उपाधि • पु॰ उप+आ+धाञ्-कि। धर्मचिन्तायाम्, "विशेषणे उपाधिर्भिद्यते न तु तद्वान्" इति सांख्यसूत्रम्। स्वधर्मस्यान्यगततयावभासके, यथा दर्पणादि स्वगतं नीलिमादिकं स्वप्रतिबिम्बितमुखगततया, जवापुष्पं च स्वगतं रक्तत्वं स्फटिकगतत्वेनावभासयति अतोऽत्र दर्पणादि नीलिमाद्यवभासने उपाधिः। न्यायमते हेतुव्यभिचारोन्नायके साध्यव्यापके साधनाव्यापके पदार्थे च।

उपाध्याय • पु॰ उपेत्याधीयतेऽस्मात् उप+अधि+इङ्-घञ्। "एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते" इति मनूक्तलक्षणे वेदैकदेशतदङ्गाध्यापके। स्त्रियां ङीपि उपाध्यायीति रूपद्वयम्। उपाध्यायस्य पत्न्यर्थे ङीप् आनुक् वा उपाध्यायानी उपाध्यायी च। [याम्।

उपानह् * स्त्री॰ उप+आ+नह्-क्विप् उपसर्गदीर्घः। चर्मपादुकायाम्।

उपान्त * पु॰ उपमितमन्तेन प्रा॰ स॰। निकटे, प्रान्ते च।

उपान्त्य • त्रि॰ उपान्ते भवः यत्। अन्त्यसमीपभवे।

उपाय * पु॰ उप+अय-घञ्। साधने, उपगमे, राज्ञां रिपुनिराकरणहेतुषु सामादिषु च। [मने च।

उपायन • न॰ उप+अय-ल्युट्। सोपचारके उपहारे, समीपगउपारत • त्रि॰ उप+आ+रम-क्त। निवृत्ते "उपारताः पश्चिमरात्रिगोचरात्" इति भारविः।

उपालम्भ • पु॰ उप+आ+लभ-घञ् मुम् च। निन्दापूर्वकदुर्वचने, परस्परदूषणे च। [पुटितेऽर्थे, प्रतिनिहते च।

उपाहृत * त्रि॰ उप+आ+हन-क्त। अमापनयनाय पुनः पुनर्भूमि-

उपासक * त्रि॰ उप+आस्-ण्वुल्। उपासनाकर्त्तरि, सेवके च त्रि॰

उपासङ्ग • पु॰ उपासज्यते शरा अत्र। उप+आ-सञ्ज-घञ्। तूणे। [सेवने। शुश्रूषा। देवताद्याराधने स्त्री॰।

उपासन • न॰ उप+आस-क्षेपे ल्युट्। शराभ्यासे। आस-ल्युट्।

उपासित • त्रि॰ उप+आस क्त। सेविते, उपासनाविषये देवादौ च।

उपास्ति • स्त्री॰ उप+आस-क्तिन्। उपासनायाम् "तदुपास्तिरतः[illegible]" इति कुसुमाञ्जलिः।

उपाहित • पु॰ उप आहन्यहितं यतः। उल्कापातादौ, अग्न्युत्पातरूपे उपद्रवे। उप+आ+धा-क्त। आरोपिते, धारिते च त्रि॰।

उपेक्षक • त्रि॰ उप+ईक्ष-ण्वुल्। विज्ञातदोषोऽप्युपेक्षमाणके, तत्त्वतः कर्तव्यविचाररहिते, उदासीने, द्वेषशून्ये च।

उपेक्षा • स्त्री॰ उप+ईक्ष-अ। [illegible] "दृष्टं च यत्र [illegible]" इति

उपेक्षाभेदे, औदासीन्ये, अनपेक्षणे च।

उपेन्द्र • पुं॰ उपगत इन्द्रम् अनुजत्वात्। विष्णौ। स हि कश्यपात् अदितौ इन्द्रादनन्तरं वामनरूपतया सञ्जातः।

उपेन्द्रवज्रा • स्त्री॰ एकादशाक्षरपादके छन्दोभेदे।

उपेय • त्रि॰ उप+इण्-यत्। उपायसाध्ये, प्राप्तव्ये च।

उपोढ • त्रि॰ उप+वह-क्त। सन्निवेशविशेषयुक्ते व्यूढे सैन्ये, निकटे, ऊढे, कृतविवाहे च।

उपोत्तम • त्रि॰ उपगतमुत्तममन्त्यम्। अन्त्यसमीपे उपान्त्ये।

उपोदकी * स्त्री॰ उपगतमुदकमत्र। पूतिकायाम् (पुइशाक)।

उपोद्घात * पु॰ उप+उत्+हन-घञ्। प्रकृतोपपादके उदाहरणे प्रकृतार्थं वर्णयितुमर्थान्तरवर्णने, "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः" इत्युक्तलक्षणायां चिन्तायाञ्च।

उपोषण • न॰ उप+उष-ल्युट्। उपवासे, अहोरात्राभोजने च।

उपोषित • न॰ उप+वस+भावे-क्त। उपवासे। कर्त्तरि क्त। उपवासकर्त्तरि त्रि॰। [स्यादौ वेधे।

उप्त • त्रि॰ वप-क्त। कृतवापे धान्यादौ। कर्मकरणे क्त। उप्तकृष्ट • त्रि॰ पूर्वमुप्तं पश्चात् कृष्टं पूर्वकालेत्यादि स॰। बीजवपनानन्तरं कृष्टे क्षेत्रे (बोआइने चषे। काहान)।

उब्ज • आर्जवे तुदा॰ पर॰ सक॰ सेट्। उब्जति औब्जीत्।

उभ • त्रि॰ द्वि॰। उ-भक्। द्वित्वविशिष्टार्थे। अस्य समासादिवृत्तौ प्रयोगो नास्ति।

उभय • त्रि॰ उभौ अवयवौ यस्य उभ+अयट्। द्वित्वविशिष्टेऽर्थे।

उभयतस् • अव्य॰ उभ-तसिल् कृतौ अयट्। उभयपार्श्वे।

उभयथा • अव्य॰ उभ+थाल् कृतौ अयट्। उभयप्रकारेणेत्यर्थे।

उभयद्युस् • अव्य॰ उभ-द्युस् कृतौ अयट्। उभयदिनयोः। अद्युस। उभयेद्युरप्यत्र।

उम् • अव्य॰ उ हुम्। रोषे, अङ्गीकारे, प्रश्ने च।

उमा • स्त्री॰ उः शिवस्तस्य मा लक्ष्मीः। दुर्गायाम् "उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम" इति [illegible] पार्वत्याम्। ओं शिवं माति [illegible] मा+क। [illegible] [illegible] [illegible] हरिद्रायाम्, [illegible] कीर्त्तौ, कान्तौ, शान्तौ च। [हरिद्रायाञ्च स्त्री॰।

उमाकट • पु॰ उमाया [illegible] वा [illegible] कटच्। [illegible]

उमागुरु • पु॰ उमाया गुरुः ६त॰। [illegible] [illegible] [illegible]।

उमाशङ्कर • पु॰ [illegible]। [illegible] [illegible]।

उम्भ • पूर्णे तुदा॰ पर॰ सक॰ सेट्। उम्भति औम्भीत्।

उर • अन्ते (?) पर॰ सक॰ सेट्। [illegible] [illegible]।

उरः • पु॰ [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] च। [illegible] [illegible] [illegible]।

उरःसूत्र • पु॰ [illegible] [illegible] [illegible] [illegible]।

स्तु लताद्रुमे । [कन्नाराती पदभेदे ।

अर्हपाद ० पु० अर्हाः पूज्याः पादाः यस्य । [illegible]

अर्हपुष्प ० पु० अर्हं अर्हणायाः पुष्पं [illegible] । [illegible] अर्हपुष्पं पुष्पं [illegible] तिलकभेदे । तद्धारणे विधिनिषेधादिकं [illegible] द्रष्टव्यम् ।

अर्हन् ० [illegible] अर्ह+शतृ [illegible] । अर्हणार्थे ।

अर्हमान ० न० अर्हमानोऽस्य [illegible] । [illegible] (बाटखारा) । तेन हि तुलादण्डारोपितेन [illegible] ।

अर्हदेव ० पु० अर्हं च तत् देवं यस्य । महादेवे, मनकादौ [illegible], मोक्षे च । [शिवपादम्" इति [illegible] ।

अर्हलिङ्ग ० पु० अर्हमुत्कृष्टं लिङ्गं चिह्नमस्य । महादेवे, "अर्हलिङ्ग

अर्हंसक ० पु० कर्म० । [illegible] । [illegible] (करवा) । अर्हलिङ्गे त्रि० ।

अर्हलिक ० पु० अर्हमुर्द्धरिमाणं [illegible] वा । [illegible]

[illegible] ० पु० स्त्री० [illegible] । [illegible], [illegible], [illegible] [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] स्त्री० [illegible]

[illegible]

[illegible] त्रि० [illegible]

[illegible]

[illegible] ० पु० [illegible]

[illegible] ० पु० [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

ऊहा ० स्त्री० ऊह+अ स्त्रीत्वात् टाप् । अध्याहारे, ऊहपदार्थे च ।

ऋ

ऋ ० गतौ भ्वा० पर० सक० अनिट् । ऋच्छति । आरत् आर्षीत् ।

ऋ ० गतौ जुहोत्यादि० पर० सक० अनिट् । इयर्त्ति आरत् ।

ऋ ० हिंसायां स्वादि० पर० सक० अनिट् । ऋणोति आर्षीत् ।

ऋक्थ ० न० ऋच्+थक् । धने, स्वर्णे, पूर्वस्वामिसम्बन्धिके दायरूपे धने च ।

ऋक्ष ० पु० ऋष+स किच । भल्लूके । नक्षत्रे, शिवादौ च पु० न० ।

ऋक्षगन्धा ० स्त्री० ऋक्षान् गन्धयति हिनस्ति गन्ध+अच् । क्षीरविदारीरूपे महाश्वेतायां, घोरविदार्याञ्च ।

ऋक्षगिरि ० पु० कर्म० । कुलाचलभेदे ऋक्षनामके पर्वते ।

ऋक्षराज ० पु० ऋक्षाणां राजा त० टच् । जाम्बवति, चन्द्रे च ।

ऋक्षवत् ० पु० ऋक्षाः सन्त्यस्मिन् मतुप् मस्य वः । नर्मदातीरस्थे पर्वतभेदे ।

ऋग्वेद ० पु० ऋक्प्रधानो वेदः । वेदचतुष्टयमध्ये समाम्नाते वेदभेदे ।

ऋच ० स्तुतौ तुदा० पर० सक० सेट् । ऋचति आर्चीत् ।

ऋच् ० स्त्री० ऋच्+क्विप् । अर्थवशेन नियताक्षरपादयुक्ते वेदांशे ।

ऋच्छ ० गतौ मूर्त्तिभवने च तुदा० पर० सक० अक० च सेट् । ऋच्छति आर्च्छीत् । आनर्च्छ ।

ऋज ० गतौ अर्जने च भ्वादि० आत्म० सक० सेट् । अर्जते आर्जिष्ट आनृजे । [नरकभेदे च ।

ऋजीष ० न० ऋज्+ईषन् किच । भर्जनपात्रे कटाहादौ । धन,

ऋजु ० त्रि० अर्ज कु । सरले । स्त्रियां वा ङीप् ऋज्वी ऋजुः ।

ऋण ० गतौ तना० उभ० सक० सेट् । अर्णोति अर्णुते आर्णीत् आर्णिष्ट ।

ऋण ० न० ऋ-क्त नि० नत्वम् । अधमर्णेन उत्तमर्णात् पुनर्देयत्वेनाङ्गीकृत्य गृहीते धने (धार), जले, दुर्गे, दुर्गभूमौ च । [illegible] "ऋणमपनयति" इति श्रुतिः ।

ऋणमत्कुण ० पु० [illegible] बन्धके प्रतिभूरि (जामिन) ।

ऋणमार्गण ० [illegible] प्रतिभूरि (जामिन) ।

[illegible] ० स्त्री० [illegible]

[illegible] ० न० [illegible]

[illegible]

[illegible]

[illegible] ० पु० [illegible]

[illegible]

[illegible] ० [illegible]

ऋत • न० ऋ+क्त। "ऋतमुञ्छशिलं ज्ञेयम्" इत्युक्ते ब्राह्मणस्य उञ्छशीलवृत्तौ, मोक्षे, जले, कर्मफले "ऋतं पिबन्तौ" इति श्रुतिः, सुप्रिये वाक्ये, मानसयथार्थसंकल्पे च। दीप्ते, सत्ये, पूजिते च त्रि०।

ऋतधामन् • पु० ऋतं सत्यं धाम यस्य। परमेश्वरे, विष्णौ च।

ऋतम् • अव्य० ऋत-अमि। सत्यमित्यर्थे।

ऋतम्भरा • स्त्री० ऋतम् बिभर्त्ति ऋतम्+भृ-खच्। योगशास्त्रप्रसिद्धे विपर्य्ययशून्ये यथार्थज्ञानरूपे चित्तवृत्तिभेदे।

ऋति • स्त्री० ऋ-क्तिन्। गतौ, स्पर्द्धायाम्, निन्दायाञ्च। कर्मणि क्तिन्। वर्त्मनि, मङ्गले च।

ऋतु • पु० ऋ-तु किच्च। "शिशिरः पुष्पसमयो ग्रीष्मो वर्षा शरद्धिमः। माघादिमासयुग्मैस्तु ऋतवः षट् क्रमादिमे" इत्युक्ते कालभेदे। शोणितदर्शनयुक्ते गर्भधारणयोग्ये स्त्रीणामवस्थाभेदे "ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः" इति मनुः। दीप्तौ, मासे च। [ऋतुस्नाते।

ऋतुप्राप्त • त्रि० ऋतुस्तद्योग्यः पुष्पादिः प्राप्तोऽनेन। फलेग्रहौ,

ऋतुमती • स्त्री० ऋतु+मतुप्। रजस्वलायां स्त्रीधर्मिण्याम्।

ऋतुराज • पु० ऋतूनां राजा ६त० टच् समा०। वसन्ते ऋतौ।

ऋतुवृत्ति • पु० ऋतूनां वृत्तिः पर्य्यायेणावर्त्तना यत्र। वत्सरे।

ऋते • अव्य० ऋत (सौत्र) के। वर्जने, विनार्थे च।

ऋत्विज् • ऋतु-यज्-क्विन्। याजके, "अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते।" इति मनूक्ते स्वानुष्ठेयवैदिकादिकर्मकरे। [च त्रि०।

ऋद्ध • न० ऋध-क्त। पक्वमर्दितधान्ये, सिद्धान्ते च। समृद्धे, सम्पन्ने

ऋद्धि • स्त्री० ऋध-क्तिन्। वृद्धौ, देवभेदे, औषधिभेदे च।

ऋध • वृद्धौ दिवा० स्वा० च पर० अक० सेट्। ऋध्यति ऋध्नोति आर्द्धीत् आर्द्धत्। [तुदा० पर० सेट्। ऋफति आर्फीत्।

ऋफ • दाने हिंसायां निन्दायां युद्धे च सक०। स्वादायां अक०

ऋभु • पु० ऋते स्वर्गे अदितौ वा भवति ऋत+भू डु। देवे।

ऋभुक्ष • पु० ऋभवो देवाः क्षियन्ति वसन्त्यत्र क्षि+ड। स्वर्गे, वज्रे, इन्द्रे च। [ऋभुक्षाः ऋभुक्षाणौ।

ऋभुक्षिन् • पु० ऋभुक्षः वज्रं स्वर्गो वाऽस्यास्ति इनि। इन्द्रे। स्वादौ

ऋष • गतौ तुदा० पर० सक० सेट्। ऋषति आर्षीत्।

ऋषभ • पु० ऋष-अभक्। वृषभे, औषधिभेदे, मुनिभेदे च।

ऋषभतर • पु० तनुः ऋषभः तनुत्वे ष्टरच्। भारवहने मन्दशक्तौ वृषभे। जातित्वेन स्त्रियां ङीष्। ऋषभतरी।

ऋषभध्वज • पु० ऋषभो ध्वजो यस्य। शिवे। वृषभध्वजोऽप्यत्र।

ऋषभी • स्त्री० ऋषभमिवाचरति ऋषभ+क्विप्-अच्। पुमाकारायां स्त्रियां, शूकशिम्ब्याम्, शिरालतायाञ्च।

ऋषि • पु० ऋष-इन् कित्। वेदे, मन्त्रद्रष्टरि मुनौ, अनुष्ठेयकर्मज्ञापकसूत्रकर्त्तर्य्ये, गोत्रप्रवर्त्तके मुनौ च।

ऋषियज्ञ • पु० ऋष्युद्देश्यको यज्ञः। ब्रह्मयज्ञे वेदाध्ययने।

ऋष्टि • स्त्री० ऋष-करणे क्तिन्। उभयतो धारायुक्ते खड्गे।

ऋष्य • पु० ऋष+क्यप्। मृगभेदे। [हते।

ऋष्यगन्धा • स्त्री० ऋष्यस्य गन्ध इव गन्धो यस्याः। वृद्धदारके

ऋष्यप्रोक्ता • स्त्री० ऋषिभिः प्रोक्ता। शतावर्य्याम्, अतिबलायाम्, शूकशिम्बीवृक्षे च।

ऋष्यमूक • पु० ऋष्यो मृगो मूको यत्र। "ऋष्यमूकस्तु पम्पायाः पुरतः पुष्पितद्रुमः" इति रामायणोक्ते पर्वतभेदे।

ऋष्यशृङ्ग • पु० ऋष्यस्य मृगभेदस्य शृङ्गमिव शृङ्गमस्य। विभाण्डकपुत्रे लोमपादराजकन्यायाः शान्तायाः पत्यौ।

—

ॠ

ॠ • गतौ जुहो० पर० सक० सेट्। पिपर्त्ति आरीत्। आर आरतुः।

—

ए

ए • अव्य० इण्-विच्। दयायां, स्मृतौ, आमन्त्रणे, असूयायां, आह्वाने च। विष्णौ पु०।

एक • त्रि० इण्-कन्। एकत्वरूपप्रथमसंख्यान्विते, केवले, मुख्ये, अन्यार्थे, श्रेष्ठे, अद्वितीये, समाने, अल्पे च।

एकक • त्रि० एक+कन्। असहाये। स्वरचारूढे द्वावे च।

एककार्य्य • त्रि० एकं कार्य्यं प्रयोजनमस्य। एकरूपकार्य्यकरे, पर-

एकगुरु • पु० एकोऽभिन्नो गुरुर्यस्य। समानाध्यापके सतीर्थे।

एकचक्र • न० एकं चक्रं यत्र। हरिगृहे। सूर्य्यरथे पु०। पुरीभेदे स्त्री०। यत्र चक्रासुरवधार्थं पाण्डवाः स्थिताः। [असुरादौ।

एकचर • त्रि० एकः सन् चरति पचाद्यच्। एकाकिचारिणि

एकचर्य्या • स्त्री० एकस्य चर्य्या चर+यप्। असहायगमने।

एकजाति • पु० एका जातिर्जननं यस्य। शूद्रे। एकजन्माप्यत्र।

एकजातीय • त्रि० एकः प्रकारो विधा यस्य प्रकारार्थे जातीयर्। तुल्यप्रकारे। [एकस्मिन्। यथा भवतामेकतमः साधुः।

एकतम • त्रि० एक+डतमच्। बहूनां मध्ये जात्यादिभिर्निर्द्धार्य्ये

एकतर • त्रि० एक+डतरच्। द्वयोर्मध्ये जात्यादिभिर्निर्द्धार्य्ये एकस्मिन्। यथा, भवतोरेकतरः साधुः।

एकतान • त्रि० एकं तानयति तन-ण्यन्तात् अण्। अनन्य, चित्तवृत्तौ एकविषयासक्तचित्ते, तद्गतचित्ते च।

एकताल • पु० एकः समस्तालो मानं यत्र। सम्मिलितवाद्ये, विच्छेदरहिते च नृत्यगीतादौ।

एकत्र • अव्य० एक+त्रल्। एकस्मिन्नित्यर्थे। [प्रवर्त्तके च।

एकत्व • न० एक-त्व। ऐक्ये, अभेदे, साम्ये, सायुज्यमुक्तौ, भेद-

एकदण्डिन् • पु० एकः केवलः त्रिदण्डादिग्रहणशून्यः दण्डी-

इत्यादि। "एकाक्षरावरुद्धं परं ब्रह्म सनातनम्। तदेकदण्ड
संयुक्तं मोक्षेतां सिवां व्रजेत्" इत्युक्तलक्षणे परिव्राजके।

एकदन्त • पु० एको दन्तोऽस्य। गणेशे। एकदंष्ट्रोऽप्यत्र।

एकदा • अव्य० एक+काले दाच्। एकस्मिन् काले इत्यर्थे।

एकदृक् • त्रि० एका दृक् यस्य। एकनेत्रे काके। काके पु०। एकं
सर्वमिदं पश्यति दृश-क्विप्। शिवे।

एकदेश • पु० कर्म०। अवयवे, प्रदेशे च।

एकधा • अव्य० एक+प्रकारे धाच्। एकप्रकारे "एकधा बहुधा
चैव दृश्यते जलचन्द्रवत्" इति श्रुतिः।

एकधुरा • स्त्री० एका धुः कर्म० अच्। एकभारे। तद्वहतीत्यर्थे अण्
तस्य लुक्। एकभारवाहके गवादौ। [गवादौ।

एकधुरावह • त्रि० एकधुरां वहतीति वह-अच्। एकभारवाहके

एकधुरीण • त्रि० एकधुरां वहतीति ख। एकभारवाहके गवादौ।

एकपद • त्रि० एक: पदो यस्य। खञ्जे।

एकपत्नी • स्त्री० एक: स्वामी पतिर्यस्या: ङीप् नुक् च।
सपत्न्यां, पतिव्रतायाम्। "दौ ऋतं एकपत्नीनाम्" इति मनुः।

एकपद • न० एकं पदं पदार्थनिर्देशकालो यत्र। एकपदनिर्-
देशकालिकत्वात्। कर्म०। एकस्मिन् पदे। "निहन्ति स एक-
पदे" इति माघः। [तत्क्षणे, सद्यश्च।

एकपदी • स्त्री० एक: पादो यस्य। [illegible] ङीप् पदादेशः।

एकपदे • अव्य० एक+पद-के। [illegible]
[illegible]

[illegible]

पातिशाख्ये प्रसिद्धे उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे

एकसर्ग • त्रि० एकस्मिन् सर्गो निश्चयो यस्य। अनन्यमनसि, एका-
ग्रचित्ते च।
[वयस्कायां गवि।

एकहायनी • स्त्री० एको हायनो वयोमानं यस्या: ङीप्। एकवर्ष-

एकाकिन् • त्रि० एक+आकिन्। असहाये।

एकाक्ष • पु० एकमक्षि यस्य षच् समा०। काके। काणे त्रि०।

एकाग्र • त्रि० एकमग्रं विषयो यस्य। विषयान्तरव्यावृत्त्या एक-
मात्रमनस्के, विक्षेपरहितध्याने च। स्वार्थे ष्यञ् ऐकाग्र्यमप्यत्र।

एकादश • त्रि० एकादशन्+पूरणे डट्। एकादशानां पूरणीभूते।

एकादशन् • त्रि० एकश्च दश च आत्वम्। एकाधिकसंख्यायुक्ते।

एकादशद्वार • न० एकादश द्वाराणि यत्र। शरीराख्ये पुरे। तत्र
हि नासिकाश्रोत्रनेत्राणां द्वयं द्वयमिति षट् मुखमानि, मुख
मेकम, नाभ्या सह अधस्थानि त्रीणि, ब्रह्मरन्ध्रमेकमित्येकाद-
शद्वाराणि सन्ति।

एकादशी • स्त्री० एकादशानां पूरणी। उभयपक्षीयप्रतिपदादित:
एकादशपूरण्यां तिथौ। यत्र हि हरिवासरव्रतम्।

एकान्नविंशति • स्त्री० एकेन न विंशति एक+नञ्-आदुक्। एको-
नविंशतिसंख्यायां, तद्युक्ते च। एकान्नविंशदादय:।

एकान्त • त्रि० एक: अन्तो निश्चयो यत्र। अत्यन्ते।

एकान्ततस् • अव्य० एकान्त+तसिल्। अव्यभिचारिणि।

एकान्न • त्रि० एकमन्नं भक्ष्यं यस्य। एकभक्तव्रते।

एकान्नविंशति • स्त्री० एकेन न विंशति। एक+न-आदुक् इत्य
वा न। एकान्नविंशतिसंख्यायां, तद्युक्ते च। एकान्नत्रिंश-
दादय:।

एकाब्दा • स्त्री० एक: अब्दो वयोमानं यस्या:। एकहायन्यां गवि।

एकायन • त्रि० एकमयनं विषयो यस्य। विषयान्तरव्यावृत्तचित्ते,
एकाग्रमनस्के च। कर्म०। एकस्थाने। [विष्णौ।

एकायनगत • त्रि० एकायनमेकविषयं मनोद्वारा गत:। एकाय-

एकावली • स्त्री० एकाऽविच्छिन्ना आवली माला मणिपंक्ति:। (एक-
नर) हारभेदे, अलङ्कारभेदे च।

एकाश्रय • त्रि० एक आश्रयो यस्य। अनन्यगतिके।

[illegible]
[illegible] [illegible]

[illegible]

स्थाई तत्तुल्यविधिके सांवत्सरिके श्राद्धमिति।
एज ० कम्पने भ्वादि० आत्म० अक० सेट्। एजते ऐजिष्ट।
एज ० दीप्तौ भ्वादि० पर० अक० सेट्। एजति ऐजीत्।
एठ ० बाधने भ्वादि० आत्म० सक० सेट्। एठते ऐठिष्ट।
एड ० पु० इल-घञ् अच् डस्य लः। मेषे। बधिरे त्रि०।
एडक ० पु० इल-ण्वुल् डस्य लः। वनच्छागले, पृथुशृङ्गे मेषे, मेषमात्रे च। जातित्वात् स्त्रीत्वे अजादित्वात् टाप् एडका।
एडगज ० पु० एडो मेषो गजो भक्षकत्वादस्य। दद्रुघ्ने (दादमर्दन)।
एडमूक ० त्रि० श्रुतिरहित एडो बधिरश्चासौ मूकः। वाक्श्रुतिशक्तिरहिते। [मांसास्थियुक्ते कुड्ये, भित्तौ च।
एडु(डू)क ० न० ईड्-(ड)-उक नि० गुणः। हिंसायाम्। अस्थि-
एण ० पु० इ-ण तस्य नेत्वम्। कृष्णवर्णे मृगे। स्त्रियाम् एणी।
एणतिलक ० पु० एणस्तिलकमिव चिह्नं यस्य। मृगाङ्के चन्द्रे।
एत ० त्रि० इण्+तन्। कर्बुरवर्णे। तद्वति त्रि०। स्त्रियामेनी च।
एतद् ० त्रि० इण्-अदि तुक् च। पुरोवर्त्तिनि बुद्धिस्थे।
एध ० वृद्धौ भ्वादि० आत्म० अक० सेट्। एधते ऐधिष्ट। [काष्ठे।
एध ० पु० इध्यतेऽग्निरनेन इन्ध+करणे घञ् नि० नलोपगुणौ।
एधस् ० न० इध्यतेऽग्निरनेन इन्ध+असि नि० नलोपगुणौ। काष्ठे।
एधित ० त्रि० एध-क्त। वर्द्धिते "मधुमद्भिरमेधित." इति माघः।
एनस् ० न० इण-असुन् नुट् च। पापे, अपराधे च।
एरका ० स्त्री० इण-रक्। तृणविशेषभेदे।
एरण्ड ० पु० ईरयति वायुं सर्ते वा ईर-अण्डच् नि० गुणश्च। वृक्षभेदे (एरण्डी)। (भेरण्डा)। [कम् पत्र इत्यम्। दन्तीवृक्षे।
एरण्डपत्रिका ० स्त्री० एरण्डस्य पत्रमिव पत्रमस्याः बहु० कप् स्त्रियां
एला ० स्त्री० इल+अच्। एलाख्यलतायाम् (एलाची)।
एलापर्णी ० स्त्री० एलायाः पर्णमिव पर्णमस्याः। रास्नायाम्। (आटा आमरुल)। [क्षुपः। गन्धद्रव्यभेदे।
ए(ऐ)लावालुक ० न० एलेव वलते वल-उण् संज्ञायां कन्। वा
एव ० अव्य० इण् वन्। सादृश्ये, अनियोगे, अवधारणे, वाक्यपूरणे, विनिग्रहे, परिभवे, ईषदर्थे च। विशेष्यसङ्गतः अन्ययोगव्यवच्छेदं। यथा पार्थ एव धनुर्धरः इत्यादौ पार्थान्यपदार्थे धनुर्धरत्वम् व्यवच्छिद्यते। विशेषणसङ्गतः अयोगव्यवच्छेदं। यथा शङ्खः पाण्डर एवेत्यादौ शङ्खे पाण्डरत्वायोगो व्यवच्छिद्यते। क्रियासङ्गतः अत्यन्तायोगव्यवच्छेदं। यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलत्वात्यन्तायोगो व्यवच्छिद्यते। गन्तरि त्रि०। [इति" कुमारः। अवधारणे, स्वीकारे, मर्षे च।
एवम् ० अव्य० इण् वमु। सादृश्ये, प्रकारे, "एवमादिनि देवर्षौ"
एष ० गतौ भ्वादि० आत्म० सक० सेट्। एषते ऐषिष्ट।
एषण ० पु० एष ल्युट्। लौहमये बाणे। इच्छा। इच्छायां पुत्रलोकधनकामनायां स्त्री०। ल्युट्। सर्वेषामादीनां मुक्तावस्थाने न०। स्त्रियोटकंदेरमिच्छन्ते स्त्री० टाप्। इष्-इ ङन्। एषणीयश्चाप्य०।

ऐ

ऐकागारिक ० त्रि० एकमसहायमगारं प्रयोजनमस्य ठक्। चौरे।
ऐकाग्र्य ० त्रि० एकाग्र+स्वार्थे ष्यञ्। एकाग्रचित्ते, अनन्यासक्तचित्ते च। [एकस्वरूपत्वे च।
ऐकात्म्य ० न० एक आत्मा स्वरूपं यस्य तस्य भावः ष्यञ्। ऐक्ये,
ऐकान्तिक ० त्रि० एकान्तं व्याप्नोति ठञ्। अव्यभिचारिणि, अवश्यम्भाविनि। स्त्रियां ङीप्। "ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते" इति पुराणम्।
ऐकाहिक ० त्रि० एकाहे भवः कालात् ठञ्। एकदिननिष्पन्ने। एकाहमात्रस्थायिनि। एकाहानन्तरं जायमाने ज्वरे, दिने दिने एकसमये जायमाने ज्वरे च पु०। "ऐकाहिकं ज्वरं हन्ति तस्य नामानुकीर्त्तनम्" इति ज्वरनाशकमन्त्रः।
ऐक्य ० न० एकस्य भावः एक+ष्यञ्। अभेदे, एकरूपतायाम्।
ऐक्षव ० त्रि० इक्षोर्विकारः इक्षु+अण्। इक्षुविकारे गुडादौ। "ऐक्षवं गुडवर्जितम्" इति स्मृतिः।
ऐक्ष्वाक ० पु० इक्ष्वाकोर्गोत्रापत्यम् अण् नि०। सूर्यवंश्ये नृपे।
ऐङ्गुद ० न० इङ्गुद्याः फलम् फले अण् तस्य न लुक्। इङ्गुदीफले।
ऐण त्रि० एणस्य इदम् अण्। एणसम्बन्धिमांसादौ।
ऐणेय ० त्रि० एण्या इदम् ढक्। एणीसम्बन्धिमांसादौ।
ऐतिह्य ० न० इति ह पारम्पर्योपदेशः अस्तीत्यस्मिन्नर्थे ऐतिह इति पठन् स्वार्थे ष्यञ्। पारम्पर्योपदेशे। यथाह वटे यक्षः प्रतिवसतीत्यादि पारम्पर्योपदेशमात्रं न तु निश्चायकप्रमाणकथितम्। [क्षेत्रापत्यम् स्त्री० ङीप्।
ऐन्दव ० न० इन्दुर्देवताऽस्य। मृगशिरोनक्षत्रे। चन्द्रसम्बन्धिनि त्रि०।
ऐन्द्र ० त्रि० इन्द्रस्य इदम् इन्द्र+अण्। इन्द्रसम्बन्धिनि। ज्येष्ठानक्षत्रे न०। स्त्रियां ङीप्। "ऐन्द्री भवत्वेषा" इति कुमारसम्भवम्। इन्द्रदेवताके त्रि०। प्राच्यां दिशि स्त्री०।
ऐन्द्रजालिक ० त्रि० इन्द्रजालेन चरति। मायाविनि। (वाजिकर)।
ऐन्द्रि ० पु० इन्द्रस्यापत्यम् इञ्। इन्द्रपुत्रे जयन्ते, अर्जुने, सुग्रीवे, वालिनि, काके च। [च।
ऐन्द्रियक ० त्रि० इन्द्रियैरेव ग्राह्यम् वुञ्। प्रत्यक्षज्ञानविषये प्रत्यक्षे।
ऐर ० न० इरा अन्नं तस्य समूहः। अन्नसमूहे, इरासम्बन्धिनि त्रि० च।
ऐरावण ० पु० इरा जलं विद्यतेऽस्मिन् इरावान् समुद्रस्तस्मादुत्पन्नः अण्। इन्द्रहस्तिनि ऐरावते।
ऐरावत ० पु० इराः सन्त्यस्मिन् इरावान् समुद्रः अण् वा इरावता समुद्रेण प्रोक्तः अण्। इन्द्रहस्तिनि इन्द्रधनुषि।
ऐरावती ० स्त्री० इराः सन्त्यस्याः इरावती नदी तत्र भवा अण्। विद्युति।
ऐरिण ० न० इरिणे ऊषरे भवः। सामुद्रे लवणे।
ऐरेय ० न० इरा अन्नम् तत्र भवं ढक्। मद्यभेदे मद्ये।

ऐल * पु० इलायाः अपत्यम्। बुधपुत्रे पुरूरवोनामके नृपतौ।
ऐलविल * पु० इलविलायाः अपत्यम् अण्। कुवेरे।
ऐशानी * स्त्री० ईशानो देवताऽस्याः। उत्तरपूर्वदिशि।
ऐश्वर्य्य ० न० ईश्वरस्य भावः। अणिमाद्यष्टविधविभूतिभेदे।
ऐषमस् * अव्य० अस्मिन् वत्सरे नि०। वर्त्तमानवत्सरे।
ऐहलौकिक ० वि० इह लोके भवः ठञ् द्विपदवृद्धिः। इहलोकजाते।
ऐहिक ० वि० इह भवः कालाट्ठञ्। इहलोकभवे, गृहीतशरीरसम्बन्धिनि स्रक्चन्दनादिसुखानुभवादौ च।

—

ओ

ओक ० पु० उच-क नि० चस्य कः। पक्षिणि, वृषले च। [च।
ओकस् ० न० उच-असुन् न्यङ्क्वादित्वात् कुत्वम्। गृहे, आश्रयमात्रे
ओकोदनी * स्त्री० ओकः आश्रयः मूर्द्धरूपम् अदनं भक्ष्यं यस्याः। (उकुण) केशकीटे। [पर० सेट्। ओखति औखीत्।
ओख ० शोषणे, भूषणे, निवारणे च अक० सामर्थ्ये सक० भ्वादि०
ओघ * पु० उच-घञ् पृषो० च। समूहे, जलवेगे, परम्परायां, द्रुतनृत्ये च। [स्वरूपे च आह। प्रणवे।
ओङ्कार * पु० अव+मन् अव्याकारलोपः, ऊठ् गुणः ओम् ततः
ओज * बले अद० चुरा० उभ० अक० सेट्। ओजयति ते औजिजत् त।
ओजस् ० न० उब्ज-असुन् बलोपे गुणः। दीप्तौ, अवष्टम्भे, प्रकाशे, बले, सामर्थ्ये, ज्योतिषोक्ते प्रथमतृतीयादौ विषमराशौ, [illegible], धातुतेजसि, ज्ञानेन्द्रियाणां पाटवे, काव्यगुणभेदे, षोडशोल्लास्. वैद्यकोक्ते "भ्रमरैः फलपुष्पेभ्यो यथा सम्भ्रियते मधु। तद्वदोजः शरीरेभ्यो धातुः सम्भ्रियते नृणाम्" इत्युक्तलक्षणे धातुसारविशेषे वसुभेदे च। अण्। ओजस्वी-[illegible]। [विश्वासिनि, भासमाने च।
ओजिष्ठ ० त्रि० अतिशयेनौजस्वी ओजस्विन् इष्ठन् मतोर्लुक्। अति-
ओडिका ० स्त्री० उड-क नभ नेत्रम् [illegible] ङीप् [illegible]। (उड़िधान) नीवारे।
ओडी ० स्त्री० उड-ड नभ नेत्रम् [illegible] ङीप्। (उड़ीधान) नीवारे।
ओड्र ० पु० न० आ ईषत् उनत्ति उन्द-रक् दस्य डः। जवापुष्पे।
ओड्रपुष्प ० पु० ओड्रं पुष्पमस्य। जवावृक्षे।
ओण ० अपनयने भ्वादि० पर० सक० सेट्। ओणति औणीत्।
ओत ० त्रि० [illegible]। [illegible] "ओतप्रोतम्" इति [illegible]। [illegible], [illegible] च।
ओतु ० त्रि० [illegible]। विडाले।
ओदन ० पु० [illegible]। [illegible]
ओदनाह्वा ० स्त्री० [illegible] ङीप्। [illegible]

—

ओदनी * स्त्री० ओदन इवाचरति ओदन+क्विप्+ततः अच् ङीप्। (बेलेडा) बलायाम्।
ओम् * अव्य० अव+मन् तस्यातो लोपः गुणः। प्रणवे, आरम्भे, अङ्गीकारे। "ओमित्युक्तवतोऽथ" इति माघः। अनुमतौ, अ[illegible] अपाकारे, मङ्गले, शुभे, ज्ञेये, ब्रह्मणि च।
ओल ० पु० आ-उनत्ति आ+उन्द-क नलोपे पृषो० दस्य [illegible] शूरणे, (ओल) इति ख्याते कन्दे च। आर्द्रे वि०। [
ओलज * क्षेपे इदित् भ्वादि० पर० सक० सेट्। ओलञ्जति
ओलड * क्षेपे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। ओलडयति ते ओलडति औलिलडत् त औलडीत्।
ओष * पु० उष-घञ्। दाहे।
ओषण ० पु० उष-ल्यु। कटुरसे, (झाल) इति ख्याते रसभेदे
ओषधि * स्त्री० ओषो दाहो धीयतेऽत्र ओष+धा-कि। [illegible] यत्वात् स्त्रीत्वे वा ङीप् ओषधी च। फलपाकान्ते [illegible] यादौ।
ओषधिप्रस्थ * पु० न० ओषधिप्रधानः प्रस्थः शाक०। हि[illegible]
ओषधिपति * पु० ६त०। चन्द्रे। ओषधीशोऽप्यत्र। [
ओष्ठ * पु० उष्यते उष्णाकारेण उष-कर्मणि थन्। (ठोंट)
ओष्ठपुष्प * पु० ओष्ठोपमानं पुष्पं यस्य। बन्धूकवृक्षे।
ओष्ठी ० स्त्री० ओष्ठ इवाचरति ओष्ठ+क्विप् ततः अच् ङीप्। बिम्बफलनामके (तेलाकुचा) वृक्षे। [बिम्बिकाल[illegible]
ओष्ठोपमफला * स्त्री० ओष्ठ उपमीयतेऽनेन ओष्ठोपमफलं

—

औ

औक्ष ० न० उक्ष्णां वृषाणां समूहः अण् टिलोपः। वृष[illegible] वृन्। औक्षकमप्यत्र।
औख्य * त्रि० उखायां पक्वं यत्। स्थालीपक्वे मांसादौ।
औचिती * स्त्री० उचितस्य भावः ष्यञ्। स्त्रीत्वपक्षे ङीप् यलोपः। न्याय्यत्वे, सत्यत्वे च।
औचित्य ० न० उचितस्य भावः ष्यञ्। उचितस्य भावे, न्याय्य
औडुम्बर * पु० धनुर्द्धराणां यमेषु मध्ये यमभेदे, कुष्ठरोगभेदे
औत्कण्ठ्य * पु० उत्कण्ठाया भावः ब्राह्म० ष्यञ्। उत्कण्ठाया
औत्तमपादि ० पु० उत्तमपादस्य नृपभेदस्यापत्यम् इञ्। ध[illegible] ज्योतिर्मण्डले नियततया [illegible] स्थिरे ध्रुवनामके नृपतौ। [ध
औत्सर्गिक * त्रि० उत्सर्गं सामान्यविधिमर्हति ठञ्। सामान्य
औत्सुक्य * न० उत्सुकस्य भावः ष्यञ्। उत्कण्ठायाम् "औ[illegible] [illegible]" इति [illegible]।
औदनिक * त्रि० ओदनः सिद्धमस्य ठञ्। सूपकारे।

औदरिक * त्रि॰ उदरे प्रसितः ठञ्। आद्यूने, (पेटुक) उदरमात्र-पूरणापेक्षके।

औदश्वित * न॰ उदश्वितिं अर्द्धजलमथिते तक्रे संस्कृतम् अण्। उदश्वित्संस्कृते द्रव्ये। तदर्थे ठकि औदश्वित्कमप्यत्र।

औदार्य्य * न॰ उदारस्य भावः गुणवचनत्वात् ष्यञ्। उदारतायाम्।

औदासीन्य * न॰ उदासीनस्य भावः ष्यञ्। रागद्वेषयोरुपेक्षायां, ताटस्थ्ये च। [अनुरागशून्यतायाम्, मनोयोगविरहे च।

औदास्य * न॰ उदास्ते उद्+आस-अच् भावार्थे ष्यञ्। वैराग्ये।

औद्दालक * न॰ "प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः। कुर्वन्ति कपिशं स्वल्पं तत् स्यादौद्दालकं मधु॥" इत्युक्ते मधुनि।

औद्भिद * न॰ "उद्भिदं पांशुलवणं यज्जातं भूमितः स्वयम्।" इत्युक्ते पांशुलवणे, "भित्त्वा भूमिं निम्नां यत् महत्या धारया स्रवेत्। तत्तोयमौद्भिदं नाम" इत्युक्तलक्षणे जले च। उद्भिद्य जायते जन-ड उद्भिज्जं ततः स्वार्थेऽण् औद्भिज्जमप्यत्र।

औद्वाहिक * न॰ उद्वाहकाले लब्धं ठञ्। विवाहकाले लब्धधनादौ। "भैवमौद्वाहिकञ्चैव" इति स्मृतिः। [स्वार्थे।

औपचारिक * पु॰ उपचार एव विनयादित्वात् स्वार्थे ठक्। उप-

औपनिषद * पु॰ उपनिषत्स्वेव वेद्यः अण्। वेदान्तमात्रवेद्ये पर-मात्मनि। "तं त्वौपनिषदं पुरुषम्" इति श्रुतिः।

औपनीविक * त्रि॰ नीविसमीपे व्यापृते ठक्। नीविसमीपे व्यापृते। "औपनीविकमरुन्ध किल स्त्री" इति माघः।

औपम्य * न॰ उपमैव चतुर्वर्णा॰ स्वार्थे ष्यञ्। सादृश्ये।

औपयिक * त्रि॰ उप+अय-अच् उपायस्तेन लब्धः ठक् प्रत्यय। उपायलब्धे, युक्ते, न्यायागतवस्तुनि च। [जाते रोगभेदे।

औपसर्गिक * पु॰ उपसर्गेण निर्वृत्तः ठञ्। वातादिसन्निपात-

औरभ्र * न॰ उरभ्रस्य मेषस्येदम् अण्। मेषादिलोमजाते कम्बले।

औरभ्रक * न॰ उरभ्राणां समूहः वुञ्। मेषसमूहे।

औरस * पु॰ उरसा निर्मितः अण्। "सवर्णायां संस्कृतायां स्वयमु-त्पादयेत्तु यम्। औरसं तं विजानीयात्" इत्युक्तलक्षणे पुत्रे।

और्द्ध्वदेहिक * त्रि॰ ऊर्द्ध्वं देहः प्रेतदेहः तत्र भवं तस्मै देयं वा श्राद्धादि ठक्। मृतदिनमारभ्य सपिण्डीकरणान्तं क्रियमाणे जलदानश्राद्धादिलक्षणे कर्मकलापे। अनुशतादित्वात् द्विपद-वृद्धौ और्द्ध्वदैहिकमप्यत्र।

और्व * पु॰ ऊर्वस्यापत्यम् अण्। वाडवानले तस्यौर्वमुनिजातत्वात् तत्स्थानस्य भृगोस्तस्य दक्षिणोर्मितायाम्। ऊर्व्यां भवः। पार्थिव-लवणे। [च।

औलूक * न॰ उलूकानां समूहः अण्। पेचकसमूहे।

औलूक्य * पु॰ वैशेषिकदर्शनकारके कणादमुनौ, तच्छास्त्रे तत्र

औशनस * न॰ उशनसा शुक्रेण प्रोक्तम् अण्। शुक्रप्रोक्ते उपपुरा-णादौ, दण्डप्रणयनरूपे शास्त्रे च।

औषीर * न॰ उष-ईरन् किच् ततः प्रज्ञादित्वादण्। मसूरिकयोः शय्यापीठयोः। [रोगहारके द्रव्यमात्रे।

औषध * न॰ ओषधौ भवः अण्। रोगनाशके ओषधिभवे द्रव्ये,

औष्ट्र * न॰ उष्ट्रस्येदम् अण्। उष्ट्रदुग्धादौ।

औष्ट्रक * न॰ उष्ट्राणां समूहः वुञ्। उष्ट्रसमूहे।

औष्ठ्य * त्रि॰ ओष्ठे भवः यत्। ओष्ठस्थानोच्चार्य्यमाणे उवर्णपव-र्गादौ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते
शब्दस्तोममहानिधौ स्वरवर्णादिकाः
शब्दाः समाप्ताः।

क

क * पु॰ के शब्दे कच दीप्तौ वा ड। ब्रह्मणि, वायौ, आत्मनि, यमे, दक्षप्रजापतौ, सूर्य्ये, अग्नौ, विष्णौ, काले, कामग्रन्थौ, राजनि, मयूरे, देहे, मनसि, धने, प्रकाशे, शब्दे च। सुखे, शिरसि, जले, रोगे च न॰।

कंस * पु॰ कम-स। उग्रसेनसुते नृपे श्रीकृष्णमातुले। तैजसद्रव्ये; कांस्ये। (ताम्ररङ्गमिश्रणजनितधातुद्रव्ये)। (काँसा) स्वर्णरज-तादिनिर्मितपानपात्रे। (आढ़क) इति प्रसिद्धे परिमाणे च अस्त्री॰। पुंसो॰ तालव्यान्त इति केचित्।

कंसक * न॰ कंसादिव कं जलं यस्मात् ५ब॰। (हीराकस) इति प्रसिद्धे नेत्रौषधौ तत्संयोगाद्धि अग्निसंयोगेन कंसादिव अणु-रादितो जलं स्रवति। [भेदे।

कंसकार * पु॰ कंस+कृ-अण् उप॰। (काँसारी) इति प्रसिद्धे जाति-

कंसजित् * पु॰ कंस+जि-क्विप् ६त॰। कंसनृपजयकारिणि श्रीकृष्णे।

कंसहन् * पु॰ कंस+हन्-क्विप् ६त॰। कंसदैत्यघातके श्रीकृष्णे।

कंसाराति * पु॰ कंस+अराति ६त॰। कंसनृपशत्रौ श्रीकृष्णे।

कंसास्थि * न॰ कंसः अस्थीव उपमितसमासः। शुक्लतयाऽस्थिसदृशे (काँसा) इति प्रसिद्धे धातुभेदे।

कक * इच्छायाम् भ्वादि॰ आत्म॰ सक॰ सेट्। ककते। अककिष्ट।

कक * गतौ भ्वादि॰ इदित् आत्म॰ सक॰ सेट्। कङ्कते। अकङ्किष्ट।

ककुत्स्थ * पु॰ ककुदि असुरवधार्थमिन्द्रेण प्रार्थितः सन् वृषरूप-धरस्य इन्द्रस्य ककुदि पृष्ठभागे तिष्ठतीति ककुत्+स्था-क। सूर्य्यवंशीयनृपभेदे यदपत्यतया काकुत्स्थेति संज्ञाभाजः सूर्य्य-वंशीया अभवन्।

ककुद * अस्त्री॰ कं सुखं कौति कुशब्दे क्विप् तुक् च तस्य दः। वृषस्कन्धपृष्ठस्थमांसपिण्डाकारे, (झुंड) इति ख्याते वृषाङ्गे, श्वेतच्छत्रादौ नृपचिह्ने, प्रधाने, पर्वताग्रभागे च।

(झुंड) इति ख्याते वृषाङ्गे, प्रधाने, नृपचिह्ने, कवादौ, पर्वताग्रभागे च।

ककुद्मत् * पु० ककुदस्यास्तीति मतुप् भयन्तत्वेऽपि यवादित्वात् न मस्य वः। वृषे, वृषोषधिविशेषे च। ककुदिव मांसपिण्डमस्यास्तीति मतुप् ङीप्। कन्याम् स्त्री०।

ककुन्दर * न० कस्य शरीरस्य (पृष्ठदेशस्य) कुं भूमिं दारयतीति कक्+दृ-णिच्-अच् पृषो०। पृष्ठवंशाधःस्थे गर्त्ताकारे कूपके।

ककुभ् * स्त्री० कं वातं स्कुभ्नाति स्कुभ+क्विप् पृषो०। दिशि, शोभायाम्, चम्पकमालायाम्, शास्त्रे, रागिणीभेदे च।

ककुभ * पु० कं वातं स्कुभ्नातीति क पृषो०। वीणाङ्गे, स्वरगाम्भीर्य्यसम्पादनार्थमधोवद्धालावुमयभाण्डे। कस्य वातस्य कुः भूमिः भात्यस्मात् कक्+भा-क। विस्तीर्णशाखत्वात् वातभूमिप्रकाशकेऽर्जुनवृक्षे, रागभेदे च। दिशि, रागिणीभेदे च स्त्री०।

कक्क * हासे भ्वादि० पर० अक० सेट्। कक्कति अकक्कीत्।

कक्कोल * पु० ककते गच्छतीति क्विप् कक्, कोलति संस्त्यायति अच् कोल. कक् चासौ कोलयतेति कर्म०। गन्धद्रव्यभेदे (काँकोल) इति वङ्गभाषाख्याते (वनकपूर) इति पाश्चात्ये ख्याते।

कक्कोलक * न० इदमर्थे कन्। कक्कोलवृक्षजाते गन्धद्रव्ये (वनकपूर) इति ख्याते। तस्य कोषे फलवत्त्वात् कोषफल इति प्रसिद्धिः।

कक्ष * पु० कष-हिंसायां स। स्रोथाम् उत्तरीयवस्त्रस्य पश्चाद्भागे अञ्चले (काँचला), लतायाम्, शुष्कतृणे, शुष्कवने च। पार्श्वभागे, राजान्तःपुरे, बाहुमूले, पृष्ठप्रदेशनिहिताधोऽंशुककक्षप्रदेशे, (काछा) कच्छापथे, हस्तिबन्धनरज्ज्वाम्, काञ्च्याम्, प्रकोष्ठे, गृहभित्तौ, साम्ये, स्पर्द्धायाम्, कक्षरोगभेदे च (काँकविराली) स्त्री०।

कक्षावेक्षक * पु० कक्षं वनमुपवनं तस्य स्त्रीवाहुमूलं वा कक्षां राजान्तःपुरं वा अवेक्षते अव+ईक्ष-ण्वुल्। राजान्तःपालके, उद्यानपाले, रङ्गाजीवे, कवौ, जारे च। [भद्रमुस्तायाम्।

कक्षोत्था * स्त्री० कक्षात् शुष्कवनात् उत्तिष्ठति उद्+स्था-क।

कक्ष्या * स्त्री० कक्षे भवा यत्। हस्तिकक्षायाम्, हर्म्यादिप्रकोष्ठे, सादृश्ये, उष्णीषे, [illegible], वस्त्रबन्धनरज्ज्वां, काञ्च्याम्, "[illegible]" इति, उत्तरीयवस्त्रे च।

कख * हासे भ्वादि० पर० अक० च सेट्। कखति अकखीत् अकाखीत्।

कङ्क * पु० ककि गतौ अच्। (काँक) पक्षिभेदे, छद्मपक्षेण गत-युधिष्ठिरे। युधिष्ठिरे च, [illegible]।

कङ्कट * पु० कं देहं कटति कम्+कट-अच् च, [illegible] कटन् [illegible]। [illegible]। कङ्कटकोऽप्यत्र। [भावे च।

कङ्कण * न० [illegible] भूषण-।

कङ्कत * न० [illegible] (काँकुइ)।

कङ्कतिका * स्त्री० [illegible]

टाप्। प्रसाधन्याम् (काँकुइ) नागवलायाञ्च। ...

कङ्कती * स्त्री० ककि-अतच् गौरा० ङीष्। प्रसाधन्याम्।

कङ्कत्रोटि * पु० कङ्कस्य त्रोटिरिव चञ्चुरस्य। मत्स्यभेदे (व... अच् समा०। कङ्कत्रोटोऽप्यत्र।

कङ्कपत्र * पु० कङ्कस्य पत्रेण पत्रं पक्षोऽस्य। पुङ्खे, तद्व...

कङ्कमुख * पु० कङ्कस्य मुखमिव मुखमस्य। (साँडाशि) स...

कङ्काल * पु० कं मुखं शिरो वा कालयति क्षिपति क... लङ्मांसरहितशरीरास्थिकेऽस्थिसञ्चये।

कङ्कालमालिन् * पु० कङ्कालानां मालाऽस्त्यस्य इनि। रु...

कङ्गु(ङ्गू) * पु० ककि+उ। (काङ्नी) धान्यभेदे। पृषो० क... कङ्गुरप्यत्र। [लस्य द्वित्वे। कङ्गि...

कङ्केल * पु० कङ्क इव इलति कङ्क+इल-क। अशोकवृक्षे।

कच * रवे भ्वादि० पर० अक० सेट्। कचति अकचीत् अका...

कच * बन्धे, दीप्ते च भ्वादि० पर० इदित् सक० सेट्। कञ्चति... चीत्। [...

कच * बन्धे, सक० दीप्तौ अक० भ्वादि० आत्म० सेट्। कचते...

कच * पु० कच-अच्। केशे, बृहस्पतिपुत्रे, शुष्कव्रणे, मे... हस्तिन्यां स्त्री०। भावे च। बन्धे, शोभायाञ्च।

कचाचित * त्रि० कचे आचितो विकीर्णो यस्य। विकीर्ण... "कचाचितौ विष्वग्" इति भारविः।

कचामोद * न० कचमामोदयति आ+मुद-णिच् अच्। (व... इति ख्याते गन्धद्रव्ये। [इत्युक्ते नखविकारे...

कचु * स्त्री० कच+उ। स्वनामख्याते (हरिद्रा मानक...

कचर * त्रि० कुत्सितं चरति कु+चर-अच् कदादेशः। मलिन... तक्रे न०।

कचित् * अव्य० काम्यते इति कं चीयते निचीयते यत्र इत... कम्+चि-क्विप् पृषो० मस्य दः। स्वाभिलषितप्रश्ना... प्रश्ने, हर्षे, मङ्गले च।

कच्छ * त्रि० कच-बन्धे छ, केन जलेन छ्यति दीप्यते छ... जलप्राये देशे। तटे, पुन्नागद्रुमे, नौकाङ्गे च पु०। परिधान... वस्त्रे (काछा), वाराह्याम्, चीरिकायाञ्च (झिल्ली) स्त्री०।

कच्छप * पु० कच्छे पिबति पा-क। कूर्मे। स्त्रियां जातित्वा... ङीप्। मल्लयुद्धबन्धभेदे च।

कच्छरुहा * स्त्री० कच्छे जलप्रायदेशे रोहति रुह-क। दूर्वायाम्।

कच्छुर * त्रि० कच्छुरस्यास्ति रः प्रत्यय। कच्छुरोगयुते। कुत्सि... छुरति कु+छुर क कदादेशः। परस्त्रीगामिनि। पुंश्चल्यां स्त्री०।

कच्छू * स्त्री० कष दीप्तिं द्यति छो कू। कण्डूख्ये रोगभेदे।

कच्छुघ्नी * स्त्री० कच्छूं हन्ति हन टक् टित्वात् ङीप्। पटोल... तायाम्। [(धामकुमो) मय्याम्, मत्स्यम...

कच्छुरा * स्त्री० कच्छुं राति ददाति रा-क। शूकशिम्बि...

कच्छाटिका * स्त्री० कच्छया अटिका। वेष्टनं वस्त्रान्तं...

कुञ् सम्प्रसारणञ्च। कच्छावेष्टने। अर्श आद्यचि स्त्रीत्वात् टाप्। कच्छवेष्टनयुक्तायां शाट्याम्।

कज • रोहे (मोदः) इदित् पर॰ अक॰ सेट्। कञ्जति अकञ्जीत्।

कज्जल * न॰ कुत्सितमीषद्वा जलं नेत्रस्य यस्मात् कोः कद्। अञ्जने। तद्वर्णत्वात् मेघे पु॰। मत्स्यभेदे स्त्री॰ टाप्।

कज्जलरोचक • पु॰ न॰ कज्जलं रोचयति रुच+णिच्-ण्वुल्। दीपाधारे (पिलसुज) इति वङ्गभाषायां प्रसिद्धे।

कञ्चिका • स्त्री॰ कचि+ण्वुल्। वंशशाखायाम् (कञ्ची)।

कञ्चुक • पु॰ कचि-उकन्। योधादेः चोलाकृतौ सन्नाहे लोहवर्मणि, निर्मोके (खोलस), स्त्रीणां चूलिकायां, वर्धे च।

कञ्चुकिन् • पु॰ कञ्चुक+इनि। राज्ञामन्तःपुराधिकारिणि द्वारपाले, सर्पे, जारे, यवे, चणके च। चोलकवति त्रि॰।

कञ्चुलिका • स्त्री॰ कचि-उल गौरा॰ ङीप् स्वार्थे कन् ह्रस्वे टाप्। स्त्रीणां कूर्पासके (काँचली)। कन् भावे। कञ्चुलीत्यप्यत्र।

कञ्ज • पु॰ कमित्यव्ययं जलादिवाचि तस्मिन् जले मूर्ध्नि वा जायते जन-ड। पद्मे, केशे, कारणजले विश्वबीजजातत्वात् चतुराननेच। [तस्य कृष्णवर्णत्वेन केशतुल्यत्वात्।

कञ्जक * पु॰ कञ्जः केश इव कायति कै-क। (मयना) पक्षिभेदे,

कञ्जार * पु॰ कं जलं जारयति जॄ-अण्। सूर्ये, ब्रह्मणि च। उदरे न॰। अचि। कञ्जरोऽप्यत्र।

कट • गतौ भ्वादि॰ पर॰ सक॰ सेट्। कटति अकटीत् अकाटीत्।

कट • गतौ भ्वादि॰ इदित् पर॰ सक॰ सेट्। कण्टति अकण्टीत्।

कट • गतौ भ्वादि॰ पर॰ सक॰ सेट्। कटति अकटीत् अकाटीत् कटः।

कट • हृतौ मर्दने च भ्वादि॰ पर॰ सक॰ सेट्। काटति अकटीत्।

कट * पु॰ कट-अच् कर्मणि घ वा। हस्तिगण्डस्थले, कटिपार्श्वे, तृणादिरचिते आसने (मादुर) (दरमा)। अतिशये, काले, शवे, शरे, प्रचये, ओषधौ, श्मशाने च। क्रियाकारके त्रि॰।

कटम्भरा • स्त्री॰ कटं हृणोति कट+हृ-खच् मुम् च। (कटकी) कटुरोहिण्याम्। कटम्भराप्यत्र।

कटक • पुंस्त्री॰ कट-वुन्। नितम्बाख्ये पर्वतमध्यभागे, बाहुभूषणे वलये, हस्तिदन्तमण्डले, चक्रे, सामुद्रलवणे, राजधान्याम्, सेनायाञ्च। [कामन्दकेषि दाक्षे च।

कटप्रू • पु॰ कटं प्रवते प्रु क्विप् दीर्घश्च। महादेवे, विद्याधरे,

कट(टि)घोष • घोष-अच् कटस्य (कट्या वा) घोषो नामविशेषः। स्मिचिकटिदेशव्यवहारेणैव, अध्याये।

कटभङ्ग • पु॰ भञ्ज घञ् कुत्व॰। सैन्यभङ्गद्वारा राजविनाशे, धान्यानां हस्तच्छेदे च। [धाम्, अच्छरोविनाशाच्च।

कटभी • स्त्री॰ कट इव भाति भा-क गौरा॰ ङीष्। ज्योतिष्मतीलता-

कटम्भरा • स्त्री॰ कटं विमर्दं भृ+खच् मुम् च। (गन्धभादाल) राजबलायाम्। श्योनाकवृक्षे पु॰।

कटशर्करा • स्त्री॰ काम्यते काम्यते कटं फलं तत् शर्करा खर्परेव यस्याः। (लाटा) गाङ्गेरुकीलतायाम्।

कटाक्ष * पु॰ कटं गण्डम् अक्षति व्याप्नोति अच्। अपाङ्गदृष्टौ।

कटायन * न॰ कटस्य तृणासनस्यायनमुत्पत्तिस्थानम्। वीरणमूले।

कटाह * पु॰ कटमाहन्ति आ+हन-ड। महिषीशिशौ, तैलादेः पाकसाधनपात्रे, खर्परे, नरके च।

कटि(टी) • स्त्री॰ कट-इन्। श्रोणिदेशे (काँकाल) कृदिकारान्तत्वात् वा ङीप्। [चर्मणि च।

कटित्र * न॰ कटिं त्रायते त्रै-क। कांच्याम्, कटिवस्त्रे, कटि॰

कटिल • पु॰ कट-इलच्। कारवेल्ले (करेला)।

कटिसूत्र * न॰ कटौ धार्यं सूत्रं शाक॰। कटिधार्ये कार्पासरचिते धातुमये वा सूत्रे (घुनसी गोट)। [देशे वसो धार्यते।

कटीतल • पु॰ कट्यां तलमास्पदमस्य। वक्रखड्गे, यतोऽसौ कटि।

कटीर * पु॰ कट-ईरन्। जघने, कन्दरे। च कट्यां न॰। संज्ञायां कन्। नितम्बे। तद्वति, स्थौल्ये, स्थूलादिषु च त्रि॰।

कटु • न॰ कट-उ। दूषणे, दुष्कार्ये, रसभेदे च (झाल)। तद्वति त्रि॰। चम्पके, चोरकर्पूरे, पटोले, कटुकीलतायाञ्च स्त्री॰ वा ङीप्

कटुक * पु॰ कटु स्वार्थे संज्ञायां वा कन्। पटोले, सुगन्धितृणे, अर्कवृक्षे (आकन्द), कुटजवृक्षे (कुरची), राजसर्षपे (राइसरिषा)। शुण्ठीपिप्पलीमरिचरूपे त्रिकटुनि न॰। [कटुत्वे च।

कटुकन्द • पु॰ कटुः कन्दो मूलं यस्य। शिग्रुवृक्षे (सजना), आर्द्रके,

कटुकफल • पु॰ कटुकं फलमस्य। ककोले।

कटुका • स्त्री॰ कटु+संज्ञायां कन्। (कट्की) कटुरोहिण्याम्, ताम्बूल्यां, राजिकायां (राइसरिषा), निशामारुके च (निशमाव)।

कटुकी • स्त्री॰ कटु+स्वार्थे कन् गौरा॰ ङीष्। (कट्की) कटुकायाम्।

कटुकीटक • पु॰ कटुः कीटः स्वार्थे कन्। मशके। [लिपि।

कटुक्वाण • पु॰ कटु क्वाणः शब्दो यस्य। (टिटिभ) टिट्टिभ॰

कटुग्रन्थि • पु॰ न॰। कटुर्ग्रन्थिरस्य। पिप्पलीमूले, शुण्ठीमूले च।

कटुच्छद • पु॰ कटु छदः पत्रं यस्य। तगरवृक्षे (टगर)।

कटुतिक्तक • पु॰ कटुश्चासौ तिक्तश्चेति स्वार्थे कन्। भूनिम्बे, शणवृक्षे च। कटुतुम्ब्याम् स्त्री॰। टाप् अत इत्वम्।

कटुतुम्बी • स्त्री॰ कर्म॰। (तितलाउ) अलाबूभेदे। कटु तुम्बं फलं यस्याः ङीप्। कटुतुम्बीत्यप्यत्र। [कटुत्रिकमप्यत्र।

कटुत्रय • न॰ कटूनां त्रयम्। शुण्ठीपिप्पलीमरिचेषु त्रिषु।

कटुदला • स्त्री॰ कटु दलं यस्याः। (काँकुड) कर्कट्याम्।

कटुपत्र • पु॰ कटु पत्रं यस्य। पर्पटे। श्वेततुलस्यां स्त्री॰।

कटुभद्र • पु॰ कटु भद्रं कल्याणं यस्य। शुण्ठ्यां न॰। कटुरपि भद्र हितकारी कर्म॰। कटुभद्रोऽप्यत्र।

कटुमञ्जरिका • स्त्री॰ कटुर्मञ्जरी यस्याः। अपामार्गे।

कटुर • न॰ कटु [illegible]

कट्टोल • पु॰ कट्टोल्लो रसो प्रतिरोध। मेहे।

कट्टोरिका • स्त्री॰ कटु कटो रोहति क्विप्। कटुकायाम्।

कट्टारिका • स्त्री॰ कर्म॰। सितकण्टकारिकायाम्।

कट्टोला • स्त्री॰ कटु तीक्ष्णं यस्याः। निम्बकाम्।

कट्टङ्गर • पु॰ कटु-अङ्ग-र नैवाद्यरसो निर्गतो यस्य। मर्वे।

कटार • पु॰ कटीक कटाकारवद् अच्छति अच्-अच्। (कटारि) [illegible]। [illegible]।

कट्वन • पु॰ कट-विद् कटु वन यस्य। (कायफल) ओषधिविशेषे कट्फलीम् (नालाए), इडकान्, काकमाचाम्, वार्ताकाय।

कट्वर • न॰ कट वाद्। तक्रे, दधिमरे, व्यञ्जने च।

कट्वी • स्त्री॰ कटु+गुणवचनत्वात् ङीष्। (कटकी) कटुकायाम्।

कठ • कार्च्छ्रे (कष्टपूर्वकजीवने) वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् इदित्। कण्ठयति ते कण्ठति। अचकण्ठत् त [illegible]। [अकण्ठीत्।

कठ • [illegible] भ्वादि॰ पर॰ सक॰ सेट्। कठति अकठीत्

कठ • [illegible] इदित् भ्वादि॰ आत्म॰ सक॰ [illegible]। [illegible]। [इति च।

कठ • पु॰ कठ अच्। [illegible]

[illegible]

[illegible]

[illegible]

कड • कार्कश्ये भ्वादि॰ पर॰ अक॰ सेट्। कडति अकडीत्।

कण • चार्त्तस्वरे भ्वादि॰ पर॰ अक॰ सेट्। कणति अकाणीत् अकणीत्। णिचि चणि अचीकणत् त अचकाणत् त। [कणयति ते।

कण • गतौ भ्वादि॰ पर॰ सक॰ सेट्। कणति अका(क)णीत्। णिचि

कण • पु॰ कण-निमीलने अच्। धान्यादेरतिसूक्ष्मांशे, लेशे च। जीरा॰ ङीष् कणजीरके स्त्री॰। अल्पार्थे टाप्। क्षुद्रांशे, जीरे, पिप्पल्याम्, श्वेतजीरके च। [अकणत् अचकाणत् त।

कण • निमीलने चुरा॰ उभ॰ सक॰ सेट्। काणयति ते अची॰

कणजीरक • न॰ कर्म॰। शुक्लजीरके।

कणभक्ष • पु॰ भक्ष-अण् उप॰। ग्रामचटके, कणादे मुनौ च। "कणभक्षपक्षानुसारिणाम्" इति मुक्तावली। स्त्रुच् कणभक्षकोऽप्यत्र। [चटिकायाम्, पश्चिमस्याञ्च च स्त्री॰।

कणिक • पु॰ कणो विद्यतेऽस्य अस्त्यर्थे ठन्। गोधूमचूर्णे (मयदा),

कणित • न॰ कण-आर्त्तस्वरे क्त। पीडितानां शब्दे।

कणिश • न॰ कणो विद्यतेऽस्य इति कणो ल शाति शो-क। सस्यमञ्जर्यां, धान्यादिशीर्षे च।

कणीयस् • त्रि॰ कण ईयसुन्। अत्यल्पार्थे।

कणे • अव्य॰ कण-के। अभिलाषातिशये।

कणेर • पु॰ कण-एर। करिणीकारवृक्षे। वेश्यायां, हस्तिन्याञ्च स्त्री॰।

कण्टक • पु॰ न॰ कठि ण्वुल्। सूच्यग्रे, क्षुद्रशत्रौ, रोमाञ्चे, मत्स्यास्थ्नि, द्रुमाङ्गे (काँटा), "अन्ताङ्कुरवन्तनमुखेव बिद्धाङ्कुष कण्टकम्" इति ज्योतिषोक्ते कर्मे, ततः चतुर्थसप्तमदशमस्थानेषु च।

कण्टकद्रुम • पु॰ कण्टकान्वितो द्रुमः शाक॰। शाल्मलीवृक्षे (शिमुल)।

कण्टकगुल्मा • स्त्री॰ इत॰। दुरालभायाम्।

कण्टकफल • पु॰ कण्टकान्वितं फलं यस्य। पनसवृक्षे (काँटाल) [illegible]। (विंगुच) तथा वृक्षे कण्टकान्वितफले।

कण्टकफला • स्त्री॰ कण्टकान्विता फला यस्याः। वार्ताक्याम्।

कण्टकश्रेणी • स्त्री॰ कण्टकानां श्रेणी यत्र। कण्टकार्याम्।

कण्टकारिका • स्त्री॰ कण्टकान् ऋच्छति कण्टक-ऋ-ण्वुल्। [illegible] [illegible] कण्टकार्यादित्वात् स्त्री॰।

कण्टकारी • स्त्री॰ कण्टक-ऋ-अण्। क्षुद्रायाम्। [illegible] [illegible] स्त्री॰।

कण्टकाशन • पु॰ कण्टकमश्नाति अश-ल्यु। उष्ट्रे।

कण्टकित • त्रि॰ कण्टकाः सञ्जाता अस्य इतच्। [illegible] "[illegible]" इति कुमार॰।

[illegible]

[illegible]

[illegible]

कण्टकी * स्त्री० कण्टक+अर्शआदित्वादच् गौरा० ङीप्। वार्त्ता-
कीभेदे। [बृहत्याम्।
कण्टतनु * स्त्री० कटि-अच् कण्टा कण्टकान्विता तनुर्यस्याः।
कण्टदला ० स्त्री० कटि-अच् कण्टं दलं यस्याः। केतक्याम्।
कण्टपत्र * पु० कण्टं कण्टकान्वितं पत्रं यस्य। विकङ्कतवृक्षे।
कण्टपत्रफला ० स्त्री० कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः।
ब्रह्मदण्ड्याम्। [वृक्षे (वर्वरी)।
कण्टपाद * पु० कण्टः कण्टकान्वितः पादो मूलं यस्य। विकङ्कत-
कण्टफल * पु० कण्टं कण्टकान्वितं फलं यस्याः। गोक्षुरे, पनसे,
धुस्तूरे, लताकरञ्जे, एरण्डभेदे च।
कण्टल ० पु० कण्ट+मत्वर्थीयो लच्। वावुले (वावला)। [वृचे।
कण्टवल्ली ० स्त्री० कण्टा कण्टकान्विता वल्ली कर्म०। श्रीवल्ली-
कण्टार्त्तगला * स्त्री० कण्टा आर्त्तगला कर्म०। नीलझिण्ट्याम्।
कण्टालु * पु० कटि+आलु। बृहत्यां, वंशभेदे, वार्त्ताक्याञ्च।
कण्ठ * पु० कण-ठ तस्य नित्वम् कठि-अच् वा। ग्रीवापुरोभागे,
मदनवृक्षे, समीपे, होमकुण्डाद्बाह्येऽङ्गुलिमितस्थाने च।
कण्ठतलासिका * स्त्री० कण्ठतले अश्वकण्ठसरूपस्थाने आस्ते
आस+ण्वुल्। अश्वग्रीवावेष्टकचर्मादौ।
कण्ठाग्नि * पु० कण्ठे अग्निः पाकाग्निर्यस्य। पक्षिणि, तस्य कण्ठा-
धःकरणमात्रेणैवान्नादेः पाकात्तोसाग्नित्वात् कण्ठाग्नित्वम्।
कण्ठाल * पु० कठि-आलच्। शूरणे (ओल), युद्धे, उष्ट्रे, नौकाङ्गे,
खनित्रे च। काले, गोणीभेदे च स्त्री०।
कण्ठिका * स्त्री० कठि-ण्वुल्। (एकनरा) कण्ठाभरणभेदे।
कण्ठी * स्त्री० क्षुद्रः कण्ठः अल्पार्थे ङीप्। अश्वकण्ठवेष्टनरज्ज्वाम्।
कण्ठीरव * पु० कण्ठे रवो यस्य। सिंहे, मत्तगजे, कपोते च।
कण्ठेकाल ० पु० कण्ठे कालः सप्तम्या अलुक्। महादेवे।
कण्डन ० न० कडि-ल्युट्। मुषलादिना तण्डुलादेर्निस्तुषतासम्पा-
दने (काँडान) [च। "कण्डनी चोदकुम्भश्च" इति मनुः।
कण्डनी ० स्त्री० कण्ड्यतेऽनेन कडि-ल्युट्। मूषले, उदूखले
कण्डिका * स्त्री० कडि+ण्वुल्। वेदैकदेशे।
कण्डु * स्त्री० कडि-उ। गात्रघर्षणे, तत्कारके रोगे च (चुलकान)।
कण्डु(ण्डू)र * पु० कण्डुं कण्डूं वा राति रा+क। कारवेल्ललतायाम्
(करेला)। शूकशिम्ब्याम् (आलकुशी) स्त्री०।
कण्डू * स्त्री० कण्डूञ् गात्रविघर्षणे सम्पदादित्वात् क्विप्। कण्डूयने,
गात्रघर्षणे च। "कपोलकण्डूम्" इति कुमारः।
कण्डूकरी * स्त्री० कृ-टक् उप०। शूकशिम्ब्याम् (आलकुशी)।
कण्डूघ्न ० पु० कण्डू+हन-टक्। आरग्वधे, गौरसर्षपे च।
कण्डूति * स्त्री० कण्डूय-क्तिन्। कण्डूयने, गात्रघर्षणे च।
कण्डूयन ० स्त्री० कण्डू+यक् ल्युट्। कण्डूम्, गात्रघर्षणे च।
कण्डूया * स्त्री० कण्डू+यक् कण्डूय-अ-स्त्रीत्वात् टाप्। कण्डूम्।
कण्डूल * पु० कण्डू+लच्। कण्डूकारके शूरणे। कण्डूयुक्ते त्रि०।
कण्डोल * पु० कडि-ओल। वंशादिरचिते धान्यस्थापनपात्रे
(डोल), उष्ट्रे च। [(पोका)।
कण्डोघ * पु० कण्डूनाशो घो यस्मात् ५व०। शूककीटे (शूया-
कण्व * पु० कण-वन्। मुनिभेदे। पापे न०।
कतक * पु० तक-हासे कस्य जलस्य तकः हासः प्रकाशो यस्मात्
५व०। (निर्मली) वृक्षभेदे। यस्य फलसम्पर्कात् जलप्रसादः।
कतम * त्रि० किम्+डतमच्। बहूनां मध्ये एकस्य जातिप्रश्नेऽर्थे
डतमच्। बहूनां मध्ये एकस्मिन् जातिविशिष्टे विशेषधर्म-
ज्ञानाय पृष्टे। द्वयोर्मध्ये तदर्थे डतरच्। कतरः।
कति * त्रि० किम्+डति। संख्याभेदपरिज्ञानाय पृष्टे।
कतिपय * त्रि० कति+अयच् पुक् च। कतिशब्दार्थे।
कत्तृण * कुत्सितं तृणं कोः कदादेशः। पृश्नी (पाकुड़िया), कुम्भि-
कायां (पाना), सुगन्धितृणे च।
कत्तोयं * न० कुत्सितमीषद्वा तोयं यत्र। मद्ये।
कत्थ * श्लाघायां भ्वादि० आत्म० अक० सेट्। कत्थते अकत्थिष्ट।
कत्र ० शैथिल्ये अद० चुरा० उभ० अक० सेट्। कत्रयति ते अच-
कत्रत् त। [अचीकथत् त अचकथत् त।
कथ * वाक्यरचनायाम् अद० चुरा० उभ० सक० सेट्। कथयति ते
कथक * त्रि० कथ-ण्वुल्। तत्त्वनिर्णयार्थं वादरूपकथाकर्त्तरि,
कथोपजीविनि नाटकवर्णनकर्त्तरि च।
कथङ्कारम् * अव्य० कथम्+कृ-णमुल्। कथं कृत्वेत्यर्थे। "कथङ्कार-
मनालम्बा" इति माघः।
कथञ्चन * अव्य० कथम्+चन। केनांशेनेत्यर्थे।
कथञ्चित् ० अव्य० कथम्+चित्। कथञ्चनार्थे, अतियत्नेनेत्यर्थे च
"प्राणान् कथञ्चिदपि धारयितुम्" इति रसमञ्जरी।
कथम् ० अव्य० किम्+प्रकारार्थे थमु कादेशः। केन प्रकारेणेत्यर्थे।
कथमपि * अव्य० कथम् च अपि च द्व०। अतियत्नेनेत्यर्थे, अति-
गौरवेणेत्यर्थे च। [२त०। किंप्रकारमाप्ते।
कथम्भूत * किं प्रकारं भूतः प्राप्तः किम्+द्वितीयान्तादपि थमु।
कथा * स्त्री० कथ+अ। कथने, "प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः
कथां विदुः। परम्पराश्रया या स्यात् सा मताख्यायिका बुधैः"
इत्युक्तलक्षणे वाक्ये, प्रबन्धरचनायां, कादम्बर्यादिग्रन्थे, पक्ष-
प्रतिपक्षोपन्यासेन विचारणायां, वादरूपे वाक्ये च।
कथाप्रसङ्ग ० पु० कथायां प्रसङ्गो यस्य। वातुले। गोष्ठीवचने
वातुले विषवैद्ये "कथाप्रसङ्गेन जनैरुदीरितात्" इति भारविः।
कद ० रोदने, वैक्लव्ये अक० आह्वाने सक० भ्वादि० इदित्
पर० सेट्। कन्दति अकन्दीत्। [अकादिष्ट। णिच्-कादयति ते।
कद * विक्लवीभावे दिवा० आत्म० अक० सेट् घटादि। कद्यते
कदध्वन् * पु० कुत्सितोऽध्वा कदादेशः गति०। कुपथे।
कदन * न० कद+णिच्-ल्युट्। पापे, मर्दने, [illegible]
[illegible]। युद्धे।

कदम्ब * पु० कद-अम्बच्। स्वनामख्याते वृक्षे। सर्षपे देवताड़वृक्षे। कदम्बं च न०। स्वार्थे कन्। तत्रैव न०।

कदम्बगोलकन्याय * पु० कदम्बपुष्पस्य गोलके यथा सर्वावयवेषु युगपत्पुष्पाणामुत्पत्तिस्तादृशे एकदोत्पत्तौ दृष्टान्तभेदे।

कदर * पु० कं जलं दृणाति पचाद्यच्। श्वेतखदिरे, (काँटावावला) वृक्षभेदे च।

कदर्थित * वि० कुत्सितोऽर्थः कदर्थस्तत् करोतीति णिच्-कर्मणि [क्त। विडम्बिते, दूषिते च।

कदर्य * वि० कुत्सितोऽर्यः स्वामी कुगति०। सति विभवे अदातरि, क्षुद्रे, "आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पातयन्। यो लोभात् सञ्चिनोत्यर्थान् स कदर्य इति स्मृतः॥" इत्युक्तलक्षणेऽर्थसञ्चयकारके च।

कदल * पु० कद-कलच्। रम्भावृक्षे। अजादित्वात् टाप् पृश्नीलतायां (चाकुलिया), शाल्मलीवृक्षे च। [पताकायां, मृगभेदे च।

कदली * स्त्री० काय दलते त्वगादौ जलवाहुल्यात्। रम्भावृक्षे,

कदलीकुसुम * न० ६त०। (मोचा) कदलीपुष्पे।

कदलीदण्ड * पु० ६त०। कदलीमध्यस्थे दण्डाकारे पदार्थे (थोड़)।

कदा * अव्य० कस्मिन् काले किम्+दा कादेशः। कस्मिन् काले इत्यर्थे।

कदाख्य * पु० कुत्सिता आख्या यस्य कदादेशः। (कुड) वृक्षे।

कदाचन * अव्य० कदा+चन। अनिर्द्धारिते कस्मिंश्चित् कालेऽर्थे च। कदाचित् अव्य० कदा+चित् कदाचनार्थे कदापीत्यर्थे च। [तद्वति त्रि०।

कदुष्ण * न० कुत्सितम् ईषदुष्णं वा कदादेशः। ईषदुष्णे अर्थे।

कद्रु * पु० कद-रु। पिङ्गलवर्णे। तद्वति त्रि०। नागमातरि स्त्री०।

कद्रू * स्त्री० कद्रु+बाह्वादित्वात् ऊङ्। नागमातरि कश्यपपत्न्याम्।

कद्रुपुत्र * पु० ६त०। सर्पे। कद्रु(द्रू)सुतादयोऽप्यत्रार्थे।

कद्वद * त्रि० कुत्सितं वदति कु+वद्-अच् कदादेशः गर्हितवाक्यवादिनि। [नीत् अकानीत्।

कन * दीप्तौ [illegible] भ्वादि० पर० सेट्। कनति अक-

कनक * न० कन-वुन्। स्वर्णे, किंशुके, [illegible] धुस्तूरे, [illegible] [illegible] कनकं द्रवति।

[illegible] * पु० [illegible] (सोहागा) टङ्कणे

[illegible] * न० [illegible] राजछत्रे।

[illegible] * स्त्री० [illegible] [illegible]।

[illegible] * पु० [illegible] [illegible]।

[illegible] * पु० [illegible] [illegible]

[illegible]

[illegible] * पु० [illegible] [illegible]

[illegible]

[illegible] * पु० [illegible]।

[illegible] * पु० [illegible]

अच्‌लुक्। कोविदारवृक्षे। [(झारी) सौवर्णकलशे।

कनकालुका * स्त्री० कनकनिर्मिता आलुः संज्ञायां कन्। स्वार्थे

कनखल * पु० तीर्थभेदे।

कनिष्ठ * वि० अयमेषामतिशयेन अल्पो युवा वा इष्ठन् कनादेशः। अतियूनि, अत्यल्पे, अनुजे च। अनुजायां, सर्वाभ्यः क्षुद्राङ्गुलौ स्त्री० टाप्। कनिष्ठभ्रातुः पत्न्यामपि अजादित्वात् टाप्।

कनी * स्त्री० कन-अच् गौरा० ङीष्। दुहितरि।

कनीनिका * स्त्री० कन-ईन संज्ञायां कन् टाप् अत इत्त्वं। अक्षितारायां, कनिष्ठाङ्गुलौ च।

कनीयस् * वि० अयमनयोरतिशयेन युवा अल्पो वा ईयसुन् कनादेशः। द्वयोर्मध्ये अल्पतरे, अनुजे च। स्त्रियां ङीप्।

कनीयस * न० कनी दीप्तिः तस्यै यस्यति यस-अच्। ताम्रे।

कन्तु * पु० कम-तु। कामदेवे। हृदये न०। कं सुखमस्तीति कम्-अस्त्यर्थे तु। सुखवति वि०। [वस्त्रखण्डे (कांथा)।

कन्था * स्त्री० कम-थन्। मृण्मयभित्तौ (कांथ), स्यूतजीर्ण-

कन्थारी * स्त्री० अतिकण्टकाकीर्णत्वात् कन्थामपि ऋच्छति वेधने प्रविशति ऋ-अण। दुष्प्रवेशाख्ये वृक्षे।

कन्द * पु० न० कन्दति कन्दयति कन्द्यते वा कदि-अच्-णिच्-घ, घञ् वा। शूरणे (ओल), अमूलमात्रमूले, मस्तके च (गाजर)। मेघे पु०। [इति ख्याते कन्दे च।

कन्दगुडूची * स्त्री० कन्दोद्भवा गुडूची शाक०। गुडूचीभेदे, (ढ़पगौ

कन्दट * न० कदि+अटन्। श्वेतोत्पले।

कन्दफला * स्त्री० कन्दात् फलं यस्याः क्षुद्रकारवेल्लायाम् (कथा।

कन्दर * पु० स्त्री० कम् जलेन दीर्य्यते कम्+दृ-अच्। अकृत्रिमगिरिनितम्बदेश गुहायाम्। स्त्रीत्वे टाप् ङीप् च। अङ्कुशे पु०। आर्द्रके न०।

कन्दराकर * पु० ६त०। पर्वते। [(पाकुड़), आग्नेयपर्वते च।

कन्दराल * पु० कन्दरा+अस्त्यर्थे लच्। गर्दभाण्डवृक्षे, प्लक्षे

कन्दरोद्भवा * स्त्री० कन्दरे उद्भवति उद्+भू-अच्। क्षुद्रपाषाणभेदीवृक्षे। [कुत्सितो दर्पोऽस्मात् वा। कामदेवे।

कन्दर्प * पु० कम् सुखं तेन मत्त वा दृप्यति कम्+दृप-अच्, कं

कन्दर्पकूप * पु० कन्दर्पस्य कूप इव। स्त्रीचिह्नभेदे।

कन्दर्पजीव * पु० कन्दर्पं जीवयति उद्दीपयति जीव+णिच्-अच्। कामवर्द्धननामकवृक्षे।

कन्दर्पमूषल * पु० कन्दर्पस्य मूषल इव। पुरुषचिह्नभेदे।

कन्दल * न० कदि-कलच्। कपाले, नवाङ्कुरे, कलध्वनौ, उपरागे कन्दलीलतापुष्पे च। स्वर्णे, युद्धे, कलापे च पु०।

कन्दली * स्त्री० कन्दे लीयते ली-ड, कदि-कलच् वा गौरा० ङीष्। मृगभेदे, गुल्मभेदे, पताकायाम्, पद्मबीजे, भूमिकदल्याम्।

कन्दलीकुसुम * न० ६त०। भूमिकदलीपुष्पे, छत्राके च।

कन्दवर्द्धन * पु० कन्देन वर्द्धते वृध-ल्यु। शूरणे (ओल)।

कन्दवल्ली * स्त्री० कन्दादारभ्य वल्ली। वन्ध्याकर्कोट्याम्।
कन्दशूरण * पु० कन्दप्रधानः शूरणः शाक०। (ओल) शूरणे।
कन्दु * पु० स्त्री० स्कन्द+उ सलोपः। (लाघोया) स्वेदनीपात्रे "कन्दुपक्वं तैलपक्वम्" इति स्मृतिः, तण्डुलादेः भर्जनपात्रभाण्डे च। "गोकुले कन्दुशालायाम्" इति स्मृतिः। [कुमार।
कन्दुक * पु० कदि-उक। गेन्दुके "सा कन्दुकैः [illegible]" इति
कन्दुपक्व * त्रि० जलोपसेकं विना कन्दुपात्रे पक्वं तण्डुलादि। सुपक्वतया भ्रष्टतण्डुलादौ। "कन्दुपक्वानि तैलेन" इत्यादि स्मृतिः।
कन्दोट * पु० कदि-ओटन्। श्वेतोत्पले। नीलोत्पले न०।
कन्दोत्थ * पु० कन्दे मूले उतः वेञ्-क्त। कुमुदे। [पोतायाम् स्त्री०।
कन्धर * पु० कं जलं धारयति अच्। मेघे। शिरस्ताच्च धरा।
कन्धि * पु० कं शिरो धीयतेऽस्मिन् कम्+धा-कि। ग्रीवायाम्।
कन्न * न० कद-क्त। पातके, मूर्च्छायाञ्च।
कन्यका * स्त्री० अज्ञाता कन्या कन्या+अज्ञातार्थे कन् क्षिपकादित्वात् नेत्वम्। "कन्यका दशमे मता" इति स्मृत्युक्तायां दशवर्षीयां कुमार्याम्।
कन्या * स्त्री० कन+यत् कन्यायाः कनीन् चेति निर्देशात् यस्मि प्रथम इति न ङीप्। अनूढायां कुमार्याम्, मेषादितः षष्ठे राशौ च। [कन्यागतस्य कुशलं ज्ञानम्" इति रामायणकथा।
कन्याकुब्ज * पु० कन्याः कुब्जा यत्र। कान्यकुब्जदेशे, तत्र हि वायुना
कन्याट * पु० कन्या अटत्यत्र घञ्। वासभवने।
कप * चलने (सौत्र:) पर० सक० सेट्। कपति अकपीत् अकापीत्।
कप * चलने भ्वादि० इदित् आत्म० अक० सेट्। कम्पते अकम्पिष्ट।
कपट * पु० न० कि मूर्द्धनि पटे पट इवाच्छादकः। [illegible] वस्तुनोऽन्यथालिनाच्छादने।
कपटिन् * त्रि० कपट+इनि। छलयुक्ते। चीनाख्यगन्धद्रव्ये पु०।
कपर्द * पु० दर्व-पूरणे क्विप् दात् अलोपे दर् पूर्त्तिः कस्य महादेवस्य परा पूर्त्तिं ददाति शुध्यति क+दर्+दैप्-क। हरजटायाम्। कैन दर्पिम पूर्त्तिं ददाति दा-क। वराटके। अल्पार्थे कन् स्त्रीत्वे टाप् अत इत्वम्। कपर्दिकाप्यत्र।
कपर्दिन् * पु० कपर्द+अस्त्यर्थे इनि। महादेवे।
कपाट * स्त्री० न० कं वात पाटयति वारयति पट+णिच् अच्। द्वारावरोधके [illegible] काष्ठादौ। [illegible] स्त्रियां ङीप्। कपाटोऽप्यत्र।
कपाल * पु० न० कं जलं पालयति अच्। घटादेरवयवे, शिरोऽस्थ्नि [illegible] शिरस्त्राणे, कर्परे च। भोजनपात्रम्। समूहे, कुष्ठरोगभेदे च। [क+क्विप्। [illegible]
कपालभृत् * पु० कपालं [illegible] शिरोऽस्थिखण्डं पात्रं बिभर्त्ति
कपालमालिन् * पु० कपालानां माला विद्यतेऽस्य इनि। शिवे। दुर्गायां स्त्री० ङीप्।

कपालिका * स्त्री० क्षुद्रे कपालमल्पार्थे कन् अत इत्वम्। भग्नमृत्पात्रखण्डे (खापरा)।
कपि * पु० भीवकप-इ। वानरे, रक्तचन्दने, वराहे, कपित्थवृक्षे च। तद्वति त्रि०। [कपिकच्छ्वैनी शूकशिम्बायाम्।
कपिकच्छू * स्त्री० कपीनामपि कच्छूः यस्याः ५ब०। (आलकुशी)
कपिका * स्त्री० कप-वुन्। नीलसिन्धुवारवृक्षे। [ष्ठोऽप्यत्र।
कपिकेतन * पु० कपिः केतनं ध्वजरूपं चिह्नं यस्य। अर्जुने। कपि-
कपिचूडा * स्त्री० कपीनां चूडेव। आम्रातकवृक्षे, तस्य मुकुलेन तथात्वात्।
कपिचूत * पु० कपीनां चूत इव प्रियः। आम्रातकवृक्षे।
कपिञ्ज * पु० कं जलमिव पिञ्जाते वर्णेन पिञ्ज-क मलोपः। (घिलारम) [illegible]।
कपिञ्जल * पु० कमिव पिञ्जते पिञ्ज-कलच्। गौरतित्तिरौ, चातके च "कपिञ्जलानालभेत" इति श्रुतिः।
कपित्थ * पु० कपिस्तिष्ठत्यत्र तत्फलप्रियत्वात् स्था+क पृषो०। (कयतबेल) वृक्षभेदे "कपित्थदराननः" इति भागवतम्।
कपित्थत्वच् * पु० कपित्थस्य त्वगिव त्वक् यस्य बहु०। एलावालुकवृक्षे।
कपित्थास्य * पु० कपित्थमिवास्यं यस्य। गोलाङ्गूलाख्ये वानरभेदे।
कपिप्रभा * स्त्री० कपावपि प्रभा अनुभवकारित्वात्। (आलकुशी) कपिकच्छ्वाम्।
कपिप्रिय * पु० ६त०। आम्रातकवृक्षे, कपित्थे च।
कपिरथ * पु० कपिः हनुमान् रथ इव वाहनं यस्य। रामचन्द्रे। कपिः रथे यस्य। अर्जुने।
कपिल * पु० कप-इलच् पादेशः। वह्नौ, वासुदेवे, सांख्यशास्त्रकारके मुनिभेदे, स च कर्दमप्रजापतिनो देवहूत्यां भगवदंशेन जातः। कुक्कुरे, [illegible], पिङ्गलवर्णे च। तद्वति त्रि०। [illegible] शिंशपायां, पुण्डरीकनामदिग्गजवनितायाञ्च स्त्री०।
कपिलधारा * स्त्री० कपिलैव धारा यस्याः। गङ्गायां [illegible]। कपिलाया धारा दुग्धधारा यत्र। [illegible]
[illegible] * स्त्री० [illegible]। [illegible]
[illegible] * स्त्री० [illegible]
[illegible]
[illegible] * पु० [illegible]
[illegible]
[illegible] * स्त्री० [illegible]
[illegible] * न० [illegible]
[illegible] * पु० [illegible]
[illegible]

कपिवदान्य * पु॰ कपिषु वदान्यो बहुफलवत्त्वेन तत्प्रदानात्। आम्रातकवृक्षे।

कपिवल्ली * स्त्री॰ कपिरिव तल्लोमतुल्या वल्ली। गजपिप्पल्याम्।

कपिश * पु॰ कपिः कपिलवर्णोऽस्त्यस्य अस्त्यर्थे श। (शिलारस) सिह्लके। कृष्णपीतमिश्रे वर्णे च। तद्वति त्रि॰। नदीभेदे, "कपिशां तीर्त्वा" इति रघुः। माधव्यां लतायाञ्च स्त्री॰।

कपिशी * स्त्री॰ कपिश+गौरा॰ ङीष्। माधव्याम्, मदिराभेदे च।

कपिशीर्ष * न॰ कपीनां प्रियं शीर्षमग्रम् शाक॰। प्राकाराग्रे।

कपिशीर्षक * न॰ कपेः शीर्षमिव कायति कै+क। हिङ्गुले।

कपीज्य * पु॰ कपिभिरिज्यते यज-क्यप्। क्षीरिकावृक्षे।

कपीतन * पु॰ कपीनाम् ईं लक्ष्मीं तनोति तन-अच्। आम्रातकवृक्षे, शिरीषवृक्षे च।

कपीन्द्र * पु॰ कपिरिन्द्र इव। हनुमति। कपीनामिन्द्रः। सुग्रीवे।

कपीष्ट * पु॰ कपीनामिष्टः। राजादने, कपित्थे च।

कपूय * त्रि॰ कुत्सितं पूयते पूयी-विशरणे अच् पृषो॰ उल्लोपः। कुत्सिते। "कपूयचरणाः कपूययोनिमापद्यन्ते" इति श्रुतिः।

कपोत * पु॰ को वातः पोत इव यस्य। पारावते, पक्षिमात्रे च।

कपोतक * न॰ कपोत इव कायति प्रकाशते कै-कः। सौवीराञ्जने।

कपोतपालिका * स्त्री॰ पालयति पाल+ण्वुल् उप॰। स्तम्भाग्रप्रसारितदारुभेदे, सौधादिप्रान्ते काष्ठादिरचिते पक्षिवासस्थाने, विटङ्के च (पायराखोप)।

कपोतपाली * स्त्री॰ कपोतान् पालयति कर्मण्यण् उप॰। प्रासादप्रान्ते दारुनिर्मिते पक्षिस्थाने, विटङ्के च (पायराखोप)।

कपोतवर्णी * स्त्री॰ कपोतस्य वर्ण इव वर्णो यस्याः गौरा॰ ङीष्। सूक्ष्मैलायाम्।

कपोताङ्घ्रि * पु॰ कपोतस्याङ्घ्रिरिव रक्तवर्णत्वात्। नलीनामद्रव्ये।

कपोतारि * पु॰ कपोतस्यारिः ६त॰। श्येनपक्षिणि।

कपोल * पु॰ गौलकप-ओलच्, गण्डे च। गल्ले (गाल)। [श्लेष्मणि।

कफ * पु॰ केन जलेन फलति फल-ड। शरीरस्थे धातुभेदे।

कफकूर्चिका * स्त्री॰ कफं कूर्चति विकरोतीति कूर्च-विकारे ण्वुल्। लालायाम्, आस्यासवे च (थुथु)।

कफणि * पु॰ स्त्री॰ केन जलेन फणति स्फुरति इन्। भुजमध्यग्रन्थौ, कूर्परे च (कनुइ) स्त्रीत्वे वा ङीप्। [कफकारके त्रि॰।

कफवर्द्धन * पु॰ कफं वर्द्धयति वृध+णिच्-ल्यु। पिण्डालुवृक्षे। कफ-

कफविरोधिन् * पु॰ न॰ कफं विरुणद्धि वि+रुध-णिनि। मरिचे, कफविरोधकारके त्रि॰। [वर्वरवृक्षे। कफनाशके त्रि॰।

कफान्तक * पु॰ कफमन्तयति नाशयतीति अन्त+णिच्-ण्वुल्।

कफारि * पु॰ ६त॰। शुण्ठ्याम्।

कफिन् * त्रि॰ कफोऽस्त्यस्य कफ+इनि। श्लेष्मप्रधाने जने।

कफोणि * पु॰ स्त्री॰ केन जलेन फणति इन् पृषो॰ ओत्वम्। भुजमध्यग्रन्थौ, कूर्परे च (कनुइ)। स्त्री॰ वा ङीप्।

कबन्ध * पु॰ कं सुखं बध्नाति बन्ध-अण्, कं बध्यते छिद्यतेऽस्मात् बन्ध-कर्मणि घञ्, केन वायुना बध्यते, को वायुर्बन्धो वा यस्य यथायथं वाक्यम्। उदरे, धूमकेतौ, राहौ, राक्षसभेदे च। जले न॰। "मनुष्याणां सहस्रे तु हतेषु हतमूर्द्धसु। तदावेगात् कबन्धः स्यादेकोऽमूर्द्धा क्रियान्वितः" इत्युक्तलक्षणे शिरःशून्यक्रियायुक्तदेहे पुंस्त्री॰। [कपित्थवृक्षे।

कबित्थ * पु॰ कपयस्तिष्ठन्त्यत्र तत्प्रियत्वात् स्था-क पृषो॰ पस्य बः।

कम् * अव्य॰ कम-णिङभावपक्षे क्विप्। पादपूरणे, जले, मस्तके, सुखे, मङ्गले, निन्दायाञ्च।

कम * वाञ्छायां भ्वादि॰ आत्म॰ सक॰ सेट्। कामयते अचीकमत अचकमत। [अचकमत।

कम * कामनायाम् चुरा॰ आत्म॰ सक॰ सेट्। कामयते अचीकमत

कमठ * पु॰ कम-अठन्। कच्छपे। यतीनां जलपात्रे न॰।

कमण्डलु * पु॰ न॰ मण्डनं मण्डः कस्य जलस्य मण्डं लाति ला+कु। करङ्के, सन्न्यासिनां जलपात्रभेदे, प्लक्षवृक्षे, चतुष्पाज्जातौ च। [अशोकवृक्षे पु॰।

कमन * त्रि॰ कामयते कम-ल्यु। कामुके, अभिरूपे, सुन्दरे च।

कमनच्छद * पु॰ कमनः सुन्दरः छदोऽस्य। कङ्कपक्षिणि।

कमनीय * त्रि॰ कम-अनीयर्। मनोहरे, कामनायोग्ये च।

कमल * न॰ जलमलति भूषयति कम्+अल-अच्। पद्मे। कमकलन्। ताम्रे, क्लोमनि, औषधे, जले च न॰। मृगभेदे, सारसविहगे च पु॰। [पद्मसमूहे।

कमलख(ष)ण्ड * न॰ कमलानां समूहः कमल+(ष)खण्डच्।

कमला * स्त्री॰ कमलं विद्यतेऽस्याः अर्शआदित्वात् अच्। लक्ष्म्याम्। कम-कलच्। वरस्त्रियाम्।

कमलालया * स्त्री॰ कमलमालयो यस्याः। लक्ष्म्याम्।

कमलासन * पु॰ कमलमासनं यस्य। चतुरानने ब्रह्मणि।

कमलिनी * स्त्री॰ कमलानां समूहः देशो वा कमल+इनि। पद्मसमूहे, पद्मयुक्तलतायाञ्च।

कमलोत्तर * न॰ कमलमिवोत्तरमुत्कृष्टम्। कुसुम्भपुष्पे।

कमितृ * त्रि॰ कम-णिङभावपक्षे तृच्। कामुके। स्त्रियाम् कमित्री।

कम्प * पु॰ कपि-चलने घञ्। गात्रादिकम्पे, वेपथौ च।

कम्पन * त्रि॰ कपि+युच्। कम्पयुक्ते। शिशिरे ऋतौ पु॰। भावे ल्युट्। चलने।

कम्पिल(ल्ल) * पु॰ कपि-इलच्। रोचन्याम्। कपि-इल्लच्, देशे, "देवीं कम्पिलवासिनीम्" इति श्रुतिः।

कम्पिल्लक * पु॰ कम्पिल्ल एव स्वार्थे कन्। (कमला) वृक्षभेदे।

कम्प्र * त्रि॰ कपि-र। कम्पान्विते।

कम्ब * गतौ भ्वादि॰ पर॰ सक॰ सेट्। कम्बति अकम्बीत्।

कम्बल * पु॰ कम+कलच्। नागभेदे, सास्नायां, प्रावारे, कृमौ च।

स्तनामस्थाने शिवमौलमिलिते वक्षामनाटौ, हले च न०।

कम्बलिन् * पु० कम्बलः गलरोमस्तम्भाकारयस्य इनि। वृषभे।

कम्बलवाह्य न० कम्बलेन वाह्यम् ...। वाह्ये शकटे, गम्बोरये च।

कम्बलवाह्यक * न० कम्बलिना ...।

कम्बि * स्त्री० कम-इन् बुक् च। दर्व्याम् (हाता) वा ङीप्। कम्बी।

कम्बु * पु० न० कम-उ बुक्। शङ्खे, गजे च। शम्बूके, वलये, गलके च न०। ग्रीवायां स्त्री०। [स्वार्थे कन्। कम्बुकण्ठिकाप्यत्र।

कम्बुकण्ठी * स्त्री० कम्बुरिव कण्ठोऽस्याः। कम्बुग्रीवायाम्।

कम्बुपुष्पी * स्त्री० कम्बुः शङ्ख इव पुष्पमस्याः। शङ्खपुष्प्याम्।

कम्बुमालिनी * स्त्री० कम्बूनां तत्समपुष्पाणां माला अस्त्यस्याः इनि। शङ्खपुष्प्याम्।

कम्बोज * पु० कवि-ओज। हस्तिभेदे, शङ्खभेदे "पञ्चनदं समारभ्य म्लेच्छादक्षिणपूर्वतः कम्बोजदेशः" इत्युक्तदेशे च। [शिवे।

कम्बुतालिन * पु० कम्बुरिवातालो। मङ्गलाशङ्कतपूर्वकाये मह-

कम्भारी * स्त्री० कं जलं बिभर्ति कम्+भृ-अण् गौरा०। गाम्भार्याम् (गाम्भार)। [ऽरे च।

कम्र * त्रि० कम-दिङ्भावपक्षे र। मैथुनेच्छावति कामुके, मनोज्ञे।

कर * पु० कृ-अप्, कृ-अच् वा। हस्ते, किरणे, राजग्राह्ये राजस्वे, वर्षोपले, प्रत्यये, हस्तिहस्ते, हस्तनक्षत्रे च। किञ्चित्कर्मोपपदे तत्कर्मकारके। यथा कर्मकरः यशस्करः।

करक * पु० कृ-वुन्। करकवृक्षे, पक्षिभेदे, दाडिमवृक्षे, कोविदारवृक्षे, बकुलवृक्षे, करीरे, नारिकेलास्थि च (नारिकेलेर खोल)। कमण्डलौ पु० न०। कर-स्वार्थे कन्, वर्षोपले (शिल) पु० स्त्री०। स्त्रियां गौरा० ङीष् करकी।

करकङ्कणन्याय * पु० करकङ्कणस्य करभूषणार्थकत्वेऽपि यथा करसम्बन्धप्रयोगस्तत्र तत्संलग्नतायोतनार्थः तद्रूपे दृष्टान्ते।

करकण्टक * पु० करस्य कण्टक इव। नखे।

करकाजल * न० करकाया जलम् ६त०। (वरफ) करकाम्बुद्रवे।

करकाम्भस् * पु० करकाया अम्भ इवाम्भो यस्य। नारिकेले।

करग्रह * पु० करस्य वधूकरस्य वरेण ग्रहो ग्रहणं यत्र। विवाहे।

करग्रहारम्भ * पु० करस्य राजग्राह्यस्य ग्रहणं प्रजाभ्य आदानं तस्यारम्भः। वार्षिककरस्य प्रथमादानारम्भे (पुण्याह)।

करङ्क * पु० कीर्यते द्रव्यमत्र कृ-अप् करोऽङ्को गर्भोऽस्य शक०। नारिकेलास्थि (खोल), मस्तकखर्परे (माथार खुलि), कमण्डलौ, पात्रभेदे च। "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी।

करच्छद * पु० कर इवाकरच्छदोऽस्य। शाखोटवृक्षे (शिंहोडा)।

करज * पु० करे जायते जन-ड। नखे, व्याघ्रनखाख्यगन्धद्रव्ये (नखी) च। कं शिरः जलं वा रञ्जयति रञ्ज+णिच्-अच् नि०। (करमचा) करञ्जवृक्षे। [ख्याते वृक्षे।

करञ्ज * पु० कं शिरः जलं वा रञ्जयति अच्। (करमचा) इति

करञ्जफल * पु० करञ्जस्य फलमिवाग्रं फलं यस्य। कपित्थे

(कएतवेल)। [दोलायां गवि स्त्री० टाप्।

करट * पु० कृ-अटन्। गजगण्डे, काके, कुसुम्भवृक्षे च। दुर्जने

करटिन् * पु० करटः गजगण्डः ततः अस्त्यर्थे इनि। हस्तिनि।

करटु * पु० कृ-अटु। (करकटिया) इति नामके विहगे।

करण * न० कृ-ल्युट्। क्रियानिष्पत्तौ साक्षात् प्रकृष्टसाधने साधने व्याकरणोक्ते कारकभेदे, वर्षे, देहे, क्षेत्रे, इन्द्रिये, गात्रे च। "करणं यत्तव कालिमत्तया" इति कुमारः। भावे ल्युट्। क्रियायाम् न०। ज्योतिषोक्तेषु ववबालवादिषु एकादशसु तिथ्यर्द्धेषु, वैश्येन शूद्रायामुत्पादिते जातिभेदे च (करणकायस्थ) पु०।

करणाधिप * पु० करणानामिन्द्रियाणामधिपः। जीवे, आत्मनि च।

करण्ड * पु० कृ-अण्डन्। मधुचक्रे (मौचाक), खड्गे, कारण्डवे विहगे, वंशादिरचिते पुष्पपात्रे (साजी), समुद्गे च (कौटा), शकलि रोगे। स्त्री० टाप्।

करतल * पु० ६त०। हस्तस्य तले, हस्ते च।

करताल * न० तल-प्रतिष्ठायां घञ् करे तालो यस्य। वाद्यभेदे (करताल), तद्धि करे स्थापयित्वैव वाद्यते।

करतालो * स्त्री० करौ ताड्येते यत्र ताड-घञ् ६त० गौरा० ङीष् डस्य लः। करतलध्वनौ।

करतोया * स्त्री० करस्य गौरीविवाहकाले शिवकरस्य तोयात् सम्प्रदानवारितः सम्भूतं तोयं यस्याः। कामरूपदेशे स्वनामख्यातायां नद्याम्।

करपत्र * न० करात् पतति पत+ष्ट्रन्। (करात) क्रकचे, दारुभेदके शस्त्रभेदे। करावेव पत्रं वाहनं यत्र। जलक्रीडायाम्। तत्र हि हस्ताभ्यां परस्परमुत्तोल्य क्रीड्यते।

करपत्रवत् * पु० करपत्रमिव पत्रमस्त्यस्य मतुप्। तालवृक्षे।

करपर्ण * पु० करः हस्त इव पर्णं यस्य। (भेंट) भिण्डातकवृक्षे, रक्तैरण्डे च।

करपल्लव * पु० करस्य हस्तस्य पल्लव इव। अङ्गुलौ।

करपात्र * न० कर एव पात्रं जलनिक्षेपपात्रं यत्र। हस्ताभ्यामुत्क्षिप्य परस्परजलदानक्रीडने। कर्म०। हस्तरूपे पात्रे।

करपाल * पु० करं पालयति पाल-अण्। खड्गे। संज्ञायां कन् टाप् अत इत्वम्। हस्तयष्टौ। (सोंटा) स्त्री० ङीप्।

करपीडन * न० करस्य वधूकरस्य वरेण पीडनं ग्रहणेन मर्दनं यत्र। विवाहे। [खड्गे।

करवाल * पु० करस्य बालः शिशुरिव। नखे। करे वालो गतिर्यस्य।

करभ * पु० कृ-अभच्, करे भाति भा+क वा। मणिबन्धात् कनिष्ठापर्यन्तं करस्य बाह्यदेशे, करिशावके, उष्ट्रशिशौ (नखी) नामगन्धद्रव्ये, उष्ट्रे च। "करभकण्ठकडारम्" इति माघः।

करभप्रिया * स्त्री० करभस्य प्रिया। दुरालभायाम् (धासकुषी)।

करभवल्लभ * पु० ६त०। उष्ट्रप्रिये पीलुवृक्षे, कपित्थवृक्षे च।

करमादनी * स्त्री० करभैः उष्ट्रैरद्यते अद-कर्मणि ल्युट् टित्त्वात्

स्त्रियां ङीप्। दुरालभायाम् (धालकुशी)।
करमर्द * पु० करं मृद्नाति मृद-अण्। (करमचा) करम्दवृक्षे। स्वार्थे कन्। करमर्दकोऽप्यत्र। तत्पर्य्यो हि करकण्डूरिति तस्य तदात्वत्।
करमर्दन * पु० करं मृद्नाति मृद-ल्यु। (करमचा) करमर्दवृक्षे।
करमाला * स्त्री० कर एव कराङ्गुलिपर्व मालेव जपसंख्याहेतुत्वात्। "आरभ्यानामिकामध्यं दक्षिणावर्त्तयोगतः। तर्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता।" इत्युक्तलक्षणायां जपसंख्यार्थं कराङ्गुलिपर्वदशकरूपायां मालायाम्। [मत्स्यभेदे।
करमुक * न० करेण मुच्यते यत् प्रति क्षिप्यते मुच-क। (बड़्शी)
करम्भ * त्रि० कृ-अम्भच्। मिश्रिते। मिश्रणे पु०।
करम्भित * त्रि० करम्भो मिश्रणं जातोऽस्य इतच्। मिश्रिते "मधुकरनिकरकरम्भित" इति जयदेवः। [मिश्रितसक्तुषु।
करम्ब * पु० केन जलेन रभ्यते मिश्यते रभ-घञ् नुम् च। दधि-
कररुह * पु० करे रोहति रुह-क। नखे। [कृपाणे (तरवार)।
करवाल * पु० करं वालयति रक्षति चु० वल-पालने अण्।
करवीर * पु० करं वीरयति चु० वीर-विक्रान्तौ अच्। कृपाणे, खड्गे, श्मशानस्थाने हये, अश्वमारे, देशभेदे च।
करवीरक * पु० करवीर इव कायति-कै-क। अर्जुनवृक्षे। स्वार्थे कन्। करवीरार्थे। [(घरहर)।
करवीरभुजा * स्त्री० करवीरस्येव भुजा यस्याः। आढ्क्याम्।
[illegible] * स्त्री० [illegible] [illegible]। [अलर्के।
[illegible] * पु० [illegible] निर्गत
[illegible] * पु० [illegible]।
[illegible] * [illegible] मङ्गलार्थं बध्यमाने सूत्रे।
[illegible] * पु० कर [illegible] रोहति रुह-दीप्तौ णिच्-अण्।
[illegible], [illegible], [illegible], देशभेदे च।
[illegible] * पु० [illegible] दीप्तौ णिच् [illegible]। मदनवृक्षे।
[illegible] [(करमचा)।
[illegible] * पु० [illegible] करमर्दे
[illegible] * त्रि० [illegible] [illegible]-
[illegible] (यवनजैन), [illegible]
[illegible] च [illegible] त्रि०। (कन-
[illegible] पु०।
[illegible] * पु० [illegible]
[illegible] (नाक-
[illegible]
[illegible]
[illegible] देशभेदे च
[illegible] [illegible]
[illegible]

करीर * पु० कॄ-ईरन्। घटे। वंशाङ्कुरे। "हिमांशुवंशस्य करीरमेव" इति नैषधम्। झिल्लयाम्, हस्तिदन्तमूले च स्त्री०।
करीष * पु० न०। कॄ-ईषन्। शुष्कगोमये। [वात्याशन्।
करीषङ्कषा * स्त्री० करीषं कषति कष-हिंसायाम् खच् मुम् च।
करुण * पु० कृ-उनन्। करुणाख्ये रसभेदे, करुणाख्ये वृक्षे च। "दृगाम्बुदग्धत्करुणे" इति नैषधम्। दीने, अनाथे, दुःखिते, करुणावति च त्रि०। दयायां स्त्री० टाप्।
करुणविप्रलम्भ * पु० करुणरसान्वितो विप्रलम्भः। अलङ्कारशास्त्रोक्ते शृङ्गाररसमध्ये विप्रलम्भभेदे साहित्यदर्पणे ३ परि०।
करुणापर * त्रि० करुणायां परः आसक्तः करुणा परा वा यस्य। अत्यन्तकरुणायुक्ते। [स्त्रियां करुणामयी।
करुणामयः * त्रि० करुणा+प्राचुर्य्ये मयट्। प्रचुरकरुणायां।
करूष * पु० कृ+ऊष। देशभेदे।
करेट * पु० के जले रेटति रेट-कु। (करकटिया) इति ख्याते पक्षी।
करेणु * पु० कृ-एणु। गजे। हस्तिन्यां स्त्री०।
करोट * पु० न० के शिरसि रोटते रुट-द्युतौ अच्। शिरोऽस्थि इन्। करोटिरप्यत्र। स्त्री० वा ङीप्।
कर्क * वासे सौत्र: पर० अक० सेट्। कर्कति अकर्कीत्।
कर्क * पु० करोति कृणोति क्रियते वा यथायथं वाच्यम् [illegible] निरूढम्। वह्नौ, अग्नौ, दर्पणे, कुलीरे, कर्कटवृक्षे, श्वेताश्वे, मेषादितश्चतुर्थे राशौ च। घटे पु०। स्त्री० वा ङीप्।
कर्कट * पु० सौत्र-क्रर्क अटन्। क्षुद्रामलके, कटफले, कर्कटशृङ्गी, पक्षिणि, जलजन्तुभेदे, कुलीरे (काँकड़ा), मेषादितश्चतुर्थे राशौ, शाल्मलीवृक्षे च। स्वार्थे कन्। कर्कटकोऽप्यत्रार्थेषु, स्त्रियां [illegible]
कर्कटशृङ्गी * स्त्री० कर्कट इव शृङ्गं यस्याः। (काँकड़ाशिङ्गा) वृक्ष-भेदे। स्वार्थे कन्। कर्कटशृङ्गिकाप्यत्र।
कर्कटि * स्त्री० कर्कं कण्टकमटति इन् शक०। (काँकुड़) इति शाल्मलीवृक्षे च। वा ङीप् अत्रार्थे, कर्कटशृङ्गाञ्च।
कर्कटु * पु० सौत्र-कर्क-अटु। करटुपक्षिणि (करकटिया)।
कर्कन्धू * स्त्री० कर्कं कण्टकं दधाति धा-कू नि० मुम्। बदर्य्यां (कुल)।
कर्कर * पु० कर्क हास-अरन्। दर्पणे, चूर्णपाषाणे, [illegible] (काँकर), मुद्गरे च। अच्। कर्कं हासं राति रा-क। कठिने त्रि०।
कर्कराङ्ग * पु० कर्करं कठिनमङ्गं यस्य। खञ्जने पक्षिणि।
कर्करान्धुक * पु० कर्करः कठोरः [illegible]
[illegible] अन्धनाम्ना [illegible] कूपे।
[illegible] * [illegible] राति [illegible] ङीप्। [illegible]
[illegible] [illegible] [illegible]
[illegible]
[illegible]

कटिया) इति ख्याते खगे।

कर्कश * पु॰ करे कशति कश-शब्दे अच् पृषो॰, कर्कः काठिन्यम् अस्त्यर्थे श कृ-क्षेपे विच् कर् कश-हिंसायाम् अच् कर्म॰ वा। कासमर्दे (कासन्दा), काममर्दे, इक्षौ, खड्गे, खरस्पर्शे च। साहसिके, क्रूरे, निर्दये, खरस्पर्शवति च त्रि॰।

कर्कशच्छद * पु॰ कर्कशः छदः पत्रमस्य। (सिहोड़ा) शाखोटवृक्षे, पटोले च। कर्कशदलोऽप्यत्र। कोषातक्यां स्त्री॰ टाप्।

कर्कसार * न॰ कर्कं श्वेतं सरति गच्छति सृ-अण्। करम्भे (दधिमिश्रितशक्तु)।   [कुष्माण्ड्यां स्त्री॰ वा ङष्।

कर्कारु * पु॰ कर्कं श्वेततामृच्छति ऋ-उण्। कुष्माण्डे।

कर्कोट * पु॰ कर्क-ओट। सर्पभेदे। स्वार्थे कन्। "कर्कोटको नाम सर्पो यो दृष्टिविष उच्यते" इत्युक्तलक्षणे सर्पे, बिल्ववृक्षे, इक्षौ, (बाँकरोल) इति ख्याते वृक्षे च।   [घोषातक्याम्।

कर्कोटकी * स्त्री॰ कर्क-ओट-संज्ञायां कन् गौरा॰ ङीष्। पीत-

कर्कोटी * स्त्री॰ कर्क-ओट गौरा॰ ङीष्। (काँकुड़) कर्कट्याम्, कुष्माण्डयां च। स्वार्थे कन्। कर्कोटिकाप्यत्र।

कर्चूर * पु॰ कर्ज-ऊर पृषो॰। स्वर्णे (कचूर) गन्धद्रव्ये, शट्यां च।

कर्ज * पीड़ायाम् भ्वादि॰ पर॰ सक॰ सेट्। कर्जति अकर्जीत्।

कर्ण * भेदने अदन्त चुरादि॰ उभ॰ सक॰ सेट्। कर्णयति ते अचकर्णत् त। आ-श्रवणे आकर्णयति ते।

कर्ण * पु॰ कृ-नन्, कर्ण-भेदने अच्, कीर्यते शब्दपथाय कॄ-नन् वा। श्रोत्रेन्द्रिये, अरित्रे, कर्णिपातके, अङ्गदेशाधिपे पृथासुते सूर्यांशजे, त्रिभुजक्षेत्रे, भुजकोटिभिन्नायां तिर्यग्रेखायां च।

कर्णकीटी * स्त्री॰ कर्णयति भिनत्ति अच् कर्णः स चासौ कीटः जात्यर्थे ङीप् कीटी कर्म॰। (काणकोटारि) शतपद्याम्।

कर्णगूथ * न॰ ६त॰। कर्णमले।

कर्णजलूका * स्त्री॰ कर्णे जलूकेव। शतपद्याम् (काणकोटारि)। कर्णजलौकस् इत्यप्यत्र।   [इतिनिर्लोचना" इति भट्टः।

कर्णजाह * न॰ कर्णस्य मूलम्। कर्ण-जाह। कर्णमूले "कर्णजा-

कर्णधार * पु॰ कर्णं नौकायाः निकटस्थदण्डं (हाल) धारयति ध-णिच् अण्। नाविके (काण्डारी)।   [भूषणभेदे।

कर्णपाली * स्त्री॰ कर्णं पालयति पाल-अण्। (कानबाला) कर्ण-

कर्णपुष्प * पु॰ कर्ण इव पुष्पं यस्य। मोरटालतायाम्।

कर्णपूर * पु॰ कर्णं पूरयति पूर-अण्। कर्णाभरणे, नीलोत्पले, शिरीषवृक्षे, अशोकवृक्षे च। यस्याः पुष्पैः लोककर्णस्य भूषा।

कर्णपूरक * पु॰ कर्णं पूरयति ण्वुल्। कर्णपूरार्थे।

कर्णमल * न॰ ६त॰। कर्णस्थे मलाकारे पदार्थे, कर्णगूथे।

कर्णललित * त्रि॰ ७त॰। कर्णे (कानाः) लोकद्वन्द्व। कर्ण पु॰।

कर्णवेध * पु॰ विध घञ् ६त॰। कर्णवेधनरूपे संस्कारभेदे।

कर्णवेष्ट * पु॰ वेष्ट वेष्ट्यते अनेन। कुण्डले। ल्युट्। कर्णवेष्टन-मप्यत्र। कर्णाभरणे न॰।

कर्णशष्कुली * स्त्री॰ कर्णस्य शष्कुलीव। कर्णगोलके, तन्मध्याकाशे च। "अवलम्बितकर्णशष्कुली" इति नैषधम्।

कर्णशूल * न॰ ६त॰। कर्णरोगभेदे।   [लताभेदे।

कर्णस्फोटा * स्त्री॰ कर्णं स्फोटो विदारणं यस्याः। (कानफाटा)

कर्णाट * पु॰ "रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि। कर्णाटदेश" इत्युक्तदेशे काव्यरीतिभेदे च। स्त्री॰ ङीप्।

कर्णाभरणक * पु॰ कर्णाभरणमिव कायति पुष्पद्वारा। आरग्वधे वृक्षे (सोन्दाल)।   [कर्णपालने।

कर्णास्फाल * पु॰ आ+स्फुर-णिच् स्फालादेशः ६त॰। करिणां

कर्णि * पु॰ कर्ण-इन्। शरभेदे, कण्टकारिकायाम्। स्त्री॰ वा ङीष्।

कर्णिका * स्त्री॰ कर्ण-ठन्। करिहस्ताग्रे, करमध्याङ्गुलौ, बीजकोषे, पद्मवराटे, मेढ्रम्याम्, कुट्टिन्याम्, अग्निमन्थवृक्षे, अश्वगोलते च। कर्ण+भूषणे इकन्। कर्णभूषणभेदे।

कर्णिकार * पु॰ कर्णिकामृच्छति ऋ-अण् उप॰। (सोन्दाल) वृक्षभेदे, आरग्वधवृक्षभेदे च (छोट सोन्दाल)।

कर्णीरथ * पु॰ कर्णः मानोन्नयनादस्य कर्णी स्कन्धः स्त्र इव सोऽस्ति यस्य स समासान्तः कप् स चासौ रथो रथगुप्त्यं वाहनं कर्म॰। स्कन्धवाह्ये याने (पालकी) इत्यादौ।

कर्णीसुत * पु॰ कर्ण्याः कंसमातुः सुतः। कंसासुरे।

कर्णेजप * पु॰ कर्णे जपति जप-अच् सप्तम्या अलुक्। सूचके, पिशुने, खले च।   [अचकर्तत् त।

कर्त * शैथिल्ये अद॰ चुरा॰ उभ॰ सक॰ सेट्। कर्तयति ते

कर्तन * न॰ कृती छेदने कृत ल्युट्। छेदने। सूत्रनिर्माणे सूत्र-निर्माणव्यापारे (काटना काटा)।

कर्तरी * स्त्री॰ कृत-अच् कर्तं राति रा-क गौरा॰ ङीष्। [illegible] स्याम्, [illegible] (काती), [illegible] (कैंचि) च, "[illegible] कर्तरी नाम [illegible]" इति ज्योतिषोक्ते योगभेदे च।

कर्तृ * त्रि॰ कृ-तृच्। कारके, व्याकरणोक्ते कारकभेदे [illegible] क्रियाश्रये स्वतन्त्रे, कर्तरि च। [illegible] पु॰।

कर्त्तृका * स्त्री॰ कृत-तृच् [illegible] कन्। [illegible]।

कर्द * [illegible] अक॰ चुरा॰ [illegible] सेट्। [illegible] अचकर्दत् त। [illegible]।

कर्दी * स्त्री॰ कर्द-अच् गौरा॰ ङीष्। [illegible] इति ख्याते [illegible]। [illegible]।

कर्द * कुत्सितशब्दे उदरशब्दे च भ्वादि॰ पर॰ अक॰ सेट्। कर्दति अकर्दीत्।

कर्द पु॰ कर्द अच्। कर्दमे।

कर्दट * पु॰ कर्द अटन्। पद्मकन्दे, [illegible]

कर्दन * पु॰ कर्द-ल्युट्। [illegible] [illegible]

पतिभेदे। मांसि न०। पद्मवति त्रि०। [पद्मे एव हि प्ररोहः।
कर्दमक * पु० कर्दमे कायति प्रकाशते कै-क। शालिभेदे, तस्य
कर्पट * पु० न० कृ-कर्मणि विच्-कर्-पटः कर्म०। लक्तके, जीर्णवस्त्रे (लाताकानि), मलिनवस्त्रे च। करस्य पटः मक०। धर्मादिमार्जनार्थे हस्तन्यस्ते वस्त्रखण्डे, कषायरक्ते वस्त्रे च।
कर्पटधारिन् * त्रि० कर्पटं मलिनं जीर्णं रक्तं वा वस्त्रं धारयति णिनि। मलिनादिवस्त्रधारके भिक्षुकादौ। [कर्पटोऽप्यत्र।
कर्पटिक * त्रि० कर्पट+ठन्। कर्पटवस्त्रयुक्ते भिक्षुकादौ। इनि
कर्पर * पु० कृप-अरन् लत्वाभावः। कपाले, शीर्षास्थि (माथार खुली), शस्त्रभेदे (कात), कटाहे उदुम्बरे वृक्षे च।
कर्पराश * पु० कर्परस्यांशः। (खापरा) कर्करायाम्। [वृक्षे च।
कर्पराल * पु० कर्पर इव अलति अल-अण्। कन्दराले, अक्षोट-
कर्परी * स्त्री० कृप-अरन् लत्वाभावः गौ० ङीप्। दारुहरिद्राक्काथसम्भवे तुत्थे (तुँते)। [ङीप्। कर्पासीत्यपि।
कर्पास * पु० न० कृ-पास। वस्त्रयोनौ (कापास) वृक्षभेदे। जातित्वे
कर्पासफल * न० ६त०। (काकाटो) कर्पासबीजे।
कर्पूर * पु० न० कृप-ऊर लत्वाभावः। स्वनामख्याते गन्धद्रव्ये।
कर्पूरमणि * पु० कर्पूरवर्णो मणिः। रत्नभेदे। कर्पूराश्माप्यत्र।
कर्पूररस * पु० कर्पूर एव रसः। रसकर्पूरे।
कर्ब * गतौ भ्वादि० पर० सक० सेट्। कर्बति अकर्बीत्।
कर्बुर * पु० कर्ब उर। राक्षसे, शठ्याम्। वर्णे, हरिताले च न०।
कर्मकर * पु० कर्म करोति कृ-ट। यमे। भृत्ये त्रि०। स्त्रियां ङीप्।
कर्मकाण्ड * पु० कर्मणां समूहः दूर्वादित्वात् काण्डच्। कर्मसमूहे, तत्प्रतिपादके वेदभागे च।
कर्मकार * पु० कर्म+कृ-अण्। लौहकारके जातिभेदे (कामार), वेतनं विना (बेगार) कर्मकारके, वाहके च।
कर्मक्षेत्र * न० कर्मणां तद्विधानार्थोचितं क्षेत्रम्। भारतवर्षे।
कर्मठ * त्रि० कर्मणि शूरः कर्मन्+ठ। क्रियाशूरे।
कर्मण्य * त्रि० कर्मणि साधुः कर्मन्+यत्। कर्मणि योग्ये, तत्र प्रवीणे च। वेतने स्त्री०।
कर्मदेवता * स्त्री० कर्मणा यागादिना देवता। यद्येन देवत्वं प्राप्ते "कश्चित् अश्वमेधादि कर्म कृत्वा महत्पदम्। प्राप्य देवैः पूज्यादतस्ताः कर्मदेवताः" इत्युक्तासु देवे।
कर्मधारय * पु० व्याकरणोक्ते भेदाभेदिना समानाधिकरणेन पदेन घटिते समासभेदे। [कार्यके च।
कर्मन् * न० कृ-मनिन्। क्रियायाम्, व्याकरणोक्ते कर्तुरीप्सिततमकारके
कर्मफल * न० कर्मणः फलम्। कर्मणिजन्यफलेषु सुखदुःखादौ, कर्मपुरुषे च (कामरांगा) वृक्षे।
कर्मभू * स्त्री० कर्म कर्षणादि तन्निमित्तं, पुण्यादिकर्म वा तस्य भूः। कर्षणभूमौ, भारतवर्षे, भारतवर्षे च विहितकर्मानुष्ठेयत्वेन तस्य तथात्वम्।
कर्ममीमांसा * स्त्री० ६त०। कर्मकाण्डप्रधानवेदभागविचारके जैमिनिप्रणीते ग्रन्थे। [कर्म मित्यादर्ण।
कर्ममूल * न० कर्मणां मूलम्। कुशतृणे। तेन हि वैदिकादिकर्म
कर्मरङ्ग * पु० न० कर्मणि भोजनादौ रङ्गो रतिर्यस्मात् रञ्ज घञ्। (कामराङ्गा) वृक्षभेदे, तद्भोजने हि भोजनादौ रुचिर्भवति।
कर्मविपाक * पु० विपच्यते वि-पच-कर्मणि घञ् कर्मणो विपाकः। शुभाशुभकर्मजन्ये तत्फलभूते सुखदुःखादौ।
कर्मव्यतिहार * पु० वि+अति-हृ-घञ्। कर्मणा व्यतिहारः ३त०। परस्परैकजातीयक्रियाकरणे, क्रियाविनिमये च। यथा कश्चित् येन कर्मणा इतरं सम्बध्नाति, इतरोऽपि तज्जातीयेन कर्मणा तं सम्बध्नाति, तयोः कर्मविनिमयो भवति। यथा अन्योन्यं ताड़यत इत्यादौ। [इयं कर्मकारिणि च।
कर्मशूर * पु० कर्मणि शूरः। प्रयत्नेन प्रारब्धकर्मसमापके, श्रमके
कर्मसङ्ग * पु० कर्मणि सङ्ग आसक्तिः सञ्ज-घञ्। इदमहं करोमि अनेनैतत् फलं भोक्ष्ये इत्याकारकेऽभिनिवेशे।
कर्मसन्न्यासिन् * पु० विहितकर्माणि विधानेन सन्न्यस्यति सं+नि+अस-णिनि। सर्वकर्मत्यागिनि यतौ।
कर्मसाक्षिन् * पु० साक्षात् पश्यति नि० साक्षी ६त०। "सूर्यः सोमो यमः कालो महाभूतानि पञ्च च। एते शुभाशुभस्येह कर्मणो नव साक्षिणः" इत्युक्तेषु सूर्यादिषु नवसु।
कर्मसिद्धि * स्त्री० ६त०। इष्टानिष्टफलप्राप्तौ। "स्वकर्मसिद्धिं पुनराशशंसे" इति कुमारः।
कर्माध्यक्ष * पु० ७त०। क्रियासाक्षिणि कृताकृतावेक्षके।
कर्मार * पु० कर्म ऋच्छति ऋ+अण्। कर्मकारे (कामार) जातिभेदे, वंशभेदे (बेड़वांश), कर्मरङ्गे वृक्षे च।
कर्मिष्ठ * त्रि० अतिशयेन कर्मी इष्ठन् इनेर्लुक्। क्रियादक्षे नरे।
कर्मेन्द्रिय * न० कर्मणां क्रियाणां साधनभूतमिन्द्रियम्। हस्तादौ, ततो हि वचनादानादिक्रिया निष्पद्यते।
कर्व * दर्पे भ्वादि० पर० अक० सेट्। कर्वति अकर्वीत्।
कर्वट * पु० कर्व-अट। हिमतग्राममध्ये सुन्दरस्थाने, यत्र क्रयविक्रयादिना सन्निहितजनपदवासिनो जना आगच्छन्ति तादृशे ग्रामे पुरे वा, नगरमात्रे च।
कर्वर * पु० कृणाति हिनस्ति कृ-वधे वरच्। व्याघ्रे, राक्षसे च। शृगाले स्त्री० ङीप्। [स्वार्थे कन् ह्रस्व। स्त्री जातत्वे
कर्विदार * पु० कर्वं दर्पं घण् तं दारयति दृ+अण्। कोविदारवृक्षे।
कर्शुर * पु० कर्श-उर। राक्षसे, पापे, नानावर्णे च। तद्वति त्रि०।
कर्ष * पु० न० कृष-अच् कर्मणि घञ् वा। षोडशमाषके मानभेदे तन्मिते सुवर्णे च।
कर्षक * पु० कृष-ण्वुल्। कृषीवले। [स्वाम् स्त्री० टाप्।
कर्षण * पु० कर्षं तन्मानं फलमस्य। विभीतकवृक्षे, आमल
कर्षिणी * स्त्री० कृष णिनि। खोरिपोदवृक्षे, खलीने च (लगाम

शामिर मोढ़) । [कुष्माण्डां, मद्दीमावे च स्त्री० ।

कर्पू * पु० कृप-ऊ । करीषाग्नौ (घुटियार आगुन), कूपौ च ।

कर्हि * अव्य० कस्मिन् काले किम्+र्हिल् कादेशः । अनद्यतने ।

कस्मिन् काले इत्यर्थे ।

कर्हिचित् * अव्य० कर्हि+चित् । कस्मिंश्चित्काले इत्यर्थे ।

कल * संख्यायां सक० शब्दे अक० भ्वादि० आत्म० सेट् । कलते

अचकलिष्ट । [अचीकलत् त ।

कल * गतौ संख्यायाञ्च अद० चुरा० उभय० सक० सेट् । कलयति ते

कल * मोदने (प्रेरणे) चुरा० उभय० सक० सेट् । कालयति ते

अचीकलत् त ।

कल * पु० कल-शब्दे घञ् अवृद्धिः मधुराव्यक्तशब्दे, मालदृचे च ।

कड मदे घञर्थे क डस्य लः । रेतसि । अजीर्णे त्रि० ।

कलकण्ठ * पु० कलः कलान्वितः कण्ठोऽस्य । कोकिले, हंसे, पारा-

वते च । जातित्वे स्त्रियां ङीप् कलकण्ठी । [इति ।

कलकल * पु० कलप्रकारः गुणवचनत्वात् प्रकारे द्वित्वम् । कोला-

कलघोष * पु० कलो घोषो यस्य । कोकिले ।

कलङ्क * पु० कलयति क्विप् कल् तामो अङ्कयति चिह्ने, अपवादे,

ताम्रादिधातूनां मलभेदे (कलङ्क), ताम्रादियोगात् अश्वा-

देर्विकारे च ।

कलञ्ज * पु० केति शब्दं लञ्जति भाषते क इत्यव्यक्तानुकरणम् ।

लजि-अण् । विषाक्तास्त्रेण हते मृगे, पक्षिणि च "न कलञ्जं

भक्षयेत्" इति श्रुतिः । तान्त्रकूटे 'कलञ्जसंवेष्टनधूमपानात्

स्यादन्नमरणिमुखरोगहानिः" इति वैद्यके तस्मैव तस्मात् सुखप-

दशदिदहक्त । "दशकैर्दशभिः प्रोक्तः कलञ्जो नाम" इत्युक्तपरि-

माणे च ।

कलत्र * न० गड-त्रन् गस्य क डस्य लः । नितम्बे, भार्यायाञ्च ।

कलधौत * न० कलेन मलः धौतोऽस्य । स्वर्णे, रजते च । कलध्वन-

मध्यत्र । [अव्यक्ते शब्दे ।

कलध्वनि * पु० ६ब० । कोकिले, पारावते, मयूरे च । कर्म० । मधु-

कलन * पु० कल-ल्यु । वेतसवृक्षे । भावे ल्युट् । चिह्ने, दोषे, लङ्घने,

एकमासिकगर्भे, ग्रहणे, संख्याने, गमने, ग्रसने च, न० । "कल-

नात् सर्वभूतानाम्" इति श्रुतिः ।

कलभः * पु० कल-अभच् । पञ्चवर्षीये हस्तिशावके, धुस्तूरवृक्षे च ।

कलभवल्लभ * पु० ६त० पीलुवृक्षे । [इव ते रघुम्" इति रघुः ।

कलम * पु० कल-अम । लेखन्याम्, चौरे, धान्यभेदे च । "कलमा

कलम्ब * पु० कड-अम्बच् डस्य लः । नालिकाशाके (कलमी), शरे,

कदम्बवृक्षे, शाकनाडिकायाञ्च । स्वार्थे कन् । कलम्बकोऽप्यत्रार्थे ।

कलम्बिका * स्त्री० कलम्बो भूम्नाऽस्त्यस्य ठन् । कलम्बीशाके, ग्रीवा

शिरायां, मन्यायाञ्च ।

कलम्बी * स्त्री० कड-अम्बच् डस्य लः कि जले लम्बते अच् वा गौरा०

ङीष् । (कलमी) जलजशाकभेदे । "कलम्बी गोपभाजिका"

इति श्रुतिः । [कर्म० । मधुराव्यक्ते शब्दे ।

कलरव * पु० रु-अप् कलो रवोऽस्य । कोकिले, पारावते, च ।

कलल * पु० न० कल-अलच् । गर्भवेष्टनचर्मणि, जरायौ, शुक्रशोणि-

तयोः संसर्गे च । [निर्यासे (धुना) ।

कललज * पु० कललं शुक्रशोणितसङ्घात इव जायते जन-ड । साल-

कलविङ्क(ङ्ग) * पु० कलं वङ्क(ङ्ग)ते वगि (वकि)-गतौ अच् पृषो०

अत इत्वम् । चटके, स्वर्गे, इन्द्रयवे च ।

कलश * पु० न० कलं शब्दं शवति श-गतौ ड । घटे ।

कलशि * स्त्री० कलं श्यति शो-इन् आलोपः । घटे । "कलशिमुद-

धिगुर्वीम्" इति माघः । वा ङीप् । "अवलम्बितकर्णशष्कुली-

कलशीकम्" इति नैषधम् । पृश्निपर्ण्याम् (चाकुलिया) ।

कलस * पु० केन जलेन लसति अच् । घटे "कलसं जलसंभृतम्"

इति नैषधम् । जातित्वात् स्त्रियां ङीप् । दीप्यमाने त्रि० ।

कलह * पु० न० कलं हन्ति हन-ड । विवादे, युद्धे, असिकोषे च ।

कलहंस * पु० कलप्रधानो हंसः । राजहंसे, "कलहंसः कलयाम्ब-

भूव सः" इति नैषधम् । कादम्बहंसे (बालहाँस), नृपोत्तमे,

परमात्मनि, वर्णवृत्तेषु, वयोदशाक्षरपादके छन्दोभेदे च ।

कलहान्तरिता * स्त्री० "कोपात् कान्तं पराणुद्य पश्चात् तापा-

न्विता यदि । कलहान्तरिता प्रोक्ता" इत्युक्तलक्षणे नायिका-

भेदे ।

कला * स्त्री० कल-अच् । चन्द्रमण्डलस्य षोडशे भागे, दत्तधनस्या-

धिकलभ्यांशे (सुद) धनांशे, कालपरिमाणे, ज्योतिषोक्ते राशेः

त्रिंशद्भागस्य षष्टिभागे, नौकायाम्, कपटे, विभूतौ, सामर्थ्ये,

संख्यायां, मरीचिपञ्चाम, चतुःषष्टिप्रकारेषु गीतवाद्यादिषु च ।

कलाद * पु० कलामंशमादत्ते आ+दा-क । स्वर्णकारे, तेन हि धन-

हारगठनार्थे दत्तस्वर्णस्यांशोऽपह्रियते ।

कलादक * पु० कलामत्ति कला+अद-ण्वुल् । स्वर्णकारे, गठनार्थं

दत्तद्रव्यांशस्य भोजनं तेन हि क्रियते । [चन्द्रे ।

कलानिधि * पु० कला निधीयन्तेऽत्र । कला+नि+धा-कि ।

कलानुनादिन् * पु० कलमनुनदति णिनि । भ्रमरे, चटके च ।

कलान्तर * पु० अन्या कला अंशः मयू० । वृद्धिभेदे "मासि शतस्य

यदि पञ्च कलान्तरं स्यात्" इति लीलावती, अन्यस्यां चन्द्रक-

लायाञ्च, "ज्योत्स्नान्तराणीव कलान्तराणि" इति कुमारः ।

कलाप * पु० कलामाप्नोति कला+आप्-अण् । समूहे, मयूरपिच्छे,

भूषणे, काञ्च्याम्, तूणे, चन्द्रे, व्याकरणभेदे, ग्रामभेदे च ।

कलापक * पु० कलाप+क स्वार्थे कन् । कलापार्थे, हस्तिकण्ठबन्धे,

एकवाक्यतापन्ने श्लोकचतुष्के न० "कलापकं चतुर्भिः स्यात्"

इत्युक्तेः । [श्रावणे वटे च । कल+आप-णिनि । कोकिले ।

कलापिन् * पु० कलापो बर्होऽस्त्यस्य इनि । मयूरे, तद्वर्णुन्दमा-

कलाभृत् * पु० कलां बिभर्ति कला+भृ-क्विप [illegible] शंसी स्त्री० ।

कलाय * पु० कलमयते अय-अच् । [illegible] ८ । शान्द-

कल्कन . . . ० पु० कल्कनानि [illegible] । अजरे । [त्रि० ।

[illegible] ० पु० [illegible] । कलावति

कल्कि ० पु० कल-क्विप् । विभीतकवृक्षे, विठारे, ... [illegible]

च । [illegible]

कल्किन ० पु० [illegible] (कौंचवध) । [च ।

कल्किका ० स्त्री० [illegible] । कोरके, वीरणमूले

कल्किकादि ० न० [illegible] पुष्पपुष्पम् । [illegible]

[illegible]

कल्किकार ० पु० [illegible] भुम्बकर्णापि, पुनिक-

[illegible] । [त्रि० । [illegible]

कल्किकारक ० पु० [illegible] । नारदे । [illegible]

कल्किकारी ० स्त्री० [illegible] (१चनाङ्गमिद्रा)

[illegible]

कल्कि ० पु० [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मुख्यस्य माहात्म्यस्य महात्मनः । भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति" इत्युक्तलक्षणे हरेरवतारे ।

कल्किन् ० पु० कल्क-इनि । "मत्स्यः कूर्मो वराहश्च नरसिंहश्च वामनः । रामो रामश्च रामश्च बुद्धः कल्की च ते दश" इत्युक्ते विष्णोरवतारभेदे ।

कल्प ० पु० क्लृप-णिच् घञ् वा । यज्ञक्रियाणामुपदेशके, विधि-कल्पव्याकरणादीनामन्यतमे वेदाङ्गभेदे, बौधायनादिकृते यज्ञादेर्यज्ञक्रमविधाने, ब्रह्मणो दिवसे, प्रलये, न्याये, विकल्पे, कल्पवृक्षे, आद्ये च । समासपदस्थः सादृश्ये कल्पम् । यथा पितृकल्पः गुरुकल्प । [त्रि० ।

कल्पक ० पु० क्लृप+णिच्-ण्वुल् । नापिते । छेदके, कल्पनाकारके

कल्पतरु ० पु० कल्पते फलदानाय अच् कर्म० । कल्पवृक्षे । [भेदे च ।

कल्पन ० न० क्लृप-भावे ल्युट् । क्लृप्तौ, छेदने, न्यायोक्ते अनुमिति-

कल्पना ० स्त्री० क्लृप+णिच्-युच् । पल्ययनादिना करिणां सज्जी-करणे, न्यायोक्ते अनुमितिभेदे, रचनायाञ्च ।

कल्पान्त ० पु० ७त० । प्रलये ।

कल्पाय ० पु० [illegible] पर्यो० [illegible]

[illegible] । पापे न० । महिति, [illegible] च त्रि० ।

कल्पाप ० पु० [illegible]

[illegible]

[illegible]

कल्पवृक्ष ० पु० [illegible]

[illegible]

कल्य ० न० [illegible] प्रभाते, [illegible]

[illegible]

[illegible] त्रि० । [illegible]

कल्याण ० स्त्री० [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

कवच * पु॰ कं वातं वञ्चयति वञ्च-क। गर्दभाण्डे वृक्षे, पटहभाण्डे च। वर्मणि, मन्त्रोक्ते पूजादौ पात्रे भूर्जपत्रे लिखित्वा धार्य्ये च देवतामन्त्रन्यासयुक्ते वाक्यस्तोमे पु॰ न॰।

कवर ० पु॰ न॰ कु-वरच्। अम्ले, लवणे, केशपाशे च। खचिते, संपृक्ते, शबले च त्रि॰। बर्बरायां स्त्री॰ टाप्। कं शिरो वृणोति आच्छादयति क+वृ-अच् गौरा॰ ङीष्। केशविन्यासे, केशवेशे, कालोन्यां, हिङ्गुपत्र्यां, बर्बरायाञ्च स्त्री॰। [एवं चवर्गादयः।

कवर्ग * पु॰ कघटितो वर्गः मध्यपदलोपः। कादिषु पञ्चसु वर्णेषु।

कवर्गीय ० पु॰ कवर्गे भवः छ। कवर्गमध्यभवे वर्णे। यत्। कवर्ग्य। एवं चवर्ग्यचवर्गीयादयः।

कवल * पु॰ केन वलते वल-अच्। ग्रासे, (वेलेमाछ) मत्स्यभेदे च।

कवलित * त्रि॰ कवलं ग्रासं करोति णिच्-क्त। भुक्ते, ग्रस्ते च।

कवाट ० न॰ कं वातं वटति वट-वेष्टने अण्। द्वाररोधके काष्ठखण्डे। गौरादित्वात् ङीष्। कवाटी।

कवि * पु॰ कु-इ। शुक्रे, वाल्मीकिमुनौ, भास्करे, काव्यकर्त्तरि, ब्रह्मणि च। अतीतानागतसर्वज्ञे सूक्ष्मार्थदर्शिनि पण्डिते च त्रि॰। खलीने स्त्री॰ वा ङीप् कवी।

कविक * न॰ कु-इ संज्ञायां कन्। खलीने, यद्धि लौहमयं घोटकमुखाभ्यन्तरे प्रग्रहयोजनार्थं दीयते तस्मिन्।

कविका * स्त्री॰ कु इ संज्ञायां कन्। खलीने, मत्स्यभेदे च (कोर)।

कविज्येष्ठ * पु॰ कविषु ज्येष्ठः। वाल्मीकिमुनौ।

कविता * स्त्री॰ कवेः कर्म भावो वा तल्। कवित्वे काव्ये "केषां नैषा भवति कविता कामिनीकौतुकाय" इति प्रसन्नराघवम्।

कवोष्ण * न॰ ईषदुष्णम् को॰ कवादेशः। ईषदुष्णे स्पर्शे।

कव्य * न॰ कु-यत्। पितृदेवेभ्यो देयेऽन्नादौ। [पितृगणभेदे।

कव्यवाह * पु॰ कव्यं पितृदेवेभ्यो द्रव्यं वाहयति वह-अण्।

कश * शब्दे भ्वा॰ सक॰ पर॰ सेट्। कशति अकशीत् अकाशीत्।

कशा ० स्त्री॰ कश-अच्। अश्वादिताडनार्थे ताडनसाधने पदार्थे (कोड़ा, चाबुक)। [इत्यादौ।

कशार्ह ० त्रि॰ कशामर्हति अर्ह-अच्। कशाघातार्हे अश्वा-

कशिपु ० पु॰ कश+कु नि॰। अन्ने, वस्त्रे च। [illegible] "[illegible]" इति [illegible]।

कशेरु ० पु॰ न॰ [illegible] [illegible]। [illegible], [illegible] च [illegible]।

कशेरुका * स्त्री॰ [illegible] (केशुर)। [illegible]

कश्मल * न॰ [illegible] च। मूर्च्छायां, [illegible], पापे च।

कश्मीर * पु॰ [illegible] देशे। [illegible]

कश्मीरज * पु॰ [illegible]

कश्य ० न॰ कश-यत्। [illegible], [illegible] च। [illegible]

कशा+यत्। कशार्हे पदार्थेऽश्वादौ।

कश्यप ० पु॰ कश्यं मद्यं पिबति पा-क। "ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः। काश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" इति निरुक्ते मुनिभेदे, मृगभेदे, मत्स्यभेदे च।

कष * वधे भ्वादि॰ पर॰ सक॰ सेट्। कषति अकषीत् अकाषीत्।

कष * न॰ कष-अच्। (कष्टी) पाषाणभेदे, "कषपाषाणनिभे नभस्तले" इति नैषधम्। [कण्डूयने च न॰।

कषण * पु॰ कष-ल्यु। अपक्वे (काँचा)। भावे ल्युट्। घर्षणे,

कषाय * पु॰ कषति कण्ठम् कष-आय। श्योनाकवृक्षे, रागे, अन्तःकरणदोषे, "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते" इति वेदान्तपरिभाषायाम्। धववृक्षे (धगाछ), रसभेदे (कषा), रक्तपीतमिश्रितवर्णे च। तद्वति त्रि॰। क्षुद्रदुरालभायां स्त्री॰।

कषायित ० त्रि॰ कषायो रक्तपीतवर्णो जातोऽस्य इतच्। जातकषाये "कषुमैव कषायितस्तनी" इति कुमारः।

कषायिन् * पु॰ कषाय+इनि। शालवृक्षे, लकुचवृक्षे, खर्जूरीवृक्षे च। विषयरागवति त्रि॰।

कष्ट * न॰ कष-क्त कृच्छ्रगहनयोः कष इति नेट्। पीडायाम् आपदायाम्। पीडायुक्ते, गहने च त्रि॰।

कस * गतौ भ्वादि॰ पर॰ सक॰ सेट्। कसति अकसीत् अकासीत्।

कस * शासने गतौ च अदा॰ इदित् आत्म॰ सक॰ सेट्। कंस्ते चकंसिषे।

कंस * शासने गतौ च सक॰ अदा॰ आत्म॰ सेट्। कंस्ते चकंसिषे।

[illegible] * पु॰ [illegible]। कामरूपे, "[illegible]" इति [illegible]। [भेदे च।

[illegible] * पु॰ [illegible]। [illegible], [illegible] [illegible]

[illegible] * पु॰ न॰ [illegible]। [illegible] (काष्ठ) भारे।

[illegible] * स्त्री॰ [illegible]। [illegible]। [illegible]

[illegible] * स्त्री॰ [illegible]।

[illegible] * न॰ [illegible]। [illegible]। [illegible] स्थले।

[illegible] * न॰ [illegible]। [illegible]। "[illegible]"। [illegible]।

[illegible] * पु॰ [illegible]। [illegible]।

[illegible] * पु॰ [illegible]। [illegible], [illegible] च। [illegible]

[illegible] * स्त्री॰ [illegible]

[illegible] * [illegible], [illegible] त्रि॰

काकस्य नादः।

काकशिम्बा * स्त्री० काकस्यां शिम्बा [illegible] फले यस्याः। गुञ्जायाम्। शब्दा०। काकशिम्बि, काकशिम्बी, काकपाल्यपि।

काकस्फूर्ज * पु० काकस्य स्फूर्जः [illegible] इव स्फूर्जो यस्य। [illegible]।

काकजङ्घा * स्त्री० काकस्य जङ्घे काकजङ्घे यस्याः। स्वनामख्याते वृक्षभेदे (केंवाटेङ्गा)।

काकतुण्डी * स्त्री० काकस्यां तुण्डः। [illegible]।

काकनासिका * स्त्री० काकस्य नासिकेव [illegible] शब्दः। [illegible] काकनासिकेत्यप्युच्यते।

काकशिरा * स्त्री० काकस्येव शिरा। गुञ्जायाम्।

काकतिन्दुक * पु० काकप्रियः तिन्दुकः। काकतिन्दुके (कुचला)।

काकमाची * स्त्री० काकस्य माचीव [illegible]। काकमाचायाम् (गुड़कामाई)। काकमाचाख्या।

काकपद * पु० काकस्य पदं इव। [illegible] "काकानां [illegible]" [illegible] (काकपाद)।

काकपक्ष * पु० काकस्य पक्षः इव। शिरो [illegible] पार्श्वे, [illegible] काकपक्षाकारे [illegible] काकपक्ष। [illegible]।

[illegible]

[illegible] काकतिन्दुके।

[illegible] काकतिन्दुक।

[illegible] काका-

[illegible]

[illegible]

[illegible]

[illegible]म्बाम्। स्त्री० टाप्। महाज्योतिष्मत्यां च ङीप्।

काकादनी * स्त्री० काकैरद्यतेऽसौ काक+अद-ल्युट्। गुञ्जायां,

काकाल * पु० काकं काकेति रवं लाति ला क। द्रोणकाके।

काकिणी * स्त्री० कक-लौल्ये घञ् तम् अणति अण् गौरा०। [illegible] पणचतुर्थांशे "वराटकानां दशकद्वयं यत् सा काकिणी" [illegible] लीलावती। काकिनीत्यप्यत्र।

काकी * स्त्री० काकस्य जातित्वात् स्त्रियां ङीप्। काकोरी काकवर्णत्वात् काकमोलनतायाञ्च।

काकु * स्त्री० काक-उण्। शोकभीत्यादिभिर्ध्वनेर्विकारे, [illegible] दमिके विरक्तार्थकत्पके नञादौ शब्दे च [illegible]

काकुत्स्थ * पु० ककुत्स्थः सूर्यवंशीयः नृपभेदस्तस्यापत्यम्

काकुद * न० काकुं ध्वनिभेदं ददाति धत्ते दा-क, काकुरेऽस्मिन् अस्ति क वा यक०। तालुनि, जिह्वेन्द्रियाधार-स्थाने च (तालुया)।

काकेन्दु * पु० काकवर्णस्तिन्दुः शको०। (कुचला) कटुतिन्दुके।

काकेष्ट * पु० काकानामिष्टः। निम्बे, तस्य हि फलं काकमिष्टम्।

काकोदर * पु० कुत्सितमकति वक्र+अच् कोः कादेशः काकोदरमुदरं यस्य। सर्पे। [illegible]

काकोडु(दु)म्बरिका * स्त्री० काकप्रिया उदुम्बरी [illegible]

काकोल * पु० काक-मौल्ये भावे विच्-घोल। द्रोणकाके, [illegible] शूकरभेदे च। नरकभेदे, विषभेदे च पु० न०। [illegible] [illegible] स्त्री०।

[illegible]

काच * [illegible]

काचित * त्रि॰ काचे शिक्ये चितं धृतं वृत्तो॰। शिक्याधृते पदार्थे।

काञ्चन * पु॰ कचि-दीप्तौ ल्युट्। स्वनामख्याते वृक्षे, चम्पके, नागकेशरे, उदुम्बरे, धुस्तूरे च। स्वर्णे, पद्मकेशरे, काञ्चनादिपुष्पे, दीप्तौ च न॰।

काञ्चनक * पु॰ काञ्चनमिव कायति प्रकाशते कै क। धान्यभेदे, कोविदारवृक्षे च। हरिताले न॰। [(चाँपाकला)।

काञ्चनदली * स्त्री॰ काञ्चनमिव दलं यस्याः। स्वर्णकदल्याम्।

काञ्चनक्षीरी * स्त्री॰ काञ्चनमिव क्षीरं यस्याः गौरा॰ ङीष्। स्वर्णक्षीरीलतायाम्। [(गन्धियारी)।

काञ्चनपुष्पी ० स्त्री॰ काञ्चनमिव पुष्पमस्याः। गन्धिकारीवृक्षे,

काञ्चनार * पु॰ काञ्चनं दीप्तिमृच्छति ऋ-अण्। काञ्चनवृक्षे।

काञ्चनाल पु॰ काञ्चनाय दीप्त्यै अलति पर्य्याप्नोति अल+अच्। कोविदारवृक्षे।

काञ्चनी * स्त्री॰ काञ्चतेऽनया काचि-दीप्तौ करणे ल्युट् ङीप्। हरिद्रायां, गोरोचनायाम्, स्वर्णक्षीरीवृक्षे च।

काञ्चि(ञ्ची) * स्त्री॰ काचि इन् वा ङीप्। स्त्रीकटिभूषणभेदे (चन्द्रहार गोट) "एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका। रशना षोडश ज्ञेया" इत्युक्तलक्षणयष्टौ, गुञ्जायाम् "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका" इति पुरीभेदे च।

काञ्ची(ञ्चि)पद+न॰ ६त॰। जघने। [र्यम्। आरनाले (काँजी)।

काञ्जिक * न॰ अनूज-धात्वर्थनिर्देशे ण्वुल् कुत्सिता अञ्जिका व्यक्ति-

काण * पु॰ कण-निमीलने घञ्। काके। एकचक्षुयुक्ते त्रि॰।

काण्ड * पु॰ न॰ कै-दीप्तौ ड तस्य नेत्वम् किच्च दीर्घः। स्तम्भे, तृणादिगुच्छे, वृक्षस्कन्धे (गुँड़ी), बाणे, अवसरे, प्रस्तरे, नाडीवृन्दे, नाले, ग्रन्थपरिच्छेदात्मके ग्रन्थप्रकरणे, निर्जनस्थाने च। पर्पटवृक्षे पु॰। [(करेला)।

काण्डकटुक ० पु॰ काण्डे स्कन्धेऽपि कटुकस्तिक्तः। कारवेल्ले

काण्डकीलक * पु॰ काण्डे कीलमिव यस्य कप् समा॰। लोध्रे, तस्मिन् कीटसम्बन्धात् हि कीलमिव सर्व्वत्र जायते।

काण्डतिक्त * पु॰ काण्डे तिक्तः। भूनिम्बे (चिराता)।

काण्डपट ० पु॰ काण्ड इव पटः। (कानात) पटभेदे, यस्य सङ्कोचे काण्डरूपता भवति।

काण्डपृष्ठ * त्रि॰ काण्डानि पृष्ठे यस्य। शस्त्राजीवे। "स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत्। तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः" इत्युक्तलक्षणे जने पु॰।

काण्डरुहा * त्रि॰ काण्डात् प्ररोहति। कटुक्याम् (कटकी)।

काण्डीर * त्रि॰ काण्डो बाणोऽस्त्यस्ति ईर। (तीरन्दाज) बाणधरे। अपामार्गे न॰। मञ्जिष्ठायां, कारवेल्लायां स्त्री॰ ङीप् वा।

काण्डेक्षु * पु॰ काण्डेन स्कन्धेन इक्षुरिव। (तालमाखना) तृणभेदे।

कातर ० पु॰ कठेनाधीतः अण्। यजुर्वेदीयशाखाभेदे। अपत्यार्थेऽण्। कठपुत्रादौ त्रि॰।

कातर * त्रि॰ ईषत्तरति स्वकार्य्यं कर्त्तुं शक्नोति कु+तृ-अच् कोः कादेशः। अधीरे, व्यग्रमाकुले, भीते, त्रिशङ्कौ, चञ्चले च। "सद्ध्यासितकातराक्षी" इति रघुः। के जले आतरति प्लवते न तु निमज्जति मज्जति। उडुपे।

काद्रव * न॰ कुत्सितं द्रवं कादेशः। कुत्सितद्रवे।

कात्यायन * पु॰ कत्यस्यापत्यं फक् मुनिभेदे। स च धर्मशास्त्रकर्त्ता, वररुचिनामा व्याकरणवार्त्तिककर्त्ता च।

कात्यायनी * स्त्री॰ कत्यस्यापत्यं स्त्री फञ्। दुर्गायां, सा हि कल्पान्तरे कत्यस्यापत्यमासीत्। अर्द्धवयस्कायां काषायवस्त्रायां विधवायाञ्च। [च। कदम्बे भवः अण्। कादम्बमद्ये त्रि॰।

कादम्ब ० पु॰ कद-विष्-अम्बच्। (कालहाँस) कलहंसे, बाणे, इक्षौ

कादम्बर * न॰ कादम्बं राति लाति प्रशस्तत्वेन रा-क। ऐक्षवे गुडादौ, तस्य विकारे मद्ये च। कादम्बं कदम्बोद्भवं रसं राति रा-क। तत्तुल्यरसत्वात् दधिसरे पु॰।

कादम्बरी * स्त्री॰ कुत्सितं मलिनमम्बरं यस्य कोः कदादेश कदम्बरो बलभद्रस्तस्य प्रिया अण्। हलिप्रियायाम् मदिरायाम्। कादम्बरसं राति रा-क गौरा॰ ङीष्। कोकिलायाम्, सरस्वत्याम्, सारिकायाञ्च।

कादम्बिनी * स्त्री॰ कादम्बाः कलहंसा बलाका वा अनुधावकत्वेन सन्त्यस्याः इनि। मेघमालायाम्। [कालभवे।

कादाचित्क * त्रि॰ कदाचिद् भवः कालार्थत्वात् ठञ्। कदाचित्-

काद्रवेय ० पु॰ कद्र्वाः अपत्यम् ढक्। नराकारे फणालाङ्गूलवति देवयोनिभेदे नागे, सर्पे च। [सुखे च।

कानन * न॰ पु॰ कन-दीप्तौ ल्युट् युच् वा। वने, गृहे, ब्रह्मणो

काननाग्नि * पु॰ ६त॰। शमीवृक्षे, तज्जातवह्निना हि वनदाहः।

कानीन * पु॰ कन्याया अनूढाया अपत्यम् अण् कनीनादेशश्च। "कानीनः कन्यकाजातो मातामहसुतो मतः" इत्युक्ते पुत्रभेदे। यथा व्यासः कर्णश्च।

कान्त ० पु॰ कन-क्त, कम-क्त वा। पत्यौ, लौहे, सूर्य्यपूर्वकः सूर्य्यकान्तशिलायाम्, चन्द्रपूर्व्वकः चन्द्रकान्तमणौ, वसन्ते, हिज्जलवृक्षे च। कस्य ब्रह्मणोऽन्तो यस्मात्। वासुदेवे। कुङ्कुमे, मौहभेदे च न॰। मनोरमे, शोभने, अभीष्टे च त्रि॰। भार्य्यां, प्रियङ्गुवृक्षे च स्त्री॰।

कान्तपुष्प * पु॰ कान्तं पुष्पमस्य। कोविदारवृक्षे। [वृक्षे।

कान्तलक ० पु॰ कान्तं लकति लक-आस्वादने अच्। (तुँद) तुन्न-

कान्तलौह ० पु॰ कान्तो लौहो यस्य। अयस्कान्ते। कर्म॰। (कान्तिलौह) लौहसारे।

कान्ताङ्घ्रिदोहद * पु॰ कान्ताङ्घ्रिः नारीपादस्पर्शः दोहदं पुष्पोद्गमौषधं यस्य। अशोकवृक्षे।

कान्तायसम् * न॰ कान्तमयः अच् समा॰। (कान्तिलौह) लोहसारे। ६त॰। अयस्कान्ते मणौ।

कान्तार • पु॰ कस्य जलस्य नृपस्य वान्तं कान्तं मनोहरं वा ऋच्छति ऋ-अण्। कोविदारवृक्षे, इक्षुभेदे, उपद्रवे, कानने, वह्निभेदे, महारण्ये, दुर्गमवर्त्मनि, गर्त्ते च।

कान्तारक • पु॰ कान्तं वनमृच्छति ऋ ण्वुल्। (काजला) इक्षुभेदे।

कान्ति • स्त्री॰ कम-क्तिन्। शोभायां, दीप्तौ, अभिलाषे च। [त्रि॰।

कान्तिदा • स्त्री॰ कान्ति+दा-क। सोमराजीलतायाम्। कान्तिप्रदे

कान्तिदायक • न॰ कान्ति+दा-ण्वुल्। कालीयकद्रव्ये। कान्ति-प्रदे त्रि॰। [भक्ष्यभेदे।

कान्दव • न॰ कन्दौ सर्वतापे संस्कृतम् अण्। (मिठाइ)

कान्दविक • त्रि॰ कान्दव पण्यमस्य ठक्। अपूपकारिणि तदुप-जीविनि (मिठाइकर)। [भोक्ता पचादिरि।

कान्दिग्भूत • त्रि॰ कां दिशं यामीत्याकुलतया भूतः भयतः पलायितः। प्रयो॰।

कान्दिशीक • त्रि॰ कां दिशं यामीत्याह ठक् प्रयो॰। भीत्या पला-यिते। [देशभेदे, जिनभेदे च (कनौज)।

[illegible]

कामदुघा • स्त्री॰ कामं दोग्धि दुह-क घादेशः। अभीष्टसम्पादयि-त्र्याम् सुरभी गवि।

कामदुह् • स्त्री॰ कामं दोग्धि दुह क्विप्। सुरभौ गवि। [गवि।

कामधेनु • स्त्री॰ कामस्य अभीष्टस्य दोहनस्य हेतुर्धेनुः। सुरभी

कामध्वंसिन् • पु॰ कामं ध्वंसयति ध्वन्स+णिच् णिनि। शिवे।

कामपाल • पु॰ कामान् पालयति पाल-रक्षणे अण्। बलभद्रे।

कामम् • अव्य॰ कम+णिङ्-अमु। अनुमतौ, प्रकामे, पर्याप्ते, असूयायाम्, अनुमतौ, अकामानुमतौ, स्वच्छन्दार्थे, अनिष्टाभ्यु-गमे स्वीकारे च। [रूपे, सुन्दररूपे च त्रि॰।

कामरूप • पु॰ स्वनामख्याते देशभेदे। कामो रूपं यस्य। स्वेच्छा-

कामरूपिन् • पु॰ कामतो रूपं यस्य इनि। विद्याधरे। मनोज्ञरू-पवति, स्वेच्छारूपधारिणि च त्रि॰।

कामल • पु॰ कामेन लस्यति लस-ड। वसन्तकाले। मत्वर्थे लच्। कामयुक्ते त्रि॰। कामं कान्तिं लुनाति लू-ड। रोगभेदे (कामोला) पु॰ स्त्री॰। स्त्रियां टाप्।

कामवल्लभ • पु॰ ६त॰। आम्रवृक्षे, तस्य कुसुमं हि कन्दर्पप्रियम्।

कामवृन्ता • स्त्री॰ कामतो वृन्तं यस्याः। पाटलायाम्।

कामवृक्ष • पु॰ कामेन बीजाङ्कुरनिरपेक्षतया यथेच्छं वृक्षः। वन्दाके (परगाछा)।

कामशर • पु॰ कामस्य शर इव मुकुलत्वेन। आम्रवृक्षे।

कामसख • पु॰ ६त॰। कामस्य सखा+टच् समा॰। वसन्तकाले, तदुद्दीपके चन्द्रे च। [वात्स्यायनप्रणीते ग्रन्थे।

कामसूत्र • न॰ कामस्य तत्त्वस्य सूत्रम्। कामतत्त्वप्रतिपादके

कामाङ्कुश • न॰ कामस्याङ्कुश इव। नखे।

कामात्मता • स्त्री॰ कामात्मनो भावः तल्। कर्मफलाभिलाषयो-गित्वे। "कामात्मता न प्रशस्ता" इति मनुः।

कामात्मन् • त्रि॰ काम फलवाञ्छायामात्मा अन्तःकरणं यस्य। फल-कामनावति, कामाकुलचित्ते च। काम आत्मा स्वरूप यस्य। कामरूपे कामायमानविषयासक्तचित्तत्वेन तद्रूपताप-न्नात्मा।

[illegible]

कामीन * पु० काममनुगच्छति ख। रामपूगे। कामानुगते त्रि०।

कामुक * पु० कम+णिङ्-उक। अशोकवृक्षे, अतिमुक्तके, माधवीलतायाम्, चटके च। मैथुनकामनातिशयवति त्रि०। स्त्रियां ङीप् कामुकी। इच्छामात्रवत्यान्तु टाप् कामुका।

कामुककान्ता * स्त्री० कामुकानां कान्ता प्रिया। अतिमुक्तकलतायाम्।

काम्पिल्य * पु० कम्पिलाया नद्या अदूरभवो देशः ण्य। उत्तरदेशभेदे, तत्र जातायां गुण्डारोचनाख्यायां लतायाञ्च।

काम्बल * पु० कम्बलेन परिवृतो रथः। कम्बलेन समन्ताद्वेष्टिते रथे।

काम्बविक * पु० कम्बुः शङ्खः शिल्पमस्य। शङ्खकारे (शाँखारि)।

काम्बोज * पु० कम्बोजो देशोऽभिजनो निवासो वा यस्य अण्। कम्बोजदेशोद्भवेऽश्वे, पुन्नागवृक्षे, म्लेच्छभेदे च। धवलखदिरे, माषपर्ण्याम्, हयपुच्छ्याञ्च। स्त्री० ङीप्।

काम्य * न० कम+णिङ्-यत्। "यत् किञ्चित् फलमुद्दिश्य, यज्ञदानतपःक्रिया। क्रियते बहुमायाभिस्तत्काम्यं परिकीर्त्तितम्॥" इत्युक्ते कर्मणि। कमनीये, सुन्दरे च त्रि०।

काय * पु० चीयतेऽस्थ्यादिभिः चिञ्+घञ् नि०। देहे। कः प्रजापतिर्ब्रह्मा वा देवतास्य अण् इत् अन्तादेशः हविरादेशश्च। प्रजापतिदेवताके चरौ, प्राजापत्यविवाहे कनिष्ठानामिकयोरधोभागे, स्वल्पाङ्गुलिमूलरूपे, ब्राह्मे तीर्थे, लक्ष्ये, स्वभावे, मूलधने च।

कायस्थ * पु० काये तिष्ठति काय+स्था-क। परमात्मनि, लिपिकरवृत्तौ (कायत) जातिभेदे च। कायस्थितत्वतया स्था+क-टाप् हरीतक्याम्, आमलक्याञ्च स्त्री०।

कायिका * स्त्री० कायेन निर्वृत्ता ठक्। गवादिकर्मकरणरूपायां "दोह्यवाह्यकर्मयुक्ता कायिका समुदाहृता" इति व्यासोक्तायां वृद्धौ, प्रत्यहं पणतदर्द्धादिदेयवृद्धौ च "कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका" इति नारदवचनात्।

कार * पु० कृ-हिंसायां, कृ करणे वा भावे घञ्। वधे, निश्चये, यत्ने, क्रियायाञ्च। कृ विक्षेपे आधारे घञ्। हिमाद्रौ, यतौ च। कर्मोपपदे कर्त्तरि अण्। तत्कर्मकर्त्तरि, यथा कर्मकारः स्वर्णकार इत्यादि। कृ-कर्मणि घञ्। बलिसे धान्यादिराशौ।

कारक * त्रि० कृ-ण्वुल्। क्रियाजनके। क्रियोत्पादके साक्षात् क्रियान्वयिनि व्याकरणोक्ते कर्त्तृकर्मादिषु षट्सु न०।

कारकदीपक * न० चमत्कारजनके अर्थालङ्कारभेदे सा० १०प०।

कारण * न० कृ+णिच्-करणे ल्युट्। नैयत्येन यद्व्यतिरेकेण कार्य्यानुत्पत्तिस्तत्साधकम्, यथा दण्डं विना घटस्यानुत्पत्तिरतो दण्डो घटस्य कारणम्। साधने, करणे, देहे च। कृण् हिंसायां णिच् भावे ल्युट्। वधे। क्विप् इति। कर्मणि, वाद्यभेदे च। कृण् हिंसायां णिच् युच् टाप् कारणा। यातनायां स्त्री०।

कारणमाला * स्त्री० अर्थालङ्कारभेदे। साहित्यदर्पणे १० परि०।

कारणोत्तर * न० कारणेन उत्तरम्। व्यवहारेषु वादिप्रतिवादिवाक्ये इत्यु सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलतामाधनकारणकथने, यथा अयं शतं धारयतीत्यभियोगे सत्यं गृहीतं किन्तु शोधितम् इत्यं भूमिरियं दीयानेन भुज्यते इत्यभियोगे सत्यमेतस्य भूमिः किन्तु दानेन क्रयादिना वा इदानीं ममेत्युत्तरकथनम्। कारणमप्येतदर्थे "मिथ्योत्तरे पूर्ववादे कारणे प्रतिवादिनि" इति कारणोत्तरेऽपि कारणशब्दप्रयोगात्।

कारण्डव * पु० रम-ड तस्य नेत्वम् रण्डः ईषत् रण्डः कारण्डः तं वाति वा-क। हंसभेदे।

कारम्भा * स्त्री० ईषत् रम्भा कोः कादेशः। प्रियङ्गुवृक्षे।

कारव * पु० केति रवोऽस्य। काके।

कारवी * स्त्री० कारं वाति वा+क, केन जलेन रौति अच् गौरा० ङीष्। रु+अच् करवो मयूरस्तस्येदम् अण्, कृ-हिंसायां विच् किप् कार् तमवति अण् वा। शतपुष्पायाम्, वृद्धजटायाम्, मयूरशिखायाम्। कारवेल्ले, त्वक्पत्राम् (तेजपात), कृष्णजीरके च।

कारवेल * पु० कारं वेल्लते वेल्ल-अण्। (करेला) लताभेदे। अल्पार्थे ङीप्। क्षुद्रकारवेल्लायाम् (उच्छा)।

कारस्कर * पु० कारं करोति कृ-ट नि० सुट्। किम्पाकवृक्षे।

कारा * स्त्री० कृ-भिदादित्वात् अङ् नि० दीर्घः। बन्धनागारे, दूत्याम्, वीणाया अधःकाष्ठमयभाण्डे, सुवर्णकारिकायाञ्च।

कारागार * न० कारैवागारम्। बन्धनालये।

कारापथ * पु० लक्ष्मणात्मजयोरङ्गदचन्द्रकेत्वो राज्यविषये देशभेदे।

कारि * स्त्री० कृ-इञ्। क्रियायाम्। शिल्पिनि त्रि०।

कारिका * स्त्री० कृ धात्वर्थनिर्देशे ण्वुल्। क्रियायाम्। कर्त्तरि ण्वुल्। नटीवृत्तौ। स्वल्पाक्षरबहुलार्थबोधके श्लोकविशेषे च। कृ-भावे ण्वुल्। यातनायाम्। कृ ण्वुल्। नापितादिकर्त्र्याम्, हस्तिभेदे च (शब्द)।

कारिता * स्त्री० कृ+णिच् क्त। "कारिता नाम या वृद्धिर्विना स्वयं कृता" इति उक्तायां वृद्धिभेदे (सूद)।

कारीरी * स्त्री० कं जलमृच्छति क+ऋ णिच् कार् तेन शम् ईरयतीति ईर-अण्। वृष्ट्यादिकामनया कर्त्तव्यायाम् इष्टिभेदे। "कारीरीमिष्टिं" इति श्रुतिः।

कारु * त्रि० कृ-उण्। शिल्पिनि, कारके च। शिल्पशालिनि पु०।

कारूष * पु० कं जलमरुषति, कु कुत्सितं रुषति वा रुष-क। वाल्मीके, वर्णसङ्करे, मेच्छे, धान्यके देशभेदे निरुक्तिविशेषे च।

कारुणिक * त्रि० करुणा शीलमस्य ठक्। दयालौ। दयावति।

कारुण्य * न० करुणैव स्वार्थे ष्यञ्। दयायाम्।

कार्त्तस्वर * न० कृतस्वरे आकरभेदे भवं, कृतस्वरेण नद्या आगतं वा अण्। स्वर्णे, धुस्तूरे, नागकेशरे च।

कार्त्तिक * पु० कृत्तिकाया युक्ता पौर्णमासी कार्त्तिकी सास्मिन् मासे अण्। अश्वनाम्नि

[illegible]

[illegible]

कालसर्प * पु० नित्यकर्म०। कृष्णसर्पे महाविषे (केउटासाप)

कालसार * त्रि० कालेन सारः शबलः। कृष्णसाराभिधे मृगे।

कालसूत्र * न० कालस्य यमस्य सूत्रमिव। कुलालचक्रसूत्रच्छेदनरूपे नरकभेदे।

कालसेय * न० कलश्यां दधिकुम्भे भवं ढक्। तक्रे।

कालस्कन्ध * पु० कालः स्कन्धो यस्य। तमालवृक्षे, तिन्दुकवृक्षे, जीरकवृक्षे, दुष्खदिरे, उदुम्बरे च।

काला * स्त्री० काल+अर्शआद्यच्। कृष्णत्रिवृति। कालयति अच्। मञ्जिष्ठायाम्। कल-क्षेपे कर्मणि घञ्। अश्वगन्धायाम्, पाटलावृक्षे, कृष्णजीरके, नीलिकायाञ्च।

कालागुरु * न० कर्म०। प्राग्ज्योतिषदेशोत्पत्तिके कृष्णागुरुचन्दने।

कालाग्नि * पु० कालकारः मृत्युकारी अग्निः। प्रलयाग्नौ। कालानलादयोऽप्यत्र। [कलविङ्के, कपिञ्जले पक्षिणि च।

कालानुनादिन् * पु० अनुनदति अनु+नद-णिनि कर्म०। भ्रमरे,

कालानुसारक * न० कालः मृगमद इवानुसरति दूरतो गच्छति अनु+सृ-ण्वुल्। कृष्णागुरुणि, पीताख्यचन्दने च।

कालानुसारिन् * न० कालः मृगमद इवानुसरति गन्धेन दूरतो गच्छति णिनि। शैलेये गन्धद्रव्ये। [ण्यत्।

कालानुसार्य्य * पु० न०। कालेन मृगमदेनानुसार्य्यते अनु+सृ-शैलजे गन्धद्रव्ये, शिंशपावृक्षे (शिशु), तगरे च।

कालान्तरविष * पु० कालान्तरे दशनकालात् बहुकालानन्तरं विषं यस्य। मूषिकादौ। तस्य हि विषं कालान्तरे कष्टदम्।

कालायस * न० कर्म०। लौहभेदे।

कालाशुद्धि * स्त्री० कालस्य शुभकर्मयोग्यसमयस्य अशुद्धिः। शुभकर्माकरणप्रयोजके मृत्याद्युक्ते कालदोषे।

कालिक * पु० काले वर्षाकाले चरति ठक्। बकपक्षिणि, कालं कृष्णवर्णमनुसरति ठक्। कृष्णचन्दने कालागुरुणि। प्रकृष्टः दीर्घः कालोऽस्य प्रकृष्टे ठञ्। वैरे। कालेन निर्वृत्ते कालस्येदं वा ठञ्। कालभवे कालसम्बन्धिनि च त्रि०। कालो वर्णोऽस्त्यस्याः ठन्। देवीभेदे, वृश्चिकपत्रवृक्षे (विछाति), क्रमिण देयवस्तुमूल्ये, नवमेघे, पटोलशाखायां, रोमाल्यां, मांस्यां, काकाम्, शिवायां, मेघावल्यां, स्वर्णादिदोषे, सुरायां, काकोल्यां, श्यामाख्यविहगे, प्रतिमाप्रदेयवृद्धौ, कुज्झटिकायां, विसिरायां, हरीतक्याञ्च स्त्री०।

कालिङ्ग * पु० कुत्सितं लिङ्गमस्य। भूमिकर्कारौ, हस्तिनि, सर्पे, लौहभेदे च। कलिङ्गानां राजा अण्। कलिङ्गदेशपतौ नृपतौ। बहुषु तस्य लुक् कलिङ्गाः। "कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे!। दक्षिणस्यां महेशानि! कालिङ्गाः परिकीर्त्तिताः॥" इत्युक्ते देशभेदे। ब० व०। गौरा० ङीष्। राजकर्कट्याम्।

कालिन्दी * स्त्री० कलिन्दाद्रौ भवा अण्। यमुनायाम्।

कालिन्दीभेदन * पु० भिनत्ति हलेनाकर्षणेन गतिरोधनादिना अन्यथा करोति भिद-ल्यु कर्त०। बलभद्रे। तत्कथा च हरिवंशे।

कालिमन् * पु० कालस्य भावः इमनिच्। कृष्णतायाम्।

काली * स्त्री० कालो वर्णोऽस्त्यस्याः अच् ङीष्। देवीभेदे, मत्स्यगन्धायां व्यासमातरि सत्यवत्याम्, नवमेघाली, परीवादे, कालाञ्जन्यां, त्रिवृति, रात्रौ, वृश्चिकाख्याम् (विचाति), वह्निजिह्वाभेदे च। [रिद्रायाम्। कृष्णचन्दने न०।

कालीयक * पु० कालस्य वर्णस्यायं हृदाच्छः संज्ञायां कन्। दारुहकालेय * पु० कलेरपत्यम् ढक्। दैत्यभेदे, (कालाय कृष्णवर्णताये प्रभवति ढक्। यकृति। कालचन्दने न०। स्वार्थे कन्। कुङ्कुमे। कालीयके चन्दने न०। हरिद्रायाम् पु०।

काल्पनिक * त्रि० कल्पनायाः आगतः ठक्। कल्पिते, आरोपिते, कल्पनाभवे च। [धारणयोग्यकालप्राप्तायां गवि।

काल्या * स्त्री० कालः गर्भधारणयोग्यसमयः प्राप्तोऽस्य यत्। गर्भकावेरी * स्त्री० कस्य जलस्य वेरं शरीरं तस्येदमित्यण्। सरिद्भेदे। कुत्सितमपवित्रं वेरं यस्याः शाङ्गत् ङीप्। वेश्यायां ब्र०। हरिद्रायाम्। [कवित्वे च।

काव्य * पु० कविरेव स्वार्थे ष्यञ्। शुक्रे। कवेः कर्म। ग्रन्थभेदे,

काव्यलिङ्ग * न० अर्थालङ्कारभेदे। साहित्यदर्पणे १० परि०।

काव्यार्थापत्ति * स्त्री० अर्थालङ्कारभेदे। साहित्यदर्पणे १० परि०।

काश * दीप्तौ भ्वा० आत्म० अक० सेट्। काशते अकाशिष्ट, काशाञ्चक्रे अकाशे। चिच्। अचकाशत् त। [अचकाशत् त।

काश * दीप्तौ दिवा आत्म० अक० सेट्। काश्यते अकाशिष्ट। चिच्।

काश * पु० काश-अच्। रोगभेदे, मुनौ, तृणभेदे च। तत्पुष्पे न०। ण्वुल्। काशकः। काशभेदे।

काशिराज * पु० ६त० टच् समा० काशीपतिरिति ख्यातः। नृपभेदे, दिवोदासे, धन्वन्तरौ नृपे च।

काशी * स्त्री० काश-णिच् गौरा० ङीष्। वाराणस्याख्यायां नगर्याम्। "काशीतनुत्यागिनी गङ्गा" इति मत्स्यपुराणम्।

काशीश * न० कं जलमश्नुते व्याप्नोति क+अश णिनि तेषु स्वर्गे ईष्टे क। (हीराकस) उपधातुभेदे, तस्य तोयात् इत्यादिना जलस्यश्याम् तस्य जलव्याप्तप्रधानत्वम्।

काश्मीर * न० काश्मीरदेशेषु भवः अण्। कुङ्कुमे, पुष्करमूले, टङ्क (सोहागा) "शारदापीठमारभ्य कुङ्कुमाद्रितटान्तकम्। तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" इत्युक्ते देशे च। ब० व० तेषां राजा अण्। काश्मीरनृपे तस्य बहुषु लुक्। काश्मीराः।

काश्मीरज * पु० काश्मीरदेशे जायते जन ड। कुङ्कुमे, कुष्ठे कुष्ठे, पुष्करमूले च। गौरा० ङीष् जात्यर्थाद् अतिविषायाम् स्त्री०। व०। काश्मीरजन्मापि अत्र।

काश्यप * पु० कश्यपस्य गोत्रापत्यम् विदादिभ्यः। मुनिभेदे, कणादे, मीनभेदे, मृगभेदे, मनुष्यसामान्यजनमुनिभेदे च। कश्यपसम्बन्धिनि त्रि०।

काषाटि * पु० कषायवर्णवस्त्रम् ठञ्। रक्तवर्णे वस्त्रे।

काश्यपी • स्त्री• कश्यपस्येयम् अण् ङीप्। पृथिव्याम्।
काश्यपेय • पु• कश्यपस्यापत्यम् ढक्। सूर्ये, गरुडे च।
काष्ठ • न• काश-क्थन्। इन्धने दारुणि। [स्थाम्।
काष्ठकदली • स्त्री• काष्ठमिव कठिना कदली शाक•। वनकद-
काष्ठकीट • पु• ६त•। घुणाख्ये कीटे। [भेदे।
काष्ठकुट्ट • पु• काष्ठं कुट्टयति छिनत्ति अण्। (काठ्ठोकरा) पक्षि-
काष्ठकुद्दाल • पु• कुद्दालयति दल विदारणे अण् मक• कुद्दालः।
६त•। नौकादिमलापनयनार्थं काष्ठघटिते कुद्दाले।
काष्ठतक्ष् • पु• तक्षति क्विप्। रथकारे वर्द्धकौ, (छुतर) इति ख्याते [illegible] च।
काष्ठतक्षक • पु• काष्ठं तक्षति ण्वुल्। रथकारे वर्द्धकौ (छुतर)।
काष्ठभेदक • पु• काष्ठं भिनत्ति ण्वुल्। घुणाख्ये कीटे।
काष्ठा • स्त्री• काश-क्थन्। दिशि, दारुहरिद्रायाम्, स्थितौ, उत्कर्षसीमायाम्, अष्टादशनिमेषात्मके काले, उत्कर्षे, "काष्ठाम[illegible]" इति कुमारः। सीमायाञ्च "[illegible] काष्ठा [illegible]" इति कुमारः।
[illegible]

किकीदिवि • पु• किकीति दीव्यति शब्दायते किकि+दिव-इन् नि• दीर्घः। चापविहगे। [स्त्रियां ङीप्।
किङ्कर • त्रि• किञ्चित् कुत्सितं वा करोति-ट। भृत्ये, दासे।
किङ्किणी • स्त्री• किञ्चित् किणं करोतीति किण+कृ+अच् गौरा• ङीष्। कटिभूषणे, क्षुद्रघण्टिकायाम्, विकङ्कतद्रुमे च।
किङ्किर • पु• किम्+कॄ-क। कोकिले, भ्रमरे, हये, कन्दर्पे च। रक्तवर्णे स्त्री•।
किङ्किरात • पु• किङ्किरो रक्तवर्णमतति गच्छति पुष्पद्वारा अण्। अशोकवृक्षे, शुकपक्षिणि, रक्तामलक्षणे (रक्तझांटी)। अत-इन् कर्म•। कन्दर्पे, कोकिले च। [पमायाञ्च।
किञ्च • अव्य• किञ्च च द्व•। प्रारम्भे, समुच्चये, साकल्ये, अधा-
किञ्चन • अव्य• किम्+चन। अल्पार्थे, अल्पे च। हस्तावर्त-पलाशे पु•।
किञ्चित् • अव्य• किम्+चित्। अल्पार्थे, अल्पे च।
किञ्चुलक • पु• किञ्चित् चुलुम्पति लोव चुलुम्प-डु संज्ञायां कन्। (केंचो) महीलताख्ये कीटभेदे।
किञ्जल्क • पु• किञ्चित् जलति जल-अपवारणे क तस्य नेत्वम्। केसरे, पुष्परेणौ, नागकेसरे, पद्ममध्यस्थे केसराकारे च। [illegible]
[illegible]
किट • गतौ भय• भ्वादि• पर• सेट्। केटति अकेटीत्।
किटि • पु• किट गतौ इन् किच्च। शूकरे। [भये च (त्रास)।
किट्ट • न• किट क्त इडभावः। धातुनां मले, [illegible]
किण • पु• कण-गतौ अच् पृषो• अत इत्वम्। (घेंटा) शुष्कव्रणे, मांसग्रन्थौ, घुणकीटे च। [गौरा• ङीष्।
[illegible]
[illegible]

किमुत * अव्य॰ किञ्च उत च द्व॰। प्रश्ने, वितर्के, विकल्पे, अतिशये च।

किम्पच ० त्रि॰ किं पचति अच्। कृपणे, स हि कालोदरपूर्त्तिमात्र पचति नागन्तुकातिथिभ्यो दानार्थम्।

किम्पचान * त्रि॰ किम्+पच-चानश्। कालोदरपूर्त्तिमात्रं पाककर्त्तरि कृपणे। [कृपणे त्रि॰।

किम्पाक ० पु॰ निन्दितः पाकोऽस्य (माकाल) इति ख्याते वृक्षे।

किंपु(पु)रुष * पु॰ कुत्सितः पु(पू)रुषः। देवयोनिभेदे देवगायके। हिमाचलहेमकूटयोर्मध्यस्थे भवर्षात्मकजम्बुद्वीपस्यैकतमे वर्षे।

कियत् ० त्रि॰ किम्+परिमाणे वतुप् किमः क्यादेशः वस्य यः। किंपरिमाणे इत्यर्थे।

कियदेतिका * स्त्री॰ कियत् एतत् आरभ्यमाणं करोति विचिन्त्ये टिलोपे अतुल्। अध्यवसाये, उत्साहे च।

किर * पु॰ कॄ-क। शूकरे।

किरण * पु॰ कॄ-क्यु। सूर्ये, रश्मौ च।

किरणमालिन् ० पु॰ किरणानां मालाऽस्त्यस्य इनि। सूर्ये।

किरात ० पु॰ कीर्यन्तेऽवस्करा अत्र कॄ-क पर्यन्तदेशस्तमतति अच्। म्लेच्छजातिभेदे, पर्यन्तदेशाश्रयिणि, अल्पतनौ, "तमकुण्डे समारभ्य रामक्षेत्रान्तकं शिवे!। किरातदेशो..देवेशि! विन्ध्यशैलेऽवतिष्ठति।" इत्युक्तदेशे च।

किराततिक्त * पु॰ किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्य अच्। कर्म॰। (चिराता) इति ख्याते वृक्षे, भूनिम्बे च।

किरि * पु॰ कॄ-इक्। शूकरे।

किरीट ० पु॰ न॰ कॄ+ईटन् कित्। मुकुटे, शिरोवेष्टने च।

किरीटिन् ० पु॰ किरीट+इनि। अर्जुने। मुकुटवति त्रि॰।

किर्मी * स्त्री॰ किरति क्विप् किरं माति मा-क गौरा॰ ङीप्। पलाशवृक्षे, गृहे, स्वर्णपुत्तलिकायाम्, लौहपुत्तलिकायाञ्च।

किर्मीर * पु॰ कॄ-ईरन् कित् मुडागमश्च। नारङ्गवृक्षे, राक्षसभेदे, चित्रवर्णे च। तद्वति त्रि॰।

किल * अव्य॰ किल-क। वार्त्तायाम्, अनुनयार्थे, निश्चये, सम्भाव्ये, प्रसिद्धप्रमाणद्योतके, सत्ये, हेतौ, अरुचौ, अलीके, तिरस्कारे च।

किलकिञ्चित "हर्षाद्रुदितगीतादिव्यामिश्रं किलकिञ्चितम्" इत्युक्ते स्त्रीणां विलासभेदे। "दमयन्तीकिलकिञ्चितं किल" इति नैषधम्।

किलकिला * स्त्री॰ किलकिलेति वीप्सायां द्वित्वं ततः अच् ततः क्विप्। हर्षध्वनौ, सिंहनादे, वानराणां शब्दानुकरणे च।

किलाटक * पु॰ "नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः" इत्युक्ते क्षीरविकारे।

किलाटिन् ० पु॰ किलति च, अट-णिनि कर्म॰। वंशे वृक्षे।

किलास * न॰ किल-क तमस्यति अस+अण्। सिध्मरोगे (छुली)।

किलिञ्ज * पु॰ किल+इन् ततो जातः जन-ड पृ॰। कटे, सूक्ष्मकाष्ठे च। [धर्मफलभूते अनिष्टे, समारे च।

किल्बिष * न॰ किल-टिषच् वुक्। अपराधे, पापे, रोगे, धर्मा-

किशल * पु॰ न॰ किं शलति शल-अच् पृषो॰। पल्लवे।

किशलय * पु॰ न॰ किञ्चित् शलति चलति कयन् पृषो॰। पल्लवे।

किशोर * पु॰ कश-ओरन् नि॰। अश्वशिशौ, सूर्ये, तरुणावस्थे "किञ्चिदङ्कुरः किशोरः स्यात् यतो हि दशमात् परम्। शूरत्वं दृश्यते किञ्चित्" इत्युक्ते दशवर्षोत्तरपञ्चदशवर्षवयस्के त्रि॰। स्त्रियां ङीप्।

किष्क * वधे चुरा॰ आत्म॰ सक॰ सेट्। किष्कयते अचिकिष्कत।

किष्किन्ध(न्ध्य) * पु॰ ओड्रदेशस्थे पर्वतभेदे। तत्रत्यगुहायां स्त्री॰।

किष्कु * पु॰ स्त्री॰ किष्क-उ। द्वादशाङ्गुलिपरिमाणे, प्रकोष्ठदेशे, हस्तपरिमाणे च। [च (नाडा)।

किष्कुपर्वन् * पु॰ किष्कुमितं पर्व यस्य। इक्षौ, वंशवृक्षे, नले

किसलय * पु॰ न॰ किञ्चित् सलति सल-गतौ कयन् पृषो॰। पल्लवे।

कीकट ० पु॰ किञ्चित् कुत्सितं कटति पृषो॰। अश्वे। मगधदेशे ब॰ व॰ च "कीकटेषु गया पुण्या" इति पुराणम्। कृपणे, निर्धने च त्रि॰।

कीकश * पु॰ कीति कशति कश-शब्दे अच्। चण्डाले।

कीकस ० पु॰ कीति कसति कस-गतौ अच्। कृमिजभेदे, अस्थ्नि न॰। कठिने त्रि॰।

कीकि * पु॰ स्त्री॰ कीति शब्दं कायति डि। चाषपक्षिणि।

कीचक ० पु॰ कीत्यव्यक्तं चकति चक-तृप्त्यादौ अच्। दैत्यभेदे, "कीचका नाम ते वंशा ये स्वनन्त्यनिलाहताः" इत्युक्ते वेणुभेदे (नलतावांश), विराटराजश्याले, केकयाधिपे नृपभेदे च।

कीचकजित् * पु॰ कीचकं जितवान् जि-भूते क्विप्। भीमसेने। एवं कीचकभिदादयोऽप्यत्र। [अचीकिटत् त।

कीट * बन्धे वर्णे च चुरा॰ उभ॰ सक॰ सेट्। कीटयति ते

कीट * पु॰ कीट-अच्। कृमिभ्यः स्थूले क्षुद्रजन्तुमात्रे। स्वार्थे कन्। तदर्थे मागधजातौ च। कठिने त्रि॰।

कीटघ्न * पु॰ कीटं हन्ति हन-टक्। गन्धके।

कीटजा * स्त्री॰ कीटेभ्यो जायते जन-ड। जतुनि, लाक्षायाञ्च।

कीटमणि * पु॰ कीटेषु मणिरिव। खद्योते।

कीदृश् ० पु॰ किम्+दृश-क्विप् किमः की। किंप्रकारे। ट। कीदृशः। क्स। कीदृक्षोऽप्यत्र।

कीनाश * पु॰ कुत्सितं नाशयति क्लिश्नाति नि॰। यमे, "कीनाशनिकेतनातिथिम्" इति माघ, वानरभेदे, कर्षके, पशुघ्ने, क्षुद्रे च।

कीर * पु॰ कीति ईरयति ईर-अच्। शुकपक्षिणि, देशभेदे ब॰ व॰। मांसे न॰।

कीर्ण * त्रि॰ कॄ-क्त। आच्छन्ने, निहिते, क्षिप्ते च।

कीर्शंसा * स्त्री॰ चुरा॰ कृत+युच्-टाप्। प्रशंसे।

कीर्त्ति * स्त्री० चु० कृत-क्तिन् । यशसि ।

कीर्त्तित * त्रि० चु० कृत-क्त । कथिते, ख्याते च ।

कीर्त्तिशेष * पु० कीर्त्तिरेव शेषः । मरणे । ब० । मृते त्रि० ।

कील * बन्धे भ्वादि० पर० सक० सेट् । कीलति अकीलीत् ।

कील * पु० स्त्री० कील-क । अग्निशिखायाम् । करणे घञ् । शङ्कौ, शस्त्रे, कफोणौ, स्तम्भे, लेशे च ।

कीलक * पु० कील+स्वार्थे संज्ञायां वा कन् । कीलार्थे, गवां दोहनार्थे बन्धनस्तम्भे, गवां कण्डूयनार्थे स्तम्भे च ।

कीलाल * न० कीलां वह्निशिखामलति वारयति अण् । जले, रुधिरे च । कीलामीर्वाग्नेः शिखां लाति ला+क । अमृते । कीलेन प्रतिबन्धेन अल्यते वार्य्यते अल-घञ् । पशौ पु० ।

कीलित * त्रि० कील+क्त । बद्धे । भावे-क्त । बन्धे न० ।

कीश * पु० कस्य वायोरपत्यम् अत इञ् किः हनुमान् ईशो यस्य । वानरे । [ङीप् । कीशपर्ण्यप्यत्र ।

कीशपर्ण * पु० कीशः तल्लोमेव पर्णमस्य । अपामार्गे । जातित्वे

कु * शब्दे भ्वादि० आत्म० सक० अनिट् । कवते अकोष्ट । [अकुत ।

कु * आर्त्तस्वरे तुदा० आत्म० सक० अनिट् कुटादि । कुवते

कु * शब्दे अदा० पर० अक० अनिट् । कौति अकौषीत् ।

कु * अव्य० कु+डु । पापे, निन्दायाम्, ईषदर्थे, निवारणे च । भूमौ, धरायाञ्च स्त्री० ।

कुक * आदाने भ्वादि० आत्म० सक० सेट् । कोकते । अकोकिष्ट ।

कुकील * पु० कौ पृथिव्याः कील इव स्तम्भहेतुत्वात् । पर्वते ।

कुकुट * पु० कौ कुटति कुट-क । (सुसनि) इति ख्याते शाकभेदे ।

कुकुद * पु० सत्कारपूर्वकमलङ्कृतकन्यादातरि ।

कुकुन्दर * पु० कुं भूमिं दारयति अन्तर्भूतण्यर्थे दृ-अण् नि० । कुत्सितं कुन्दरमिव, स्कुन्दते कामिनाऽत्र स्कुन्द नि० वा । स्त्रीणां नितम्बस्थे आवर्त्ताकारे पृष्ठवंशादधोगर्त्तद्वये ।

कुकुर * पु० कुं पृथिवीं कुरति कुर-क । यदुवंशीयनृपभेदे तेषां ययातिशापात् राज्यं नास्तीति पुराणकथा । "कुकुरस्त्रियः" इति माघः । दशार्हदेशभेदे ब० व० ।

कुकूल * पु० कोः भूमेः कूलं कुत्सितं वा कूलम् कु-ऊलच् धातोः कुगागमश्च । तुषानले, शङ्कुनि, शङ्कोर्युते गर्त्ते, वर्मणि च ।

कुकोल * न० कुत्सितं कोलति कुल-अच् । कोलिवृक्षे ।

कुक्कुट * पु० कु-क्विप् कुक् तेन कुटति कुट-क । (कुकड़ा) ख्याते पक्षिणि, उल्काग्नौ, वनकुक्कुटे, वह्निस्फुलिङ्गे च । स्वार्थे कन् । तत्रैव "शूद्रायां निषादात्तु स वै कुक्कुटकः स्मृतः" इति मनूक्ते सङ्कीर्णवर्णे । स्त्रियां ङीप् ।

कुक्कुटमस्तक * पु० कुक्कुटस्येव मस्तकं यस्य । चव्ये (चइ) ।

कुक्कुटव्रत * न० [illegible] [illegible]

[illegible] । [[illegible] [illegible] ।

कुक्कुटाहि * पु० [illegible] [illegible]

कुक्कुभ * पु० कुक् इत्यव्यक्तं शब्दं कौति कु-भक् । वनकुक्कुटे ।

कुक्कुर * पु० कोकते क्विप् कुरति शब्दायते कुर-शब्दे क कर्म० । स्वनामख्याते पशौ । ग्रन्थिपर्णे वृक्षे न० । [भेदे ।

कुक्कुरद्रु * पु० कुक्कुरस्याप्रियो दुर्गन्धः शाक० । (कुकुरमोड़ा) वृक्ष-

कुक्कुवाच् * पु० कुक् इत्यव्यक्ता वाक् यस्य । सारङ्गमृगे । [(कोंक) ।

कुक्षि * पु० कुष-क्सि । उदरे, उदरस्य वामदक्षिणपार्श्वयोश्च

कुक्षिम्भरि * त्रि० कुक्षिं बिभर्त्ति भृ+इन्-मुम् च । देवातिथ्यर्चनेनात्मोदरमात्रपूरके ।

कुक्षिरन्ध्र * न० कुक्षेरिव रन्ध्रं छिद्रं यत्र । नले ।

कुङ्कुम * न० कुक्यते आदीयते कुक-उमक् नि० नुम् । काश्मीरदेशजे स्वनामख्याते गन्धद्रव्ये । [त्तिस्थाने पर्वतभेदे ।

कुङ्कुमाद्रि * पु० कुङ्कुमस्याकरः अद्रिः । काश्मीरदेशस्थे कुङ्कुमोत्प-

कुच * रोधे, सम्पर्के, लेखने च सक० कौटिल्ये अक० तु० पर० सेट् कुटादि । कुचति अकुचीत् चुकोच ।

कुच * उच्चे शब्दे भ्वादि० पर० अक० सेट् । कोचति अकोचीत् ।

कुच * पु० कुच+सम्पर्के अच् । स्तने । [वृक्षभेदे च ।

कुचन्दन * न० कुत्सितं गन्धहीनत्वात् चन्दनम् । रक्तचन्दने, (बकम्)

कुचफल * पु० कुचाविव फलमस्य । दाड़िम्बवृक्षे ।

कुचर * त्रि० कुत्सितं चरति चर-अच् । परदोषकथनशीले ।

कुचेला * स्त्री० कुत्सितं चेलमिव पत्रमस्याः । विद्धकर्णवृक्षे । गौरा० ङीप् । अम्बष्ठायां (आकनादि) । [कोजिला, कुत्रा ।

कुज * स्तेये भ्वादि० पर० सक० सेट् उदित् । कोजति अकोजीत्

कुज * पु० कौ पृथिव्या जायते जन-ड । मङ्गलग्रहे, नरकासुरे वृक्षमात्रे च । सीतायां, कात्यायन्याञ्च स्त्री० ।

कुज्झटि(टी) * स्त्री० कु-क्विप् कुत् झट-संहतौ इन्, वा ङीप् । (कुयासा) नीहारे ।

कुञ्चन * न० कुन्च-ल्युट् । कौटिल्ये अनादरे च, "वाताद्यावर्त्म-सन्धीश्च जनयन्ति यदा मलाः । तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः ।" इत्युक्ते नेत्ररोगभेदे च । स्वार्थे कन् । नभारिपौ ।

कुञ्चि * पु० कुन्च कौटिल्ये इन् । "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" इत्युक्ते मानभेदे ।

कुञ्चिका * स्त्री० कुन्च-ण्वुल् टाप् । कृष्णजीरके, (कुंचे) इति ख्याते मत्स्यभेदे, (कनूची) वंशशाखायां, तालकोद्घाटने यन्त्रभेदे च (काटी) "उद्घाटिनी कुञ्चिका" इति शब्दरत्नावली ।

कुञ्चित * न० कुन्च-क्त । तगरपुष्पे । वक्रे, सङ्कुचिते च त्रि० ।

कुञ्ज * पु० कौ पृथिव्यां जायते जन-ड पृ० । हस्तिहनौ । समन्ताल्लतादिभिराच्छादिते मध्यशून्ये पर्वतादेः स्थानभेदे पु० न० ।

कुञ्जर * पु० कुञ्ज+अस्त्यर्थे र । हस्तिनि ।

कुञ्जरच्छाय * पु० योगे "मघायां यदि शीतांशुः कुञ्जरच्छायसंज्ञकः । [illegible] मघ्यं च [illegible] इत्युक्ते योगभेदे ।

कुञ्जरपिप्पली * पु० कुञ्जर इव स्थूला पिप्पली । गजपिप्पल्याम् ।

कुष्ठरायण * पु॰ कुष्ठैरायते अय गतौ ल्युट् । पारम्पहृचे ।
कुझम * न॰ कुत्सितं जन्म यत्र पृषो॰ । काञ्जिके (कामांजि)।
कुट * कौटिल्ये तुदा॰ पर॰ अक॰ सेट् कुटादि । कुटति अकुटीत् चुकोट ।
कुट * प्रतापने चुरा॰ आत्म॰ सक॰ सेट् । कोटयते अचुकुटत ।
कुट * वैकल्ये भ्वा॰ इदित् पर॰ अक॰ सेट् । कुण्टति अकुण्टीत् ।
कुट * पु॰ कुट-क । दुर्गे (गड), पर्वते, हर्म्ये च । घटे पु॰ न॰ । स्वार्थे स्त्री॰ ङीप् । शिलाकुट्टे अश्मे पु॰ । अत्र कुट इत्येके । [गिरिसन्निकटे च ।
कुटङ्क * पु॰ कुटं गृहं कपति क छ पृ॰ । गृहाच्छादने (चाल),
कुटज * पु॰ कुटे पर्वते जायते जन-ड । (कुड़ची) वृक्षभेदे, यस्य फलम् इन्द्रयवः । कुटे घटे जायते । अगस्त्यमुनौ, द्रोणाचार्य्ये च ।
कुटजवीज * न॰ ६त॰ । इन्द्रयवे ।
कुटघट * पु॰ कुटम् घटीभवन् अटति । ग्रोनाकवृक्षे । मुस्तके न॰ ।
कुटप * पु॰ कुट-कपन् । मुनौ । गृहसमीपस्थोपवने, कुडवरूपमानभेदे च । पद्मे न॰ । [ङीप् ।
कुटि * पु॰ कुट इन् । वृक्षे, देहे, जले च । क्षुद्रगृहे स्त्री॰ वा
कुटिचर * कुटौ जले चरति चर-अच् । वारिचरे शूकरे ।
कुटी(टि)र * पु॰ अल्पा कुटी ईरन् । पर्णशालादौ (कुँडे) ।
कुटिल * वि॰ कुट-इलच् । वक्रे, भङ्गुरे च । तगरपुष्पे न॰ ।
कुटिलग * पु॰ कुटिलं गच्छति गम-ड । सर्पे । नद्यां स्त्री॰ टाप् । वक्रगामिनि वि॰ । [वा क अच् । यतिभेदे ।
कुटि(टी)च(र)क * पु॰ कुट्यां कुटौ वा चरति, चकति तृप्यति ।
कुटुम्ब * पु॰ न॰ कुटुम्ब-अच् । पोष्यवर्गे, बान्धवे, सन्ततौ, द्वितीयगृहे च ।
कुटुम्ब * धृतौ चुरा॰ आत्म॰ सक॰ सेट् । कुटुम्बयते अचुकुटुम्बत ।
कुटुम्बिनी * स्त्री॰ कुटुम्ब+इनि । पतिपुत्रादियुतायां प्रशंसितायां स्त्रियाम् । [अचुकुट्टत् त ।
कुट्ट * छेदने निन्दने च अद॰ चुरा॰ उभ॰ सक॰ सेट् । कुट्टयति ते
कुट्ट * प्रतापने अद॰ चुरा॰ आत्म॰ सक॰ सेट् । कुट्टयते अचुकुट्टत ।
कुट्टक * पु॰ कुट्ट-ण्वुल् । लीलावत्यादौ प्रसिद्धे गणिते अङ्कभेदे । छेदके वि॰ । [समागमकारयित्र्याम् ।
कुट्टनी * स्त्री॰ कुट्ट-ल्युट् ङीप् । (कुट्नी) परपुरुषेण सह परस्त्रियाः
कुट्टमित * न॰ "केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टमितं नाम शिरःकरविधूननम्" इत्युक्ते स्त्रीणां विलासभेदे ।
कुट्मल * पु॰ न॰ कुट-क्मलच् । मुकुले, विकाशोन्मुखकलिकायाम् । नरकभेदे न॰ यत्र रज्जुभिर्यन्त्रणा नारकिभ्यो दीयते ।
कुठ * छेदने धीयः पर॰ सक॰ सेट् । कोठति अकोठीत् ।
कुठ * वैकल्ये आलस्ये अक॰ मोचने सक॰ च इदित् भ्वादि॰ पर॰ सेट् । कुण्ठति अकुण्ठीत् ।
कुठ * पु॰ कुठ-छेदने घञर्थे कर्मणि क । वृक्षे ।

कुठर * पु॰ कुठ करन् । मन्थनदण्डबन्धनार्थस्तम्भे । [वृक्षे पु॰ ।
कुठार * पु॰ स्त्री॰ कुठ-आरन् । अस्त्रभेदे (कुड़ाल) । स्त्रियां ङीप् ।
कुठारु * पु॰ कुठ आरुन् । वानरे पु॰ स्त्री॰ । वृक्षे, शस्त्रकारे च ।
कुठेर * पु॰ कुठ-एरन् । श्वेततुलस्याम्, वह्नौ, (बाबुइ) इति ख्याते वृक्षे च । स्वार्थे कन् । (बाबुइतुलसी) इति वृक्षे ।
कुड * वैकल्ये भ्वा॰ इदित् पर॰ अक॰ सेट् । कुण्डति अकुण्डीत् ।
कुड * दाहे भ्वादि॰ इदित् आत्म॰ सक॰ सेट् । कुण्डते अकुण्डिष्ट ।
कुड * रक्षणे चुरा॰ इदित् उभ॰ सक॰ सेट् । कुण्डयति ते अचुकुण्डत् त । [कुडति अकुडीत् चुकोड़ ।
कुड * अदने सक॰ बाल्ये अक॰ तुदा॰ पर॰ सेट् कुटादि ।
कुडप(व) * पु॰ कुड-कपन् (कवन्) वा । प्रस्थचतुर्थांशरूपे परिमाणभेदे । [नरकभेदे न॰ ।
कुड्मल * पु॰ न॰ कुड-क्मलच् । विकाशोन्मुखकलिकायाम् ।
कुड्य * न॰ कुड-ण्यत् । भित्तौ, विलेपने च ।
कुड्यच्छेदिन् * पु॰ छिद+णिनि ६त॰ । चौरे, येन गृहभित्तिं विदार्य्य चौर्य्यं क्रियते ।
कुड्यच्छेद्य * पु॰ कुड्यं छेद्यं यस्य । खनके ।
कुण * आभाषणे, मन्त्रणे च अद॰ चु॰ उभ॰ सक॰ सेट् । कुणयति ते अचुकुणत् त । [अकोणीत् ।
कुण * उपकरणे शब्दे च तुदा॰ पर॰ सक॰ सेट् । कुणति
कुणप * पु॰ कुण-कपन् सम्प्रसारणञ्च । त्यक्तप्राणे मृतदेहे शवे, पूतिगन्धे तद्वति च वि॰ । गौरा॰ ङीप् । विट्सारिकायाम् (गुयाशालिक) ।
कुणि * पु॰ कुण-इन् । तुन्नवृक्षे (तुँद) । कुत्सितकरे वि॰ ।
कुण्ठ * वि॰ कुठि-अच् । क्रियासु मन्दे, अकर्मण्ये, मूर्खे च ।
कुण्ठक * वि॰ कुठि ण्वुल् मूर्खे ।
कुण्ड * पु॰ कुण्डयते कुडि मदे, कुडि-दाहे वा घञ् । जीवति भर्त्तरि जारजे पुत्रे, मानभेदे पात्रे, जलाशये च । होमीयाग्निस्थापनस्थानभेदे पु॰ न॰ । ङीप् । स्थाल्याम् स्त्री॰ ।
कुण्डपाय्य पु॰ कुण्डेन पीयते सोमोऽस्मिन् । यज्ञभेदे ।
कुण्डल * न॰ कुडि दाहे रक्षणे वा कलच् । कर्णभूषणे, वेष्टने, पाशके, वलये च ।
कुण्डलना * स्त्री॰ कुण्डलं वेष्टनं करोति णिच् ततो युच् । वेष्टने "विषमो कुण्डलनामवापिता" इति नैषधम् । तन्त्रप्रसिद्धे मूलाधारस्थिते शक्तिभेदे, (जिलिपी) इति ख्याते पक्वान्नभेदे, गुडूचीलतायां, सर्पजातिस्त्रियाञ्च ।
कुण्डलिन् * पु॰ कुण्डल+अस्त्यर्थे इनि । सर्पे ।
कुण्डलिनी * स्त्री कुण्डलवलयाकारवेष्टनमस्त्यस्य इनि । सर्पाकारेण त्रिवेष्टनयुतं तन्त्रप्रसिद्धे शक्तिभेदे, मद्यान्न । [(कुडि) ।
कुण्डिका * स्त्री॰ कुण्ड+संज्ञायां कन् । कमण्डलौ, स्थाल्याञ्च
कुण्डिन * पु॰ कुडि इनच् । मुनिभेदे, विदर्भनगरे, देशभेदे च ।

शी+ड वा। मत्स्ये। कौ लिशति श्लिष्यति लिश-क। अस्थिसंहारवृक्षे, मत्स्यभेदे च। [भगिन्याञ्च।

कुली * स्त्री० कौ लीयते-ड ङीप्। कण्टकार्य्यां, पत्न्या ज्येष्ठ-

कुलीन * पु० कुले आकरे भवः ख। श्रेष्ठहये। तस्मिन् कुलाचारवति, सत्कुलीने च त्रि०।

कुलीनक * पु० कौ भूमौ लीनः कौ+लीन संज्ञायां कन्। वनमुद्गे।

कुल्माष * पु० कोलति कुल-क्विप् कुल् माषोऽस्मिन् ब०व०। "अर्द्धस्विन्नाश्च गोधूमा अन्ये च चणकादयः। कुल्माष इति कथ्यन्ते" इत्युक्तेषु अर्द्धस्विन्नगोधूमादिषु "स ह कुल्माषान् खादन्तं बिभिक्षे" इति श्रुतिः, सूर्य्यस्य पारिपार्श्विकभेदे, शूकधान्ये यवादौ च। काञ्जिके, मसीपरिणामे च न०।

कुल्य * न० कुल-संस्त्याने क्यप्। अस्थ्नि, अष्टद्रोणीरूपपरिमाणे, शूर्पे, आमिषे च। कुले भवः, कुलाय हितो वा यत्। सत्कुलोद्भवे, कुलहिते च त्रि०। कुल-क्यप्-टाप्। कृत्रिमायामल्पनद्याम्, जीवन्त्यामोषधौ, कुलस्त्रियां, स्पृक्नशाकौ च स्त्री०। [च।

कुव * न० कुं भूमिं वाति गच्छति वा क। जलजे, पुष्पमात्रे, उत्पले

कुवङ्ग * न० कुत्सितं वङ्गम्। सीसकं (सीसा) धातुभेदे।

कुवल * न० कौ वलते वल संवरणे अच्। उत्पले, मुक्ताफले च। कोलिवृक्षे स्त्री० ङीप्। बदरीफले न०।

कुवलय * न० कोर्वलयमिव शोभाहेतुत्वात्। उत्पले, श्वेतोत्पले, नीलोत्पले च, "कुवलयदलश्यामविस्तीर्णदृष्टे" इत्युद्भूतम्।

कुवलयापीड * त्रि० कुवलयमापीडो भूषणं यस्य। नीलोत्पलभूषणवति जने। कंसासुरस्य हस्तिरूपधारिणि दैत्यभेदे पु०।

कुवाद * त्रि० कुत्सितं वदति अण्। परदोषकथनशीले। भावे घञ् कुग०। कुत्सितवाक्ये।

कुविन्द * पु० कुं भूमिं विन्दति विद-श। तन्तुवाये, शूद्रीगर्भे विप्रकर्मणो जाते वर्णभेदे च (तांति)।

कुहस्तिकृत् * पु० कोः पृथ्व्याः हस्तिं वेष्टनं करोति कृ-क्विप्। (कोटाकरा) इति ख्याते वृक्षे। कुत्सितहस्तिकर्त्तरि त्रि०।

कुवेणि(णी) * स्त्री० कुत्सितं वेणनं मत्स्या यस्याम् वेण-इन्, वा ङीप्। मत्स्यधान्याम् (खालुइ)।

कुश * पु० न० कौ शेते शी कुं पापं श्यति शो-वा ड कुशति कुश-क वा। स्वनामख्याते तृणे। कुशोऽग्रजगर्भस्थे इवति रामसुते च "त्रिपुरागाद्गुं कुशम्" इति रघु.। योक्त्रे, लवणसमुद्रवेष्टिते द्वीपभेदे च पु०। जले न०।

कुश * दुगौ इदित् भ्वादि० पर० सक० सेट्। कुंशति अकुंशीत्।

कुश * श्लेषे दिवा० पर० सक० सेट्। कुश्यति अकुशत् अकोशीत्।

कुशध्वज * पु० जनकस्य नृपस्यानुजे भ्रातरि।

कुशपुष्प * न० कुशाकारं पुष्पमस्य। दन्तिपर्णीवृक्षे।

कुशल * न० कुश-कलच्। कल्याणे। मङ्गले। शस्ते त्रि०। कुशान् लाति ला+क। दक्षे त्रि०। कौ पृथिव्यां शलति वर्त्तते शल अच्। कार्य्यचतुरे त्रि०।

कुशलिन् * त्रि० कुशल+अस्त्यर्थे इनि। कल्याणवति। "कुशलिनी वत्सस्य धात्री" इति साहित्यदर्पणे।

कुशस्थल * न० ६त०। कान्यकुब्जदेशे। द्वारकायां स्त्री० ङीप्।

कुशा * स्त्री० कुश-क। वल्गायां, रज्ज्वां, मधुकर्कट्यां, सामगानां स्तोत्रगानार्थेऽवोड्स्वरशङ्कुषु च।

कुशाकर * पु० कुशैराकीर्य्यते समन्तादपेव मूलाच्छादनेन वेष्ट्यते आ+कृ-अप्। यज्ञाग्नौ। स हि कुशकण्डिकायां कुशैराक्रियते।

कुशाग्रीय * त्रि० कुशाग्रमिव छ। अतिसूक्ष्मे।

कुशाल्मलि * पु० कुत्सितः शाल्मलिः। रोहितकवृक्षे।

कुशावती * स्त्री० कुश-अस्त्यर्थे मतुप् मस्य वः दीर्घः। रामात्मजकुशस्य राजधान्यां पुर्य्याम्।

कुशिक * पु० कुश-अस्त्यर्थे ठन्। जमदग्निपितरि, विश्वामित्रस्य पितरि च मुनिभेदे। कुश+इवार्थे इकन्। फाले, सर्जवृक्षे, विभीतकवृक्षे, अश्वकर्णवृक्षे, तैलशेषे च। केकरे (टेरा) त्रि०।

कुशी * स्त्री० कुश-अयोविकारेऽर्थे ङीप् नि०। लौहविकारे फाले।

कुशीलव * पु० कुत्सितं शीलं कुगति० अस्त्यर्थे व, कुशीलं वाति वा-क वा। कीर्त्तिसञ्चारके भटे, चारणे, गायके च। कुशीलवाभिनाट्यप्रचारकत्वात् वाल्मीकौ मुनौ।

कुशीलवौ * पु द्वि० व०। कुशश्च लवश्च द्व० नि०। रामपुत्रयोः।

कुशूल * पु० कुश-ऊलच्। तुषाग्नौ, धान्यकोष्ठे, इष्टकादिनिर्मिते धान्यादिस्थापनार्हे स्थाने च।

कुशूलधान्यक * पु० कुशूलपरिमितं धान्यं यस्य। यावता धान्येन वर्षत्रयं स्वस्य सकुटुम्बस्य भरणस्य निर्वाहो भवति तावन्मात्रसञ्चितधान्ये विप्रे। [चिरिः, अर्शोवृक्षे च।

कुशेशय * न० कुशे जले शेते शी-अच् अलुक्। पद्मे, सारस-

कुष * निष्कर्षे क्र्यादि० पर० सक० सेट्। कुष्णाति अकोषीत्। निरस्तु वेट् निरकोषीत् निरकुक्षत्।

कुषाकु * पु० कुष्णाति कुष-काकु। वानरे, सूर्य्ये, वह्नौ च। परोपतापिनि त्रि०। [(कुड़) धान्यभेदे च।

कुष्ठ * न० कुष्णाति रोगम् देहं वा कुष-क्थन्। (कुड़) त्रिवृभेदे,

कुष्ठगन्धि * न० कुष्ठस्येव (कुड़) गन्धोऽस्य इत् समा०। एलवालुके।

कुष्ठगन्धिनी * स्त्री० कुष्ठस्य गन्धोऽस्त्यस्याः इनि। [illegible]।

कुष्ठघ्नी * स्त्री० कुष्ठं हन्ति हन-क-ङीप्। काकोडुम्बरिकायाम्।

कुष्ठनाशन * पु० कुष्ठं नाशयति नश+णिच्-ल्यु। [illegible], गौरसर्षपे, हरिद्रावृक्षे च। [[illegible]

कुष्ठनाशिनी स्त्री० कुष्ठं नाशयति नश-णिच्-णिनि ङीप्। [illegible]।

कुष्ठल * न० [illegible]।

कुष्ठसूदन * पु० कुष्ठं सूदयति सूद-ल्यु। आरग्वधे (सोंदाल)।

कुष्ठहन्तृ * पु० कुष्ठं हन्ति हन-तृच्। हस्तिकन्दे [illegible]।

कुष्ठहृत् * पु० कुष्ठं हरति हृ-क्विप् तुक् च। खदिरे [illegible]

कूटपाकल * पु॰ कूटं मृत्तिकाकूटं पाकयति णिच्-अच् । कुम्भाग्नौ ।

कूटपाश * म॰ कूटेन छन्नं पाशम् । पक्षिव्याधादिदानेन मृगपक्षि-धारणार्थं पातिते यन्त्रे ।

कूटशाल्मलि * पु॰ कूटः मिथ्याभूतः शाल्मलिः । कृष्णशाल्मलौ ।

कूटसंक्रान्ति * स्त्री॰ "अर्द्धरात्रे व्यतीते तु यदा संक्रमते रविः । सा प्रोक्ता कूटसंक्रान्तिः" इति ज्योतिषोक्ते रवेरर्द्धरात्रानन्तरं राश्य-न्तरसञ्चारे ।

कूटसाक्षिन् * त्रि॰ कर्म॰ । साक्ष्ये मिथ्याभिधायिनि ।

कूटस्थ * त्रि॰ कूटोऽयोघनवत् निश्चलं यथा तथा तिष्ठति स्था-क । एकरूपतया सर्वकालव्यापिनि परिणामादिकार्यान्तरशून्ये आकाशादौ, परमात्मनि च । व्याघ्रनखाख्यगन्धद्रव्ये पु॰ ।

कूटागार * न॰ कर्म॰ । द्यूतागारे, चन्द्रशालिकायाम्, (चिलाघर) क्रीडागृहे च । [यक्षभेदे ।

कूटायुध * न॰ कर्म॰ । अन्तर्गुप्तनिशितशस्त्रे बहिःकाष्ठादिमये

कूटार्थभाषा * स्त्री॰ कूटार्थस्य कल्पितार्थस्य भाषा कथा । असत्य-कल्पनाकथायां कथायाम् ।

कूड * घनीभावे तुदादि॰ पर॰ अक॰ सेट् । कूडति अकूडीत् ।

कूण * सङ्कोचे अद॰ चुरा॰ उभ॰ अक॰ सेट् । कूणयति ते अचु-कूणत् त ।

कूण * सङ्कोचे चुरा॰ आत्म॰ अक॰ सेट् । कूणयते अचुकूणत ।

कूणित * त्रि॰ कूण-इतच् । रोगादिना सङ्कुचितनयनाद्यवयवे जने ।

कू(कु)प * दौर्बल्ये अद॰ चुरा॰ उभ॰ अक॰ सेट् । कू(कु)पयति ते । अचुकू(कु)पत् त ।

कूप * पु॰ कुत्सिताः ईषत् वा आपो यत्र अच् समा॰ कुवन्ति मण्डूकाः अस्मिन् कु-पक् दीर्घश्च वा । स्वनामख्याते जलाधारे, गर्त्ते च । ततः संज्ञायां कन् । नौकादौ गुणाधारे (मास्तुल) काष्ठमये द्रुमे । [रोमाञ्चे ।

कूपाङ्ग(ङ्क) * पु॰ कूपाकारोऽङ्गमस्य कूपाकारमङ्गं यस्मिन् ।

कूपार * पु॰ कुं पृथिवीं पिपर्त्ति पूरयति अण् पूर्वदीर्घः । समुद्रे ।

कूपी * स्त्री॰ कूप-अच् गौ॰ ङीष् । स्नेहादिधारणार्थे चर्ममये पात्रभेदे ।

कूर्च * पु॰ न॰ कुर्च्यते कुच-अट् नि॰ दीर्घः । भ्रुवोर्मध्ये स्थिते लोमोच्चये, श्मश्रुणि, कैतवे, दर्भे, मयूरपुच्छे, कुशमुष्टौ, अङ्गु-ष्ठाङ्गुलिमध्यस्थोर्द्ध्वभागे, श्मश्रौ, शीर्षे, आसनभेदे, तन्त्रोक्ते बीजभेदे च (हुम्) ।

कूर्चशिरस् * न॰ ६त॰ अग्नि॰स्कन्धे (गुडगुडा) । [शिखरादयोऽप्यत्र ।

कूर्चशीर्ष * पु॰ कूर्चः श्मश्रु तद्वत् शीर्षमस्य । नारिकेले । कूर्च-

कूर्चिका * स्त्री॰ कूर्च+श्मश्रु अस्त्यर्थे ठन् । (चोरमा) दुग्धविकारे, सूचिकायां, तूलिकायाम्, कुड्मले, कुञ्चिकायाञ्च, द्रव्यमार्जन-साधने द्रव्ये (कुंचि), दन्तगुच्छे च ।

कूर्पास * पु॰ कूर्पासवत् सर्वम् ।

कूर्म * पु॰ कुत्सितः कौ वा ऊर्मिर्वेगो यस्य पृ॰ । कच्छपे, "उन्मी-लने कूर्मः कूर्मः" इत्युक्ते देहस्थे वायुभेदे च ।

कूर्मचक्र * न॰ कूर्माकारं चक्रम् । ज्योतिषोक्ते कृषिकर्मोपयो-गिनि, तन्त्रोक्ते जपादिकर्मोपयोगिनि च कूर्माकारे चक्रभेदे ।

कूर्मपुराण * न॰ कूर्मेण कूर्मावतारेण भगवता उक्तं पुराणम् । अष्टादशसु पुराणेषु मध्ये पुराणभेदे ।

कूर्मपृष्ठक * न॰ कूर्मस्य पृष्ठमिव इवार्थे कन् । शरावे (सरा) ।

कूल * आवृतौ भ्वादि॰ पर॰ सक॰ सेट् । कूलति अकूलीत् ।

कूल * न॰ कूल-अच् । नद्यादेर्जलसमीपस्थाने तीरे, स्तूपे, शैल-पृष्ठे च ।

कूलक * पु॰ कूल-ण्वुल् । कृमिपर्वते, वल्मीके स्थाने (उपरदीपि) ।

कूलङ्कष * पु॰ कूलं कषति कष-खच् मुम् च । समुद्रे । नद्यां स्त्री॰ ।

कूवर * पु॰ न॰ कू शब्दे कुटादि वरच् । रथस्य चक्रकाष्ठाश्रयके काष्ठे युगन्धरे, कवचे च । रथे त्रि॰ ।

कूष्माण्ड * पु॰ कुत्सित उष्मा अण्डेषु बीजेषु यस्य । (कुमडा) वृक्ष-भेदे, गणदेवताभेदे च । जातित्वात् ङीष् । कुष्माण्डीत्यप्यत्र ।

कृ * कृतौ भ्वादि॰ उभ॰ सक॰ अनिट् । करति ते अकार्षीत् अकृत ।

कृ * कृतौ तना॰ उभ॰ सक॰ अनिट् । करोति कुरुते अकार्षीत् अकृत । कृषिमः । [अकृत ।

कृ * वधे स्वादि॰ उभ॰ सक॰ अनिट् । कृणोति कृणुते अकार्षीत्

कृक * पु॰ कृ-कक् । गले ।

कृकण * पु॰ कृ इति कणति कण-शब्दे अच् । (कयार) क्रकर-पक्षिणि, क्षुधाकारके देहस्थे वायुभेदे च ।

कृकर * पु॰ कृ इति शब्दं करोति । क्षुधाकारे देहस्थे वायौ ।

कृकलास * पु॰ कृकं कण्ठं लासयति अच् । सरटे (काँकलास) पक्षिणि । [मयूरे, सरटे च ।

कृकवाकु * पु॰ कृकेण वक्ति वच-परिभाषणे ञुण् कश्च । कुक्कुटे,

कृकाटिका * स्त्री॰ कृकं कण्ठमटति अट-ण्वुल् टाप् कापि अत इत्त्वम् । ग्रीवायामुन्नतदेशे ।

कृच्छ्र * न॰ कृत-रक् छोऽन्तादेशः । कष्टे, दुःखे, तत्कारणे-पापे, कष्टदायके-प्राजापत्यादिव्रते, मूत्रकृच्छ्ररोगे च । तद्वति त्रि॰ ।

कृत * छेदे तुदा॰ पर॰ सक॰ सेट् । मुचादि । कृन्तति अकर्त्तीत् कर्त्तिष्यति कर्त्स्यति कृत्तः ।

कृत * वेष्टे रुधा॰ पर॰ सक॰ सेट् । कृणत्ति कृन्तः अकर्त्तीत् ।

कृत * न॰ कृ-क्त । "चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्" इति मनूक्ते दिव्यमानेन चतुःसहस्रमितवर्षे, मानुषमानेन १७ २८००० मितवर्षे, सत्ययुगे, पर्य्याप्ते, अलमर्थे, फले च । रचिते त्रि॰ । [त्रि॰ ।

कृतक * न॰ कृत+कन् । विड्लवणे । कृत्रिमे, मिथ्याकल्पिते च

कृतकर्मन् * त्रि॰ कृतं कर्म्म कर्म्मक्षं येन । कृतार्थे, समाप्तकार्य्ये, धन्ये, विदग्धे च ।

कृतपद * त्रि॰ कृतः पदः मनयो येन। कृताभ्यासे।

कृतघ्न * कृतं हन्ति हन-क। कृतोपकारस्य जनस्य अपकारे प्रवृत्ते जने "कृतघ्ने नास्ति निष्कृतिः" इति पुराणम्।

कृतच्छिद्रा * स्त्री॰ कृतं छिद्रं यस्याः। कोषातकीलतायाम्।

कृतज्ञ * त्रि॰ कृतं कृतोपकारं जानाति ज्ञा-क। कृतोपकारस्मारके उपकारके। कुक्कुरे पु॰।

कृतधी * त्रि॰ कृता सम्पादिता धीर्येन। शास्त्राभ्यासजनितान्तःकरणे, विदिते, "कृतधीः किं प्रभाषेत" इति गीता।

कृतवर्मन् * पु॰ कृतवर्मा दुष्टानुपसर्गेभ्यो रक्षकः यादवो नामः। कृतवर्मा।

कृतवत् * त्र्य॰ कृत-वतु। कृतवति, निषेधे च।

कृतमाल * पु॰ कृता माला यस्य। आरग्वधे (सोन्दाल), कर्णिकारे च।

कृतलक्षण * त्रि॰ कृतानि लक्षणान्यस्य। गुणैर्विख्याते।

कृतवर्मन् * पु॰ हार्दिक्यपुत्रे यादवे क्षत्रियभेदे।

कृतवेश * त्रि॰ कृतः वेशो येन। सर्वाकारभूषिते।

कृतवीर्य * पु॰ कृत वीर्यं यस्य। यदुवंश्यनृपभेदे कार्तवीर्यार्जुनस्य जनके नृपभेदे। वीर्यसम्पन्ने त्रि॰।

कृतविद्य * त्रि॰ कृता अभ्यस्ता विद्या येन। अभ्यस्तविद्ये।

कृतपादिका * स्त्री॰ [illegible]

[illegible]

कृतान्त * पु॰ कृत-अन्त [illegible]

[illegible]

छन्दोभेदे च। [यति, निपुणे, साधौ, कृतार्थे।

कृतिन् * स्त्री॰ कृतमनेन इष्टादित्वादिनि। पण्डिते, दक्षे, पुण्यवति।

कृत्त * त्रि॰ कृत-क्त। छिन्ने, वेष्टिते च।

कृत्ति * स्त्री॰ कृत-क्तिन्। चर्मणि, भूर्जपत्रे च।

कृत्तिका * स्त्री॰ कृत-क्तिन् संज्ञायां कन्। अश्विन्यवधिके तृतीये नक्षत्रे। [कालेः सुतो यानः। स्त्री॰

कृत्तिकासुत * पु॰ कृत्तिकायाः सुतः। स्कन्दे। कृत्तिकातनयः।

कृत्तिवासस् * पु॰ कृत्तिचर्म वासो यस्य, कृत्तिं वस्ते वस-क्विप् वा। शिवे। [यत्कर्तरि सान्येषु प्रत्ययेषु पु॰। कर्तव्ये त्रि॰।

कृत्य * न॰ कृत-क्यप्। कार्ये, व्याकरणोक्तेषु तव्यतव्यानीयरादिषु।

कृत्यविद् * त्रि॰ कृत्यं कर्तव्यं वेत्ति विद्+क्विप्। कार्यज्ञे। "कृत्यविदित्युवाच" इति रघुः। [देवभेदे।

कृत्या * स्त्री॰ कृ-क्यप् टाप्। क्रियायाम्, अभिचारक्रियायां

कृत्रिम * कृ-क्त्रि मेमप् च। विड्लवणे, काचलवणे, तुरुष्कगन्धद्रव्ये, रसाञ्जने च। सिह्लके, द्वादशविधपुत्रान्तर्गते पुत्रे च पु॰। क्रियया निष्पन्नमात्रे त्रि॰।

कृत्स्न * न॰ कृत-क्स्न। सकले, जले, कुक्षौ च। पर्याप्ते त्रि॰।

कृन्तन * न॰ कृत-ल्युट्। नि॰ नुम् च। छेदने, "कृन्तन यो यातो छेदनस्य वनस्पतेः" इति श्रुतिः।

कृप * सामर्थ्ये भ्वादि॰ आत्म॰ लुङि लुटि लृटि लङि च परस्मैपदादि पक्षे॰ वेट्। कल्पते अकल्पत् अक्लृपत् अकल्पिष्ट कल्पितासि क्लृप्तासि कल्पितासे कल्प्स्यति कल्पिष्यते।

कृप * दौर्बल्ये चद॰ चुरा॰ उभ॰ सक॰ सेट्। कृपयति ते अचीकृपत् त।

कृप * गतौ चिन्ताकरणे वा चुरा॰ पक्षे भ्वादि॰ पर॰। कल्पति अकल्पीत् पक्षे अकृपत्-त अकल्पीत्।

कृप * पु॰ कृप-क। भरद्वाजपुत्रे द्रोणश्यालके कृपाचार्ये।

कृपण * पु॰ कृप-क्युन्। कृमौ। मन्दे, क्षुद्रे च "कृपणाः फलहेतवः" इति गीता। दीने, "कार्पण्यदोषोपहतस्वभावः" इति गीता, धनादौ च त्रि॰। [कृपाणः

कृपा * स्त्री॰ कृप भिद्। दयायाम्, परदुःखनिराचिकीर्षया दीनानां

कृपाण * पु॰ कृपां नुदति। खड्गे। कोषे। कृपाणः [illegible] कर्तर्याम्।

कृपालु * त्रि॰ कृपां लाति आलुच्। कृपायुक्ते।

कृपी * स्त्री॰ द्रोणाचार्यस्य पत्न्याम् अश्वत्थाम्नो जनन्याम्।

कृपीट * न॰ कृप कीटन्। उदरे, नीरे च।

कृपीटयोनि * पु॰ कृपीटस्य जलस्य योनिः। वह्नौ [illegible] इति श्रुत्यर्थस्य सर्वाग्निनाम्।

[illegible] कोटात् [illegible], [illegible] कोटसमागमे च।

[illegible]

कृमिकोषोत्थ * न० कृमेः कोषात् उत्तिष्ठति उत्पद्यते उद्-स्था-क। कौषेये (रेशमिवस्त्रे)।

कृमिघ्न * पु० कृमिं हन्ति हन-क। विडङ्गे, पलाण्डौ, कोलकन्दे, भल्लातके च। हरिद्रायाम् स्त्री० टाप्। धूपपमायां स्त्री० ङीप्।

कृमिज * न० कृमिभिर्जन्यते जन-कर्मणि ड। अगुरुणि चन्दने। कृमितो जाते त्रि०। लाक्षायां स्त्री० टाप्।

कृमिफल * पु० कृमयः फलेऽस्य। उदुम्बरे।

कृमिशैल * पु० कृमीणां शैल इव। वल्मीके। [वनमुद्गे।

कृमीलक * पु० कृमीन् ईरयति जनयति ईर-ण्वुल् रस्य लः।

कृश * तनूकरणे दिवा० पर० सक० सेट्। कृश्यति अकृशत् अकर्शीत्।

कृश * त्रि० कृश क्त नि०। अल्पे, सूक्ष्मे च।

कृशाङ्गी * स्त्री० कृशमङ्गमस्याः। प्रियङ्गुवृक्षे। कृशदेहे त्रि०।

कृशानु * पु० कृश-आनुक्। वह्नौ, चित्रकवृक्षे च।

कृशानुरेतस् * पु० कृशानौ वह्नौ रेतो यस्य। शिवे। देव्या सीदमसम्भ्रमाय शिववीर्यस्याग्नौ प्रक्षेपः कार्त्तिकेयो जात इति पुराणकथा अनुसन्धातव्या। [चक्रमर्द्दे।

कृष * आकर्षणे विलेखने च तुदा० उभ० सक० अनिट्। कृषति।

कृष * आकर्षणे विलेखने च भ्वादि० पर० सक० अनिट्। कर्षति अकाक्षीत्-अकार्क्षीत्-अकृक्षत्।

कृषक * पु० कृष क्वुन्। फाले, हले च। कर्षके त्रि०।

कृष(श)ल(र)र * पु० "तिलतण्डुलमाषाद्यः कृष(श)र(ल)रः परिकीर्त्तितः" इत्युक्ते तिलमिश्रिते पक्वे तण्डुलाद्ये।

कृषि * स्त्री० कृष-इक्। वैश्यवृत्तिभेदे भूमिकर्षणरूपे शस्योत्पादनव्यापारे। कर्मणि इक्। भूमौ।

कृषिजीविन् * त्रि० कृष्या जीवति जीव-णिनि। स्वयमपत्यं वा कृषकेण कृषिद्वारा जीविनि।

कृषीवल * त्रि० कृषिरस्त्यस्य वलच् दीर्घश्च। कर्षके।

कृष्टपच्य * त्रि० कृष्टे क्षेत्रे स्वयमेव पच्यते पच यत्। धान्यादौ।

कृष्ण * पु० कृष-नक्। भगवतोऽवतारभेदे वासुदेवे देवकीनन्दने। "कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते" इत्युक्ते परब्रह्मणि, वेदव्यासे, अर्जुने शयामवर्णे च। कृष्णवर्णत्वात् काके, कोकिले, करमर्द्दके (करमचा) द्रुमे, नीले वर्णे च। तद्वति त्रि०। कृष्णागुरुणि, अञ्जनमरिचे च न०। द्रौपद्यां, नीलीवृक्षे, द्राक्षायां, दारुदार्व्यां, जीवन्तीवृक्षे, कृष्णजीरके, राजसर्षपे, कटुरोहिण्याम्, शारिवायाम्, पिप्पल्यां, काकोल्यां कृष्णवर्णवत्याम् स्त्री० टाप्। नीलाञ्जने, लौहे, मरिचे च न०।

कृष्णकलि * पु० कृष्ण इव कुसुमं कलि कलिका यस्य। [illegible] कृष्णवर्णपुष्पवृक्षे।

कृष्णकाय * पु० कृष्णः कायो यस्य। महिषे। कृष्णवर्णदेहयुक्ते त्रि०।

कृष्णगन्ध * पु० कृष्णः गन्धो गन्धोऽस्य। शोभाञ्जनवृक्षे।

कृष्णगर्भ * पु० कृष्णवर्णो गर्भोऽस्य। कट्फले। [वृक्षे।

कृष्णचूडा * स्त्री० कृष्णस्य चूडा इव चूडाऽस्य। स्वनामख्याते पुष्पवृक्षे।

कृष्णचूर्ण * न० कृष्णस्य चूर्णम्। लौहमले (लोहार गु)।

कृष्णजटा * स्त्री० कृष्णा जटा यस्याः। जटामांस्याम्।

कृष्णजीरक * पु० कर्म०। कृष्णवर्णजीरके (कालजीरे)।

कृष्णद्वैपायन * पु० द्वीपे भव. फञ् कर्म०। वेदव्यासे, तस्य पराशरात् यमुनाद्वीपे जन्म अभवदिति पुराणम्।

कृष्णधुस्(धत्)र * पु० कर्म०। (कालधुतरा) वृक्षभेदे।

कृष्णपर्णी * स्त्री० कृष्णं पर्णमस्याः। (कालतुलसी) कृष्णतुलस्याम्।

कृष्णपक्ष * पु० कर्म०। प्रतिपदाद्यमावास्यान्तासु पञ्चदशसु तिथिषु, "कृष्णपक्षः स्मृतः कृष्णपक्षपक्षक." इत्युक्ते मासार्द्धकाले च। [क्षे। कारमर्द्दे।

कृष्णपाक * पु० पक्वे इति पाकः पक्वं कृष्णः कृष्णवर्णं पाको-

कृष्णपाकफल * पु० कृष्णपाकं फलमस्य। करमर्द्दे।

कृष्णफल * पु० कृष्णं पाकादस्यादौ फलमस्य। करमर्द्दे, शोभाराल्यां स्त्री० टाप्। [कटुकायाम्।

कृष्णभेद * पु० कृष्णो वर्णेन भेदनेन वा भेदोऽस्य। वा ङीप्।

कृष्णमुद्ग * पु० कर्म०। (कालमुग) मुद्गभेदे।

कृष्णरक्ता * स्त्री० कृष्णा रक्ता [illegible] इव च। [illegible]

कृष्णलवण * न० कर्म०। सौवर्चलवणे (कालानोन)।

कृष्णल * पु० कृष्णं वर्णं लाति ला-क [illegible] [illegible] गुञ्जाफले, [illegible] "[illegible]" इति मनुः।

कृष्णला * स्त्री० कृष्णं वर्णं [illegible] लाति ला-क टाप्। गुञ्जायाम्।

कृष्णलोह * न० कर्म०। [illegible]

कृष्णलोहित * पु० कृष्ण [illegible] [illegible]

[illegible]

कृष्णवक्त्र * पु० कृष्णं वक्त्रमस्य। वानरे।

कृष्णवर्ण * पु० कृष्णो वर्णोऽस्य [illegible] [illegible] [illegible] [illegible] त्रि०।

कृष्णवर्त्मन् * पु० कृष्णं वर्त्म [illegible] [illegible], [illegible] [illegible]

[illegible]

कृष्णवृन्ता * स्त्री० कर्म०। [illegible]

कृष्णशारी * स्त्री० कर्म०। [illegible]

कृष्णसार * पु० कृष्ण [illegible] [illegible]

कृष्णसर्प * स्त्री० [illegible] [illegible] [illegible]

[illegible]

[illegible]

[illegible]

कृष्णशालि * पु॰ कर्म॰। (कालधान) धान्यभेदे।
कृष्णशिम्बिका * स्त्री॰ कर्म॰। काकाण्डाम्।
कृष्णशिग्रु * पु॰ कर्म॰। कृष्णशोभाञ्जने (कालसजना)।
कृष्णशृङ्ग * पु॰ कृष्णं शृङ्गमस्य। महिषे।
कृष्णसर्षप * पु॰ कर्म॰। (राइ सर्षा) राजसर्षपे।
कृष्णसार * पु॰ कृष्णः सारोऽस्य। शिंशपावृक्षे (शिश)।
कृष्णस्कन्ध * पु॰ कृष्णः स्कन्धोऽस्य। तमालवृक्षे।
कृष्णागुरु * न॰ कर्म॰। कालागुरुणि, "कृष्णं गुणाधिकं तत् तु लोहवत् वारि मज्जति" इत्युक्तलक्षणे धूपकाष्ठे।
कृष्णाजिन न॰ कर्म॰। कृष्णसारमृगचर्मणि।
कृष्णायस * न॰ कर्म॰ टच् समा॰। कृष्णलौहे अयस्कान्ते।
कृष्णार्चिस् * पु॰ कृष्णः कृष्णता अर्चिभ्यो यस्य। कृष्णताकारकशिखे वह्नौ।
कृष्णार्जक * पु॰ कर्म॰। विपत्रे (कालतुलसी) वनवर्वरे।
कृष्णावास * पु॰ कृष्णस्यावासोऽस्मिन्। अश्वत्थवृक्षे।
कृष्णिका * स्त्री॰ कृष्णेव संज्ञाया कन्। (राइ सर्षा) राजसर्षपे।
कृष्णेक्षु * पु॰ कर्म॰। (काजला) इक्षुभेदे।
कृष्य * स्त्री॰ कृष-पर्य्याये क्यप्। कर्षणार्हायां भूमौ।
कॄ * विक्षेपे तुदा॰ पर॰ सक॰ सेट्। किरति अकारीत्। कीर्णः।
कॄ * हिंसने क्र्यादि॰ उभ॰ सक॰ सेट्। कृणाति अकारीत्।
कॄ * विज्ञाने चुरा॰ आत्म॰ सक॰ सेट्। कारयते अचीकरत।
कॄत * संशब्दे चुरा॰ उभ॰ सक॰ सेट्। कीर्त्तयति ते अचकीर्त्तत् त।
क्लृप्त * त्रि॰ क्लृप्-क्त। रचिते, नियते, "क्लृप्तेन सोपानपथेन" इति रघुः।
केकय * पु॰ देशभेदे, तद्राजस्य अपत्ये बहुषु लुक्। तद्देशराजभेदे च ब॰ व॰। तस्यापत्यं जनपदशब्दत्वात् केकयी स्त्री॰ भरतमातरि। [दृष्टियुक्ते पुरुषे (टेरा)।
केकर * पु॰ के मूर्ध्नि कर्त्तुं शीलमस्य कृ-अच् अलुक् स॰। तिर्य्यग्-
केका * स्त्री॰ के मूर्ध्नि कायति शब्दायते कै-क अलुक् समा॰। मयूरवाण्याम्।
केकावल * पु॰ केका+अस्त्यर्थे वलच्। मयूरे।
केकिन् * पु॰ केका+अस्त्यर्थे इनि। मयूरे।
केचन * अव्य॰ किम्+पुंसि बहुव॰ चन ततश्च। कैश्चिदित्यर्थे। एवं केचिदित्यप्यत्र। [केतत् त।
केत * आमन्त्रणे अद॰ चुरा॰ उभ॰ सक॰ सेट्। केतयति ते अचि-
केतक * पु॰ कित निवासे ण्वुल्। "केतकः सूचिकापुष्पो जम्बुकः क्रकचच्छदः" इत्युक्तलक्षणे वृक्षे, तत्पुष्पे न॰। गौरादि॰ ङीष्। केतक्यप्यत्र।
केतन * न॰ कित आह्वाने निवासे वा करणाधारादौ ल्युट्। ध्वजे, निमन्त्रणे, गेहे, अङ्के, स्थाने, कार्ये च।
केतु * पु॰ चाय-तु किच्च कादेशः। दीप्तौ, ध्वजे, [illegible], चिह्ने, रिपौ च। राहोः शरीरात्मके उपग्रहे। तेषामुत्पातरूपता ज्योतिषे सिद्धा ब॰ व॰।
केतुमाल * न॰ "सुकेतनं केतुमालं प्रतीच्यां गन्धमादनात्" इत्युक्ते जम्बुद्वीपस्य नवखण्डान्तर्गते खण्डभेदे।
केदार * पु॰ के शिरसि दारोऽस्य। पर्वतभेदे, तत्स्थे शिवलिङ्गभेदे, भूमिप्रभेदे, आलवाले, क्षेत्रे च।
केनिपात * पु॰ के जले निपातोऽस्य अलुक् स॰। अरित्रे नौकादेर्गतिनियामके (हाल) इति प्रसिद्धे काष्ठे। वा कपि तत्रैवार्थे।
केन्दु * पु॰ कुत्सित इन्दुः कोः कादेशः। तिन्दुकवृक्षे। सञ्ज्ञायां कन्। (गाब) गालकवृक्षे।
केमुक * पु॰ के शिरसि अमयति रुजति अम+उक् अलुक् समा॰। (केन्ट) इति ख्याते केन्दुवृक्षे। "अथ केमुकवर्जितम्" इति स्मृतिः।
केयूर * पु॰ के बाहुशिरसि याति या-ऊरन् अलुक् समा॰। (बाजु) (ताड) बाहुभूषणे।
केरल * पु॰ ब॰ व॰। "सुब्रह्मण्यं समारभ्य यावद्देशो जनार्दन। तावत् केरलदेशः स्यात्" इत्युक्ते देशे। वैदिकयागानधिकारिणि श्मश्रुधारिणि, "कोलिसर्पा माहिषका दर्वाश्चोलाः सकेरलाः। सर्वे ते क्षत्रियास्तात! धर्मस्तेषां निराकृतः" इति हरिवंशोक्ते क्षत्रियभेदे च। [अचिकेलत् त।
केल * चालने भ्वादि॰ पर॰ सक॰ सेट्। केलति अकेलीत्। णिचि
केलि * पु॰ स्त्री॰ केल-इन्। परीहासे, क्रीडायाञ्च। स्त्रियां स्त्री॰ वा ङीप्।
केलिवृक्ष * पु॰ केलेः क्रीडायै वृक्षः। केलिकदम्बवृक्षे।
केलिसचिव * पु॰ केलौ सचिवः सहायः। नर्मसचिवे, क्रीडासचिवे सन्धिवि च। [अचिकेवत् त।
केव * सेवने भ्वादि॰ आत्म॰ सक॰ सेट्। केवते अकेविष्ट। णिचि
केवल * त्रि॰ केव-कलच् के सरसि वलयति वल-अच् अलुक् स॰। एके, कृत्स्ने च। निर्णीते, ज्ञानभेदे, शठे च न॰।
केविका * स्त्री॰ केव-ण्वुल्-टाप्। कर्णाटदेशप्रसिद्धे (केवेर) इति ख्याते पुष्पप्रधाने वृक्षे, भृङ्गारे च।
केश * पु॰ क्लिश्यते क्लिश्नाति वा क्लिश-अच् ललोपश्च कस्य ईशो वा। वरुणे, श्रीवेरे, दैत्यभेदे, शिरोजे, चिकुरे च। मज्जधातुप्रभोपधातुविशेषोऽयं केशः। अस्य पर्य्यायशब्दाः पाशादिशब्दाः केशभूयस्त्ववाचिनः। "पाशस्तु तत्पराः पाशो रचनाभार उच्चयः। हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः" इत्युक्तेः।
केशकीट * पु॰ ६त॰। यूकाख्ये केशकीटे (उकुण)।
केशपर्णी * स्त्री॰ केश इव पर्णमस्याः जातित्वात् ङीप्। अपामार्गे।
केशपाशी * स्त्री॰ केश+पाश-गौरा॰ ङीष्। शिखायाम्, केशमध्यस्थचूडायाञ्च।
केशमथनी * स्त्री॰ केशे केशा मथ्यन्तेऽनेन मथ+ल्युट्-ङीप्। शमीवृक्षे।
केशमार्जक * न॰ केशात् मार्ष्टि मृज-ण्वुल्। (काँकइ चिरुणि)

इति ख्यातायां केशप्रसाधिकायां कङ्कतिकायाम्।

केशर * पु० के जले शीर्य्यते शॄ-अप्। सिंहस्कन्धस्थायां जटायाम्, अश्वस्कन्धस्थकेशेषु, पुन्नागवृक्षे, बकुलवृक्षे, नीलकेशरवृक्षे, सुरानामगन्धद्रव्ये च। हिङ्गुनि न०। किञ्जल्के पु० न०।

केशरञ्जन * पु० केशान् रञ्जयति रन्ज-णिच्-ल्यु। भृङ्गराजवृक्षे (भीमराज)।

केशराज * पु० केशा राजन्तेऽनेन घञ्। भृङ्गराजे (भीमराज)।

केश(स)रिन् * पु० केश(स)राः सन्त्यस्य इनि। सिंहे, अश्वे, पुन्नागवृक्षे, नागकेशरवृक्षे, बीजपूरकवृक्षे, हनुमत्पितरि वानरभेदे च।

केशरूपा * स्त्री० केशस्येव रूपमस्याः। वन्दाकवृक्षे (परगाछा)।

केशव * पु० केशो ब्रह्मरुद्रौ सर्वेश्वरावपि अनुकम्प्यतया वाति वा-क। केशं केशिनं असुरं वाति हिनस्ति वा-क वा। विष्णौ। "यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन। तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसि" इत्युक्तेः। "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मात् मां प्राहुर्द्विजसत्तमाः" इत्युक्तं सूर्य्यांशवति परमेश्वरे च। केश+प्राशस्त्ये व। प्रशस्तकेशवति त्रि०। [लतायाम्।

केशवर्द्धिनी * स्त्री० केशान् वर्द्धयति वृध-णिच्-णिनि। सहदेवी-

केशवेश * पु० केशस्य वेशः। कबरीबन्धने। [लतायाम्।

केशारुहा * स्त्री० केशा आरोहन्त्यनया रुह-घञर्थे क। सहदेवी-

केशिक * त्रि० प्रशस्ताः केशाः सन्त्यस्य ठन्। प्रशस्तकेशयुक्ते जने।

केशिका * स्त्री० केशिन इव कायति प्रकाशते कै-क। शतावरी-वृक्षे। [विष्णौ, दैत्यभेदे, सिंहे च पु०।

केशिन् * त्रि० प्रशस्ताः केशाः सन्त्यस्य केश+इनि। प्रशस्तकेशवति।

केशिनिषूदन * पु० केशिनं निषूदयति हिनस्ति नि+सूद-णिच्-ल्युट्। लत्वम्। केशिहादयोऽप्यत्र।

केश्य * न० केशाय हितं केश+यत्। कृष्णागुरुणि। भृङ्गराजे पु०।

केसर * न० के जले सरति सृ-अच्। हिङ्गौ, नागकेसरपुष्पे, कासीसे, स्वर्णे च। नागकेशरवृक्षे, तुरङ्गस्कन्धस्थे केशे, सिंहस्कन्धस्थजटायां, पुन्नागवृक्षे च पु०। किञ्जल्के पु० न०।

कै * शब्दे भ्वादि० पर० अक० अनिट्। कायति अकासीत्।

कैकयी * स्त्री० केकयानां देशानां राजा तस्यापत्यम् अणि ङीप्। दशरथपत्न्यां भरतमातरि। [देशभूपे।

कैकेय * पु० केकय+राजनि+अञ्। नि० अत एत्वं वृद्धिः। केकय-

कैकेयी * स्त्री० केकयस्यापत्यं स्त्री अण्। भरतमातरि दशरथपत्न्याम्।

कैटभ * पु० कीटवत् भाति भा-क स्वार्थे अण्। दैत्यभेदे।

कैटभजित् * पु० कैटभं जितवान् जि+भूते क्विप् तुक् च। विष्णौ। कैटभार्य्यादयोऽप्यत्र।

कैटर्य्य * पु० किट-त्रासे घञ् कैटं राति रा-प्रतिदित्वात् क स्वार्थे ष्यञ्। निम्बे

कैतव * न० कितवस्य कर्म अण्। कपटतायाम्। स्वार्थे अण्। द्यूते, वैदूर्य्यमणौ, धुस्तूरपुष्पादौ च। [क्षेत्रसमूहे न०।

कैदार * पु० केदारस्य क्षेत्रस्यायम् अण्। केदारजन्ये शालिधान्ये।

कैदार(रि)क * न० केदार+समूहार्थे वुञ्, ठञ् वा। क्षेत्रसमूहे।

कैरव * न० के जले रौति रु-अच् अलुक् स०। केरवो हंसस्तस्य प्रियम् अण्। कुमुदे, शुक्लोत्पले, शत्रौ च।

कैरविणी * स्त्री० कैरव+इनि। कुमुदसमुदाये, तद्युक्तलतायाञ्च।

कैरवी * स्त्री० कैरवाय हिता अण्। चन्द्रिकायाम्।

कैरात * पु० किरात इव शूरः इवार्थे अण्। बलवत्पुरुषे, किरातदेशे (पर्य्यन्तदेशे) भवः अण्। भूनिम्बे, शम्बरचन्दने च न०।

कैरात न० केरलदेशे भवम् अण्। विडङ्गे।

कैलास * पु० के जले लासो लसनं दीप्तिरस्य अलुक् स०, केलसः स्फटिकस्तस्येव शुभ्रः अण्, केलीनां समूहः अण्, केलं तेनास्यतेऽत्र आस-घञ् वा। शिवकुवेरयोः स्थाने।

कैलासपति * पु० ६त०। शिवे। [(जेले) धीवरजातौ।

कैवर्त्त * पु० के जले वर्त्तते वृत-अच् अलुक् समा० ततः स्वार्थे अण्।

कैवर्त्तमुस्तक * पु० कर्म०। जलस्थितमुस्तके (केशुर)।

कैवल्य * न० केवलस्य गुणस्य उपाधिरहितस्य भावः। मोक्षे।

कैशिक * न० केशानां समूहः ठक्। केशसमूहे। नाटकाभिधे वृत्तिभेदे स्त्री० ङीप् साहित्यदर्पणे ६परि०।

कैशोर * न० किशोरस्य भावः अञ्। "पौगण्डं दशमावधि, कैशोरमापञ्चदशात्" इत्युक्तायां किशोरावस्थायाम्।

कैश्य * न० केशानां समूहः ष्यञ्। केशसमूहे।

कोक * पु० कोकते कुक+आदाने अच्। चक्रवाके, वृके, भेकाम्, खर्ज्जूरीवृक्षे, दर्दुरे, विष्णौ च।

कोकनद * पु० कोकान् चक्रवाकान् नदति नादयति अन्तर्भूतण्यर्थे नद-अच्। रक्तकुमुदे, रक्तपद्मे च। [त्रि०।

कोकनदच्छवि * पु० कोकनदस्येव छविर्दीप्तिरस्य। रक्तवर्णे। तद्वति

कोकबन्धु * पु० कोकयोश्चक्रवाकयोर्मिलनकारित्वात् बन्धुरिव। सूर्य्ये। [स्त्रियां टाप्।

कोकिल * पु० कुक आदाने इलच्। स्वनामख्याते पिकपक्षिभेदे।

कोकिलाक्ष * पु० कोकिलस्याक्षीव रक्तमक्षि पुष्पं यस्य। (काल-माखना) क्षुपभेदे, करवीरभेदे, इक्षुरकायाञ्च।

कोकिलावास * पु० ६त०। आम्रवृक्षे।

कोकिलेष्ट * पु० कोकिल इव कृष्णं इष्टुः। (कालजाम) इक्षुभेदे।

कोङ्कण * पु० कौमिति कनत्यत्र। "सह्याद्रेः पश्चिमे भागे कोङ्कणः परिकीर्त्तितः।" इत्युक्ते देशभेदे।

कोच * पु० कुच-अच्। देशभेदे, महेश्वरे "नीलाद्रेश्च पूर्वतः कामरूपादुत्तरे। कोचनामैति विश्रुतः।" इत्युक्ते देश-

कोजागर * पु॰ कोजागर्त्तीति वदत्यस्मिन् पु॰। आश्विनपौर्णमास्याम्। "निशीथे वरदा लक्ष्मीः कोजागर्त्तीति वादिनी" इति।

कोट * पु॰ कुट-घञ्। कौटिल्ये, दुर्गे च (गड़)।

कोटर * पु॰ न॰ कोट कौटिल्यं राति रा-क। वृक्षस्यगह्वरे।

कोटवी * स्त्री॰ कोटं वाति वा-क गौरा॰ ङीप्। नग्निकायां स्त्रियां, दुर्गायाञ्च।

कोटि * स्त्री॰ कुट-इन्। धनुषोऽग्रभागे, वस्तुमात्रस्याग्रभागे, प्रकर्षे, शताम् (निर्जिङ्गुमाह), संशयस्यालम्बने, वादे निर्णयार्थे कृते पूर्वपक्षे, शतलक्षनिरुक्तसंख्यायां, तत्संख्ये दे च। वा ङीप् कोटीत्यप्यत्र। [कोटे।

कोटिक * पु॰ कोट्या बहुधा कायति प्रकाशते कै-क। इन्द्रगोप-

कोटिर * पु॰ कोटिं राति रा-क। इन्द्रे, नकुले, इन्द्रगोपकीटे च।

कोटिवर्षा * स्त्री॰ कोटिभिरग्रैर्वर्षति मधु वृष-अच्। (पिङ्गिङ्ग) शाकभेदे।

कोटिहोम * पु॰ कोट्या कर्त्तव्य होम [illegible]। होमभेदनैऽस्मे।

कोटीर * पु॰ कोटिमीरयति ईर-अण्। किरीटे, जटायाञ्च।

कोट्ट * पु॰ कुट्ट [illegible]। दुर्गे (गड़), राजधानीभेदे च।

कोट्टवी * स्त्री॰ [illegible] वाति वा-क गौरा॰ ङीप्। नग्नायां स्त्रियाम्, दुर्गायाञ्च।

[illegible]

[illegible]

[illegible]

[illegible] [illegible] [illegible]

[illegible] [illegible] [illegible]

[illegible]

[illegible]

कामिप्रायेण।

कोरङ्गी * स्त्री॰ कुर-अङ्गच्-ङीप्। सूक्ष्मैलायाम्, पिप्पल्याञ्च।

कोरदूष * पु॰ कोरं दूषयति दुष-णिच् अण्। (कोदो) धान्यभेदे।

कोल * पु॰ कुल-संस्त्याने अच्। क्रोडे-शनिग्रहे, शूकरे, उडुपे (डोङ्गा), भुजान्तरे, भेलके, चित्रायाम् (चिता), फलभेदे, तोलकमाने, जातिभेदे च। चव्ये, मरिचे, तोलकमाने, बदरी च न॰। [मरिचे, कक्कोले च न॰।

कोलक * पु॰ कुल-ण्वुल्। अङ्कोठवृक्षे (कांकला) च। गन्धद्रव्ये।

कोलकन्द * पु॰ कोलमिव कन्दोऽस्य। महाकन्दभेदे।

कोलदल * न॰ कोलं बदरीफलमिव दलमस्य। नखीनामगन्धद्रव्ये।

कोलपुच्छ * पु॰ कोलस्य शूकरस्येव पुच्छोऽस्य। कङ्कपक्षिणि।

कोलमूल * न॰ कोलस्य बदर्या इव मूलम्। पिप्पलीमूले।

कोलम्बक * पु॰ कुल-अम्बच् संज्ञायां कन्। तन्त्रीभिर्विना प्रसृतिसमुदाये वीणायाः काये। [कर

कोलवल्ली * स्त्री॰ कोल इव वल्ली तत्तुल्यरोमवत्त्वात्। गजपिप्पल्याम्।

कोलशिम्बि॰ स्त्री॰ कोलपादाकारा शिम्बिरस्याः। (पात्कुमी) इति ख्यातायां शूकरपादिकायां लतायाम्। [शिम्बीभेदे।

कोला * स्त्री॰ कुल-अच्-टाप्। पिप्पल्याम्, चव्यभेषजे, कोविदारे

कोलाविध्वंसिन् * त्रि॰ कोलां विध्वंसितुं वस्तुं शीलमस्य [illegible] धातोरन्यार्थपरत्वम्। पर्वतवासिनि म्लेच्छभेदे, "पालयन्तस्तस्य म्लेच्छाः पर्वतवासिनः। कोलाविध्वंसिनः [illegible]" इति देवीभागवतम्। "कोलाविध्वंसिनस्तथा" इति देवीमाहात्म्यम्। कोलायध्वः कोलाहलनाशकस्तथा च कोलाविध्वंसि राज्यविध्वंस कुर्वन्ति ये। तपु। [मिथ्यार्थे धर्मे

कोलाहल * पु॰ कुल-घञ् समाह्वयति अच्। बहुविधे ध्वनौ।

कोलि * पु॰ स्त्री॰ कुल इन्। बदर्याम्। ङीष्पक्षे वा ङीप्।

कोविद * पु॰ कु-शब्दे विच् कोः शब्दस्य वेत्ति विद+क। पण्डिते विदुषि। [[illegible]

कोविदार * पु॰ कु भूमिं विदृणाति वि+दॄ-अण्। रक्तकाञ्चने

कोश(ष) * पु॰ कुश(ष)-घञ्। पानपात्रे, कुड्मले, खड्गपिधाने [illegible] [illegible], धनागारे, अण्डे, शब्दावल्यां, पर्णाद्यपुटे, [illegible] [illegible], दिव्यभेदे, वीणा, शिम्बायाम्, गुणाके, [illegible] [illegible], [illegible] [illegible] च (कोश)। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

(भिक्षा) यस्यां तत्परत्वेऽपि ह्रीतत्वादित्वात् कौलम्।
कौपिका ● स्त्री० कौपी+ स्वार्थे शिक्षादित्वात् इकन्। गृहद्वारीम्।
कौपी(पो) ● स्त्री० कुप (कुप) घञ् गौरा०। चर्मपादुकायाम्, धान्यादपमार्जे च (गड्डा)।
कौप ● पु० कोपवत्।
कौपचक्षु ● पु० कोपाकारा चक्षुर्यस्य। मार्जारविशेषे।
कौपदृष्टि ● स्त्री० कोपस्य धनसञ्चयस्य दृष्टिः। धनहर्षे कोपवा-चकस्य प्रदिष्टत्वम्। योगविदे पु०।
कौपवादिका ● स्त्री० कोपे मेते गो-ण्वुल्। छुरिकायाम्।
कौपिन् ● पु० कौप+इनि। चाण्डाले।
कौठ ● पु० कुठ-घञ्। गृहमध्ये, उदरमध्ये, धान्यादिस्थापने कुशूले च (कुटी)। तत्सम्बन्धिनि त्रि०।
कोष्ण ● न० ईषदुष्णम् कोः कादेशः। ईषदुष्णस्पर्शे। तद्वति त्रि०।
कोशल ● पु० कौ पृथिव्यां शलति शब्दयते गच्छति अच् पृ० गुणः। सरयूतीरनिविष्टे देशे। अयोध्यायां स्त्री०। [च।
कोहल ● पु० कौ हलति स्पर्द्धते अच् पृ० गुणः। वाद्यभेदे, मद्यभेदे
कौक्कुटिक ● पु० कुक्कुटीं मायां, पादपतनदेशञ्च पश्यति ठक्। दाम्भिके, कीटादिवधभीत्या पादपतनदर्शिनि सन्न्यासिनि च।
कौक्षेयक ● कुक्षौ भवं ढकञ्। सततकुक्षिस्थे खड्गे।
कौट ● पु० कूटे पर्वतशृङ्गे भवः अण्। कुटजे (कुरची)। कुट्यां माय-भवः। स्वतन्त्रे त्रि०।
कौटज ● पु० कूटमेव कौटं तत्र जातः। कुटजे वृक्षे।
कौटतक्ष ● पु० कर्म०। स्वाधीनकर्मोपजीविनि। [illegible]
कौटिक ● त्रि० कूटेन मृगबन्धनयन्त्रेण चरति ठक्। मांसविक्रय-
कौडविक ● त्रि० कुडवः सम्भवति (तस्मिन् समावेशयति) तस्य पाकः वपनयोग्यं क्षेत्रम् वा ठञ्। कुडवधान्यपाकवपनयोग्ये पात्रे, तद्वपनयोग्ये क्षेत्रे च।
कौणप ● पु० कुणपः शवो भक्ष्यत्वेन विद्यतेऽस्य अण्। राक्षसे।
कौतुक ● न० कुतुक+प्रज्ञादित्वात् स्वार्थे अण्। अपूर्वदर्शनोत्सुक्ये।
कौतूहल ● न० कुतूहल+प्रज्ञादित्वात् स्वार्थेऽण्। कौतुके।
कौद्रवीण त्रि० कोद्रवाणां भवनं क्षेत्रम् खञ्। (कोदो) धान्यभेद-भवनयोग्ये क्षेत्रे।
कौन्ती ● स्त्री० कुन्तिषु देशेषु भवा अण् ङीप्। अपगन्धिन्योषधौ।
कौप ● त्रि० कूपे भवः अण्। "भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः। बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते" इत्युक्ते कूपोदके। स्त्रियां ङीप् "विरसाः कौपीरपः पास्यति" इति साहित्यदर्पणे उदा०।
कौपीन ● न० कूपं पतनमर्हति यथार्थे नि०। पापे, तद्वति त्रि०। गोप्यत्वात् पुरुषलिङ्गमपि कौपीनम् तदाच्छादकत्वात्। भिक्षुकादिवद्धे वस्त्रखण्डे च "कौपीनवन्तः खलु भाग्यवन्तः"

इति पुराणम्।
कौमार ● न० कुमारस्य भावः अण्। "आतः कुं पृथिवीं पद्भ्यां मारयेत् स कुमारकः" इत्युक्तलक्षणायां "कौमारं पञ्चमाब्दान्तम्" इत्युक्तावस्थायां "कौमारं यौवनं जरा" इति गीता।
कौमारी ● स्त्री० कुमारस्य कार्त्तिकेयस्येयम् अण्। कार्त्तिकेयशक्तौ, पूर्वकुमारीतिकायाञ्च। "अपूर्वपतिः कुमारीम्" उपयच्छति कौमारापूर्ववचने इत्यण्। भार्यायाम्।
कौमुद ● पु० "कौ मोदन्ते जना यस्मिन् कौमुदस्तेन कीर्त्तितः" इत्युक्तलिङ्गे कार्त्तिकमासे।
कौमुदी ● स्त्री० कुमुदानां चन्द्रस्येयम् अण्। ज्योत्स्नायां, तत्सम्बन्धे हि कुमुदप्रकाशः कविकल्पितः "कौ मोदन्ते जना यस्यां नानाभावैः परस्परम्। हृष्टाः तुष्टाः सुखापन्नास्तेन सा कौमुदी मता" इत्युक्तलक्षणायां कार्त्तिकपौर्णमास्याम्, आश्विनपौर्ण-मास्यामपि। [विष्णोः तस्येयम् अण्। विष्णुगदायाम्।
कौमोदकी ● स्त्री० कोः पृथिव्याः पालकत्वात् मोदकः कुमोदकः
कौरव ● पु० कुरोरयम् कण्वादित्वादण्। कुरुनृपसन्ततौ धृतराष्ट्र-सुतेषु पाण्डवेषु च उभयोरपि कुरुवंशजातत्वात्।
कौरव्य ● पु० कुरु-ण्य। कुरुवंशजे क्षत्रिये। बहुषु लुक्। कुरवः।
कौल ● त्रि० कुले सत्कुले भवः अण्। सत्कुलीने, तन्त्रोक्ते कुला-चाररते च।
कौलटिनेय ● पु० स्त्री० भिक्षुकायाः सत्या अपत्यम् ढक् इनादेशश्च। सत्या भिक्षुक्याः पुत्रे। स्त्रियां ङीप्।
कौलटेय ● पु० स्त्री० कुलटायाः सत्याः असत्या वा अपत्यम्। ढक्। सत्याः असत्याश्च कुलटायाः पुत्रे। स्त्रियां ङीप्। [पुत्रे।
कौलटेर ● पु० स्त्री० कुलटायाः असत्या अपत्यम् ढ्रक्। बन्धक्याः
कौलिक ● त्रि० कुलादागतः ठक्। कुलपरम्परागते। कुलेनाचरितः ठक्। कुलाचारे। कौलं कुलधर्मं प्रवर्त्तयति ठक्। कुलधर्मप्रव-र्त्तके तन्त्रोक्ते शिवे, मन्वादौ च।
कौलीन ● न० कौ पृथिव्यां लीनं यस्मात् अलुक् समा०। गुह्ये, परीवादे, दुष्टकार्ये च। कुलीनस्य भावः कर्म वा। कुलीन-कर्मणि, प्राणिभिर्द्यूते च।
कौलेय ● त्रि० कुले+भवः ढक्। सत्कुलोत्पन्ने।
कौलेयक ● पु० कुले भवः श्वा ढकञ्। कुलागते कुक्कुरे।
कौवेरी ● स्त्री० कुवेरस्येयम् अण्। मातृभेदे, उत्तरदिशि च।
कौशल ● न० कुशलस्य भावः अण्। क्रियायां नैपुण्ये।
कौशलिका ● स्त्री० कुशलस्य प्रश्नः ठक्। कुशलप्रश्ने। कुशलाय सम्प्रश्नाय नीयते ठञ्। उपायने, उपढौकने च।
कौशलेय ● पु० कौशल्यायाः अपत्यम् ढक् यलोपः। रामचन्द्रे।
कौशल्या ● स्त्री० कुशलस्य चातुर्वर्ण्यादित्वात् ष्यञ्। राममातरि।
कौशाम्बी ● स्त्री० कुशाम्बेन निर्वृत्ता नगरी अण्। वत्सपत्तने।
कौशिक ● पु० कुशिकस्य गोत्रापत्यम् ऋष्यण्। विश्वामित्रे मुनौ।

क्रव्याद् * पु० क्रव्यमत्ति अद क्विप्। राक्षसे, श्वपादौ च।

क्रव्याद * पु० क्रव्यमत्ति अद-अण्। राक्षसे, सिंहे, श्येने, शवमांस-भक्षकेऽग्नौ "क्रव्यादो मृतभक्षणे" इत्यग्निनामभेदे श्रवणात्।

क्रशिमन् * पु० कृशस्य भावः इमनिच्। कृशत्वे। [च त्रि०।

क्रान्त * पु० क्रम-क्त। अश्वे। आक्रान्ते, अतिक्रान्ते, व्याप्ते, संक्रान्ते

क्रान्तदर्शिन् * त्रि० क्रान्तमतीतं पश्यति णिनि। पण्डिते अतीत-द्रष्टरि।

क्रान्ति * स्त्री० क्रम-क्तिन्। आक्रमणे, गतौ, खगोलमध्यस्थसूर्य-गत्यर्थे तिर्य्यक्कोणरेखायाञ्च "अयनादयनं यावत् कक्षा तिर्य्यक् तथा परा। क्रान्तिसंज्ञा तया सूर्यः सदा पर्य्येति भासयन्" इत्युक्तकक्षायामपि।

क्रिमि * पु० क्रम-इनि अत इत्त्व। कृमिशब्दार्थे। [ङीप्।

क्रिमिघ्न * पु० क्रिमिं हन्ति हन-क। विडङ्गे। सोमराज्याम्। स्त्री०

क्रिया * स्त्री० कृ-भावे श-टाप्। आरम्भे, चेष्टायाम्, इन्द्रियव्या-पारे, पाकादिशब्दप्रवृत्तिनिमित्ते फलव्यापाररूपे धात्वर्थे, निष्कृतौ, पूजायाम्, शिक्षायां, चिकित्सायां, करणे, गर्भाधा-नादिसंस्कारे, व्यवहारपादविशेषे च। "सर्वेष्वर्थविवादेषु बल-वत्युत्तरा क्रिया" इति स्मृतिः।

क्रियापादः * पु० कर्म०। व्यवहारे साक्षिलेख्यादिभिः प्रतिज्ञातार्थ-साधनरूपे तृतीये पादे "पूर्वपक्षः स्मृतः पूर्वो द्वितीयोत्तरः स्मृतः। क्रियापादस्तृतीयः स्यात्" इति स्मृतिः।

क्रियाफल * न० ६त०। "इत्यात्तराजिर्धिक्कांतः सक्ष्मतिन चतुर्वि-धम्। क्रियाफलं प्राहुरार्य्याः" इत्युक्ते कर्मफले, उत्पत्त्यादौ, यागादिजन्ये पुण्यापुण्यादौ च।

क्रियायोग * पु० योगार्थं क्रियमाणे देवाराधनादौ। "यस्तु बाह्या-र्थसंयोगः क्रियायोगः स उच्यते। प्रधान कारणं योगो मुक्तेर्मुनि-वरोत्तम। क्रियायोगस्तु योगस्य कारणं परमं मतम्" इति पुराणम्।

क्रियासमभिहार * पु० सम्+अभि+हृ-घञ्। ६त०। क्रियायाः पौनःपुन्ये। "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः" इति माघः। [क्रीडति क्रीडीत अक्रीडीत् अक्रीड।

क्री * क्रये (मूल्यदानेन द्रव्यग्रहणे) क्र्यादि० उभ० सक० अनिट्।

क्रीड़ * खेलने भ्वादि० पर० अक० सेट्। क्रीडति अक्रीडीत्।

क्रीड़न * न० क्रीड-ल्युट्। परीहासे, क्रीडायाञ्च।

क्रीड़ा * स्त्री० क्रीड अ। परीहासे, खेलने च।

क्रीत * पु० क्री क्त। द्वादशपुत्रान्तर्गते "क्रीणीयाद् यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य" इत्युक्ते पुत्र-भेदे। क्रयकर्मणि क्रयेण प्राप्ते त्रि०।

क्रीतानुशय * पु० क्रीते अनुशयः दुष्टत्वादिना पश्चात्तापो यत्र। अष्टादशविवादेषु "क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते" इत्युक्ते विवादभेदे।

क्रुड * घात्ते दिवा० आत्म० अक० सेट्। क्रुड्यते। अक्रोडिष्ट।

क्रुञ्च् * पु० क्रुन्च-क्विप्। (कोँच) बकभेदे। जातित्वे टाप् क्रुञ्चा।

क्रुञ्च * पु० क्रुन्च+कर्मणि घञ्। क्रौञ्चपर्वते। अच् टाप्। वीणाभेदे।

क्रुध्(धा) * स्त्री० क्रुध+सम्पदादित्वात् क्विप् वा टाप्। कामाप्राप्ति-हेतुके चित्तवृत्तिभेदे कोपे। [भृत्यमभिक्रुध्यति अक्रुधत्।

क्रुध * कोपे दिवा० पर० अक० सोपसर्गः सक० अनिट्। क्रुध्यति

क्रुन्च * गतौ वक्रणेऽनादरे च सक० पर० सेट्। क्रुञ्चति अक्रु-ञ्चीत्।

क्रुन्थ * क्लेशे घोषे च क्र्यादि० पर० अक० सेट्। क्रुथ्नाति अक्रुन्थीत्।

क्रुश * रोदने आक्रोशे च सक० भ्वादि० पर० अनिट्। क्रोशति अक्रुक्षत्। [त्रि०

क्रुष्ट * क्रुश-भावे क्त। रोदने, रवे च। आङ्+कर्मणि क्त। आहूते

क्रूर * त्रि० कृत-रक् धातोः क्रू। कठिने, निर्दये, परद्रोहकारिणि, नृशंसे, उष्णे च। रक्तकरवीरे, श्येनपक्षिणि, कङ्कपक्षिणि, ज्योति-षोक्ते रविमङ्गलमन्दराहुकेतुरूपे ग्रहे, पूर्वात्रयभरणीमघारूपे नक्षत्रे च पु०।

क्रूरराविन् * पु० क्रूरमुग्रं रौति रु-णिनि। द्रोणकाके।

क्रेय * त्रि० क्री-यत्। क्रेतव्ये वस्तुमात्रे।

क्रोड़ * पु० न० क्रुड-घञ्। अङ्के (कोल)। राक्षसे, शूकरे च पु०। अश्वानामुरसि, भुजान्तरे च स्त्री० टाप्। वाराहीकन्दे पु० स्त्री०।

क्रोड़ाङ्घ्रि * क्रोडे अङ्घ्रिर्यस्य। कच्छपे।

क्रोध * पु० क्रुध-घञ्। पराज्ञकाराय चित्तवृत्तिभेदे, परानिष्टाभि-लाषे अनिष्टविषयहेतुके चित्तवृत्तिभेदे च।

क्रोधज * पु० क्रोधात् जायते जन-ड। मोहे "क्रोधात् भवति संमोहः" इति गीता। 'पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्द-ण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टक" इत्युक्ते व्यसन-भेदे च।

क्रोधन * पु० क्रुध युच्। कोपयुक्ते, कोपशीले, तन्त्रोक्तेषु अष्टसु भैरवेषु भैरवभेदे, षष्टिसंवत्सरमध्ये ज्योतिषोक्ते "रोगा मरण-दुर्भिक्षं विरोधो बहुलद्रुमः। क्रोधने विषमं सर्वम्" इत्युक्तफलके वत्सरभेदे च।

क्रोश * पु० क्रुश घञ्। रोदने, आह्वाने च। अष्टसहस्रहस्तमाने (कोश) "क्रोशः सहस्रद्वितयेन तेषाम्" इति लीलावती। मता-न्तरे सहस्रहस्तमाने। [स्त्रियां ङीष्।

क्रोष्टु * पु० क्रोशति क्रुश-तुन्। शृगाले। स्वार्थे कन्। अत्रैवार्थे।

क्रोष्टुपुच्छिका * स्त्री० क्रोष्टुरिव पुच्छमस्य अस्याः। (चाकुलिया) पृश्निपर्ण्याम्। [शृगालिका, आखुपर्ण्याञ्च।

क्रोष्ट्री * स्त्री० क्रुश-तृच् स्त्रियां ङीप्। भूमिकुष्माण्डे, विदार्याम्,

क्रौञ्च * पु० क्रुञ्च+स्वार्थे अण्। (कोँचवक) पक्षिभेदे, कुररपक्षिणि, देशभेदे, हिमवत्सुतेऽद्रिभेदे, द्वीपभेदे च।

क्षुद्रशङ्ख * पु॰ कर्म॰। शम्बूके। [त्रि॰।
क्षुद्रशीर्ष * पु॰ क्षुद्रं शीर्षमस्य। मयूरशिखावृक्षे। अल्पशीर्षवति
क्षुद्रशुक्ति * स्त्री॰ कर्म॰। जलशुक्तिकायाम्। स्वार्थे कन् तत्रैवार्थे।
क्षुद्रश्याम * पु॰ कर्म॰। अल्पश्यामरोगे। [रणभ्यायाश्च।
क्षुद्रसहा * स्त्री॰ सह+अच् क्षुद्रस्य सहा ६त॰। मुद्गपर्ण्याम्, मार्जा-
क्षुद्रसुवर्ण * न॰ कर्म॰। पित्तले। [रूपे टाप्। अत्रैवार्थे।
क्षुद्रहिङ्गुली * स्त्री॰ कर्म॰। कण्टकार्य्याम्। स्वार्थे कन् अत्रो
क्षुद्रा * स्त्री॰ क्षुद+रक्। वेश्यायाम्, कण्टकार्य्याम्, सरघायां, मक्षि-
कामात्रे, चाङ्गेर्य्याम्, हिंसायां, गवेधुकायाश्च (गड़गड़ेधान)।
क्षुद्राग्निमन्थ * पु॰ कर्म॰ (छोटगणियारी) स्वल्पगणिकारिकायाम्।
क्षुद्राम्लपनस * पु॰ अम्लः अम्लरसः पनसः कर्म॰। लकुचे (डेफो)
(मान्दार)। [स्वार्थे कन् तत्रैवार्थे।
क्षुद्राम्ला * स्त्री॰ अम्ला अम्लरसा कर्म॰। चाङ्गेर्य्याम् (चुकोपालङ्ग)
क्षुद्रेर्वारु * पु॰ कर्म॰। गोपालकर्कट्याम्।
क्षुद्रोदुम्बरिका * स्त्री॰ कर्म॰। काकोडुम्बरिकायाम्।
क्षुध * बुभुक्षायां दिवा॰ पर॰ सक॰ अनिट्। क्षुध्यति अक्षुधत्।
क्षुध्(धा) * स्त्री॰ क्षुध-सम्पदादित्वात् क्विप् वा टाप्। भोजनेच्छा-
याम्। [कापिशमदिक्स्थे पर्वतभेदे च।
क्षुप * पु॰ क्षु-पक्। ह्रस्वशाखाशिफायुक्ते आस्फोटादिद्रुमे, दार-
क्षुब्ध * पु॰ क्षुभ-क्त नि॰। मन्थनदण्डे। क्षुभिते त्रि॰।
क्षुभ * सञ्चलने भ्वादि॰ आत्म॰ अक॰ सेट्। क्षोभते अक्षुभत् अक्षो-
भिष्ट क्षुब्धः क्षुभितः। [भीत। क्षुभितः।
क्षुभ * सञ्चालने वा दिवा॰ अक॰ सेट्। क्षुभ्यति क्षुभ्नाति अक्षो-
क्षुभित * त्रि॰ क्षुभ-क्त। आलोडिते, व्याकुले, भीते,च।
क्षुमा * स्त्री॰ क्षु-मक्। (मसिना) (तिसी) अतस्याम्।
क्षुर * विलेखने तुदा॰ पर॰ सक॰ सेट्। क्षुरति अक्षोरीत्।
क्षुर * पु॰ क्षुर-क क्षु-रक् वा। नापितास्त्रे, पश्वादीनां शफे (खुर),
कोकिलाक्षे, गोक्षुरे, महापिण्डीतके, बाणे च। [च।
क्षुरक * पु॰ क्षुर-क्वुन्। गोक्षुरे (गोखुरी), कोकिलाक्षे, तिलकद्रुमे
क्षुर(रि)कर्मन् * न॰ क्षुरस्य क्षुरिणो वा नापितस्य कर्म॰। क्षौरे
श्मश्रुकेशादिकर्त्तने "क्षुर(रि)कर्म न कुर्वीत जन्ममासे च
जन्मभे" इति स्मृतिः। [क्षुरभाण्डादयोऽप्यत्र।
क्षुरधान * न॰ क्षुरो धीयतेऽस्मिन्। नापितास्त्राधारे (भांड़)।
क्षुरधार * पु॰ क्षुराणां धारेव शरपत्रधारा यत्र। नरकभेदे। [त्रि॰।
क्षुरपत्र * पु॰ क्षुर इव पत्रमस्य। बाणे। क्षुरतुल्यपर्णयुक्ते शरवणादौ
क्षुरपत्रिका * पु॰ क्षुर इव पत्रं यस्याः। पालङ्गशाके।
क्षु(खु)रप्र * पु॰ क्षुरः (खुरः) इव पृणाति छिनत्ति पृ-क। (खुरपो)
इति ख्याते घासच्छेदनास्त्रे, तत्तुल्याग्रफलके शरे च।
क्षुरमर्दिन् * पु॰ क्षुरं मर्दयति घर्षयति मृद-णिनि। नापिते।
क्षुरमुण्डिन् * पु॰ क्षुरेण मुण्डयति मुण्ड-णिनि ३त॰। नापिते।
क्षुराङ्ग * पु॰ क्षुर इवाङ्गमस्य। गोक्षुरे (गोखुरी)।

क्षुरिणी * स्त्री॰ क्षुर+अस्त्यर्थे इनि ङीप्। वराहक्रान्तायाम्, नापि-
तभार्य्यायाञ्च।
क्षुरिन् * पु॰ क्षुर+इनि। नापिते, पशौ च। [नखौ, कनिष्ठे च।
क्षुल्ल * त्रि॰ क्षु(खु)द-क्विप् क्षुद्(खुत्) तां लाति ला-क। अल्पे,
क्षुल्लक * त्रि॰ क्षुधा लक्यते लक-आस्वादाने घञर्थे क। नीचे,
पामरे, अल्पे च।
क्षेत्र * न॰ क्षि-ष्ट्रन्। देहे, अन्तःकरणे, इन्द्रिये, "इन्द्रियाणि दशै-
कञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं सङ्घातश्चे-
तना धृतिः। एतत् क्षेत्रम्" इति गीतोक्ते इन्द्रियादिसङ्घाते,
शस्योत्पत्तिस्थाने केदारे, सिद्धस्थाने, कलत्रे, मेषादिराशिषु च।
क्षेत्रज * क्षेत्रे जायते जन-ड। "यस्तल्पजः प्रमीतस्य क्लीबस्य
व्याधितस्य वा। स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजो मतः"
इत्युक्ते द्वादशविधपुत्रमध्ये पुत्रभेदे। क्षेत्रजातमात्रे त्रि॰।
गोविकायाम्, श्वेतकण्टकार्य्याञ्च स्त्री॰।
क्षेत्रज्ञ * पु॰ क्षेत्रं देहमात्मत्वेन जानाति ज्ञा-क। "क्षेत्राण्याहुः
शरीराणि तेषाञ्चैव यथासुखम्। आत्मानं वेत्ति सयोगात् ततः
क्षेत्रज्ञ उच्यते" इत्युक्ते जीवात्मनि।
क्षेत्रपति * पु॰ ६त॰। "रुद्रं क्षेत्रपतिं प्राहुः केचिदग्निमथापरे।
स्वतन्त्र एव वा कश्चित् क्षेत्रस्य पतिरुच्यते" इत्युक्तेषु रुद्रादिषु,
क्षेत्रस्वामिमात्रे च। क्षेत्रपालादयोऽप्यत्र।
क्षेत्ररुहा * स्त्री॰ क्षेत्रे रोहति रुह-अच्। वालुकर्कट्याम्।
क्षेत्राजीव * पु॰ क्षेत्रं शस्योत्पादनभूमिराजीवो यस्य। कृषके।
क्षेत्रिक * त्रि॰ क्षेत्र+अस्त्यर्थे ठन्। क्षेत्रस्वामिनि।
क्षेत्रिन् * त्रि॰ क्षेत्र+अस्त्यर्थे इनि। क्षेत्रस्वामिनि।
क्षेत्रिय * पु॰ परक्षेत्रे देहान्तरे चिकित्स्यः परक्षेत्र+घ नि॰।
देहान्तरचिकित्सनीये असाध्ये रोगे, "दण्डोऽयं क्षेत्रियो येन
मय्यपाती" इति भट्टिः, परक्षेत्रोत्पन्ने क्षेत्रजपुत्रादौ च। क्षेत्र-
जातमात्रे त्रि॰। [विलम्बे, हेलायाश्च।
क्षेप * पु॰ क्षिप-घञ्। विक्षेपे, निन्दायाम्, गर्वे, प्रेरणे, लङ्घने,
क्षेपक * त्रि॰ क्षिप ण्वुल्। क्षेपकर्त्तरि। घञ् स्वार्थे कन्। ग्रन्थादौ
अन्यकर्त्तुरन्येन क्षिप्तपाठे, गुच्छे च। लीलावतीप्रसिद्धे कुट्टके,
संयोजनीये अङ्कविशेषे च। [क्षेपणं सदा" इति स्मृतिः।
क्षेपण * न॰ क्षिप-ल्युट्। प्रेरणे, "आयुषः क्षेपणार्थञ्च दातव्यं
क्षेपणिका * स्त्री॰ क्षिप्यते चाल्यतेऽनया क्षिप-अनि। नौकाचाल-
नदण्डे (दाड़), जालभेदे च (क्षेपला)।
क्षेपणीय * क्षिप अनीयर्। भिन्दिपालेऽस्त्रे, पाषाणादिके वा
क्षेप्यास्त्रे च। क्षेप्यमात्रे त्रि॰।
क्षेपिष्ठ * त्रि॰ अयमेषामतिशयेन क्षिप्रः इष्ठन्। अतिशीघ्रगामिनि,
"वायुर्वै क्षेपिष्ठा देवता" इति श्रुतिः।
क्षेम * न॰ क्षि-मन्। चोरनामगन्धद्रव्ये। लब्धवस्तुनो रक्षणे पु॰
न॰। कुशले न॰। तद्वति त्रि॰। मुक्तौ न॰।

खटिक * पु॰ खटा+ठन्। कुक्षपाणौ। (खड़ि) सेचनद्रव्ये स्त्री॰। "खटिका लिखोति" इति नैषधम्।
खटिनी * स्त्री॰ खट+इनि। लेखनद्रव्ये (खड़ी) "न पतति खटिनी समभुवा यस्य" इत्युद्भटः।
खटी * स्त्री॰ खट-अच् गौरा॰ ङीप्। (खड़ी) लेखनसाधनद्रव्ये।
खट्ट ० हतौ चुरा॰ उभ॰ सक॰ सेट्। खट्टयति ते अचखट्टत् त।
खट्टा ० स्त्री॰ खट्ट अच्। "खट्टाभिः काष्ठखण्डैश्च कृता खट्वेति कथ्यते" इत्युक्तायां शय्यायाम्। [इत्युक्तम्। स्वल्पखट्टायाम्।
[ख]ट्टिका ० स्त्री॰ खुट्टा-खट्टा अल्पार्थे कन् अभाषितपुंस्कत्वात् वा अत
[ख]ट्वाङ्ग * पु॰ राजभेदे। खट्वाया अङ्गमिव। नरपञ्जरे, ईशायुधविशेषे, पृष्ठवंशे च। ६त॰ खट्वाया अङ्गे न॰ "खट्वाङ्गवरधारक." इति षट्कर्मदीपम्। [षट्कर्मरिपौ च।
[ख]ट्वाङ्गभृत् * पु॰ खट्वाङ्गं बिभर्ति भृ क्विप् तुक् च। शिवे,
[ख]ट्वारूढ़ * पु॰ खट्वा अम् आरुह-क्त नित्यस॰। प्रमादवति। खट्वाश्रिते त्रि॰। [अपकृष्टे।
... * मन्थने भक्षणे च भ्वादि॰ आत्म॰ इदित् सक॰ सेट्। खण्डते।
... भेदे चुरा॰ उभ॰ सक॰ सेट्। खडयति ते अचीखडत् त।
... न॰ खड-अच्। तृणभेदे (खड़)। पालान्तरे, भेदे च पु॰।
... * स्त्री॰ खडक् इत्यव्यक्तशब्दं करोति कृ-ड गौरा॰ ङीप्।
... [द्व]ारे (खिड़कि)। [सेचनद्रव्ये।
... [ख]ड्गी॰ खडि+अच् नि॰ नलोपः गौरा॰ ङीप्। खनामख्याते
... खडि-ग नि॰ नलोपः। गण्डकशृङ्गे, तद्वति गण्डकपशौ
... [गण्]डार)। चोरनामगन्धद्रव्ये, पशौ च। लौहे न॰।
... पु॰ ६त॰। चर्मादिमये खड्गपिधाने (खाप्) असुनि,
... खड्गावरके च। [खड्गकोषे (खाप) च।
... ६॰ खड्गस्य पत्रमिवाच्छादकम्। (ढाल) खड्गावरके,
... न॰ खड्गः पिधीयतेऽनेन। (खाप्) खड्गकोषे।
... खड्ग+अस्त्यर्थे इनि। गण्डारे। खड्गधारिजने त्रि॰।
... -घञ्। भेदे "खण्डं खण्डं ययुर्धना:" इति देवीमाहात्म्ये, इक्षुविकारे (खाँड) च न॰। कर्मधि
... [ह्र]दभेदे पु॰ न॰। [भेदे।
... [पु]॰ खण्ड इव कर्णः कन्दो यस्य। (शकरकन्द) आलु-
... पु॰ खण्ड इव कायति कै-क कर्म॰। (शकरकन्द)
... । [(काँकरोल)
खण[्डधारा] ... स्त्री॰ खण्डे एकदेशे धारा यस्याः। कर्त्त्याम्
खण्ड[न] ... * खण्डि-ल्युट्। भञ्जने, भेदने, निराकरणे च।
खण्डप[रशु] ... पु॰ खण्डयति खण्डः परशुरस्य। शिवे, तच्छिष्ये
[परशुर]ामे ... [रा]मे च। खण्डपरशुरप्यत्र।
खण्डिक * पु॰ खण्ड+अस्त्यर्थे ठन्। कलाये, पक्षिभेदे, कक्षे च।
[सु]खे त्रि॰। "खण्डिकोपाध्यायः शिष्याय चपेटं ददाति" इति भाष्यम्।

खण्डित * त्रि॰ खडि-क्त। भेदिते, छिन्ने, द्विधाकृते च। "ज्ञातान्यसङ्गविकृतैः खण्डितैर्वाकषायिता" इत्युक्तलक्षणायां स्त्रियां स्त्री॰।
खण्डी * स्त्री॰ खण्डयते गौरा॰। वनमुद्गे।
खण्डीर ० पु॰ अपकृष्टा खण्डी यवादित्वात् र। पीतमुद्गे।
खतमाल * पु॰ खे तमाल इव। धूमे, मेघे च। [अखदीत्।
खद ० स्थैर्ये अक॰ वधे सक॰ भ्वादि॰ पर॰ सेट्। खदति अखादीत्
खदिर * पु॰ खद किरच्। (खयेर) द्रुमभेदे, इन्द्रे, चन्द्रे च।
खदिरपत्रिका * स्त्री॰ खदिरस्येव पत्रमस्याः ङीप् ततः संज्ञायां कप् कपि ह्रस्वः। अरिमेदे, लज्जालुलतायाश्च। कन् भावे। खदिरपत्रीत्यप्यत्रैव। ["विना खदिरसारेण" इत्युद्भटः।
खदिरसार पु॰ ६त॰। खदिरद्रुमस्य निर्यासजे सारे (खयेर)
खदिरिका * स्त्री॰ खदिरः खदिररसोऽस्त्यस्याः ठन्। लाक्षायां तस्या हि खदिरतुल्यनिर्यासः। [(छागलजोड़ा) लतायाश्च।
खदिरी * स्त्री॰ खद-किरच् गौरा॰ ङीप्। लज्जालुलतायाम्, शाकभेदे, (छागलजोड़ा) लतायाश्च।
खदिरोपम * न॰ खदिर उपमा यस्य। (काँटावावला) द्रुमभेदे।
खद्योत * पु॰ खे द्योतते द्युत-अच्। सूर्य्ये, कीटभेदे च (जोनाकेपोका)।
खधूप * पु॰ खमाकाशं धूपयति धूप-अच्। (हाउइ) अग्नौ अग्निक्रीडने "सुमुचुः खधूपान्" इति भट्टिः।
खन * विदारे भ्वादि॰ उभ॰ सक॰ सेट्। खनति अखानीत् अखनीत् अखनिष्ट खायात् खन्यात्। [त्रि॰,।
खनक * पु॰ खन-वुन्। मूषिके, सन्धिचौरे च। भूमिदारके (कोड़ा)
खनि(नी) ० स्त्री॰ खन-इ वा ङीप्। धातुरत्नाद्युत्पत्तिस्थाने। आकरे, भूविदारणे च।
खनित्र ० न॰ खन-इत्र। (खोन्ता) अस्त्रभेदे।
खपुर * पु॰ खमिन्द्रियमाकाशं वा पिपर्त्ति पॄ-क। गुवाकद्रुमे (सुपारी), भद्रमुस्तके, व्याघ्रनखे च। अद्रिगते पुरे, घटे च न॰। अलसे त्रि॰। [पर्णाम् (पाना)।
खमूली * स्त्री॰ खे आकाशे भूमिमन्तरेणापि मूलमस्याः। वारि-
खम्ब ० गतौ भ्वादि॰ पर॰ सक॰ सेट्। खम्बति अखम्बीत्।
खर * पु॰ खं सुखविरुद्धमतिशयेनास्त्यस्य र खमिन्द्रियं राति रा-क वा रलयोरेकत्वम्। गर्दभे, अश्वतरे, राक्षसभेदे च "चेरतुः खरदूषणौ" इति भट्टिः। कण्टकिवृक्षभेदे, काके, कङ्कविहगे, कुररपक्षिणि, ६॰ संवत्सरमध्ये वत्सरभेदे, रवेः पार्श्वचरे, तिग्मस्पर्शे च। तद्वति, कठिने च त्रि॰ "खरविशदमभ्यवहार्य्यम्" इति भाष्यम्। देवताड़वृक्षे स्त्री॰ टाप्।
खरकाष्ठिका ० स्त्री॰ खरमुग्रं काष्ठं यस्याः। बलायामोषधौ।
खरगन्धा * स्त्री॰ खरो गन्धो यस्याः। नागबलायाम्।
खरघातन ० पु॰ खरमुग्ररोगं घातयति हन+णिच्-ल्यु। नागके-

शरे, रामे च।
खरच्छद * पु० खरः छदः पत्रमस्य। (उलुखड़) तृणभेदे।
खरणस्(स) * त्रि० खरा कठिना नासिकास्य नासिकाया नस आदेशः। णत्वम्। कठिननासिके।
खरत्वच् * पु० खरा कठिना त्वक् यस्य। लकुचभेदे। [पट्टे।
खरदण्ड * न० खरः पुष्पादपेक्षया कठिनो दण्डो नालो यस्य।
खरदला * स्त्री० खरं दलं यस्याः। काष्ठोडुम्बरे।
खरदूषण * पु० खरमुखं दूषणमुत्पादकताडितदोषो यत्र। धत्तूरे (धुतुरा)। बहुदोषे त्रि०। [णिनि। रामे।
खरध्वंसिन् * पु० खरं खरनामानं राक्षसं ध्वंसयति ध्वन्स-णिच्-
खरनादिनी * स्त्री० खरं नदति नद-णिनि। रेणुकानामगन्धद्रव्ये।
खरपत्र * पु० खराणि पत्राण्यस्य। शाकद्रुमे, मरुबके, दमनकतुल-स्याञ्च। गोजिह्वायां स्त्री० टाप्।
खरपत्रक * पु० खरपत्र+संज्ञायां कन्। तिलकद्रुमे।
खरपादाढ्य * न० खरैः पादैः मूलैराढ्यः। कपित्थद्रुमे।
खरपुष्पा(ष्पी) * स्त्री० खराणि पुष्पाण्यस्याः वा ङीप्। वर्वरा-ख्ये (बाबुइ तुलसी)।
खरमञ्जरी स्त्री० खरा मञ्जरी यस्याः गौरा० ङीष्। अपामार्गे।
खरयष्टिका * स्त्री० खरा यष्टी [illegible] (पान)।
खरशब्द * पु० खरः शब्दः शब्दोऽस्य। कुररपक्षिणि। ६त०। गर्दभशब्दे। कर्म०। कठशब्दे।
खरस्कन्ध * पु० खरः स्कन्धोऽस्य। पियालद्रुमे। खर्जूर्यां स्त्री०।
खराश्वा * स्त्री० [illegible] (बन-[illegible])।
खर * पु० [illegible] [illegible] त्रि०। [illegible]
[illegible]
खर्ज * [illegible] सक० पर० सेट्। खर्जति अखर्जीत्।
खर्जन * न० खर्ज-ल्युट्। कण्डूयने। [illegible]
खर्जू(र्जू) * स्त्री० [illegible]
खर्जूर * पु० [illegible] [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

च। नीचे, वामने च त्रि०।
खर्ब(र्व)ट * पु० खर्ब(र्व)+अटन्। "एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्। मिश्रं तु खर्ब(र्व)टो नाम नदीगिरिसमाकुलम्" इत्युक्तचिह्ने ग्रामे।
खर्वशाख * त्रि० खर्वाः शाखाः हस्तपादादयोऽस्य। वामने। ह्रस्वशाखावति द्रुमे पु०। [लताफलभेदे।
खर्बू(र्बू)ज * न० खर्ब(र्व)+क तस्याः जायते जन-ड। (खरमुज)
खर्व * गर्वे भ्वादि० पर० सक० सेट्। खर्वति अखर्वीत्। [सेट्।
खल * चलने सञ्चलने च भ्वादि० पर० सक० सेट्। खलति अखा-
खल * न० खल-अच्। धान्यमर्दनस्थाने (खामार) भुवि, तिलकल्के च (खइल्)। नीचे, अधमे, क्रूरे च त्रि०। खे शोदरे लो-ड। सूर्ये। खं वर्तमानं लाति ला-क। तमालद्रुमे।
खलति * पु० स्खल+सञ्चलने अति ह्र०। इन्द्रलुप्तरोगे (मायाटाक) तद्वति त्रि०। [(टेराम)।
खलपू * त्रि० खलं भूमिं पुनाति पू-क्विप्। स्थानशोधनकारिणि
खलाधारा * स्त्री० खल आधारो यस्याः। (तेलापोका) तैलपायि-कायाम्।
खलि * पु० खल-इ। तैलकीट्टे (खइल)।
खलि(ली)न * पु० न० खे मुखच्छिद्रे लीनं पृ० वा ह्रस्वः। अश्वमुखस्थायां कविकायां (कड़िआल)।
खलिनी * स्त्री० खलानां धान्यमर्दनस्थानानां समूहः इनि। धान्यमर्दनस्थानसमूहे। [मत्स्यभेदे।
खलिश * पु० खे आकाशे जलादूर्ध्वभागे लिशति क। (खलिशा)
खलीकार * पु० अखलं खलं करोति च्वि-कृ-घञ्। अपकारे तत्करणे हि अखलोऽपि खलो भवति।
खलु * अव्य० खल-उ। प्रश्ने, सान्त्वने, जिज्ञासायां, माने, निषेधे, अनुनये, वाक्यस्य भूषणपूरणयोः, निश्चये, हेतौ च।
खलेकपोत * पु० खले धान्यमर्दनस्थाने यथा कपोता युगपत् पतन्ति तद्वत् निरपेक्षाणामेकत्र युगपदन्वयरूपे न्यायभेदे।
खलेवाली * स्त्री० खले वाला [illegible] यस्याः। धान्यमर्दनभूमिमध्यस्थे काष्ठे (मेढिकाठ)।
खल्या * स्त्री० खलानां समूहः यत्। धान्यमर्दनस्थानसमूहे।
खल्ल * पु० खलति क्विप् खल् तं लाति ला-क। चर्मभेदे, गर्ते, वस्त्रे, [illegible] (मसक), औषधमर्दनपात्रे च (खल)।
खव * [illegible] प्रादुर्भावे, भ्वादि० पर० सक० सेट्। खवति अखावीत् अखवीत्। [illegible]
खस्र * [illegible] आकाशात् निपतन्ति [illegible]
खस * पु० देशभेदे, [illegible] "[illegible]" [illegible]
[illegible]
[illegible]

खस * पु० खानि इन्द्रियाणि स्यति निश्चलीकरोति सो-क। (खोस) (पाचड़ा) रोगभेदे। [(खाफिड़)।
खस्खस * पु० (पोस्ता) नामकफले, द्रुमभेदे यस्य निर्यासः अहिफेनः
खाजिक * पु० खे आकाशे जीयते अज-घञ् आजो गतिः सोऽस्यास्ति ठन्। लाजेषु (खइ) ईषद्वायुयोगे हि तेषामाकाशगतिः।
खाटि * पु० स्त्री० खट-इञ्। शवरथे। स्त्री० वा ङीप्। असद्व्यवहारे।
खाण्डव * पु० इन्द्रप्रस्थनगरसन्निकृष्टस्थे वने। [इति स्मृतिः।
खात * न० खन-क्त। गर्त्ते, पुष्करिण्यादौ च "पूर्त्तं खातादिकर्म च"
खातक * पु० खन-घञ् स्वार्थे कन्। (खाइ) परिखायाम्। खात इव कायति कै-क। अधमर्णे (खाणी), खात(द)को वित्तहीनः स्यात् त्रातको वित्तवान् यदा" इति स्मृतिः।
खातभू * स्त्री० खातस्य भूः स्थानम्। परिखायाम्, अन्धकूपे च।
खाद * भक्षणे भ्वादि० पर० सक० सेट्। खादति अखादीत्।
खादक * पु० खादति खाद-ण्वुल्। भक्षयाङ्के अधमर्णे "खादको वित्तहीनः स्यात्" इति स्मृतिः। भक्षके त्रि०।
खादिर * त्रि० खदिरस्य विकारः अण्। खदिरकाष्ठनिर्मिते यूपादौ "खादिरं यूपं बध्नाति खादिरं वीर्य्यकामस्य" इति श्रुतिः। खदिरनिर्यासे (खयर) पु०। [चतुष्टयरूपे धान्यादिमानभेदे।
खारि(री) * स्त्री० खमाराति रा-क गौरा० ङीप् वा ह्रस्व। द्रोण-
खारीक * त्रि० खार्य्याम् वापः, खारीपरिमाणमस्य वा ईकन्। खारीमितधान्यवपनयोग्ये क्षेत्रे, खारीमिते धान्यादौ च।
खिट * भये भ्वादि० पर० अक० सेट्। खेटति अखेटीत्।
खिद * दैन्ये दिवा० रुधा० च आत्म० अक० अनिट्। खिद्यते खिन्ते अखित्त। खिन्नः। [खिन्दतः। अखैत्सीत् खिन्नः।
खिद * परिघाते तुदा० पर० सक० अनिट् मुचादि। खिन्दति
खिन्न * त्रि० खिद क्त। दैन्ययुक्ते, श्रान्ते, खेदयुक्ते च।
खिल * कणश आदाने तुदा० पर० सक० सेट्। खिलति अखेलीत्।
खिल * त्रि० खिल-क। हलादिना अकृष्टे क्षेत्रादौ, शास्त्रः अखिले पूर्वाद्यनुक्तपरिशिष्टे, यथा ऋग्वेदादौ खैलिकम्, यजुर्वेदे खिल-सहस्रादि, महाभारते हरिवंशः। "खिलेषु हरिवंश." इति पुष्पिकाव्याख्याने, "खिलो नारायणः प्रोक्तस्तद्गुणा इवस्थ स्मृताः" इति मौलकस्य प्रोक्तेः नारायणे च।
खु * ध्वनौ भ्वादि० आत्म० अक० अनिट्। खवते अखोष्ट।
खुज * स्तेये भ्वादि० पर० सक० सेट्। खोजति अखोजीत्।
खुज्जाक * पु० खुज ञाक छ०। देवदारुवृक्षे। [लिट्।
खुड * भङ्गे इदित् भ्वादि० आत्म० अक० सेट्। खुण्डते अखु-
खुड * भेदने चुरा० उभ० सक० सेट्। खोडयति-ते अचुखोडत् त।
खुड * भेदने चुरा० उभ० इदित् सक० सेट्। खुण्डयति ते अचुखु-ण्डत् त।
खुर * विलेखने तुदा० पर० सक० सेट्। खुरति अखोरीत्।
खुर * पु० खुर-क। अश्वादीनां पादे हद्गता हस्ते, कोलदले, कपोताख-
गन्धद्रव्ये, नापितास्त्रे, खट्वादीनां पादे च (खुरा)।
खुरक * पु० खुर इव कायति कै क। तिलवृक्षे।
खुरणस(स) * त्रि० खुर इव नासिकाऽस्य नसादेशः वा अस्य शोषः णत्वञ्च। चिपिटनासिके।
खुरली * स्त्री० खुर इव लाति ला-क गौरा० ङीप्। शराभ्यासे।
खुरालिक * पु० खुराणामालिभिः कायति प्रकाशते कै-क। (भांड़) नापितास्त्रभाण्डे, नाराचास्त्रे, उपधाने च। [(खु)दिट।
खु(खू)र्द * क्रीडायां भ्वादि० आत्म० अक० सेट्। खु(खू)र्दते अखु-
खेचर * पु० खे चरति चर-ट अलुक् स०। शिवे, सूर्य्यादिग्रहे, विद्याधरे च। स्त्रियां ङीप्। "चित्तं चरति खे यस्मात् जिह्वा चरति खे गता। भ्रुवोरन्तर्गता जिह्वा खेचरी नाम मुद्रिका" इति तन्त्रोक्ते मुद्राभेदे स्त्री०। [खेटत् त।
खेट * भोजने अद० चु० उभ० सक० सेट्। खेटयति ते अचि-
खेट * पु० खे अटति। सूर्य्यादिग्रहे, "पञ्चिमुखे स्थिताः खेटाः" इति ज्योतिषम्। कफे, ग्रामभेदे च। मृगयायां पु० न०। अधमे त्रि०। कर्षणे, तृणे च न०। [दुर्गोपाख्यानम्।
खेटक * पु० खेट-स्वुन्। फलके (ढाल), खेटकं पूर्णपात्रञ्च" इति
खेड * भोजने अद० चु० उभ० सक० सेट्। खेडयति ते अचि-खेडत् त।
खेद * पु० खिद-घञ्। शोके, अवसन्नताद्यां।
खेदिनी * स्त्री० खेदयति खिद+णिच् णिनि। असनपर्ण्यां हि।
खेय * न० खन-यत्। परिखायाम् (गड़खाइ)। खननीये त्रि०।
खेल * चालने गत्यां च भ्वादि० पर० सक० सेट्। खेलति अखे-लीत्। अचिखेलत् त। [मानिकभेदे स्त्री०।
खेलन * न० खेल ल्युट्। क्रीडायाम्। कर्म्मणि ल्युट् ङीप्।
खेला * स्त्री० खेल अ। क्रीडायाम्। [खेवन।
खेव * सेवने भ्वादि० आत्म० सक० सेट्। खेवते अखेविष्ट अचि-
खेसर * पु० खे आकाश इव सीदत्यस्मात् सरति सृ-ट अलुक् स०। गर्दभाद्वडवायां जातः अश्वाद्गर्दभ्यां वा जातो अश्वतरः।
खै * स्थैर्ये अक० खनने हिंसायां च सक० भ्वादि० पर० अनिट्। खायति अखासीत्।
खोट * [illegible] भ्वादि० पर० सक० सेट्। खोटति अखोटीत्।
खोट * क्षेपे अद० चु० उभ० सक० सेट्। खोटयति ते अचुखोटत् त।
खोटि(टी) * स्त्री० खोट इन् वा ङीप्। चतुरायां स्त्रियां, [illegible] दुष्टे च। [illegible]
खोड * [illegible] भ्वादि० पर० सक० सेट्। खोडति [illegible]
खोड * क्षेपे अद० चु० उभ० सक० सेट्। खोडयति ते अचुखोडत् त।
खोड * त्रि० [illegible] खञ्जे। [illegible]
खोर * [illegible] भ्वादि० पर० सक० सेट्। [illegible] खोरीत् त। [illegible]
खोल * [illegible] भ्वादि० पर० सक० सेट्। [illegible]

खोर(च) • त्रि• खोर(र)+चव्। खञ्जे।
ख्यात • त्रि• ख्या+क्त। ख्यातिगुणे, कथिते च। [चख्यत्।
ख्या • कथने चदा• पर• सक• सेट्। [illegible]
ख्याति • स्त्री• ख्या+क्तिन्। प्रसिद्धायाम्, प्रसिद्धौ, कथने च।

ग

ग • पु• गै-क। गन्धर्वे, गणेशे, छन्दोग्रन्थोक्ते एकगुरुवर्णे च।
गगन • न• गम-ल्युट् [illegible]। [illegible]। आकाशे।
गगनध्वज • पु• गगनस्य ध्वज इव। मेघे, सूर्ये च।
गगनेचर • पु• गगने चरति चर-टक्। सूर्यादिग्रहे, पक्षिणि च।
गज • मदने भ्वादि• पर• अक• सेट्। गजति अगजीत्।
[illegible] • स्त्री• [illegible]। [illegible]।
गजास्य • पु• [illegible]। गणेशे, कार्त्तिकेये च स हि [illegible] [illegible] [illegible]।
[illegible] • पु• [illegible]। शिवे, स हि [illegible] [illegible]।
[illegible]

[illegible]

गजभक्ष्या • स्त्री• गजैर्भक्ष्या। शल्लकीद्रुमे।
गजवल्लभा • स्त्री• ६त•। बहुशोभायां गिरिकदल्यां, शल्लकद।
गजसाह्वय • न• गजेन हस्तिनामकनृपेण सहितं आह्वयो यस्य। हस्तिनापुरे (दिल्ली)। [रामा।
गजाजीव • पु• गजैस्तत्पालनादिभिराजीव्यते जीव-घञ्। हस्ति-
गजानन • पु• गजस्येवाननं यस्य। गणेशे स हि शनिदृष्ट्या छिन्नमस्तकः पश्चात् गजमस्तकेन सम्पन्नमिति पुराणम्।
गजारोह • पु• गजमारोहति रुह-अण्। हस्तिपाले (माहुत)।
गजाय(द)न • पु• गजैरय(द)ते अनेन ल्युट्। [illegible]। गजक्षी स्त्री• ङीप्। [गजाह्वयमदः।
गजाह्व • न• गजसहिता आह्वा यस्य प्राक•। हस्तिनापुरे।
गजेष्टा • स्त्री• गजानामिष्टा। विदार्याम् (भूमिकुष्माण्ड)।
गञ्ज • पु• गजि-घञ्। अवज्ञायाम्। आधारे घञ्। आकरे, खनौ, कोषागारे च। पामरगृहे, हट्टमार्गे, मदभाण्डे, [illegible] गृहे च स्त्री• टाप्। [अगञ्जीत्। गञ्जति-
गड • सेके भ्वादि• पर• सक• सेट् घटा•। गडति [illegible]
गड • वदनैकदेशे (गण्डमध्यादौ) इदित् भ्वादि• पर• अक• सेट्। गण्डति अगण्डीत्।
गड • पु• गड-अच्। मत्स्यभेदे (गडुइ), विघ्ने, परिखायां, [illegible] देशभेदे च। स्वार्थे कन्। (गडुर) मत्स्ये।
गडदेशज • न• गडदेशे शाकम्भरीदेशे जायते जन-ड। [illegible]।
गडि(डी)न • पु• गड(डी)-इन्। [illegible]
"[illegible]" [illegible]
गडु • पु• गड-उ। [illegible] [illegible] "[illegible]" इति [illegible]।
गडु(डू)र • पु• [illegible]। कुब्जे।
गडेर • गड-एरक्। मेघे (गाङ्गल)।
गड्डर(क) • गड-डर (डल) वा [illegible]। मेषे।
गड्डरिका • स्त्री• [illegible]। [illegible]।
गण • संख्याने अद• चु• उभ• सक• सेट्। गणयति [illegible] [illegible]।
गण • पु• गण-अप्। [illegible]
[illegible]

[illegible]

शास्त्रेषु "आदित्या द्वादश प्रोक्ता विश्वे देवा दश स्मृताः। चतुःषष्ट्याभास्वरा. षट्त्रिंशत् तुषिता मताः। आभास्वरास्तु-षष्टिर्ज्ञेया: पञ्चाशदूनकाः। महाराजिकनामानो द्वे शते विंशतिस्तथा। साध्या द्वादश विख्याता रुद्रा एकादश स्मृताः" इत्युक्तलक्षणेष्वादिदेवभेदेषु आदित्यादिषु। [नायकादयोऽप्यत्र।

गणनाथ * पु॰ गणानां प्रमथादीनां नाथः। गणेशे, शिवे च। गण-

गणरात्र * न॰ गणानां रात्रीणां समाहारः। गणशब्दस्य संख्यावाचकत्वात् द्विगुस॰ अच्समा॰। रात्रिसमूहे।

गणरूप * पु॰ गणा बहूनि रूपाण्यस्य। अर्कवृक्षे।

गणशस् * अव्य॰ गणान् गणान् इति गण+शस्। बहुश इत्यर्थे।

गणहासक * पु॰ गणान् हासयति हस-णिच्-ण्वुल्। चोरनामगन्धे

गणाग्र * न॰ गणाग्रोत्कृष्टं, गणानां धान्यम्। मठादौ बहुजनो-द्देशेनोत्सृष्टार्थे, बहुस्वामिकेऽर्थे च। "गणान्नं गणिकान्नञ्च" इति मनुना निषिद्धान्नमध्ये गणितम्।

गणिका * स्त्री॰ गणः सङ्घोऽस्त्यस्याः भर्तृत्वेन ठन्। वेश्यायाम्, चित्ताकर्षकत्वात् यूथिकायाम् (युइ), हस्तिन्याञ्च।

गणिकारिका * स्त्री॰ गणनं गणिः गण-इन् तं करोति अण् ङीप् गणिकारी स्वार्थे के ह्रस्वः। (गणियारी) द्रुमे। कन् भावे। गणिकारीत्यप्यत्र।

गणित * न॰ गण-भावे क्त। गणने। करणे क्त। व्यक्ताव्यक्तरूपे शास्त्रे। कर्मणि क्त। कृतगणने, संख्याते च त्रि॰।

गणेय * त्रि॰ गण-एय। गणनीये।

गणेरु * स्त्री॰ गण-एरु। कर्णिकारवृक्षे, हस्तिन्यां, वेश्यायाञ्च।

गणेश * पु॰ गणानामीशः। स्वनामख्याते देवे, शिवे च।

गण्ड * पु॰ गडि-अच्। हस्तिकपोले, कपोलमात्रे, गण्डके (गाण्डार), चिह्ने, वीरस्थाने, पिटके, वीरे, हयभूषणे, बुद्बुदे, स्फोटके, ग्रन्थौ, ज्योतिषोक्ते विष्कुम्भादिमध्ये योगभेदे, ज्योतिषोक्ते जन्मलग्नस्थे अश्विन्यादितारादण्डभेदे च।

गण्डक * पु॰ गण्ड+स्वार्थे कन्। स्वनामख्याते पशौ (गण्डार), संख्याभेदे, अन्तराये, अवच्छेदे च।

गण्डकारी * स्त्री॰ गण्डं ग्रन्थिं भग्नसंयोजनरूपं सन्धिं करोति कृ-अण्-ङीप्। (हातयोड़ा) वराहक्रान्तायामोषधौ।

गण्डकी * स्त्री॰ "गण्डक्याश्चैकदेशे च शालग्रामशिलास्थलम्" इत्युक्ते नदीभेदे। [याम्।

गण्डकीशिला * स्त्री॰ गण्डक्यामुत्पन्ना शिला। शालग्रामशिला-

गण्डगात्र * न॰ गण्डाः स्फोटका गात्रेऽवयवे यस्य। (आता) सीताफले।

गण्डदूर्वा * स्त्री॰ गण्डयुक्ता ग्रन्थिमती दूर्वा। (गाँटदूर्वा) दूर्वाभेदे।

गण्डमाला * स्त्री॰ गण्डानां स्फोटकानां माला। "स्याद्गण्डमाला बहुभिश्च गण्डैः" इत्युक्तलक्षणे रोगभेदे।

गण्डमालिका * स्त्री॰ गण्डानां ग्रन्थीनां माला यस्य वा कप् अत इत्वम्। लज्जालुवृक्षे।

गण्डशैल * स्त्री॰ नित्यकर्म॰ शैला स्थलो गण्डः स्थलीव। प्रशस्तगण्डस्थलाम्। गण्डभित्त्यादयोऽप्यत्र।

गण्डशैल * पु॰ शैलस्य गण्ड इव, राज॰ स॰। पर्वतात्पतितेषु स्थूलोपलेषु, ललाटे च।

गण्डु * पु॰ स्त्री॰ गडि-उ। ग्रन्थौ उपधाने च। स्त्रीत्वे वा ऊङ्।

गण्डूपद * पु॰ गण्डुयुक्तानि पदानि यस्य। (केँचो) किञ्चुलके। जातौ ङीप्।

गण्डूष * पु॰ गडि+ऊषन्। मुखपूरणयोग्ये तोये "गजाय गण्डूषजलम्" इति कुमारः। करिहस्ताग्रे, प्रसृत्या प्रमिते जले, कराङ्गुली च।

गण्य * त्रि॰ गणं लब्धा गण+यत्, गण-कर्मणि यत् वा। गणं संख्यामर्हति, गणनीये च। [भावे क्त। गमने।

गत * त्रि॰ गम+क्त। ज्ञाते, प्राप्ते, याते, लब्धे, पतिते, समाप्ते च।

गतागत * न॰ गतं चागतञ्च द्व॰। यातायाते "गतागतं कामकामा लभन्ते" इति गीता। गतस्यागतस्य यत्र। पक्षिगतिभेदे।

गतार्त्तवा * स्त्री॰ कृनोदयमार्त्तवः मत्कृत गर्भादि च गतं आर्त्तवो यस्याः। वन्ध्यायाम्, वृद्धायाञ्च।

गति * स्त्री॰ गम-भावादौ क्तिन्। गमने, पथि, ज्ञाने, दशायां, यात्रायाम, उपाये, नाडीव्रणपथे, कर्मफले, प्राप्तौ च। [च।

गद * पु॰ गद+अच्। श्रीकृष्णानुजे, रोगे च। भावे क। कथने, विषे

गदा * स्त्री॰ गद-अच्-टाप्। स्वनामख्याते लौहादिकीलिते, लौहमये शस्त्रभेदे, पाटलावृक्षे च।

गदाग्रज * पु॰ ६त॰ श्रीकृष्णे।

गदाधर * पु॰ गदां धरतीति धृ+अच् ६त॰। श्रीकृष्णे।

गदाराति * पु॰ ६त॰। औषधे। [गद्गति त्रि॰।

गद्गद * पु॰ गदित्यव्यक्तं गदति क, अच् वा। अव्यक्तास्फुटशब्दे।

गद्गदध्वनि * पु॰ गद्गदः कफादिनाऽव्यक्तः ध्वनिः। हर्षशोकादिना सकफेन वायुना यथास्थानानुच्चारणात् सञ्जाते अव्यक्तध्वनौ। तद्वति त्रि॰। [समूहे न॰।

गद्य * त्रि॰ गद-यत्। कथनीये। पद्यभिन्ने कविकृते अपादे पद-

गन्त्री * स्त्री॰ गम्यतेऽनया ष्ट्रन् ङीप्। वृषवहनीये शकटे।

गन्त्रीरथ * पु॰ गन्त्री रथ इव अभीष्टस्थानप्रापकत्वात्। शकटे।

गन्ध * दीप्तौ चुरा॰ आत्म॰ सेट्। गन्धयते अजगन्धत।

गन्ध * पु॰ गन्ध-अच्। सम्बन्धे, लेशे, गन्धके, गर्वे, शोभाञ्जने, घृष्टचन्दनादीनां घ्राणग्राह्ये गुणभेदे। स च गन्धः षड्विधः "चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव वा। रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव वा" इति षड्विधकारणभेदात् घृष्टचन्दनादौ च। [कर्कोटके।

गन्धकन्दक * पु॰ गन्ध+अर्श आद्यच् गन्धयुक्तः कन्दोऽस्य कप्।

गन्धकचूर्ण * पुं॰ गन्धकप्रधानचूर्णे। (बारुद) इति ख्याते च

गन्धकाष्ठ • न० गन्धयुक्तं काष्ठम् कर्म०। अगुरुचन्दने।
गन्धकुटी • स्त्री० गन्धस्य कुटीवाधारः। मुरानामगन्धद्रव्ये।
गन्धकुसुमा • स्त्री० गन्धयुक्तं कुसुमं यस्याः। (गन्धियारी) गनि-
कारीवृक्षे। [गन्धवति भूतले।
गन्धखेटक • न० गन्धस्य खेटा यत्र कप् उभयोरेकत्वात्। (बेना)
गन्धगज • न० गन्धो भागो यत्र। तेजपत्रे।
गन्धघ्रा • स्त्री० गन्धं आघ्रायनदा घ्रायते च। नासिकायाम्।
गन्धतैल • न० गन्धयुक्तस्य चन्दनस्याग्निसंयोगेन जनितं तैलम्।
उष्णवीर्येण जनितं तैले, (चावर) प्रसुती च।
गन्धत्वच् • स्त्री० गन्धान्विता त्वक् यस्याः। एलावाम्।
गन्धदला • स्त्री० गन्धयुक्तं दलं यस्याः। अजमोदायाम्।
गन्धन • न० गन्ध-धात्वादिषु ल्युट्। उत्साहे, प्रकाशने, सूचने,
हिंसायाञ्च।
गन्धनाकुली • स्त्री० गन्धान्विता नाकुली रास्ना। रास्नाभेदे।
गन्धनिलया • स्त्री० गन्धस्य निलयो यत्र। नवमल्लिकायाम्।
गन्धपत्र • पु० गन्धयुक्तं पत्रं यस्य। तुलस्याम्। शटीभेदेस्त्री०।
गन्धपत्रिका • स्त्री० गन्धयुक्तं पत्रं यस्याः कप् अत इत्वम्।
[illegible] [illegible], अजगन्धायाम्, अजमोदायाम्।
गन्धपत्री • स्त्री० गन्धयुक्तं पत्रं यस्याः गौरा० ङीष्। अश्व-
[illegible] • स्त्री० गन्धयुक्तं [illegible] [illegible]।
[illegible]
[illegible] • पु० [illegible] [illegible], चन्दने, पद्मादिकाष्ठे, कर्पूरादि,
[illegible]
[illegible]
[illegible]

[illegible]

सनामख्याते पुष्पवृक्षे च।
गन्धराजी • स्त्री० गन्धानां राजी टच् ङीप्। नखीगन्धद्रव्ये।
गन्धर्व • पु० गन्धमर्वति अर्व-गतौ अच् शक०। खगभेदे, पुं-
कोकिले, स्वर्गगायके देवयोनिभेदे, गायनमात्रे च।
गन्धर्वनगर • पु० न० गन्धर्वाणां नगरमिव। शून्याधिष्ठाने पुराकार
नीलपीतादिमेघरचनाभेदे, इन्द्रजाले च। गन्धर्वपुरमप्यत्र।
गन्धर्वलोक • पु० ६त०। गुह्यकलोकोपरि विद्याधरलोकादधो
निविष्टे स्थाने।
गन्धर्ववेद • पु० ६त०। सामवेदस्योपवेदे, सङ्गीतविद्यायाम्।
गन्धर्वहस्त • पु० गन्धर्वस्य खगभेदस्य हस्तः पाद इव पत्रम्
एरण्डवृक्षे। स्वार्थे कन्। तत्रैवार्थे।
गन्धलता • स्त्री० गन्धान्विता लता। प्रियङ्गौ। [illegible]
गन्धवणिज् • पु० गन्धोपजीवी वणिक्। (गन्धवेनिया) इति ख्याते
गन्धवती • स्त्री० गन्ध+मतुप् मस्य व। व्यासमातरि, भूमौ, [illegible]
नगर्याम्, सुरायाञ्च।
गन्धवल्कल • न० गन्धो वल्कलेऽस्य। (दारचिनि) ख्याते।
गन्धवल्लरी • स्त्री० गन्धान्विता वल्लरी। सहदेवीलतायाम्। [illegible]
कोद्रव्य। [गायकादौ पु०। गन्धधारिमात्रे त्रि०
गन्धवह • पु० गन्धं वहति वह-अच् ६त०। वायौ। [illegible]
गन्धवारि • न० गन्धवासितं वारि। गन्धद्रव्येण वासिते जले।
गन्धवाह • पु० गन्धं वहति वह-अण् उप० स०। वायौ। कस्तू-
र्याम्, नासिकायां स्त्री०।
गन्धविह्वल • पु० गन्धेन विह्वलयति ह्वल-णिच्-अच्। गोधूमे।
गन्धबीजा • स्त्री० गन्धो बीजे यस्याः। मेथिकायाम्।
गन्धव्याकुल • पु० न० गन्धेन व्याकुलयति वि+आ+कुल णिच्-अच्
कक्कोले। [इति ख्याते
गन्धशालि • पु० गन्धप्रधानः शालिः। (बासमति चाउल) [illegible]
गन्धसार • पु० गन्धयुक्तः सारो यस्य। चन्दनवृक्षे।
गन्धमादन • पु० गन्धं मादयति मद-णिच्-ल्यु। [illegible] [illegible]
गन्धनाम • न० गन्धाय नामो [illegible]। कुमुदे, अब्जादौ [illegible]
गन्धा • स्त्री० गन्ध [illegible]। [illegible]
[illegible] • स्त्री० गन्धयुक्तं [illegible]। [illegible] (शुँठी)।
[illegible] • पु० गन्धेन गन्धद्रव्यमामोदयति [illegible]
[illegible]
[illegible] • पु० गन्धेन [illegible]। चन्दनवृक्षे, [illegible] [illegible]
[illegible] इति ख्याते [illegible]
[illegible]
[illegible] • स्त्री० गन्धयुक्त [illegible]
[illegible] • पु० [illegible], [illegible]
[illegible]
[illegible] • स्त्री० [illegible]

गन्धालीगर्भ • स्त्री० गन्धश्रेणी गर्भे यस्याः। सूक्ष्मैलायाम्।

गन्धाष्टक • न० गन्धानां गन्धद्रव्याणामष्टकम्। चन्दनाद्यष्टसु गन्धद्रव्येषु तद्भेदस्तु, वाचस्पत्ये द्रष्टव्यः।

गन्धिनी • स्त्री० गन्धो विद्यतेऽस्याः इनि। मुरानामगन्धद्रव्ये।

गन्धिपर्ण * पु० गन्धि गन्धयुक्तं पर्णं यस्य। सप्तच्छदद्रुमे (छातिम)।

गन्धोत्कटा • स्त्री० गन्धेन उत्कटा उग्रा। दमनकवृक्षे।

गन्धोत्तमा • स्त्री० गन्धेन उत्तमा उत्कृष्टा। मदिरायाम्।

गन्धोली • स्त्री० गन्धयति अर्दयति गन्ध-ओलच् गौरा० ङीप्। वरटायाम् (बोलता)।

गभस्ति • पु० गम्यते ज्ञायते गम ड गः विषयस्तं बभस्ति भासयति भस+क्तिच्। किरणे, सूर्ये च। स्वाहायां वह्निपत्न्यां स्त्री० वा ङीप्।

गभस्तिमत् * पु० गभस्ति+मतुप्। सूर्ये। [सूर्ये।

गभस्तिहस्त • पु० गभस्तयो हस्ता इव जलाकर्षकत्वात् यस्य।

गभीर • त्रि० गच्छति जलमत्र गम-ईरन् भान्तादेशश्च। निम्नस्थाने, अतलस्पर्शे, गहने, दुष्प्रवेशे, दुर्बोधे च।

गम * गतौ भ्वादि० पर० सक० अनिट्। गच्छति अगमत्।

गम • गम-अप्। द्यूतभेदे, विजिगीषोर्यात्रायाम्, गमने, पथि, सदृशपाठे च। [त्वात् समास इति भाष्यम्। गमयितरि च।

गमक * त्रि० गमयति बोधयति गम-णिच्-ण्वुल्। बोधके, गमक

गम्भारी • स्त्री० कं जलं बिभर्त्ति भृ-अण् ङीप् पृ० कस्य गः। (गामारी) द्रुमभेदे।

गम्भीर * त्रि० गच्छति जलमत्र गम+ईरन् भुगागमः नि०। निम्नस्थाने, गभीरार्थे च। जम्बीरे, पद्मे, ऋग्मन्त्रभेदे च पु०। "चर सत्वे च नाभौ च त्रिषु गम्भीरता शुभा"।

गम्भीरवेदिन् • पु० गम्भीरं यथा स्यात्तथा वेत्ति विद-णिनि। "चिरकालेन यो वेत्ति शिक्षां परिचितामपि। गम्भीरवेदी विज्ञेयः स गजः" इत्युक्तलक्षणे "त्वग्भेदात् शोणितस्रावात् मांसस्य क्रथनादपि। आत्मानं यो न जानाति न स्यात् गम्भीरवेदिता" इत्युक्तलक्षणे च गजे। तत्र गम्भीरवेदिताप्यत्र।

गय • पु० असुरभेदे, वानरभेदे, नृपभेदे च। तीर्थभेदे स्त्री० टाप्।

गर • पु० गॄ-निगरणे अच् अप् वा। विषे, रोगे, रसाधिके उपदंशकरणे च।

गरघ्न • गरं विषं हन्ति। बर्बरे। मत्स्यभेदे (गडुर) स्त्री० ङीप्।

गरल • न० गिरति जीवनं गॄ-अलच्। विषे, सर्पविषे, तृणमुष्टौ च।

गरागरी • स्त्री० गरं कृत्रिमविषमागिरति आ+गॄ-अच् गौ० ङीष्। देवताडीद्रुमे।

गरिमन् • पु० गुरोर्भावः इमनिच् गरादेशः। गौरवे।

गरिष्ठ • त्रि० अतिशयेन गुरुः इष्ठन्। गुरुतरे। ईदृशि [illegible] दानवभेदे।

गरी • स्त्री० गॄ शब्दे अच् गौरा० ङीष्। देवताडीद्रुमे।

गरुड़ * पु० गरुद्भ्यां डयते डी ड पृ० तलोपः। कश्यपात्मजे विनतागर्भजाते पक्षिराजे।

गरुड़ध्वज • पु० गरुडो ध्वजः चिह्नमस्य। विष्णौ।

गरुडपुराण • न० गरुडेन प्रोक्तं पुराणम्। पुराणभेदे।

गरुडाग्रज • पु० ६त० विनतायाः ज्येष्ठपुत्रे सूर्यसारथौ अरुणे।

गरुत् * पु० गॄ-उति। खगानां गमनोपयोगिनि पक्षे (पाखा)।

गरुत्मत् * पु० गरुत् पक्षस्य मतुप् यवादित्वात् न मस्य वः। गरुड़े, विहगमात्रे च।

गर्ग * गृ-ग। ब्रह्मणः पुत्रे मुनिभेदे।

गर्गरी • स्त्री० गर्ग इति शब्दं राति रा क गौ० ङीष्। दधिमन्थनपात्रे, कलसे च। मत्स्यभेदे, तद्धर्षणो च पु०।

गर्ज * जलगर्जितवच्छब्दे भ्वादि० पर० सक० सेट्। गर्जति अगर्जीत् "गर्ज गर्ज क्षणं मूढ" इति देवीमाहात्म्यम्।

गर्ज • रवे चुरा० उभ० सक० सेट्। गर्जयति ते अजगर्जत् त।

गर्जर • पु० गृ-विच् गरं जरयति जॄ णिच्-अच्। (गाजर) मूलभेदे।

गर्जित • न० गर्ज-क्त। मेघशब्दे। कर्त्तरि क्त। मत्तहस्तिनि।

गर्त्त • पु० गॄ तन्। भूमिच्छिद्रे, त्रोणितस्थले कूपाकारांशे, रोगभेदे च "धनुः सहस्रात्यटौ च गतिर्यासां न विद्यते। न ता गर्त्ताशब्दवाच्या गर्त्तास्ता" इत्युक्ते अल्पे स्त्री० टाप्। [घर)।

गर्त्तिका • स्त्री० गर्त्तोऽस्त्यस्याः ठन्। तन्तुवायशालायां (तांत-

गर्द * रवे वा चुरा० उभ० पक्षे भ्वादि० पर० अक० सेट्। गर्दयति ते गर्दति अजगर्दत् त अगर्दीत्। (विड़ङ्गे च न०।

गर्दभ • पु० गर्द+अभच्। (गाधा) गर्दभे, गन्धभेदे च। श्वेतकुमुदे,

गर्दभशाक • पु० स्त्री० गर्दभस्य भक्ष्यः शाकः। ब्रह्मयष्टिद्रुमे (वामनहाटी), भाण्डीर् स्त्री० ङीप्।

गर्दभाण्ड • पु० गर्दभं गर्दभाकारमण्डमस्य अम-ड कस्य [illegible]। पलाशादिवृक्षाकारे द्रुमे, (पाकुड़) वृक्षे च।

गर्दभाह्वय • पु० गर्दभ इत्याह्वयमाह्वयति ह्वे-श। गर्दभ इति आह्वयो यस्य वा। कुमुदे।

गर्दभी • स्त्री० गर्द+अभच् गौ० ङीष्। [illegible], [illegible] [illegible], [illegible]। गर्दभ+पु० [illegible] ङीष्। [illegible]।

गर्ध • [illegible] पु० [illegible] [illegible] सेट्। [illegible] [illegible]।

गर्ध • पु० [illegible] [illegible]। [illegible]।

गर्धन • त्रि० [illegible] युच्। लुब्धे।

गर्ब • गतौ भ्वादि० पर० सक० सेट्। गर्बति अगर्बीत्।

गर्ब • दर्पे अद० चुरा० आत्म० सेट्। गर्बयते अजगर्बत।

गर्ब • पु० गर्ब दर्पे घञ्। अहङ्कारे।

गर्भ पु० गॄ भन्। भ्रूणे, [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

यति ते घटति। अजीघटत् त अघाटीत् अघटीत्।

घट * शब्दकरणे चुरा० उभ० अक० सेट् इदित्। घण्टयति ते अजघण्टत् त।

घट * पु० घट-अच्। कलसे, कुम्भशब्दार्थे, परिमाणभेदे च।

घटक * त्रि० घटयति स्वविशिष्टतया निरूपयति घट-णिच्-ण्वुल्। वाक्यतत्त्वादिषु मध्यपातिनि पदार्थे, योजके च।

घटना * स्त्री० चुरा० घट-युच्। संहतकरणे, योजने, मेलने, करिणां समूहे च। [डम्बरे च।

घटा * स्त्री० घट-अ। घटने, सभायां, समूहे, गजसंहतौ, मेघा-

घटिका * स्त्री० "गुर्वक्षराणामुदितं च षष्ठ्या पलं पलानां घटिका किलैका" इति ज्योतिर्विदाभरणोक्ते षष्टिपलात्मके दण्डरूपे काले। घटयति विहितकार्य्यकरणाय घट-णिच्-ण्वुल्। दण्डद्वयरूपे मुहूर्त्तात्मके काले। अल्पो घटः कन्। अल्पे घटे। स्वार्थे कन्। नितम्बे न०।

घटी * स्त्री० घटेन कालमानज्ञापकेन सच्छिद्रेण कुम्भेन ज्ञाप्या। दण्डात्मके काले। अल्पार्थे ङीप्। क्षुद्रे घटे।

घटीयन्त्र * न० ६त०। कूपादितो जलोद्धारणयन्त्रे अरघट्टे, उद्घाटने, चक्षूरोगभेदे च।

घटोत्कच * पु० हिडिम्बायां राक्षस्यां भीमसेनाज्जाते राक्षसभेदे।

घट्ट * चालने भ्वादि० आत्म० सक० सेट्। घट्टते अघट्टिष्ट।

घट्ट * चालने चुरा० उभ० सक० सेट्। घट्टयति-ते अजघट्टत्-त।

घट्ट * पु० घट्टतेऽत्र घञ्। जलावतरणस्थाने (घाट), शुल्कग्रहणस्थाने च। भावे घञ्। चालने। [जातिभेदे।

घट्टजीविन् * पु० घट्टं जीवति जीव-णिनि। (पाटुनि) इति प्रसिद्धे

घट्टित * त्रि० घट्ट-क्त। निर्मिते, चालिते, चित्रपटादेरङ्कनार्थम् [illegible] स्निग्धे वसनादौ (कसद दिय घोटा)।

घण * दीप्तौ तना० उभ० सक० सेट्। घणोति घणुते। अघाणीत् अघणीत् [illegible]। घणिता घण्टः।

घण्टा * स्त्री० घण-ट [illegible] नि० च। कांस्यादिनिर्मित वाद्यभेदे। अतिबलायां, नागबलायां, घण्टापाटल्यां च।

घण्टाकर्ण * पु० घण्टेव कर्णावस्य। शिवानुचरभेदे (घेंटु)।

घण्टापथ * पु० [illegible], घण्टायुक्ता हस्त्यादीनां गमनयोग्यो [illegible]। "[illegible] राजमार्गो घण्टापथः स्मृतः" [illegible]।

[illegible]

[illegible]

घर्घ[illegible] * पु० [illegible]

घर्घर्ट[illegible] * स्त्री० [illegible]

[illegible]

<hr>

घण्टिका * स्त्री० क्षुद्रा घण्टा अल्पार्थे कन्। क्षुद्रघण्टायां तदाकारत्वात्, (आलजिव) तालुमूलजिह्वायाम्।

घण्टेश्वर * पु० व्रणदायके मङ्गलस्य मेधानाम्न्यां पत्न्यां जाते पु[त्रे]

घन * पु० हन-अप् घनादेशः। मेघे, मुस्तायां, घोषे, दार्ढ्ये, काठि[न्ये] विस्तारे, देहे, लौहमुद्गरे, कफे, अभ्रके, "समत्रिघातश्च घनः प्रदिष्टः" इत्युक्ते सजातीयाङ्कत्रयस्यान्योन्यगुणने च यथा त्रयाणां घनः २७ चतुर्णां ६४। निविडे, सान्द्रे, पूर्णे, दृढे च त्रि० कांस्यतालादिवाद्ये, मध्यमनृत्ये, लौहे च न०।

घनकफ * पु० घनस्य मेघस्य कफ इव। मेघोपले, करके च।

घनच्छद * पु० घनो निविडश्छदो यस्य। शिग्रौ।

घनत्वच् * पु० घना निविडा त्वक् यस्य। लोध्रे।

घनद्रुम * पु० कर्म०। विकण्टकवृक्षे।

घननाभि * पु० ६त०। धूमे तस्य मेघयोनित्वात् तन्नाभित्वं "धू[म]ज्योतिःसलिलमरुताम्" इति मेघदूते तद्धेतुतोक्ता।

घनपद * पु० घनानि पदान्यस्य। पुनर्नवायाम्।

घनपदवी * स्त्री० ६त०। आकाशे, तस्य मेघाधारतया तद्ग[मन]स्थानतया च तथात्वम्।

घनरस * पु० घनस्य रसो निष्यन्दः। जले। कर्म०। मार्ग[illegible] सादौ। कर्पूरे, पीलुपर्ण्यां च पु०। ब० निविडरसे त्रि०।

घनवल्लिका * स्त्री० घना निविडा वल्ली। अमृतस्रवलतायाम्।

घनवल्ली * स्त्री० घनस्य मेघस्य वल्लीव। विद्युति। [पारदे, अभ्र[illegible]

घनसार * पु० घनस्य सार इव शीतलत्वात्। कर्पूरे, दक्षिणा[वर्त्त][illegible]

घनस्कन्ध * पु० घनः स्कन्धो यस्य। कोशाम्रवृक्षे।

घना * स्त्री० रुद्रजटायां माषपर्ण्यां च।

घनागम * पु० घनानां मेघानामागमो यत्र। वर्षाकाले "घना[illegible] राजपथे हि" इति नैषधम्।

घनाघन * पु० हन-अच् नि०। इन्द्रे, वर्षुकमेघे, मत्त-मातङ्गे[illegible] अक्षे, अन्योन्यघट्टने च। निरन्तरघातुके त्रि०।

घनात्यय * पु० घनानामत्ययो यत्र काले। शरत्काले।

घनामय * पु० घनो दृढः आमयो यस्मात् ५ब०। खर्जूरवृक्षे।

घनाश्रय * पु० घनानामाश्रयः [illegible]। वायुमार्गे।

घनोपल * पु० ६त०। घनस्य उपल इव संहत्य कठिनत्वात् करके (शिल)।

घम्ब * गतौ भ्वादि० पर० सक० सेट्। घम्बति अघम्बीत्।

घरट्ट * पु० घृ-अच् घट्टो यस्मात् ५ब०। [illegible]। (जाँता) "[illegible] घरट्टनात्" इति नैषधम्।

घर्घर * पु० घुर घुर घरति यत्नपूर्वं अच्। [illegible] द्वार, भ्रमभेदे च। क्षुद्रघण्टिकायाम् स्त्री०।

घर्घरिका * स्त्री० घर्घरेव स्वार्थे टन्। क्षुद्रघण्टायाम्, वाद्ये च। भ्रष्टधान्ये, नदभेदे च पु०।

घर्ब * गतौ भ्वादि० पर० सक० सेट्। घर्बति अघर्बीत्।

घर्म * पु० घृ-सेके मक् नि० गुणः। स्मार्त्तस्य गात्रात् निष्यन्दिनि जले, आतपे, ग्रीष्मे च। [क्रतौ यज्ञभेदे।

घर्मविचर्चिका * पु० घर्मोत्था विचर्चिका। (घामाचि) राजिका-

घर्मधाम * पु० घर्मभाव व्याप्नोति पर्याप्नोति धम-अच्। शिला-पुत्रके (नोडा)।

घर्षणी * स्त्री० घृष कर्मणि ल्युट्-ङीप्। हरिद्रायाम्।

घष(स) ० रक्षणे भ्वादि० आत्म० अक० सेट् इदित्। घंष(स)ते अघं-षि(सि)ष्ट। [घस्यति।

घस * भक्षणे भ्वादि० पर० सक० अनिट्। घसति। अघसत्। घस्ता

घस्मर ० त्रि० घस-क्मरच्। भक्षणशीले।

घस्र * पु० घस-रक्। दिवसे। हिंस्रे त्रि०।

घाट * पु० चुरा० घट-अच्। ग्रीवायाः पश्चाद्भागे। सर्वेषार्थे स्त्री० टाप्। स्वार्थे कन् अत्रैवार्थे।

घाण्टिक * पु० घण्टया चरति ठक्। “राज्ञां प्रबोधसमये घण्टाशि-ल्पास्तु घाण्टिकाः” इत्युक्तलक्षणेषु राज्ञां प्रबोधनाय घण्टां वादयित्वा स्तुतिपाठकेषु, धुस्तूरे च। घण्टावादके त्रि०।

घात * पु० हन-घञ्। प्रहारे, मारणे, अङ्कस्य पूरणे, गुणने च। करणे घञ्। बाणे।

घातिन् * त्रि० हन-तच्छीलार्थे णिनि। हननकरणशीले।

घातुक त्रि० हन-उकञ्। हिंस्रे, क्रूरे च।

घार * पु० घृ-सेके घञ्। सेचने। [भक्ष्यभेदे (घियोड)।

घार्त्तिक * पु० घृतेन निर्मितः तस्य विकारो वा ठक्। घृतपूरे

घास * पु० घस+कर्मणि घञ्। गवादीनां भक्ष्ये तृणभेदे। [घिष्ट।

घिण * ग्रहणे भ्वादि० आत्म० सक० सेट् इदित्। घिण्णते अघि-

घु * ध्वनौ भ्वादि० आत्म० अक० अनिट्। घवते अघोष्ट।

घुट * आवर्त्तने भ्वादि० आत्म० सक० सेट्। घोटते अघुटत् अघो-टिष्ट। [क्षुघोट।

घुट * प्रतिघाते तुदा० कुटा० पर० सक० सेट्। घुटति अघुटीत्

घुट * पु० तुदा० घुट-अच्। चरणग्रन्थौ गुल्फे। रन्। सर्वेषार्थे स्त्री० वा ङीप्। स्वार्थे कन् अत्रैवार्थे। [क्षुघाड।

घुड * व्याघाते तुदा० कुटा० पर० सक० सेट्। घुडति अघुडीत्

घुण * भ्रमणे तुदा० आत्म० सेट्। घोणते अघोणिष्ट।

घुण * भ्रमणे तुदा० पर० सेट्। घुणति अघोणीत्।

घुण ० ग्रहणे भ्वादि० आत्म० सक० सेट्। घुणते अघोणिष्ट।

घुण ० पु० घुण-क। स्वनामख्याते काष्ठभक्षककृमौ।

घुण्ट * पु० घुट-क नि० मुम्। गुल्फे। स्वार्थे कन्। सर्वेषार्थे।

घुर ० ध्वनौ भीमभवने च तुदा० पर० अक० सेट्। घुरति अघो-रीत्।

घुर्घुर ० पु० घुरित्यव्यक्त ध्वनिं घुरति घुर+क। (घुर्घुरिया) कीटभेदे, शूकरशब्दे च “न घुर्घुरायितघुरो” इति साहित्यदर्पणे श्वाद०।

घुष * कान्तौ कृतौ च भ्वादि० आत्म० अक० सेट् इदित्। घुंषते अघुंषिष्ट।

घुष * वधे भ्वादि० पर० सक० सेट्। घोषति अघुषत्।

घुष * स्तुतौ आविष्करणे च वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। घोषयति ते घोषति अजूघुषत् त। अघुषत्।

घुसृण * न० घुस-क्नन्। कुङ्कुमे “घुसृणैरिव जलाशयोदरे” इति नैषधम्।

घूक * पु० घू इति कायति कै-क। उलूके पेचके।

घूकारि * पु० ६त०। काके तस्य पेचकवैरित्वं लोकप्रसिद्धम्।

घूकावास * पु० ६त०। शाखोटवृक्षे तस्य निविडस्कन्धशाखायुतत्वेन कोटरतुल्यत्वात् दिवाभीरोर्घूकस्यावासस्थानत्वम्।

घूर * हिंसायां सक० जीर्णतायाम् अक० दि० आत्म० सेट्। घूर्य्यते अघूरिष्ट। घूर्णः। [घूर्णितः।

घूर्ण ० भ्रमणे तुदा० उभ० सक० सेट्। घूर्णति ते अघुर्णीत् अघूर्णिष्ट

घृ * सेके भ्वादि० पर० सक० अनिट्। घरति अघार्षीत्।

घृ * सेके चुरा० उभ० सक० सेट्। घारयति ते अजीघरत् त। घार-यिता घारितः।

घृ * भासि अक० सेके सक० जु० पर० अनिट्। जिघर्त्ति अघार्षीत्।

घृण ० दीप्तौ तना० उभ० अक० सेट्। घर्णोति घर्णुते अघर्णीत्।

घृण * ग्रहणे भ्वादि० आत्म० सक० सेट् इदित्। घृण्णते अघृण्णिष्ट।

घृणा * स्त्री० घृ-सेके नक्। कारुण्ये, दयायां, जुगुप्सायाञ्च। [च।

घृणि * पु० घृ-नि नि० गुणाभावः। किरणे, ज्वालायां, तरङ्गे, सूर्य्ये

घृत * न० घृ-भासे भावे क्त। दीप्तौ। कर्त्तरि क्त। दीप्ते त्रि०। सेका-र्थस्य कर्त्तरि क्त। जले, पक्वनवनीते, सर्पिषि च न०।

घृतकुमारी * स्त्री० घृतप्रधाना कुमारी। स्वनामख्यातायामोषधौ तस्या हि दले दलिते घृतमिव स्रवति।

घृतपूर * पु० घृतेन पूर्य्यते पूर-घञ्। पक्वान्नभेदे (घियोड)।

घृताची * स्त्री० अप्सरोभेदे।

घृष * संघर्षे सक० भ्वादि० आत्म० सेट्। घर्षते अघर्षिष्ट।

घृष्टि * पु० घृष क्तिच्। वराहे। क्तिन्। घर्षणे, स्पर्द्धायां, विष्णु-क्रान्तायां, वाराह्याञ्च स्त्री०।

घृष्टिला ० स्त्री० घृष्टिं लाति ला-क। पृश्निपर्ण्याम् (चाकुलिया)।

घोट(क) * पु० घुट-अच् ण्वुल् वा। अश्वे। [लोके प्रसिद्धः।

घोटकारि ० पु० ६त०। महिषे, तस्य महिषेण सह वैरिभावस्य

घोणा * स्त्री० घुण-अच्। अश्वनासिकायां, नासामात्रे च।

घोणिन् * पु० घोणा नासाऽस्त्यस्य व्रीह्यादित्वात् इनि। वराहे तस्य दीर्घनासत्वात् तथात्वम्।

घोण्टा ० स्त्री० घुण-ट तस्य नेत्त्वम्। (सेयाकुल) बदरीभेदे।

घोर ० पु० घुर-अच्। शिवे, ऋषिभेदे, सांख्योक्तेषु रजःप्रधानेषु आकाशादिविशेषधर्मेषु। विषे न०। दारुणे, भयानके, दुर्गमे च त्रि०।

घोरदर्शन ० पु० घोरं दर्शनं यस्योऽस्य। उलूके।

घेरा * स्त्री॰ घुर घञ्। देवताडीलतायां, भयानकायां रात्रौ, माल्योक्तायां राजधां मनोहरौ, ज्योतिषोक्ते "रवावृषभे सङ्क्रमे भास्करस्य मवेद्वारं नाम्नी" इत्युक्ते रविसंक्रान्तिभेदे च।

घोल * पु॰ न॰ घुड कर्मणि घञ् डस्य लः। तक्रे मथितदध्नि।

घोष * पु॰ घोषन्ति गावोऽत्र घुष-आधारे घञ्। आभीरपल्ल्याम्। भावे घञ्। ध्वनौ, घम्बुदनादे च। कर्तरि अच्। अपामार्गे, व्याकरणोक्ते वर्णविधिमोत्पत्तौ वाह्यप्रयत्नभेदे च। कांस्ये न॰।

घोषणा * स्त्री॰ घुष णिच्-युच्। लोके ख्यापनार्थमुच्चैःशब्दकरणे।

घोषा * स्त्री॰ घुष्यते भ्रमरैरियं कर्मणि घञ्। शतपुष्पायां, मधुरिकायां, कर्कटशृङ्ग्यां, कोषातक्यां च।

घ्रा * गन्धग्रहणे भ्वादि॰ पर॰ सक॰ दहकमार्थे सक॰ अनिट्। जिघ्रति अघ्रात् अघ्रासीत्। घ्राणः घ्रातः। [वि॰।

घ्राण * न॰ घ्रायतेऽनेन घ्रा-ल्युट्। नासिकायाम्। घ्रा-क्त। आघ्राते

घ्राणतर्पण * पु॰ घ्राणं नासिकां तर्पयति तृप-णिच्-ल्यु। सुगन्धौ।

ङ

ङ * पु॰ ङ् ड। विषये, शिवदरभाराधाच।

ङु * शब्दे भ्वा॰ आत्म॰ अक॰ अनिट्। ङवते अङविष्ट।

च

च * अव्य॰ चि-ड। [illegible]

[illegible]

चकास * दीप्तौ अदा॰ जुहो॰ पर॰ अक॰ सेट्। चकास्ति चकासीत्। अचचकासत्। [प्राचरपादके छन्दोभेदे च।

चकित * न॰ चक-भावे क्त। भये। कर्त्तरि क्त। भीते त्रि॰।

चकोर * पु॰ चक-तृप्तौ ओरन्। स्वनामख्याते पक्षिभेदे "चन्द्रपारणकरौ" इति मुरारिः।

चक्क * वर्त्तौ चुरा॰ उभ॰ सक॰ सेट्। चक्कयति-ते अचचक्कत्।

चक्र * पु॰ क्रियतेऽनेन कृ-घञर्थे क नि॰ द्वित्वम्। [illegible] पक्षिणि (चका), रथाङ्गे (चाका), सैन्ये, समुदाये, राष्ट्र[illegible] भेदे, कुम्भकारोपकरणे, "कलसे निजहेतुदण्डजः किमु चक्रभ्रमिकारिता" इति नैषधम्। अस्त्रभेदे, [illegible] पुटभेदे, [illegible] ग्रामजाले, तगरपुष्पे, व्यूहभेदे, तन्त्रोक्तेषु मूलाधारादिस्थितेषु षट्सु पद्मेषु, देवार्चनयन्त्रेषु, "श्रीचक्रमितरद्विधं" इति तन्त्रम्। मन्त्रदीक्षोपयोगिषु अकडमादिषु, [illegible] "प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः" इति तन्त्र[illegible] कारोक्ते काव्यबन्धविशेषे च न॰। अर्द्धर्चादित्वात् द्वित्वेऽपि लक्ष्यभेदेनैवास्य लिङ्गनियमः।

चक्रक * पु॰ चक्रमिव कायति कै-क। [illegible] [illegible]निष्टप्रसङ्गरूपे तर्कभेदे। [[illegible]

चक्रकारक * न॰ [illegible] चक्रवत् वेष्टनं करोति [illegible]

चक्रकुल्या * स्त्री॰ चक्रस्य तद्वद्वेष्टनाकारस्य कुल्येवाधारः। (चा[illegible]) पृश्निपर्ण्याम्। [मर्दे (दादमर्द)।

चक्रगज * पु॰ चक्रे चक्राकारे दद्रुरोगे गज इव मर्दकत्वात्। च[illegible]

चक्रगुच्छ * पु॰ चक्रमिव वेष्टनाकारो गुच्छः स्तवको यस्य। अशो[क] वृक्षे। [विष्णौ, [illegible]

चक्रधर * पु॰ चक्रमस्त्रभेदं [illegible] धारयति धृ-अच्।

चक्रधारा * स्त्री॰ चक्रस्य धारा प्रान्तः। चक्राये [illegible] धारा। [illegible]

चक्रनख * पु॰ चक्राकारो नख इव [illegible] [illegible]

चक्रपाट * पु॰ [illegible] चक्रवत् पाटयति अच्। [illegible] दद्रुरोगे चक्रपाटः गज इव मर्दकत्वात्। चक्रमर्द [illegible] मर्दन)। [illegible]

चक्रवर्णी * स्त्री॰ चक्रमिव [illegible] ङीप्। (आकुलिया) [illegible]

चक्रपाणि * पु॰ चक्रं पाणौ यस्य। विष्णौ।

चक्रपाद * पु॰ चक्रं पाद इव [illegible] यस्य। रथे। [illegible] पादः। [illegible]

[illegible]

[illegible]

[illegible]

चतुःपर्वी * स्त्री॰ चत्वारि चत्वारि पर्वाण्यस्याः। क्षुद्रपाषाणभेदे।

चतुःपर्णी * स्त्री॰ चत्वारि चत्वारि प्रतिपर्णं पर्णान्यस्याः। क्षुद्राम्लिकायाम् (कामरुल)।

चतुःफला * स्त्री॰ चतुर्धा विभक्तं फलमस्याः। नागबलायाम्।

चतुःशाला * न॰ चतस्रः अन्योन्याभिमुख्यः शाला यत्र। अन्योन्याभिमुखगृहचतुष्कयुतभवने। "एकग्रामे चतुःशाले, दुर्भिक्षे" इति ज्योतिषम्।

चतुःसम * न॰ चत्वारि समानि यत्र। "लवङ्गं जीरकं पथ्या यमानी च चतुःसमम्" इत्युक्ते लवङ्गादितुल्यचतुर्द्रव्यात्मके औषधे, "कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु। कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम्" इत्युक्तेषु तत्तत्परिमाणान्वितकस्तूरीचन्दनकुङ्कुमकर्पूरेषु च। वा सत्वे चतुस्सममप्यत्र।

चतुर् * त्रि॰ ब॰ व॰ चत-उरन्। चतुःसंख्यायाम्, चतुःसंख्यान्विते च। स्त्रियां चतस्रः। [गोचरे च त्रि॰।

चतुर * पु॰ चत-उरच्। हस्तिशालायाम्। कार्य्यकुशले, दक्षे, नेत्र-

चतुरङ्ग * न॰ चत्वारि अङ्गानि यस्य। हस्त्यश्वरथपदातिरूपाङ्गचतुष्टययुते सैन्ये। रक्तहरितपीतश्यामलरूपाणि चत्वारि बलरूपाणि क्रीडासाधनान्यस्य। (चतुरङ्गक्रीडाभेदे)।

चतुरङ्गुला * स्त्री॰ चतस्रोऽङ्गुल्यः प्रमाणमस्य पर्वणः अच्समा॰। आरग्वधे (सोन्दाल)।

चतुरस्र * त्रि॰ चतस्रः अस्रयः कोणाः यस्य सुतप्रातेत्यादि नि॰। चतुष्कोणे, ज्योतिषोक्तयोः लग्नाच्चतुर्थाष्टमस्थानयोश्च। दन्त्यगर्भं चतुरश्रमित्यन्ये। [मुखादयोऽप्यत्र।

चतुरानन * पु॰ चत्वारि आननानि यस्य। ब्रह्मणि। एवं चतु-

चतुर्थ * त्रि॰ चतुर्णां पूरणः। येन चतुःसंख्या पूर्य्यते तादृशे तुरीये।

चतुर्थांश * पु॰ चतुर्थोऽंशः। चतुर्भागैकभागे पादे। "चतुर्थांशहराः सुताः" इति स्मृतिः।

चतुर्थी * स्त्री॰ चन्द्रस्य चतुर्थकलायाः प्रवेशनिर्गमनरूपक्रियात्मकतिथौ, व्याकरणोक्तेषु ङे भ्याम् भ्यस् इति प्रत्ययेषु च।

चतुर्दन्त * पु॰ चत्वारो दन्ता यस्य। ऐरावते इन्द्रगजे।

चतुर्दशन् * त्रि॰ ब॰ व॰। चतुरधिका दश। संख्याभेदे, तत्संख्याते पदार्थे च। तत्संख्यापूरणे तु डट्। चतुर्दशः स्त्रियां चतुर्दशी। चन्द्रस्य चतुर्दशकलाक्रियायां चतुर्दशी।

चतुर्दोल * न॰ "चतुर्भिर्वाह्यते यत्तु चतुर्दोलं तदुच्यते" इत्युक्ते द्विपदैश्चतुर्भिर्वाह्ये यानभेदे (चौदोल)।

चतुर्धा * अव्य॰ चतुःप्रकारं धाच्। चतुःप्रकारे।

चतुर्भद्र * न॰ चत्वारि भद्राणि धर्मार्थकाममोक्षरूपाणि कल्याणानि यस्मात्। धर्मार्थकाममोक्षरूपे चतुर्भद्रे। मिलिते धर्मादिचतुष्के।

चतुर्भुज * पु॰ चत्वारो भुजा हस्ता यस्य। नारायणे।

चतुर्युग * न॰ चतुर्णां युगानां समाहारः पात्रादित्वात् ङीप् न। सत्यत्रेताद्वापरकलिरूपयुगचतुष्टये। "विज्ञेयं तच्चतुर्युगम्" इति मनुः। [काममोक्षेषु चतुर्षु पुरुषार्थेषु

चतुर्वर्ग * पु॰ चतुर्णां धर्मार्थकाममोक्षाणां वर्गः समुदायः। धर्मार्थ-

चतुर्विंशति * स्त्री॰ चतुरधिका विंशतिः। (चब्बिश) चतुर्युतविंशतिसंख्यायाम्, तत्संख्याते च।

चतुर्विद्य * पु॰ चतस्रो विद्या वेदज्ञानरूपा यस्य। चतुर्वेदवेत्तरि। प्रज्ञाद्यणि द्विपदवृद्धिः। चातुर्विद्योऽप्यत्र।

चतुर्विधशरीर * न॰ कर्म॰। जरायुजाण्डजस्वेदजोद्भिज्जेषु शरीरेषु। चतुर्विधशरीराणि धृत्वा मुक्त्वा सहस्रशः" इति।

चतुर्व्यूह * पु॰ सृष्ट्यादिकार्य्यार्थं चत्वारो व्यूहा विभागा यस्य। वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धात्मके विष्णौ। [कन् चतुष्क।

चतुष्क * न॰ चतुर्भिः स्तम्भैः कायति कै-क। चतुःस्तम्भयुक्तमण्डपे।

चतुष्टय * त्रि॰ चत्वारोऽवयवा विधा यस्य तयप्। चतुर्विभागवति, चतुष्के च। स्त्रियां ङीप् "प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी" इति कुमारः। [(सुसुनी) शाकभेदे।

चतुष्पर्वी * स्त्री॰ चत्वारि चत्वारि प्रत्येकपर्वं पर्वाण्यस्याः ङीप्।

चतुष्पथ * पु॰ चत्वारः पन्थानः ब्रह्मचर्य्यादयः आश्रमा यस्य ब॰ समा॰। ब्राह्मणे। चतुर्णां पथां समाहारः अच्। (चौमाथा) चतुर्मुखे पथि।

चतुष्पद * पु॰ चत्वारि पदानि चरणा यस्य। गवादौ पशौ। ज्योतिषोक्ते करणभेदे, मेषवृषसिंहधनुरन्त्यार्द्धमकरपूर्वार्द्धरूपराशिभेदे च। पादशब्दस्य पाद्भावे चतुष्पादप्यत्र।

चतुष्पादी * स्त्री॰ चत्वारः पादा यस्याः पादस्य पाद्भावे ङीपि पद्भावः। चतुश्चरणात्मकी पद्ये। [(कुल) क्षुद्राम्लिकायाम्।

चतुष्पर्णी * स्त्री॰ चत्वारि चत्वारि प्रतिपर्णं पर्णान्यस्याः। (आम-

चतुश्चिंशत् * त्रि॰ चतुरधिका त्रिंशत्। चतुरधिकायां त्रिंशति (चौतिश), तत्संख्याते च। चतुश्चत्वारिंशदादयोऽप्येवम्।

चत्वर * न॰ चत-ष्वरच्। स्थण्डिले, यागार्थं संस्कृतभूमौ, अङ्गने च (उठान)। [संख्याभेदे, तत्संख्याते च।

चत्वारिंशत् * स्त्री॰ चत्वारि दशतः परिमाणमस्य नि॰। (चल्लिश)

चत्वाल * पु॰ चत-वालच्। होमकुण्डे, दर्भे च।

चद * याचने भ्वादि॰ उभ॰ द्विक॰ सेट्। चदति-ते अचदीत्।

चद * आह्लादे दीप्तौ च भ्वादि॰ पर॰ सेट् इदित्। चन्दति अचन्दीत्। [चनति। अचानीत्-अचनीत्। चनयति।

चन * हिंसायां शब्दाप्रतिघाते च भ्वादि॰ पर॰ सक॰ सेट् घटा॰।

चन * शब्दे तुदा॰ पर॰ अक॰ सेट्। चनति। अचानीत्-अचनीत्। चानयति।

चन * अव्य॰ चन शब्दे-अच्। असाकल्ये यथा किञ्चन। अन्वर्थे च।

चनस * मतौ भ्वादि॰ पर॰ सक॰ सेट्। चनति अचनीत् "चनकुसुमसित-" इति वैयाकरणाः। [भेदे, पौषधिभेदे च।

चन्दन * पुं॰ न॰ चदि-ल्युट्। मलयजाते गन्धसारे, रक्तचन्दने, शालि-

चन्द्रधेनु • स्त्री० चन्द्रलेखाङ्किता धेनुः। "प्रतिपद्यथवा माघी
शिशिरे प्रदृश्यते। चन्द्रलेखाङ्किता धेनुस्तथा, स्यात्सा तु दीयते"
इति स्कन्दपुराणोक्तायां चन्द्रलेखाङ्कितायां देयधेन्वाम्।
चन्द्रपुष्प • न० चन्द्रस्येव पुष्पमस्य। मरहे।
चन्द्र • पु० चदि-रक्। इन्दौ, जलनिरोगयवने, कर्पूरे, काम्पिल्ये,
चौरके, जले, काव्ये, सुन्दरे, मयूरपुच्छस्य चन्द्रके, मोक्षमुक्ता-
फले च। आह्लादकद्रव्ये त्रि०। स्वर्णे, वृत्ते च न०।
चन्द्रक • पु० चन्द्र इव कायति कै-क इवार्थे कन् वा। मयूरस्य पुच्छ-
स्थिते चन्द्राकृतौ पदार्थे, मत्स्यभेदे (चांदा), शिग्रुबीजे, मम-
मरिचे च।
चन्द्रकला • स्त्री० ६त०। चन्द्रस्य षोडशे भागे, डिण्डिमवाद्यभेदे च।
चन्द्रकान्त • पु० चन्द्रः कान्तोऽभीष्टो यस्य। चन्द्रसन्निधाने मणि-
भेदे, तद्दर्शने हि तस्य जलस्रावात् तत्कान्तत्वम्। कैरवे, श्वेत-
कुमुदे च न०। राज्ञौ, ज्योत्स्नायां, चन्द्रशालायां, चन्द्रप-
त्न्याञ्च स्त्री०। [६त०। चन्द्रस्य दीप्तौ।
चन्द्रकान्ति • न० चन्द्रस्येव कान्तिरस्य शुभ्रत्वात्। रजते, रूप्ये।
चन्द्रकावत् • पु० चन्द्रक+अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपद-
दीर्घः। मयूरे।
चन्द्रकिन् • पु० चन्द्रक+अस्त्यर्थे इनि। मयूरे।
चन्द्रकूट • पु० कामरूपस्थे पर्वतभेदे।
चन्द्रगुप्त • पु० महानन्दस्य मुरानाम्न्यां दास्यां जाते चाणक्येन
नवनन्दं समूलं हत्वा कृतराज्याभिषेके राजभेदे।
चन्द्रपुष्पी • स्त्री० चन्द्र इव शुभ्रं पुष्पमस्याः। श्वेतकण्टकार्याम्।
चन्द्रबाला • स्त्री० चन्द्रस्य कर्पूरस्य बालेव तुल्यगन्धित्वात्। स्थूलै-
लायाम्। चन्द्रस्य प्रभायां रश्मौ।
चन्द्रभागा • स्त्री० काश्मीरदेशस्थे नदीभेदे।
चन्द्रमण्डल • न० ६त०। चन्द्रस्य मण्डलाकारे बिम्बे।
चन्द्रमस् • पु० चन्द्रमाह्लादं मिमीते मि असुन् मादेशः चन्द्रं कर्पूरं
माति तुलयति मा-असुन् वा। चन्द्रे।
चन्द्रमौलि • पु० चन्द्रो मौलौ यस्य। चन्द्रशेखरे शिवे।
चन्द्रवल्लरी • स्त्री० ६त०। सोमलतायाम्।
चन्द्रवल्ली • स्त्री० चन्द्र इव वल्ली सुधातुल्यमधुरस्निग्धत्वात्। माधवी-
लतायाम्। [संयुक्ते व्रते।
चन्द्रव्रत • न० चन्द्रस्य चन्द्रलोकप्राप्तये व्रतं नियमः। चान्द्रायण-
चन्द्रशाला • स्त्री० चन्द्रः शालेवाश्रयो यस्याः। ज्योत्स्नायाम्।
चन्द्र इवाह्लादिका शाला। प्रासादोपरिस्थे गृहे (चिलेकोठा)।
स्वार्थे कन् तत्रैवार्थे। [पर्वतभेदे च।
चन्द्रशेखर • पु० चन्द्रः शेखरं शिरोभूषणं यस्य। शिवे, पूर्वदेशस्थे
चन्द्रसम्भव • पु० सम्भवस्थानात् सम्भवः चन्द्रः सम्भवो यस्य। बुधे।
एवं सोमसुतादयोऽप्यत्र। नर्मदायां, सूक्ष्मैलायाञ्च स्त्री०।
चन्द्रहास • पु० चन्द्र इव हासः प्रभाऽस्य चन्द्रं हसति वा शितत्वात्
चन्द्र वा। खड्गे। रौप्ये न०। गुडूच्यां स्त्री०।
चन्द्रा • स्त्री० चदि-रक्। एलायां, चन्द्रातपे च (चाँदोया)।
चन्द्रातप • पु० चन्द्रस्य आतो समन्तात् तपः पाति पा-क। (चाँदोया)
वितानके। चन्द्रस्य आतप इव किरणः। ज्योत्स्नायाम्।
चन्द्रापीड • पु० चन्द्र आपीडः शिरोभूषणं यस्य। शिवे, तारा-
पीडसुते नृपभेदे च।
चन्द्रिका • स्त्री० चन्द्र प्राशस्त्येन अस्त्यस्याः ठन्। ज्योत्स्नायां,
स्थूलैलायां, कर्णस्फोटायां, मयोदगाचरपादके छन्दोभेदे च।
चन्द्रिकाद्राव • पु० चन्द्रिकया द्रावो निस्यन्दो यस्य। चन्द्रकान्तमणौ।
चन्द्रिकापायिन् • पु० चन्द्रिकां पिबति पा-णिनि। चकोरपक्षिणि।
चन्द्रेष्टा • स्त्री० चन्द्र इष्टो यस्याः। उत्पललतायाम्, उत्पलिन्याञ्च।
चन्द्रोपल • पु० चन्द्रप्रियः उपलः। चन्द्रकान्तमणौ।
चप • पूर्वोक्तार्थे चु० उभ० सक० सेट् घटा०। चपयति-ते अची-
चपत्-त। चित्रादित्वात् स्वार्थे णिजिति केचित्। [पीत्। चपयति।
चप • सान्त्वने भ्वादि० पर० सक० सेट्। चपति अचापीत् अच-
चप • गतौ चु० उभ० सक० सेट् इदित्। चम्पयति ते अचच-
म्पत् त।
चपल • पु० चप-विच् चप् चपं मात्स्यं लाति ला-क। पारदे,
मीने, चोरनामगन्धद्रव्ये, प्रस्तरभेदे, राजमाषे च। तरले,
चञ्चले, चपिटे, शीघ्रे, दुर्विनीते च त्रि०। लक्ष्म्यां, विद्युति,
पुंश्चल्याम्, पिप्पल्यां, विजयायां, मदिरायां, जिह्वायां, छन्दोभेदे
च स्त्री०।
चपेट • पु० चप चपत्वे वा चपाय सान्त्वनाय इटति गच्छति इट-
क। विस्तृताङ्गुलिके हस्ते, प्रहारे च (चापड़)। स्त्रीलपौष्यते
षष्ठिकोपाख्यायाः मिथाय चपेटां ददातीति भाष्यप्रयोगात्।
स्वार्थे कन् तत्रैवार्थे।
चम • भक्षणे भ्वादि० स्वादि० च पर० सक० सेट्। चमति आचा-
मति विचमति चमोति अचमीत्। चमित्वा चान्त्वा।
चमत्कार • पु० चमदित्यव्यक्तं क्रियते कृ-घञ्। लोकातीतवस्तु-
दर्शनात् चित्तस्य आनन्दहेतौ प्रकाशे विस्मये, अपामार्गवृक्षे च।
चमर • पु० चम-अरच्। मञ्जिष्ठाकृतौ मृगभेदे, यस्य पुच्छेन चाम-
राख्यं व्यजनं भवति, दैत्यभेदे च। जातौ स्त्रियां ङीप् चमरी।
चमरव्यजने, चामरे च न०। [काञ्चनारे च।
चमरिक • पु० चमरमिव पुष्पमस्त्यस्य ठन्। कोविदारवृक्षे, रक्त-
चमस • पु० न० चम-असच्। काष्ठजाते यज्ञिये पात्रभेदे, सोम-
रसपानपात्रे च। पिष्टकभेदे, लड्डुके च पु०।
चमीकर • पु० कनकराशिभेदे सर्वत्रोत्पत्तिस्थाने, तदीयात् स्वर्णे
चामीकरमित्युच्यते।
चमू • स्त्री० चम-ऊ। सेनामात्रे, (गजाः ७२९, रथाः ७२९, अश्वाः
२१८७, पदातयः ३६४५) एतत्संख्याभेदान्विते सैन्यभेदे च।
चमूरु • पु० चम-ऊरच्। मृगभेदे, कोविदारवृक्षे च। स्वार्थे कन् चमूरु-

चर्मणा" इति माघः। [कदलीफलभेदे न॰ (चाँपाकला)।

चम्पक • पु॰ चपि-गतौ क्वुन्। (चाँपा) इति नामके वृक्षभेदे।

चम्पकमाला * स्त्री॰ ६त॰। स्वर्णचम्पकैः निर्मितायां स्त्रीणां कण्ठाभरणे, दशाक्षरपादके पङ्क्तिच्छन्दोभेदे च।

चम्पकरम्भा • स्त्री॰ चम्पक इव रम्भा। स्वर्णकदल्याम् (चाँपाकला)।

चम्पकोष • पु॰ चपि-घञ् कर्म॰। पनसे, तस्य हि कोषो भक्ष्यते।

चम्पा * स्त्री॰ चपि-अच्। नगरीभेदे, नदीभेदे, तीर्थभेदे, कर्णस्य भार्य्यायाञ्च।

चम्पाधिप • पु॰ ६त॰। कर्णे। [र्य्याम्।

चम्पावती * स्त्री॰ चम्पा+मतुप् मस्य वः। कर्णराजधान्यां नग-

चम्पू * स्त्री॰ "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इत्युक्ते काव्यभेदे।

चम्ब • गतौ भ्वादि॰ पर॰ सक॰ सेट्। चम्बति अचम्बीत्।

चय * गतौ भ्वादि॰ आत्म॰ सक॰ सेट्। चयते अचयिष्ट।

चय * पु॰ चि-अच्। प्राकारमूले, प्राकाराधारवेदिकायाम्, समूहे, समाहृतौ च। [पुष्पादेश्चयादितो पञ्चके च।

चयन • न॰ चि-ल्युट्। इष्टकादीनामूर्ध्वाधोनयनरूपे रचनाभेदे,

चर * गतौ भ्वादि॰ पर॰ सक॰ सेट्। चरति अचारीत्।

चर • संशये चुरा॰ उभ॰ सक॰ सेट्। चारयति-ते अचीचरत्-त।

चर • पु॰ चर-अच्। परराष्ट्रवृत्तान्तज्ञानार्थे राजनियोगेन इतस्ततो भ्रमणकर्त्तरि चारे, खञ्जने, कपर्दके, ज्योतिषोक्तेषु मेषकर्कटतुलामकरराशिषु च। स्थातिपुनर्वसुश्रवणादित्रिकरूपे नक्षत्रभेदे, भौमवारे च न॰। चले, जङ्गमे च त्रि॰।

चरक • पु॰ चर-क्वुन् स्वार्थे कन् वा। चारे, राजदूते, पर्पटे, भिक्षौ, वैशम्पायनशिष्ये मुनिभेदे, तत्कृते तन्नामके ग्रन्थे च। [illegible] "[illegible]" इति नैषधम्।

चरण • पु॰ न॰। चर करणे ल्युट्। पादे, वेदैकदेशे शाखारूपे [illegible], [illegible] मूले, गोत्रे च। भावे ल्युट्। गतौ, भक्षणे, आचारे, [illegible] च न॰।

चरणग्रन्थि • पु॰ ६त॰। गुल्फे।

चरणायुध • पु॰ चरणावायुधमस्य [illegible]। कुक्कुटे।

चरणव्यूह • पु॰ चरणानां वेदशाखानां व्यूहो विशेषेणोहो निरूप्यते यत्र। [illegible] ग्रन्थभेदे।

चरम • त्रि॰ चर-अमच्। अन्त्ये, पश्चात्ये, पश्चिमे च।

[illegible] • पु॰ [illegible] कर्म॰। [illegible]। [illegible] [इत्युक्ते। करटके पु॰।

[illegible]

[illegible]

[illegible]

[illegible]

भावुके च। [चर्त् त। चर्चितः चर्चा।

चर्च * अध्ययने चुरा॰ उभ॰ सक॰ सेट्। चर्चयति ते [अचच-

चर्च * उक्तौ भर्त्सने च तुदा॰ पर॰ सक॰ सेट्। चर्चति अचर्चीत्।

चर्चरी * स्त्री॰ चर्च+अरन् गौरा॰ ङीष्। गीतिभेदे, कुटिलकेशे, हर्षक्रीडायाम्, साटोपवाक्ये, छन्दोभेदे च। [पने च।

चर्चा * स्त्री॰ चर्च-अ। विचारे, चिन्तायां, चन्दनादिना देहले-

चर्चित * त्रि॰ चर्चा जातास्य इतच्। चन्दनादिना कृतगात्रानुलेपने।

चर्ब * गतौ भक्षणे च भ्वादि॰ पर॰ सक॰ सेट्। चर्बति अचर्बीत्।

चर्मकार * पु॰ चर्म तन्मयं पादुकादिकं करोति कृ-अण्। (चामार) पादुकाकारे। एवं चर्मकृदादयोऽप्यत्र।

चर्मण्वती * स्त्री॰ चर्माण्यस्याम् मतुप् नि॰। नदीभेदे।

चर्मदण्ड • पु॰ चर्मणा कृतो दण्डः। कशायाम् (कोड़ा)।

चर्मन् * न॰ चर-मनिन्। त्वक्पर्यायां कृत्तौ, इन्द्रियभेदे येन स्पर्श उपलभ्यते तस्मिन् "शरीरावरकं यत्तु चर्म इत्यभिधीयते" इत्युक्ते (ढाल) फलके च।

चर्मपादुका * स्त्री॰ चर्मनिर्मिता पादुका। उपानहि (जुता)।

चर्मप्रभेदिका • स्त्री॰ प्रभिनत्ति प्र+भिद्-ण्वुल् ६त॰। चर्मभेदनेऽस्त्रभेदे।

चर्मप्रसेविका • स्त्री॰ चर्मणा प्रसीव्यते सिव-ण्वुल्। अग्निसन्दीपनार्थं चर्मणा प्रसीव्यते भस्त्रानाम्नि यन्त्रे।

चर्मिन् • पु॰ चर्म फलकमस्यास्ति व्रीह्यादित्वादिनि। फलकपाणौ, लघुपत्रभूर्जवृक्षे, भूर्जवृक्षे, भृङ्गरीटे, कदल्याञ्च।

चर्य्या • स्त्री॰ चर+क्यप्। नियमापरित्यागे, गुरूपदिष्टव्रताचरणे च।

चर्व • भक्षे (दन्तैश्चूर्णने वा) चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰। चर्वयति-ते चर्वति अचचर्वत्-त अचर्वीत्।

चर्षणि • पु॰ कृष-अनि पृ॰ चादेशत्वम्। जने। "न चर्षणीनामुद्गात्" इति भागवतम्। [चल: चाञ्च।

चल • गतौ भ्वादि॰ पर॰ सक॰ सेट् ज्वलादि। चलति अचालीत्।

चल • विलासे तुदा॰ पर॰ सक॰ सेट्। चलति अचालीत्।

चल • संपर्के चुरा॰ उभ॰ सक॰ सेट्। चालयति अचीचलत्-त।

चल • त्रि॰ चल-ज्वलादित्वात् वा अच्। तरले, चञ्चले, कम्पके च। भावे वा। कम्पे। [दधीऽल्प

चलदल • पु॰ चलानि चञ्चलानि दलान्यस्य। अश्वत्थवृक्षे। चलदलं-

चला • स्त्री॰ चल-अच्। लक्ष्म्यां, सिह्लके च।

चलाचल • त्रि॰ चल-अच् नि॰। अत्यन्तचपले। काके पु॰।

चलि • स्त्री॰ चलं इन् पृ॰। (चर) चर्म्मे। [अत्यर्थे।

चलिका • स्त्री॰ चलि+कन् पृ॰। चर्म (चर)। इकन् पृ॰। चलिक-

चल्क • न॰ चलति चलं यत् पृ॰। (चर) शल्ये, [illegible], [illegible]

चल्कला • स्त्री॰ [illegible] [illegible]।

* भक्षे भ्वादि॰ उभ॰ पर॰ सक॰ सेट्। चषति-ते अचाषीत्
अचषीत् अचषिष्ट।
त ० वधे भ्वादि पर॰ सक॰ सेट्। चषति अचाषीत्-अचषीत्।
षक * पु॰ न॰ चष-करणे क्वुन्। मद्यपानपात्रे। कर्मणि क्वुन्।
मधुनि, मद्यभेदे च न॰।
षाल * पु॰ चष-चालच्। यज्ञीयपशुबन्धनार्थं काष्ठे, यूपमध्ये देये
वलयाकारे काष्ठमये लौहमये वा पदार्थे च।
ह ० प्रतारणे भ्वादि॰ पर॰ सक॰ सेट्। चहति अचहीत्।
ह ० प्रतारणे चद॰ चुरा॰ उभ॰ सक॰ सेट्। चहयति ते अचच-
[चहत् त।
हत् त।
चह * प्रतारणे चुरा॰ पर॰ सक॰ सेट् घटा॰। चहयति अची-
चाकचक्य * न॰ चक-यच् चक' प्रकारे द्वित्वं चकचकस्तस्य भावः।
उज्ज्वलतायाम्। "चाकचक्यादिमाहात्म्यमन्दर्शनसमुद्भूता" इति
वेदान्तपरिभाषा।
चाक्षुष * न॰ चक्षुषा निर्वृत्तम् अण्। चक्षुर्जन्ये ज्ञाने, षष्ठे मनौ च।
चाक्रिक * पु॰ चक्रेण समूहेन चरति ठक्। सङ्घस्य स्तुतिपाठके,
चाण्टिकार्थे च।
चाङ्गेरी * स्त्री॰ "चङ्गस्तु शोभने दक्ष" इत्युक्ते। चाङ्गं शोभनदन्त-
तामीरयति ईर-अण् गौरा॰ ङीप्। (चामरुल) क्षुपभेदे।
चाट * पु॰ चुरा॰ चट भेदे अच्। चाटौ विश्रामसमुत्पाद्य पश्चात्
धनापहारिणि चौरे "चाटचारणदासेषु दत्तं भवति निष्फलम्"
इति स्मृतः।
चाटकैर ० पु॰ चटकायाः चटकस्य वाऽपत्यम् ढरक्। चटकापत्ये।
चाटु * पु॰ चट-ञुण्। प्रियवाक्ये, मिथ्याप्रियवाक्ये च। स्वार्थे कन्।
अत्रैवार्थे "विश्रब्धचाटुकशतानि" इति साहित्यदर्पणे ३ परि॰।
चाटुपटु ० पु॰ चाटौ मिथ्यापरितोषणे वाक्ये पटुः। (भाण्ड)
(खोसामुदे) जने। पु॰ यस्य वः चाटुबटुरप्यत्र। विदूषके च।
चाणकीन ० त्रि॰ चणकस्य भवनं क्षेत्रम् खञ्। चणकभवनयोग्ये
क्षेत्रादौ। [चन्द्रगुप्ताय राज्यं दातरि विष्णुगुप्ते।
चाणक्य * पु॰ चणकस्य मुनेर्गोत्रापत्यम् यञ्। नव नन्दान् हत्वा
चाणू(नू)र ० पु॰ चण(न)-ऊरण्। कंसासुरस्य प्रधानमल्ले।
–णू(नू)रसूदन ० पु॰ चाणू(नू)र सूदयति ल्युट्। श्रीकृष्णे।
चाण्डाल ० पु॰ चण्डाल एव प्रज्ञाद्यण्। स्वपचे चण्डालार्थे।
चातक ० पु॰ चतति याचते सततमब्धो मेघान् चत-ण्वुल्। स्वना-
मख्याते पक्षिभेदे। [चातुरी तुरी" इति नैषधम्।
चातुरी ० स्त्री॰ चतुरस्य भावः तस्येदं वा ष्यञ्। "चातुर्य"
चातुर्मास्य ० न॰ चतुर्षु मासेषु विहितम् ण्य। चतुर्माससाध्ये
यज्ञभेदे, व्रतभेदे च। "आषाढस्य द्वादश्यां पौर्णमास्यामथापि
वा। चातुर्मास्यव्रतारम्भः" इत्युपक्रम्य "कार्त्तिक्यां शुक्लपक्षे
तु द्वादश्यां तत् समापयेत्" इत्युक्तं वाराहे।
चातुर्वर्ण्य ० न॰ चत्वारो ब्राह्मणादयो वर्णा एव स्वार्थे ष्यञ्। ब्राह्म-
णादिषु चतुर्षु वर्णेषु। "चातुर्वर्ण्यं मया सृष्टम्" इति गीता।
भावे ष्यञ्। चतुर्वर्णधर्मे।
चान्द्र ० पु॰ चन्द्रो देवताऽस्य, तस्येदमिति वा अण्। चन्द्रकान्तमणौ,
त्रिंशत्तिथ्यात्मके पौर्णमास्यन्ते अमान्ते वा मासे च। चान्द्रा-
यणव्रते न॰। चन्द्रलोके पु॰। चन्द्रेण प्रोक्तमण्। व्याकरणभेदे।
तदधीते। पुनरण्। चान्द्रव्याकरणाध्यायिनि त्रि॰।
चान्द्रमास * पु॰ कर्म॰। "तत्त्रिंशता भवेन्मासश्चान्द्रस्तु तिथिभि-
स्तथा" इत्युक्तलक्षणे मासि।
चान्द्रायण * चान्द्रचन्द्रलोकोऽयतेऽनेन अय-ल्युट् णत्वम्। व्रतभेदे।
चान्द्री ० स्त्री॰ चन्द्रस्येयम् अण्। चन्द्रपत्न्यां ज्योत्स्नायाञ्च। तत्तु-
ल्यशुभ्रत्वात् श्वेतकण्टकार्य्याम्। [मश्मे राशौ च।
चाप * पु॰ चपस्य वंशभेदस्य विकारः अण्। धनुषि, मेषाद्धिके
चापल ० न॰ चपलस्य भावः कर्म वा अण्। अविमृश्यकारिताख्ये,
प्रयोजनं विनाऽपि पाण्यादेश्चालनरूपे वा चपलकर्मणि "मातृ-
सर्व्वैदेवागादेश्चापल्ये त्वनवस्थितिः" इत्युक्तलक्षणेऽनवस्थाने
च। ष्यञ्। चापल्यमप्यत्र। [पुच्छकृतव्यजने।
चामर ० पु॰ न॰ चमरस्य विकारः तत्पुच्छनिर्मितत्वात्। चमर-
चामरपुष्प ० पु॰ चामरमिव पुष्पमस्य। क्रमुके, काशे, केतके,
चाम्रे च। [च।
चामीकर * न॰ चमीकरे आकरभेदे भवः अण्। स्वर्णे धुस्तूरे
चामुण्डा * स्त्री॰ चमू सेनां विपक्षादिसमूहरूपां माति चादर्शे
ला-क पृ॰। दुर्गायाम् "यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपा-
गता। चामुण्डेति ततो लोके ख्याता देवि" इत्युक्तेर्वा चण्ड-
मुण्डानयिकायां दुर्गायाम्।
चाम्पेय ० न॰ चम्पायां भवः ढञ्। चम्पके, नागकेशरे, स्वर्णे, किञ्ज-
ल्के च। स्वार्थे कन्। किञ्जल्के। [मीत् अचायिष्ट चायाञ्च।
चाय ० दर्शने भ्वादि॰ उभ॰ सक॰ सेट्। चायति ते अचायी-
चार * पु॰ चर एव स्वार्थे अण्। चरे "चारैः पश्यन्ति राजान"
इति नीतिशास्त्रम्। चर-भावे घञ्। गमने, बन्धे च। आधारे
घञ्। कारागारे। कृत्रिमविषे न॰।
चारण ० पु॰ चारयति कीर्त्तिं चर-णिच्-ल्यु। कीर्त्तिप्रचारके
नटे "चाटचारणदासेषु" इति स्मृतिः।
चारित्र ० न॰ चरित्रमेव स्वार्थेऽण्। चरित्रे।
चारु ० पु॰ चर-उण्। बृहस्पतौ। मनोज्ञे, मनोहरे च त्रि॰।
चारुकेशरा ० स्त्री॰ चारूणि केशराण्यस्याः। नागरमुस्तायाम्।
चारुनालक ० न॰ चारु नालं यस्य कप् टाप्। रक्तपद्मे।
चारुपर्णी ० स्त्री॰ चारूणि पर्णान्यस्याः ङीप्। (प्रसारणी) प्रसा-
रिण्याम्।
चारुफला ० स्त्री॰ चारूणि फलानि सन्त्यस्याः। द्राक्षायाम्।
चार्चिक्य ० न॰ चर्च्च धात्वर्थे ण्वुल् चर्चिकैव स्वार्थे ष्यञ्। चन्दना-
दिना गात्रलेपने।

लतायाम्, चतुराक्षरपादके छन्दोभेदे च। [र्ण्याम्।
चित्रपर्णी * स्त्री० चित्राणि पर्णान्यस्याः। (चाकुलिया) पृश्निप
चित्रपादा * स्त्री० चित्रौ पादौ यस्याः। सारिकापक्षिणि।
चित्रपुष्पी * स्त्री० चित्राणि पुष्पाण्यस्याः ङीप्। अम्बष्ठालतायाम्।
चित्रपृष्ठ * पु० चित्रं पृष्ठमस्य। कलविङ्कपक्षिणि।
चित्रफला * स्त्री० चित्रं फलं यस्याः। कण्टकार्य्यां, वार्त्ताक्याञ्च।
चित्रभानुः * पु० चित्रा भानवो यस्य। वह्नौ, सूर्य्ये, चित्रकद्रुमे, अर्कद्रुमे च। [दुम्बरिकायाम्।
चित्रभेषजा * स्त्री० चित्रमाश्चर्य्यं भेषजं यस्याः पूर्व०। काको-
चित्ररथ * पु० चित्रो रथोऽस्य। सूर्य्ये, गन्धर्वभेदे च।
चित्रलता * स्त्री० कर्म०। मञ्जिष्ठायाम्।
चित्रलेखा * स्त्री० अप्सरोभेदे कुम्भाण्डसुतायाम् उषासख्याम्, चतुर्दशाक्षरपादके छन्दोभेदे च।
चित्रवीर्य्य * पु० चित्रमाश्चर्य्यं वीर्य्यमस्य। रक्तैरण्डे।
चित्रशिखण्डिज * पु० चित्रशिखण्डिनोऽङ्गिरसो जायते जन-ड। बृहस्पतौ।
चित्रशिखण्डिन् * पु० चित्राः शिखण्डाः सन्त्यस्य इनि। "मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः" इत्युक्तेषु सप्तसु मुनिषु।
चित्राङ्ग * पु० चित्रमङ्गमस्य। रक्तचित्रके, सर्पे च। [च।
चित्राङ्गद * पु० शान्तनुराजसुते विचित्रवीर्य्यभ्रातरि, गन्धर्वभेदे
चित्राङ्गी * स्त्री० चित्रमङ्गमस्याः। मञ्जिष्ठायां, कर्णजलौकसि च।
चित्रायस * न० कर्म० अच् समा०। तीक्ष्णलौहे (इस्पात)।
चिद्रूप * पु० चिदेव रूपमस्य। आत्मनि, स्फूर्त्तिमति च।
चिदाकाश * न० चिद् आकाशमिव निर्लेपत्वात् सर्वाधारत्वाच्च। शुद्धे ब्रह्मणि।
चिदाभास * पु० चित आभासः प्रतिबिम्बः। बुद्ध्यात्मप्रतिबिम्बे। "जीवो बुद्ध्यर्पितश्चिदाभासो" इति वेदान्तः।
चिन्ता * स्त्री० चिति-अ। प्रागनुभूतज्ञानजन्यसंस्कारोद्बोधे पूर्वदृष्टपदार्थस्मरणे।
चिन्तामणि * पु० चिन्ताविषयस्य (तदुद्भवार्थे) मणिः। चिन्तामात्रेण चिन्तितवस्तुदायके मणौ, स्पर्शमणौ च। "यथा चिन्तामणिं स्पृष्ट्वा लोहः काञ्चनतां व्रजेत्" इति।
चिन्न * पु० चिन-न पृ० तस्य नः। (चिना) धान्यभेदे।
चिन्मय * पु० चिदेव चित्+मयट्। चैतन्यरूपात्मके परमेश्वरे "चिन्मयस्याद्वितीयस्य" इत्यादि। [कन्। अत्रैवार्थे।
चिपिट * पु० चि पिटच् किच्च। (चिड़ा) इति ख्याते पृथुके। स्वार्थे
चिर * न० चि रक्। दीर्घकाले। तद्वति पदार्थे त्रि०।
चिरक्रिय * त्रि० चिरकालेन क्रिया यस्य। दीर्घसूत्रे।
चिरजीवक * पु० चिरं जीवति जीव-ण्वुल्। जीवकद्रुमे।
चिरजीविन् * पु० चिरं जीवति णिनि। काके, जीवकद्रुमे शाल्मलिद्रुमे, मार्कण्डेये, "अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः" इत्युक्तेषु सप्तसु च। चिरजीविनि त्रि०।
चिरञ्जीविन् * पु० चिरं जीवति जीव-णिनि। चिरजीविपदार्थे।
चिरण्टी * स्त्री० चिरेण अटति पितृगृहात् भर्तृगेहम् अट+अच पृ०। यौवनवत्यां पितृगेहस्थायां स्त्रियाम्।
चिरतिक्त * पु० चिरस्तिक्तो रसो यत्र। (चिराता) भूनिम्बे।
चिरत्न * त्रि० चिरे भवः त्न। चिरन्तने, पुरातने च।
चिरन्तन * त्रि० चिरम्+ट्युल् तुट् च। पुरातने। स्त्रियां ङीप्।
चिरपाकिन् * पु० चिरेण पाकोऽस्यस्य दुर्जरत्वात्। कपित्थे।
चिरपुष्प * पु० चिराणि पुष्पाण्यस्य। बकुलद्रुमे।
चिरम् * अव्य० चि-रमुक्। बहुकालार्थे।
चिररात्र * पु० चिरा रात्रिः अच्। बहुकाले।
चिररात्राय * अव्य० चिररात्राय अयते अय-अण्। बहुकाले।
चिरविल्व * पु० चिरं विलति विल-भेदने क। करञ्जद्रुमे।
चिरसूता * स्त्री० चिरं प्रसूता। बहुकालप्रसववत्यां गवादौ। स्वार्थे कन् अत्रार्थे।
चिरस्य * अव्य० चिरमस्यति अस-अत् शक०। दीर्घकाले।
चिरात् * अव्य० चिरमतति अत-क्विप्। दीर्घकाले, गरुडे पु०।
चिराय * अव्य० चिरमयते अण्। चिरकाले, दीर्घकाले च।
चिरायुस् * पु० चिरमायुर्यस्य। देवे। चिरजीविनि त्रि०।
चिरि * हिंसे स्वादि० पर० सक० सेट्। चिरिणोति अचिरायीत्।
चिरेण * अव्य० चिर+एनप्। दीर्घकालार्थे। [टोऽप्यत्र।
चिर्भटी * स्त्री० चिरेण भटति अच् ङीप् पृ०। कर्कट्याम्। चिर्भि-
चिल * वासे तु० पर० अक० सेट्। चिलति अचेलीत्।
चिलिचिम * पु० चिल इन् चिलिं वासं चिनोति चि-मक्। (चेलेगुड़गुड़िया) मत्स्यभेदे।
चिल्ल * शैथिल्ये भावकृतौ च भ्वादि० पर० अक० सेट्। चिल्लति अचिल्लीत्। [चिल्। क्लिन्ननेत्रे त्रि०।
चिल्ल * पु० चिल्ल-अच्। (चिल) पक्षिभेदे। क्लिन्न+ल क्लिन्नस्य
चिल्लक * पु० चिल्ल-ण्वुल्। लोध्रे। झिल्लिकायां स्त्री०।
चिल्लाभ * पु० चिल्ल इव प्रसह्यहारित्वादाभाति भा-क। ग्रन्थिभेदके चौरे। [कशाके च।
चिल्ली * स्त्री० चिल्ल अच् गौरा० ङीप्। झिल्लीकीटे, लोध्रे, वास्तू-
चिवु(क) * न० चीव-संवरणे उ पृ० ह्रस्वः। ओष्ठाधोभागे। स्वार्थे कन् तत्रैवार्थे। मुचकुन्दद्रुमे पु०।
चिह्न * लक्षणे अद० चुरा० उभ० सक० सेट्। चिह्नयति ते अचिचिह्नत् त। [लक्षणे च।
चिह्न * न० चिह्न-अच्-अह्न-न उपधाया ह्रस्वम् वा। लाञ्छने।
चीक * मर्षणे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। चीकयति ते चीकति अचीचिकत् त अचीकीत्।

चीन * पु॰ चि-नक् पृ॰ दीर्घः। "भानमेगात् दक्षपूर्वं चीनदेशः प्रकीर्त्तितः" इत्युक्ते देशे, तद्देशस्थे जने ब॰ व॰। तन्मांते तद्देशाचारभेदे च। तद्देशोद्भववस्त्रे न॰ "चीनपीनस्तनवसनदमान्दोलने" इत्युद्भटः। कङ्गुतुल्यव्रीहिभेदे, सूत्रे, मृगभेदे च पु॰। पताकायां, सीसके च न॰। स्वार्थे कन्। कङ्गुधान्यभेदे।

चीत्कार * पु॰ चीदित्यव्यक्तशब्दस्य कारः कृ-घञ्। भयहेतुके ध्वनिभेदे।

चीनपिष्ट * न॰ पिष-क्त पिष्टं चूर्णं ६त॰। (चीनेर सिन्दूर) सिन्दूरभेदे। [अचिचीभत् त।

चीभ * प्रशंसायां भ्वादि॰ आत्म॰ सक॰ सेट्। चीभति अचीभीत्।

चीर * न॰ चि-क्रन् दीर्घश्च। वस्त्रखण्डे "चीराणि किं पथि न सन्ति" इति भागवतम्। लेखनभेदे, चूडायां, सीसके, वृक्षत्वचः खण्डे, वस्त्रभेदे च। [ह्रस्वम्। चञ्चुशाके।

चीरपत्रिका * स्त्री॰ चीरमिव पत्रमस्याः स्वार्थे कन्-अत

चीरपर्ण * पु॰ चीरमिव पर्णमस्य। शालवृक्षे।

चीरितच्छद * पु॰ चीरवदारितः छदो दलं यस्य। पालङ्क्यशाके।

चीर्ण * त्रि॰ चर+क्त पृ॰ अत ईत्वम्। कृते, शीलिते, सञ्चिते च।

चीव * ग्रहणे संवृतौ च भ्वादि॰ उभ॰ सक॰ सेट्। चीवति ते अचीवीत् अचीविष्ट। अचिचीवत् त।

चीव * दीप्तौ चुरा॰ उभ॰ सक॰ सेट्। चीवयति ते अचीचिवत् त।

चीवर * न॰ चि-ष्वरच् दीर्घश्च। भिक्षुवस्त्रे कौपीनादौ।

चुक्क * पीडने चुरा॰ उभ॰ सक॰ सेट्। चुक्कयति ते अचुचुक्कत् त।

चुक्र * पु॰ चक-रक् अत उत्वञ्च। अम्लवेतसे, (चुकापालङ्) शाकभेदे, अम्लभेदे च। स्वार्थे कन् (आमरुल) शाके, तिन्तिडीकाञ्च स्त्री॰। [काञ्चिकभेदे च स्त्री॰।

चुक्राम्ल * पु॰ चुक्रमिवाम्लम्। वृक्षाम्ले। अम्ललोणिकायां, चिञ्चायां,

चुक्रिमा * स्त्री॰ चुक्रैव स्वार्थे कन्। (चुकोपालङ्) शाकभेदे।

चु(चू)चुक * न॰ चु(चू)चु इत्यव्यक्तं शब्दं कायति यत्र कै-क। कुचाग्रे, स्तनवृन्ते च। [सेट्। चुच्यति अचुचीत् चुञ्चुः।

चुच्य * स्नाने मन्थने पीडने सुरादिसम्पादने च भ्वादि॰ पर॰ सक॰

चुट * अल्पीभावे भ्वादि॰ पर॰ अक॰ सेट्। चोटति अचोटीत्।

चुट * अल्पीभावे भ्वादि॰ पर॰ अक॰ सेट् इदित्। चुण्टति अचुण्टीत्।

चुट * छेदने वा॰ चुरा॰ उभ॰ पक्षे तुदा कुटा॰ पर॰ सक॰ सेट्। चोटयति ते अचूचुटत् त पक्षे चुटति अचुटीत् चुचोट।

चुट * छेदने चुरा॰ उभ॰ सक॰ सेट् इदित्। चुण्टयति ते अचुचुण्टत् त। [त।

चुड * अल्पीभावे चुरा॰ उभ॰ अक॰ सेट्। चुड्डयति ते अचुचुड्डत्-

चुड * छेदने चुरा॰ उभ॰ सक॰ सेट् इदित्। चुण्डयति-ते अचुचुण्डत्-त।

चुड * अल्पीभावे भ्वादि॰ पर॰ अक॰ सेट् इदित्। चुण्डति अचुण्डीत्। [ड्डीत्

चुड्ड(ड्ड) * हावे भावे च भ्वादि॰ पर॰ सक॰ सेट्। चुड्डति अचु-

चुण * छेदने तु॰ कु॰ पर॰ सक॰ सेट्। चुणति अचुणीत् चुचोण।

चुत * क्षरणे भ्वादि॰ पर॰ अक॰ सेट्। चोतति अचुतत्-अचोतीत्।

चुद * नोदने चुरा॰ उभ॰ सक॰ सेट्। चोदयति-ते अचूचुदत्-त। चोदना चूडा।

चुप * मन्दगतौ भ्वादि॰ पर॰ अक॰ सेट्। चोपति अचोपीत्।

चुब * चुम्बने वा॰ चुरा॰ उभ॰ भ्वादि॰ पर॰ सक॰ सेट् इदित्। चुम्बयति-ते चुम्बति अचुचुम्बत् त अचुम्बीत्।

चुम्बक * पु॰ चुबि-ण्वुल्। स्वनामख्याते अयस्कान्ते मणौ। धूर्त्ते, चुम्बनकर्त्तरि, ग्रन्थैकदेशाभिज्ञे च त्रि॰।

चुर * स्तेये (परद्रव्यापहरणे) वा॰ चु॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। चोरयति ते चोरति अचूचुरत्-त अचोरीत्।

चुरा * स्त्री चुर-क टाप्। चौर्य्ये।

चुल * समुच्छ्राये चुरा॰ उभ॰ सक॰ सेट्। चोलयति-ते अचूचुलत्-त।

चुलुक * पु॰ चुल उकक्। प्रसृतौ, निविडपङ्के, भाण्डभेदे च। माषमात्रमज्जनयोग्ये जले न॰।

चुलुकिन् * पु॰ चुलुक+अस्त्यर्थे इनि। शिशुमाराकारे मत्स्यभेदे।

चुलुम्प * लाल्ये भ्वादि॰ पर॰ अक॰ सेट्। चुलुम्पति अचुलुम्पीत्।

चुल्ल * भावकृतौ भ्वादि॰ पर॰ अक॰ सेट्। चुल्लति अचुल्लीत्।

चुल्ल * पु॰ क्लिन्नस्य चुलादयः लत्वमत्ययः। क्लिन्न नत्र। तद्युक्ते जने त्रि॰।

चुलि(ल्ली) * स्त्री॰ चुल-इन् वा ङीप् चुद-लिक् वा। पाकार्थमग्निस्थापनस्थाने (चुला) "चुल्लौ चिर रोदिति" इत्युद्भटः। यत्। चुल्लाप्यत्र।

चूडा * स्त्री॰ चुद-अङ् नि॰, चुल समुच्छ्राये दीर्घः अङ् डस्य ल वा। मयूरशिखायां, मस्तकमध्यस्थशिखामात्रे, जुटिकायां, बाहुभूषणे, शिखायाम् (अग्रे), भूषणमात्रे, कूपे, दशविधसंस्कारान्तर्गते संस्कारभेदे च। "प्रथमेऽब्दे तृतीये वा चूडा कार्य्या" इति मनुः।

चूडामणि * पु॰ ६त॰। शिरोरत्ने "चूडामणीकृतविधुः" इति।

चूडाम्ल * न॰ चूडायामम्लम्। वृक्षाम्ले।

चूडाल * न॰ चूडा शिखास्त्यस्य ल। मस्तके। शिखायुक्तजने त्रि॰। श्वेतगुञ्जायां, नागरमुस्तायाम्, उच्चटायाञ्च स्त्री॰ टाप्।

चूण * सङ्कोचे चुरा॰ उभ॰ सक॰ सेट्। चूणति अचूणीत्।

चूत * पु॰ चुष-क्त पृ॰। आम्रे, "नवचूतप्रसवो गमिष्यति" इति कुमारः। च्यु-क्त पृ॰। गुह्यद्वारे न॰। स्वार्थे कन्। आम्रे, कूपके च।

चूर * दाहे दिवा॰ आत्म॰ सक॰ सेट्। चूर्य्यते अचूरिष्ट। चूर्णः।

चूर्ण * पेषणे चुरा॰ उभ॰ सक॰ सेट्। चूर्णयति-ते अचुचूर्णत्-त।

चूर्ण * पु॰ चूर्ण-घञ्। पेषणजाते रजसि, धूलौ, (आवीर) ख्याते द्रव्ये,

ताम्बूलचर्वणोपयोगिद्रव्ये च। "चूर्णमानीयतां तूर्णम्" इति।
चूर्णक * पु॰ चूर्ण-ण्वुल्। सक्तु। स्वार्थे कन् चूर्णार्थे च। "अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः" इत्युक्ते गद्यभेदे न॰।
चूर्णकार * पु॰ चूर्णं करोति कृ-अण्। (चुनारी) जातिभेदे।
चूर्णकुन्तल * पु॰ चूर्ण्यते इति चूर्णः कर्म॰। शिरःस्थे क्षुद्रकेशे (कलके)। [कपर्दके च।
चूर्णि(र्णी) पु चुर चर-वा क्विप्। नि॰। पतञ्जलिकृते महाभाष्ये,
चूना * स्त्री॰ चुन च दीर्घः। प्रासादोपरिस्थे (चिलाघर). चूडायाञ्च। [नाटकाङ्गभेदे च।
चूलिका * स्त्री॰ चुल-समुच्छ्राये ण्वुल् पृ॰ दीर्घः। हस्तिकर्णमूले,
चूष * पाने भ्वादि॰ पर॰ सक॰ सेट्। चूषति। अचूषीत्।
चृत * हिंसे ग्रन्थने च तुदा॰ सक॰ सेट्। चृतति अचर्तीत्।
चृत(प) * सन्दीपने वा चु॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। चर्त(र्प)यति-ते। अचीचृत(प)त् अचचर्त(र्प)त् त। पक्षे चर्त(र्प)ति अचर्तीत्(र्पीत्)।
चेट(ड) * पु॰ चिट-परप्रैष्ये अच् वा टस्य डः। दासे, उभयत ङीप्। दास्याम्। ण्वुल्। दासे, उपनायके च। स्त्रियां चेटि(डि)का। [तथा कथने च।
चेत् * अव्य॰ चित्-विच्। यद्यर्थे, पक्षान्तरे, अमन्देऽपि सन्दिग्ध·
चेतकी * स्त्री॰ चित-वुन्। हरीतक्याम्, तत्फलेऽपि स्त्री॰।
चेतन * पु॰ चित+युच्। आत्मनि, जीवे, परमेश्वरे, प्राणिनि च। चेतन्ययुक्ते त्रि॰।
चेतनकी * पु॰ चेतनं करोति कृ-ड गौ॰ ङीष्। हरीतक्याम्।
चेतना * स्त्री॰ चु॰ चित+युच्। बुद्धौ ज्ञाने च।
चेतनीया * स्त्री॰ चेतनाय हिता छ। ऋद्धिनामौषधे।
चेतस् * चित-असुन्। चित्ते। आत्मनि पु॰ "साक्षीचेताः केवलो निर्गुणश्च" इति श्रुतिः। [जीवे।
चेतोमुख * चेतो मुखं द्वारमस्य। वेदान्तोक्ते सुषुप्त्यभिमानिनि
चेदि * पु॰ देशभेदे। तद्देशस्थे जने ब॰ व॰।
चेदिपति * पु चेदीनां पतिः। शिशुपाले, उपरिचरवसुनामके नृपे च चेदिराजादयोऽप्यत्र। [चचिचेलत् त।
चेल * लौल्ये गतौ च भ्वादि॰ पर॰ सक॰ सेट्। चेलति अचेलीत्
चेल * न॰ चिल-वाससाच्छादने कर्मणि घञ्। वस्त्रे। चेल-लौल्ये अच्। अधमे त्रि॰।
चेल्ल * चलने गतौ च भ्वादि॰ पर॰ सक॰ सेट्। चेल्लति अचेल्लीत्।
चेष्ट * चेष्टायां भ्वादि॰ आत्म॰ सक॰ सेट्। चेष्टते अचेष्टिष्ट। अचचेष्टत् अचिचेष्टत्।
चेष्टा * स्त्री॰ चेष्ट+अङ्। "चालयन्त्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा" इत्युक्ते कायिके व्यापारे।
चैतन्य * न॰ चेतन+भावे स्वार्थे वा ष्यञ्। चेतनायां, ब्रह्मणि, प्रकृतौ च।
चैत्त * न॰ चित्तस्येदम् अण्। बौद्धमते विज्ञानातिरिक्ते स्कन्धभावे।
चैत्य * न॰ चित्याया इदमण्। ग्रामादिप्रसिद्धे महावृक्षे, देवावासे वृक्षे, जनानां सभास्थतरौ, बुद्धभेदे, आयतने, चिताचिह्ने, जनसभायां, यज्ञस्थाने, जनानां विश्रामस्थाने, देवस्थाने च।
चैत्यगृह * न॰ चैत्यस्य समीपे गृहम्। चतुष्पथस्थे चैत्यसन्निहिते गृहे।
चैत्यद्रुम * पु॰ कर्म॰। अश्वत्थादिप्रसिद्धे वृक्षे।
चैत्र * पु॰ चित्रानक्षत्रेण युक्ता पौर्णमासी चैत्री साऽस्मिन् मासेऽण्। स्वनामख्याते शुक्लप्रतिपदादिदर्शान्तरूपे मासे। ठञ्। चैत्रिकः। कन्। चैत्रकोऽप्यत्र। पर्वतभेदे च।
चैत्ररथ * पु॰ चित्ररथेन गन्धर्वेण निर्वृत्तम् अण्। कुबेरोद्याने।
चैत्रावली * स्त्री॰ चैत्रे आसम्यक् बलिरस्याम्। चैत्रपौर्णमास्याम्।।
चैत्री * स्त्री॰ चित्रानक्षत्रेण युक्ता पौर्णमासी अण्। चैत्रमासपौर्णमास्यां, तत्रैव तद्योगसम्भवात्।
चैद्य * पु॰ चेदीनां जनपदानामयं अञ्। शिशुपाले।
चोदना * स्त्री॰ चुरा॰ चुद युच्। "चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः" इति भट्टोक्ते प्रवर्त्तनावाक्ये "चोदनालक्षणार्थो धर्मः" इति मीमांसासूत्रम्। प्रेरणायां, तर्जनायां, प्रवर्त्तनायाञ्च। [त्रि॰।
चोद्य * न॰ चुद-ण्यत्। प्रश्ने, पूर्वपक्षे, अद्भुते च। प्रेरणार्हे
चोपन * न॰ चुप-ल्युट्। मन्दगमने, गुप्तोत्थाने, मौने च।
चोर * पु॰ चुर-अच्। स्तेयकर्त्तरि, परद्रव्यापहारके, गन्धद्रव्यभेदे; तत्पुत्रमञ्ज्याञ्च। [वृक्षे।
चोरक * पु॰ चोरः स्वगन्धस्याऽपहर्त्तेव इव जायते कै क। ग्रन्थिपर्ण·
चोरपुष्पी * स्त्री॰ चोर इव पुष्पमस्याः रात्रिविकाशित्वात्। शङ्खिन्याम्। स्वार्थे कन् अत इत्वम्। चोरपुष्पिकाऽप्यत्र।
चोरा * स्त्री॰ चोरगुणं रात्रिविकाशित्वेन पुष्पमस्त्यस्या अर्श आद्यच्। शङ्खपुष्पिकायाम्।
चो(चौ)रिका * स्त्री॰ चोर+कर्मणि ठन् ठञ् वा। चौर्ये।
चोल * न॰ चुल-घञ्। स्त्रीणां कञ्चुकाख्ये चाण्डदीर्घे वस्त्रे। (चोला) इति ख्याते पुंसां वस्त्रभेदे च। दाक्षिणात्ये'ऽद्रविडसमीपस्थे देशभेदे पु॰। [त्रिवृत्पर्णे च।
चोलकी * पु॰ चुल-ण्वुल् गौरा॰ ङीष्। करीरे, नागरङ्गे,
चोली * स्त्री॰ चलचोल ङीष्। कुर्पासके वस्त्रभेदे च।
चोष्य * त्रि॰ चुष+ण्यत् च॰। इक्षुदण्डादौ भक्ष्यभेदे।
चौड(ल) * न॰ चूडा प्रयोजनमस्य अण्। चूडाकर्मणि संस्कारभेदे। वा ङीप् च। [वराटके। चोरपात्रशायिनि पु॰।
चौर * त्रि॰ चुरा शीलमस्य चोर एव वा अण्। गन्धद्रव्यभेदे·
चौर्य * न॰ चोरस्य भावः कर्म वा ष्यञ्। परद्रव्यापहरणे।
च्यवन * पु॰ च्यु-युच्। मुनिभेदे।

च्यु * गतौ भ्वादि॰ आत्म॰ सक॰ अनिट्। च्यवते अच्योष्ट।
च्यु * हासे सहने च चुरा॰ उभ॰ सक॰ अनिट्। च्यावयति ते अचुच्यवत् त। [तीत्।
च्युत * क्षरणे भ्वादि॰ पर॰ अक॰ सेट्। च्योतति अच्युतत्-अच्यो-
च्युति * स्त्री॰ च्यु+क्तिन्। क्षरणे, नाशे च। अपादाने क्तिच्। गतौ, क्षरणे, गुह्यद्वारे च।

छ

छ * त्रि॰ छो-क। छेदनकर्त्तरि, निर्मले, तरले च। गृहे न॰।
छगल * पु॰ छो-कलच् गुक् ह्रस्वश्च। पशुभेदे, छागे च। जातौ ङीप्। नीलवस्त्रे न॰। वृद्धदारकवृक्षे स्त्री॰ टाप्। स्वार्थे कन्। पशुभेदे, छागे च।
छगलान्त्री(ड्री) * स्त्री॰ छगलस्येवान्त्रम् अङ्घ्रिर्वा अस्याः गौरा॰ ङीप्। वृद्धदारकौषधे, वृके च। स्वार्थे कन्। अत्रैवार्थे।
छटा * स्त्री॰ छो-अटन्। दीप्तौ, परम्परायाञ्च।
छटाफल * पु॰ छटेव परम्परान्वितं फलं यस्य। गुवाके।
छत्र * पु॰ छद-णिच्-ष्ट्रन् ह्रस्वः। वर्षाकारमूलपत्रे (छातारिया) क्षुपभेदे। आतपत्रे न॰। अतिच्छत्रायां (सुल्फा) वृक्षे स्त्री॰।
छत्रक * पु॰ छत्रमिव कायति कै-क। (राङ्गाकुकड़ाङ्गा) वृक्षे, मत्स्यरङ्गपक्षिणि च। स्वार्थे कन्। छत्रे न॰।
छत्रपत्र * न॰ छत्रमिव पत्रमस्य। स्थलपद्मे। भूर्जपत्रवृक्षे पु॰।
छत्रपुष्प * पु॰ छत्रमिव पुष्पमस्य। तिलकवृक्षे।
छत्रभङ्ग * पु॰ छत्रस्य भङ्गो यत्र। नृपनाशे, वैधव्ये, स्वातन्त्र्ये च।
छत्राक * न॰ छत्रं आविष्कृत्येव कायति कै-क। भिन्नोक्ते "छत्राकं विड्वराहञ्च" इति मनुः।
छत्राकी * स्त्री॰ छत्रमकति अक कुटिलगतौ अण्। रास्नायाम्।
छद * अपवारणे अद॰ चुरा॰ उभ॰ सक॰ सेट्। छदयति ते अचिच्छदत् त।
छद * बलाधाने जीवने च भ्वादि॰ पर॰ अक॰ सेट्। छदति अच्छदत् अच्छदीत्-अच्छादीत्।
छद * संवरणे वा चुरा॰ पक्षे भ्वादि॰ उभ॰ सक॰ सेट् इदित्। छन्दयति-ते छन्दति-ते अचच्छन्दत्-त। छन्दति-ते अच्छन्दीत् अच्छन्दिष्ट।
छद * आवरणे भ्वा॰ [illegible] उभ॰ सक॰ सेट्। छदति छदते। अच्छदीत् अच्छादीत् अच्छदिष्ट। [च।
छद * पु॰ छद-घ। पत्रे, पक्षिणां पक्षे, ग्रन्थिपर्णवृक्षे, तमालपत्रे
छदन * न॰ छद-ल्युट्। पत्रे, पक्षे, (तेजपात) पत्रे च। भावे ल्युट्। [illegible]।
छदपत्र * पु॰ छद-[illegible] [illegible]। भूर्जपत्रे।
छदि * [illegible]। [illegible] रथादेराच्छादके [illegible]।
छदिस् * स्त्री॰ छद-इसि। [illegible]।
छद्मतापस * पु॰ छद्मना तापसः। [illegible]
ख्यापनाय तापसलिङ्गधारिणि तत्कर्मानुष्ठायिनि वैडालव्रतिके।
छद्मन् * न॰ छाद्यते स्वरूपमनेन छद-मनिन्। कपटे, छले च।
छन्द * पु॰ छदि संवरणे धातोरनेकार्थत्वात् इच्छायां घञ्। अभिलाषे, वशतायाम्, विषभेदे च।
छन्दस् * न॰ छदि+असुन्। वेदे, स्वैराचारे, अभिलाषे, नियताक्षरवर्णमात्रादिमद्विशेषवशात् चतुश्चरणादौ उक्थादिभेदे, गायत्र्यादौ छन्दसि, पद्ये च।
छन्दोग * पु॰ छन्दः सामवेदं गायति गै-क। सामवेदगे द्विजादौ।
छन्न * त्रि॰ छद-णिच् क्त नि॰। आच्छादिते। निर्जने, रहसि च न॰।
छप * गतौ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् इदित्। छम्पयति ते छम्पति अचच्छम्पत् त अच्छम्पीत्। [छान्त।
छम * भक्षणे भ्वादि॰ पर॰ सक॰ सेट्। छमति अच्छमीत्। छमिता
छर्द * वमने चुरा॰ उभ॰ सक॰ सेट्। छर्दयति ते अचच्छर्दत् त।
छर्दन * पु॰ छर्द-णिच्-ल्यु। निम्बवृक्षे, मदनवृक्षे च। भावे ल्युट्। वमने न॰। [छर्दि।
छर्दि(र्दी) * स्त्री॰ छर्द-णिच्-इन्। वमनरोगे। वा ङीप्। [illegible]
छर्दिका * स्त्री॰ छर्द-णिच्-ण्वुल्। उत्कासिकायां, विष्णुक्रान्तायाञ्च। धात्वर्थे ण्वुल्। वमने।
छर्दिकारिपु * पु॰ ६त॰। सूक्ष्मैलायाम्। छर्दिनाशके त्रि॰।
छर्दिघ्न * पु॰ छर्दिं हन्ति-हन्-टक्। निम्बभेदे। छर्दिनाशके त्रि॰।
छर्दिस् * स्त्री॰ छर्द-इसि। वमने।
छल * न॰ छो+कलच्। शाठ्ये, स्वरूपाच्छादने, व्याजे, [illegible] तात्पर्यान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरकल्पनेन वादुक्तप्रति[illegible] दिना दत्तदूषणे च। यथा नेपालादागतोऽयं नवकम्बलवानिति वादिना उक्तो नवशब्दस्य नूतनत्वार्थपरत्वे स्थिते प्रतिवादि[illegible] तस्य नवसंख्यायुक्तार्थत्वकल्पनेन नास्य नवसंख्यककम्बल[illegible] मिति यद्दूषणं दीयते। [छल
छलना * स्त्री॰ छल+तत्करोति णिच्-भावे युच्। प्रतारणे
छल्ली * स्त्री॰ छद-क्विप् तां लाति ला-क गौ॰ ङीप्। त्वचि (छाल), लतायाम्, सन्ततौ च। [छागी।
छवि * स्त्री॰ छ्यति अन्धकारं छिनत्ति छो-वि नि॰। शोभा[illegible]
छष * वधे भ्वादि॰ उभ॰ सक॰ सेट्। छषति ते अच्छाषीत् अच्छषीत् अच्छषिष्ट।
छाग * पु॰ छो+गन्। छागले। जातौ स्त्रियां ङीप्। पुंसि[illegible] इदमर्थे अण्। छाग्या दुग्धे, छागमांसे च न॰।
छागण * पु॰ छगण एव प्रज्ञाद्यण्। [illegible] पक्षो, [illegible] पचन् पच्। अग्निभेदे।
छागरथ * पु॰ छागो वाहनमस्य। वह्नौ।
छात * त्रि॰ छो कर्मणि कर्त्तरि वा क्त। छिन्ने, दुर्बले च। "[illegible] तराकुन्दरा" इति भाग॰ प्र॰ १७॰।

[छत्र] * पु॰ गृहोर्द्ध्वावरणं छत्रं तत्कोषमध्य च। शिष्ये, "वरटाः कपिलाः पीताः प्रायोहिमवतो वने। कुर्वन्ति छत्रकाकारं तज्ज्ञैः छात्रं मधु स्मृतम्" इत्युक्ते मधुभेदे न॰।

[छा]दन ● पु॰ छद-णिच्-ल्यु। नीलाम्लानवृक्षे। भावे ल्युट्। छादने। करणे ल्युट्। पक्षे न॰।

[छा]न्दस * पु॰ छन्दोवेदमधीते ऽण्। वेदाध्ययनकर्त्तरि।

[छा]न्दोग्य ● न॰ छन्दोग+आम्नायार्थे ञ्य। सामगानां धर्मे आम्नाये (सामवेदब्राह्मणात्मके ग्रन्थे), समूहे च।

[छा]या * स्त्री॰ छो-ण। आतपाभावे, कान्तौ, प्रतिबिम्बे, पालने, उत्कोचे, पङ्क्तौ, संज्ञाप्रतिरूपायां सूर्यभार्य्यायाम्, कम-विंशाक्षरपादके छन्दोभेदे च।

छायातनय * पु॰ ६त॰। शनैश्चरे। छायासुतादयोऽप्यत्र।

छायापुरुष * पु॰ छायया पुरुष इव। आकाशे द्रष्टव्ये निजच्छायानुरूपे छायात्मके पुरुषे।

छायावृक्ष * पु॰ छायाप्रधानो वृक्षः शाक॰। वटादौ वृक्षे।

छिक्कनी ● स्त्री॰ छिक् इत्यव्यक्तं नासिकाशब्दं कनति शब्दायते अच् गौरा॰ ङीष्। (नाकछिकनी) वृक्षभेदे।

छिक्का * स्त्री॰ छिक् इत्यव्यक्तं शब्दं करोति कृ+ड। क्षुते।

छित्वर * त्रि॰ छिद-ष्वरप्। पु॰ तुरुष। वैरिणि, धूर्त्ते, छेदके च। स्त्रियां ङीप्। छेदने न॰।

छिद * द्वैधीकरणे रुधा॰ उभ॰ सक॰ अनिट्। छिनत्ति छिन्ते [च। अच्छैत्सीत् अच्छिदत् अच्छित्त, छिदा।

छिदिर * पु॰ छिद-किरच्। कुठारे, पावके, रज्जुभेदे, करवाले

छिदुर * त्रि॰ छिद-कुरच्। वैरिणि, धूर्त्ते, छेदके, छेदनद्रव्ये च।

छिद्र * भेदने अद॰ चुरा॰ उभ॰ सक॰ सेट्। छिद्रयति ते अचि-च्छिद्रत् त। [ज्योतिषोक्ते लग्नतोऽष्टमस्थाने च।

छिद्र ● न॰ छिद-रक् छिद्र-अच् वा। दूषणे, गर्त्ते, अवकाशे,

छिद्रान्तर * पु॰ छिद्रमन्तर्मध्यं यस्य। नले।

छिद्रित ● त्रि॰ छिद्र+त। विद्धे, लतच्छिद्रे च।

छिन्नपत्री * स्त्री॰ छिन्नं पत्रं यस्याः। अम्बष्ठायाम् (आकनादी)।

छिन्नमस्ता ● स्त्री॰ छिन्नं मस्तं यस्याः। महाविद्यायां, विद्याभेदे [मन्नकां, केतक्याञ्च स्त्री॰। च।

छिन्नरुह ● पु॰ छिन्नोऽपि रोहति रुह-क। तिलकवृक्षे। गुडूच्यां,

छिन्नोद्भवा * स्त्री॰ छिन्नाप्युद्भवति उद्+भू-अच्। गुडूच्याम्।

छुछुन्दरी * स्त्री॰ छुछु इत्यव्यक्तं दधाति अच् पृ॰। (छुंचु) जन्तु-भेदे, गन्धमूषिके च। [यति ते छुटति। अचुच्छुटत् अच्छुटीत्।

छुट * छेदने वा चुरा॰ उभ॰ पक्षे तु॰ कुटा॰ पर॰ सक॰ सेट्। छोट-

छुड * छेदने तु॰ कु॰ पर॰ सक॰ सेट्। छुडति अच्छुडीत् चुच्छोड।

छुप * स्पर्शे तु॰ पर॰ सक॰ अनिट्। छुपति अच्छौप्सीत्।

छुप ● पु॰ छुप-क। क्षुपे, स्पर्शे, चपले, युद्धे च।

छुर ● छेदे भ्वादि॰ पर॰ सक॰ सेट्। छोरति अच्छोरीत्।

छुर * लेपने तु॰ कु॰ पर॰ सक॰ सेट्। छुरति अच्छुरीत्।

छुरिका ● स्त्री॰ छुर-क्वुन्। अस्त्रभेदे (छुरि)। छुर-क गौरा॰ ङीष्। छुरीत्यप्यत्र।

छृद * सन्दीपने वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। छर्दयति ते छर्दति। अचच्छर्दत् अचिच्छृदत् त अच्छर्दीत्।

छृद ● देवने दीप्तौ च अक॰ वमने सक॰ रुधा॰ उभ॰ सेट्। छृणत्ति छृन्ते अच्छृदत् अच्छर्दीत्।

छृप * दीपने दिक॰ शब्दे अक॰ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सेट्। छर्पयति ते छर्पति। अचिच्छृपत् त अचच्छर्पत् त। अच्छर्पीत्। [नागरे च त्रि॰।

छेक * पु॰ छो-बा डेकन्। गृहासक्ते पक्षिणि, मृगे च। विदग्धे,

छेकानुप्रास * पु॰ छेकस्य विदग्धस्य प्रियोऽनुप्रासः शाक॰। अनु-प्रासभेदे शब्दालङ्कारे। [भेदे।

छेकोक्ति ● स्त्री॰ छेकायाः विदग्धाया उक्तिः। वक्रोक्तिरूपेऽलङ्कार-

छेद * छेदने अद॰ चुरा॰ उभ॰ सक॰ सेट्। छेदयति ते अचिच्छे-दत् त।

छेद ● पु॰ छिद-घञ्। छेदने, छेदके, भाजके च "छेदं गुणं गुणं छेदम्" इति लीलावती। कर्म्मणि घञ्। खण्डे, "वलाहक-च्छेदविभक्तरागाम्" इति कुमारः।

छैदिक ● पु॰ छेदं नित्यं अर्हति ठक्। वेतसे।

छो * छेदने दिवा॰ पर॰ सक॰ अनिट्। छ्यति अच्छात् अच्छासीत्।

छोटिका ● स्त्री॰ चुरा॰ छुट-ण्वुल्। तर्जन्यङ्गुष्ठजनिते शब्दे।

छ्यु ● गतौ भ्वादि॰ आत्म॰ सक॰ अनिट्। छ्यवते अच्छ्योष्ट।

ज

ज ● जि-जन वा ड। शिवे, विष्णौ, जनके, वेगे, मुक्तौ, विषे, छन्दो-ग्रन्थोक्ते गुरुमध्यगे वर्णत्रये च। [अजक्षीत्।

जक्ष * भक्षणे सक॰ हासे अक॰ अदा॰ जक्षा॰ पर॰ सेट्। जक्षिति

जगच्चक्षुस् ● पु॰ जगतां चक्षुरिव सर्वपदार्थदर्शकत्वात्। सूर्य्ये।

जगत् * पु॰ गम-क्विप् नि॰। वायौ। जङ्गमे त्रि॰। विश्वे लोके न॰।

जगत्प्राण ● पु॰ जगतां प्राणो जीवनहेतुत्वात्। वायौ।

जगत्साक्षिन् ● पु॰ जगतां साक्षीव सर्वस्य साक्षाद्दर्शनात्। सूर्य्ये।

जगती ● स्त्री॰ गम-क्विप् नि॰। पृथिव्यां, भुवने, जने, जम्बुद्वीपे, वास्तुभेदे, द्वादशाक्षरपादके छन्दोभेदे च।

जगदाधार ● पु॰ ६त॰। वायौ, जगतामाश्रये च, "कालो हि जग-दाधारः" इति स्मृतिः। [द्धात्रीम्" इति स्मृतिः।

जगद्धात्री ● स्त्री॰ धा-तृच् ६त॰। दुर्गाभेदे। "उद्यद्वाञ्च जग-

जगद्योनि ● पु॰ जगतां योनिरुत्पत्तिः यस्मात्। शिवे, विष्णौ, हिरण्यगर्भे, कुमारे च। ६त॰। पृथिव्याम्। [भैरवभेदे च।

जगन्नाथ * पु॰ ६त॰। विष्णौ, तदीयक्षेत्रभेदे, विमलापीठस्थे

जगल * पु॰ गल-अदने यङ् अच् नि॰। मद्यकल्के (मदेर गाद), मदनवृक्षे, पिष्टमद्ये, धूर्त्ते च।

जटट • त्रि० जट-क। मुखे।

जटित • स्त्री० जट-इन्। लोचने, महर्षिपत्ने च।

जटर • न० यत्र जनि इन-जट्-अच् उ०। स्त्रोपां योविद्युरोमावै, अंगौ च। "जौवन्दवदवनाः" इत्युक्ते।

जटलम्बा • स्त्री० जटर इव लम्बमानं जलमन्दात् जनुम् उ०। कदवाद्दुर्मांसादाद्।

जडमा • त्रि० इन-डड् अच् उ०। अजननिक इवार्थे यत् वा। जडदे, चदे, नर्तंदे च। मूढे पु०। जडमन्दुमोचितं दृश्य। दुःसं निष्ठं।

जडमत • पु० जडर्क पाले जात्वं जन ड। मूढे। वनिष्ठे त्रि०।

[illegible]

मेदे स्त्री (जडुल)। [गुडे, अडिते च

जठर • न० जायते जन्तुर्गर्भो यस्मिन् जन-अर ठान्तादेशः। ...

जड • त्रि० जलति घनीभवति जल-अच् डस्य लः। शीतार्ते, हिमार्ते, मूके, बुद्धिहीने, अप्रकाशे, वेदग्रहणा... मूर्खे च। जले, सीसके च न०। जडयति ... णिच्। मूकस्त्रियां, भूम्यामलक्यां च स्त्री० टाप्।

जतु • न० जन-उ तोऽन्तादेशः। धनत्रे, लाक्षायाञ्च।

जतुका • स्त्री० जतु+इवार्थे कन्। (चामचिका) पक्षिभेदे, द्रव्यभेदे, जन्यां, पर्पट्यां, तिर्यक्फलायां, नियामावाञ्च।

जतुकारी • स्त्री० जतु करोति कृ-अण्-ङीप्। जतुकावां ...

जतुरस • पु० ६त०। लाक्षारसे। [भागविक्रयोः

जत्रु • न० जन-रु तान्तादेशः। स्कन्धवक्षसोः सन्धौ, ...

जन • जनने जुहो० पर० सक० सेट्। घटा०। जजन्ति। ... अजनीत् अजानीत्। जनयति जनितः। [...

जन • जनने दि० आ० अक० सेट् घटा०। जायते अजनिष्ट।

जन • पु० जन-अच्। लोके, पामरलोके, महर्लोकादूर्ध्वलोके।

जनक • पु० जन-णिच्-ण्वुल्। पितरि, मिथिलाधिपे राजभेदे। कारके त्रि०। [...

जनकसुता • स्त्री० जनकस्य सुततया ख्याता। सीतादेवी ...

जनता • स्त्री० जनानां समूहः तल्। जनसमूहे।

[illegible]

तायायाश्च। जायते चारोग्यमनया। ओषधिभेदे, जतुकायाश्च।
* न० जन-उसि। जपसी।
) * स्त्री० जन-उ वा ऊङ्। जपमी।
० पु० जनानामिष्टः। मुद्गाद्वृक्षे। हरिद्रामौषधौ, जातीपुष्पे,
हरिद्रायां, जतुकायाश्च स्त्री०। [त्मानिमानिनि जीवे च।
* पु० जन-तु। जननशीले प्राणिनि, पक्षिप्रभृतिपाद् देहा-
ा ० स्त्री० जन्तुभिः कायति प्रकाशते कै-क। शालायां,
प्या हि कोटैः प्रकाशः। हिङ्गुनि च।
* पु० जन्तून् क्रमीन् हन्ति टक्। बीजपूरे। विडङ्गे, हिङ्गुनि
न०। प्राणिघातके त्रि०।
तम * पु० जन्तवः फलेऽस्य। उदुम्बरे।
ारी * स्त्री० जन्तून् क्रमीन् मारयति मृ-णिच्-अण् उप०।
नम्बूके (निमको)। [बहुकीटानां स्थितिः।
ा ० स्त्री० जन्तून् कीटान् माति ला-क। कामवृक्षे, तत्र हि
[० न० जन-मनि। उत्पत्तौ, आद्यचणसम्बन्धे, गर्भवासनी-
ोनिनिःसारणेन देहग्रहणे, न्यायमते अपूर्वदेहादिभिः
म्बन्धे, ज्योतिषोक्ते जन्मलग्ने, स्वावधिके दशमे जनविशे
। नक्षत्रे, जन्मलग्ने च।
ाम ० पु० ६त०। "आरभ्य जन्मदिवसं यावत् त्रिंशद्दिनानि
।। जन्ममासः स विज्ञेयो वर्जितः सर्वकर्मसु" इत्युक्ते जन्मदि-
ावधिके त्रिंशद्दिनात्मके मासि।
न्तर ० न० अन्यत् जन्म मयू०। जन्मान्तरे, परलोके च।
टमी ० स्त्री० श्रीकृष्णस्य जन्मतिथौ, मुख्यचान्द्र भाद्रस्य
कृष्णाष्टम्याश्च।
न् * पु० जन्मास्त्यस्य ब्रीह्यादि० इनि। प्राणिनि, जीवे च।
* त्रि० जन-कर्मणि यत्। जायमाने। जन-णिच्-यत्।
उत्पाद्ये, जनके च। जनौ वधूं वहति नयति वा यत्।
वरोढाज्ञातिमित्रभृत्यादिष्वेषु त्रि०। यद्दे, परीवादे, यौतो,
युद्धे, देहे च पु०। भावे यत्। जनने न०। मातृवत्स्याद्या
स्त्री०। [पौष-घदर्पोत्।
* उपालम्भे वाचि च भ्वादि० पर० सक० सेट्। जपति जजा-
० पु० जप-अप्। वेदमन्त्रादेरावृत्तौ मनसोच्चारणे "जपस्तृा-
दर्शं धीयमानप्यौष्करणं स्मृते" इत्युक्ते मन्त्रादिभाषणे च।
(पा) ० स्त्री० जप-अच् वा पच्च वः। जवाख्याते वृक्षे,
तत्पुष्पे च।
० मैथुने भ्वादि० पर० सक० सेट्। जभति जजभीत्।
० मैथुने भ्वादि० पर० सक० सेट्। जभति जजभीत्।
० नाशे भ्वादि० आत्म० सक० सेट् इदित्। जम्भते जजम्भे
० नाशे चुरा० उभ० सक० इदित्। जम्भयति-ते जजम्भत्-त।
० भक्षणे भ्वादि० पर० सेट्। जमति जजमीत्। [जमता।
० भक्षे भ्वादि० पर० सक० सेट्। जमति जजमीत्। अदिद्ा-

जमदग्नि ० पु०। परशुरामस्य पितरि मुनिभेदे।
जम्पती * पु० द्वि० व०। जाया च पतिश्च द्व०। जायाया जम्।
दम्पत्योः, स्त्रीपुरुषयोश्च। [मेशाले, जैनकाव्य।
जम्बाल * पु० जम्ब-घञ् जम्बमाम्नोति आदत्ते आ+ला-क। पङ्के,
जम्बालिनी * स्त्री० जम्बाल+अस्त्यर्थे इनि। नद्याम्।
जम्बीर ० पु० जम-विच् वीर-शिकाम्लो व कर्म०। (गोड़ानेबु) वृक्ष-
भेदे, मरुवके, मिताम्ले च।
जम्बु(म्बू) * स्त्री० जम-कु नि० बुक् पृष० वा ऊङ्। (जाम) इति
ख्याते वृक्षे। तस्याः फले अण् तस्य वा लुप्। जाम्बवम्। वा
वृक्षे। जम्बु चाप्यत्र।
जम्बुक ० पु० जम्बु इव कायति कै-क। (गोलापजाम) इति ख्याते
वृक्षे, श्योनाकभेदे च। स्वार्थे कन्। जम्बुशब्दार्थे।
जम्बुद्वीप * पु० जम्बुवृक्षचिह्नितो द्वीपः शाक०। सप्तद्वीपमध्ये
स्वनामख्याते द्वीपभेदे।
जम्बूक ० पु० जम ऊकादि० नि०। शृगाले, नीचे, वरुणे, प्रत्यु-
कायें च। (गोलापजाम) दाक्षाभेदे स्त्री०।
जम्भ ० पु० जभि-घञ्। दैत्यभेदे, दन्ते, जम्बीरे, अंशे, तूणे, तूणे
च। भावे घञ्। भक्षणे, जृम्भणे च। च। जृम्भायां स्त्री०।
जम्भभेदिन् * पु० जम्भं दैत्यं भिनत्ति भिद-णिनि। इन्द्रे। जम्भ-
भेदनादयोऽप्यत्र।
जम्भला ० स्त्री० जम्भ जृम्भां लाति ला क। राक्षसीभेदे, तस्याः
स्मरणे स्तनपानात् स्तनाशे च तत्पूर्वोक्तजृम्भाख्या अपि
नामः "समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी" इति।
जय ० पु० जि-भावे अच्। शत्रुपराभावे, नारायणपार्षदभेदे,
"यतो धर्मस्ततो कृष्णो यतो कृष्णस्ततो जयः" इति भारतम्।
विराटपुराख्ये युधिष्ठिरे युधिष्ठिरे च।
जयढक्का ० स्त्री० जयार्थिका ढक्का। वाद्यभेदे।
जयद्रथ ० पु० जयत् रथो यस्य। सिन्धुराजे, दुर्योधनभगिनीपतौ
स्वनामख्याते नृपे, सूर्ये, भीमे च। [दुर्योधने भीमे च।
जयन्त ० पु० जि-झच्। इन्द्रस्य पुत्रे, चन्द्रे, शिवे, विराटपुराख्ये
जयन्ती ० स्त्री० जयति रोगान् जयत्यरीनर्थान् वा जि-झच् ङीप्।
[illegible], [illegible], दुर्गाभेदे "जयन्ती मङ्गला काली" इति
[illegible]। [illegible], [illegible], "[illegible]
[illegible]
जयन्ती नाम सा [illegible]" इत्युक्तायां [illegible] च।
जयपत्र ० न० जयसूचकं पत्रम्। "[illegible]
[illegible]" इत्युक्ते
पत्रे।
जयपाल ० पु० जयेन [illegible] [illegible]। [illegible]
ख्याते [illegible] वृक्षे। [illegible]
जया ० स्त्री० जि-अच्। [illegible], [illegible], [illegible], [illegible]

—१६

झट् * गतौ भ्वादि० आत्म० सक० अनिट्। झटते अझटीष्ट।

ञ

ञ * पु० हर्षे, शुक्रे, कुटिलगतौ, गायने, घर्घरध्वनौ च।

ट

ट * पु० टल-ड। वामने, पादे, निस्वने च। करङ्के, टङ्कारे च न०।

टक * बन्धे चुरा० उभ० सक० सेट् इदित्। टङ्कयति-ते अटटङ्कत्-त।

टङ्क * पु० टकि+घञ्-अच् वा। कोपे, कोषे, खड्गे, पाषाणभेदने-ऽस्त्रे च। चतुर्माषकरूपे परिमाणे, जङ्घायां, नीलकपित्थे, खनित्रे, दर्पे च पु० न०।

टङ्कक * पु० टङ्कते बध्यते घञ् अज्ञायां कन्। (तङ्का) रजतमुद्रायाम्।

टङ्कन * पु० टकि-युच्। क्षारभेदे (सोहागा)।

टङ्कानक * पु० टङ्कं कोपमानयति उद्दीपयति आ-नी-णिच्-ण्वुल्। ग्रन्थदारवृक्षे (वामनगाछ)।

टङ्कार * पु० टमित्यव्यक्तशब्दस्य कारः कृ-घञ्। ध्वनिभेदे, धनुर्ज्या-कर्षणजे शब्दे, विस्मयहेतुके शब्दे च।

टङ्ग * टकि-अच् पृ०। (टाङ्गि) अस्त्रभेदे, जङ्घायाञ्च।

टङ्गन * पु० टकि-युच् पृ०। (सोहागा) क्षारभेदे।

टङ्गिनी * पु० टकि-णिनि पृ०। (आकनादी) पाठायाम्।

टल * विह्वले भ्वादि० पर० अक० सेट् ज्वला०। टलति अटालीत्। टल टालः।

टिटि(टी)भ * पु० टिटि(टी) इत्यव्यक्तं भाषते भाष-ड। टिटिर) पक्षिभेदे। स्वार्थे कन्। अत्रैवार्थे।

टिप * नोदने चुरा० उभ० सक० सेट्। टेपयति ते अटीटिपत् त।

टिप्पनी * स्त्री० टिप्-क्विप् टिपा पन्यते स्तूयते अच्। टीकायाम्।

टीक * गतौ भ्वादि० आत्म० सक० सेट्। टीकते अटीकिष्ट।

टीका * स्त्री० टीक-अ। विषमपदव्याख्यानरूपायां वृत्तौ।

टूल * विह्वले भ्वादि० पर० अक० सेट्। टूलति अटूलीत्।

ठ

ठ * मण्डले, चन्द्रबिम्बे, शून्ये, महेश्वरे, बृहद्ध्वनौ च।

ठक्कुर * पु० देवप्रतिमायां, द्विजोपाधिभेदे च।

ड

ड * पु० डी-ड। वाड़वाग्नौ, शब्दे, त्रासपत्रिणि, शिवे च।

डङ्ग(ङ्गा)री * स्त्री० कर्कटीभेदे।

डप * संहतौ वा चुरा० उभ० पक्षे भ्वादि० आत्म० अक० सेट्। डापयति-ते डपते अडीडपत् त। अडपिष्ट।

डब * राशीकरणे वा चुरा० उभ० पक्षे भ्वादि० आत्म० सक० इदित्। डम्बयति ते डम्बते अडडम्बत् अडम्बिष्ट।

डब * प्रेरणे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट् इदित्। डम्बयति ते डम्बति अडडम्बत् अडम्बीत्।

डभ * संहतौ वा चुरा० उभ० पक्षे भ्वादि० आत्म० सक० सेट् इदित्। डम्भयति ते डम्भते अडडम्भत् त अडम्भिष्ट।

डमरु * पु० डम् इति शब्दम् ऋच्छति ऋ-उन्। वाद्यभेदे कापालिकयोगिवाद्ये, चमत्कारे च।

डल्लक * न० वंशादिरचिते पात्रभेदे (डाला)।

डवित्थ * पु० काष्ठमये मृगे।

डहु(हू) * पु० दह+उ(ऊ) कुणयादि० नि०। लकुचे (मान्दार)।

डाकिनी * स्त्री० डाकानां समूहः इनि। काल्या गणभेदे।

डामर * पु० शिवोक्ते तन्त्रशास्त्रभेदे।

डिण्डिम * पु० डिण्डि इति शब्दं मिनोति प्रकाशयति मि-ड। वाद्यभेदे, (पान आमाला) वृक्षभेदे च। [समुद्रफेने।

डिण्डि(ण्डी)र * पु० डिण्डि इति शब्दोऽस्त्यस्य रः पूर्वपददीर्घः।

डित्थ * पु० काष्ठमये गजे, "श्यामरूपो युवा विद्वान् सुन्दरः प्रियदर्शनः। सर्वशास्त्रार्थवेत्ता च डित्थ इत्यभिधीयते" इत्युक्ते पुरुषभेदे च। [डेपयति ते डेपते अडीडिपत् त।

डिप * संहतौ वा चुरा० उभ० पक्षे भ्वादि० आत्म० अक० सेट्।

डिप * प्रेरणे वा चुरा० उभ० पक्षे तुदा० कुटा० च पर० सक० सेट्। डेपयति ते डिपति अडीडिपत् त अडिपत् अडिपीत्।

डिप * संहतौ वा चुरा० उभ० पक्षे भ्वादि० आत्म० अक० सेट् इदित्। डिम्पयति ते डिम्पते अडिडिम्पत् त अडिम्पिष्ट।

डिब * प्रेरणे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट् इदित्। डिम्बयति ते डिम्बति अडिडिम्बत् त अडिम्बीत्।

डिभ * संहतौ वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट् इदित्। डिम्भयति ते डिम्भति। अडिडिम्भत् त अडिम्भीत्।

डिम * हिंसने भ्वा० पर० सक० सेट्। डेमति अडेमीत्।

डिम * पु० डिम-क। दृश्यकाव्यरूपनाटकभेदे।

डिम्ब * पु० डिवि+घञ्। शिशौ, अण्डे, प्लीहानि, विप्लवे, अयस्त्वे कलहे, एरण्डे, भयहेतुके ध्वनौ, भये, भ्रमरे, फुस्फुसे च न०।

डिम्बाहव * पु० डिम्बतुल्य आहवः। नृपतिशून्ये युद्धे।

डिम्भ * पु० डिभि-अच्। मूर्खे, शिशौ च। स्वार्थे कन्। अत्रैवार्थे। अतिशिशौ स्त्री०।

डी * नभोगतौ भ्वादि० आत्म० अक० सेट्। डयते अडयिष्ट डीनः।

डी * नभोगतौ दिवा० आत्म० अक० सेट्। डी डीनः।

डीन * न० डी-भावे क्त। पक्षिणां ग

डुण्डुभ * पु० डुण्डु-इत्यव्यक्तशब्द

भा ड। (ढोंडा) इति ख्या

डोर * न० दोष्+र

: श्मशाने च। सान्धकाररात्रौ स्त्री०।
तमिस्रपक्ष * पु० तमिस्रप्रधानः पक्षः शाक०। कृष्णपक्षे। प्रथ-
मतोऽन्धकारस्याविर्भावात् तस्य तत्प्रधानत्वम्।
तमोघ्न * पु० तमोऽन्धकारं मोहमज्ञानं वा हन्ति हन-ठञ्। सूर्य्ये,
वह्नौ, चन्द्रे, बुद्धे, विष्णौ, शिवे च।
तमोज्योतिस् * पु० तमसि अन्धकारे ज्योतिरस्य। खद्योते कीटे।
तमोऽपह * पु० तमोऽन्धकारमज्ञानं वापहन्ति अप+हन ड। सूर्य्ये,
चन्द्रे, वह्नौ, ज्ञाने च। तमोनुदादयोऽप्यत्र।
तम्ब * गतौ भ्वादि० पर० सक० सेट्। तम्बति अतम्बीत्।
तय * गतौ रक्षणे च भ्वादि० आत्म० सक० सेट्। तयते अतयिष्ट।
तरक्षु * पु० तरं गतिं मार्गं वा क्षिणोति मितद्रु० डु। मृगादने
क्षुद्रव्याघ्रे। [तिर्य्यगूर्ध्वादिप्लवने च।
तरङ्ग * पु० तॄ-अङ्गच्। (ढेउ) ऊर्म्मौ, वायुना जलस्य सञ्चालनेन
तरङ्गिणी * स्त्री० तरङ्ग+अस्त्यर्थे इनि। नद्याम्। [च।
तरङ्गित * वि० तरङ्गः संजातोऽस्य तार० इतच्। जाततरङ्गे, चञ्चले
तरण * पु० तॄ-ल्यु। भेलके (डोङ्गा), स्वर्गे च। भावे ल्युट्। पार-
गमने, प्लवने च न०।
तरणि * पु० तॄ-अनि। सूर्य्ये, भेलके, अर्कवृक्षे, किरणे, ताम्रे
च। नौकायां, घृतकुमार्य्याञ्च स्त्री० वा ङीप्। ङीबन्तः
पद्मचारिण्यामपि।
तरण्ड * पु० न० तॄ-अण्डच्। वडिशीसूत्रबन्धनकाष्ठे (फात्ना), प्लवे
च। देशभेदे पु०। नौकायां वि० स्त्रीत्वपक्षे ङीप्।
तरतम * वि० न्यूनाधिकभावान्वितेऽर्थे। "तारतम्येन वर्त्तमानः"
इति शारीरकभाष्यम्। [स्त्री० ङीप्।
तरन्त * पु० तॄ-झच्। समुद्रे, प्लवे, भेके, राक्षसे च। नौकायां
तरपण्य * न० तरस्य नद्यादिपारयानस्य पण्यं शुल्कम्। नद्यादेः
पारयानार्थं देये शुल्के।
तरल * पु० तॄ-अलच्। हारमध्यस्थे मणौ, हारे, तले च। चपले,
कामुके, विस्तारे, भास्वरे, मध्यशून्ये द्रव्ये, द्रवीभूते पदार्थे च
त्रि०। यवाग्वाम्, सुरायाञ्च स्त्री०। [कम्पिते, धूर्त्ते, लुलिते च।
तरलित * वि० तरल इवाचरति तरल+क्विप्-क्त। आन्दोलिते,
तरवारि * पु० तरं प्लवं गतिं वारयति वृ-णिच्-इन्। खड्गभेदे।
तरस् * न० तॄ-करणादौ असुन्। जले, वेगे, सवेगगमने, रोगे, तीरे,
वानरे च। [अपरस्य बलप्रदत्वात् तथात्वम्।
तरस * न० तरो वेगोपलक्षितं बलमस्त्यस्मिन् अच्। मांसे, तद्-
तरसा * अव्य० तॄ-असाच्। झटितीत्यर्थे, शीघ्रे च।
तरस्विन् * पु० तरस्+अस्त्यर्थे विनि। वायौ, गरुड़े च। वेगवति,
शूरे च त्रि०। [नद्यायाञ्च।
तरि(री) * ... वा ... ...न्, वसनपेटके, वस-
तरिक * पु० ... प्लवे, भेलके।
नावायां

तरी * स्त्री० तॄ-ई। नौकायाम्। अङ्कोल्लवाच्य शुक्लीयादि।
तरु * पु० तॄ-उ। वृक्षे। [वृक्षषण्डादयोऽप्य
तरुषण्ड * पु० तरूणां समूहः तरु+षण्ड। वृक्षसमूहे,
तरुण * पु० तॄ-उनन्। एरण्डवृक्षे, स्थूलजीरके च। कुब्ज
न०। नूतने, यूनि च त्रि०। युवत्यां स्त्री० ङीप्। ङीबन्त
घृतकुमार्य्यां, दन्तीवृक्षे, (सेवती) पुष्पवृक्षे च।
तरुणज्वर * पु० "आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः" इत्यु
सप्तरात्रपर्य्यन्ते ज्वरे।
तरुरुहा * स्त्री० तरुषु रोहति रुह-क। वन्दाके (परगाछा)।
तरुवल्ली * स्त्री० तरोर्वल्लीव। वन्दाके।
तरुविलासिनी * स्त्री० तरोर्विलासिनीव। नवमल्लिकायाम्।
तर्क * पु० तर्क-घञ्। आकाङ्क्षायां, वितर्के, बुद्धिमात्रे विच
व्याप्यारोपणेन व्यापकप्रसञ्जने, यथा अत्र यदि वह्निर्न स्य
धूमोऽपि न स्यात्। मीमांसादिशास्त्रे, आगमाविरोधिन्याय
आगमार्थपरीक्षणे, व्यभिचारशङ्कानिवर्त्तके न्यायोक्ते आत
श्रयादिपञ्चके, अविज्ञातार्थे कारणोपपत्तितस्तत्त्वज्ञानार्थं ऊ
ऊहे चाध्याहारे च। [अततर्कत्
तर्क * दीप्तौ अक० वितर्के सक० चुरा० उभ० सेट्। तर्कयति
तर्कविद्या * स्त्री० ६त०। गोतमोक्तानां प्रमाणप्रमेयादीनां षो
डशानां पदार्थानां विद्यायां, कणादाद्युक्तषट्पदार्थादिविद्
यायाञ्च।
तर्कारी * स्त्री० तर्कमृच्छति ऋ-अण्। जयन्तीवृक्षे।
तर्कु * पु० कृत-उ नि०। (टेको) इति ख्याते यन्त्रभेदे।
तर्कुलासक * पु० तर्कुं लासयति चालयति लस-णिच्-ण्वुल्।
तर्कुचालके यन्त्रे (चरका)।
तर्ज * भर्त्सने भ्वादि० पर० सक० सेट्। तर्जति अतर्जीत्।
तर्ज * भर्त्सने चुरा० आत्म० सक० सेट्। तर्जयते अततर्जत।
तर्जनी * स्त्री० तर्ज्यतेऽनया तर्ज ल्युट्। अङ्गुष्ठान्तिकस्थे अङ्गुली
तर्ण * पु० तृण-अच्। वत्से। ल्युट्। गोवत्से, "कृष्णमनाया तर्ण
कपङ्क्तिः" इति छन्दोम०। सद्योजाते शिशौ च।
तर्द * हिंसे भ्वादि० पर० सक० सेट्। तर्दति अतर्दीत्।
तर्दू * स्त्री० तर्द-ऊट् वा ऊ। काष्ठनिर्मितायां दर्व्याम्।
तर्पण * न० तृप-ल्युट्। तृप्तौ। णिच्-ल्युट्। प्रीणने, यज्ञस्
कर्त्तव्ये पञ्चयज्ञान्तर्गते पितृयज्ञे, यज्ञकाष्ठे च।
तर्पिणी * स्त्री० तर्पयति प्रीणयति णिनि। पद्मचारिण्योषधौ।
तर्ब * गतौ भ्वादि० पर० सक० सेट्। तर्बति अतर्बीत्।
तर्मन् * न० तॄ-मनिन्। यूपाग्रभागे। [मानात्" इति भागवतम्
तर्ष * पु० तृष-घञ्। अभिलाषे, तृष्णायाञ्च। "निवृत्ततर्षैरुपगीय
तर्हि * अव्य० तद्+र्हिल्। तस्मिन् काले इत्यर्थे।
तल * प्रतिष्ठायां वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्।
तालयति ते तलति। अतीतलत् त अतालीत्।

तल • पु० न० तल+अच्। स्वरूपे, यथा भूमितलं काननम्। अधोभागे, चपेटे, तालवृक्षे च। खड्गमुष्टौ, आधारे, स्वभावे च पु०। वने न०। ज्याघातवारणे, गर्त्ते च स्त्री० टाप्। [चपेटाघाते।

तलप्रहार • पु० तलेन चपेटेन प्रहारः प्र+हृ-घञ्। (चापड़मारा)

तलातल • न० अतलादिषु मध्ये पञ्चमे पाताले।

तलित • न० तल+तारका० इतच्। भृष्टमांसे। [च त्रि०।

तलिन • न० तल इनन्। शय्यायाम्। विरले, स्तोके, तुच्छे, स्वच्छे

तलुन • पु० तृ-उनन् रस्य लः। वायौ। यूनि, तरुणे च त्रि०। युवत्यां स्त्री० ङीप्।

तल्प • पु० न० तल पक्। शय्यायाम्, अट्टालिकायां, दारेषु च।

तल्पकीट • पु० ६त०। (छारपोका) कीटभेदे।

तल्पज • पु० तत्र भार्यायां जातः तल्पजः। क्षेत्रजे। उत्तरपदस्योद्देशः प्रथमावचनेनैवेति समासेऽपि नियतलिङ्ग एव तेन ग्राह्य औरसज इत्येव।

तष्ट • त्रि० तक्ष क्त। तनूकृते, द्विधाकृते, गुम्फिते च।

तष्टृ • पु० तक्ष-तृच्। (छुतार) जातिभेदे, विश्वकर्मणि, वर्द्धकौ च।

तस • अलङ्कारे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। इदित्। तंसयति ते तंसति अततंसत् त अतंसीत्।

तस • उपक्षेपे दिवा० पर० सक० सेट्। तस्यति अतसीत् अतासीत्। तसित्वा तस्त्वा।

तस्कर • पु० तत् करोति तद्+कृ-अच् नि०। चौरे, प्रकाशाप्रकाशाभ्यां परद्रव्यापहारके, दमनकवृक्षे, श्रवणाख्ये च। कोपवत्यां स्त्रियां स्त्री० ङीप्।

ताच्छील्य • न० तत् शीलमस्य ष्यञ्। नियततत्स्वभावे।

ताट(ड,ड्ड) • पु० ताड्यते ताड वा डस्य टः अङ्कः चिह्नं यस्य बहु०। कर्णभूषणभेदे।

ताटस्थ्य • न० तटस्थस्य भावः ष्यञ्। औदासीन्ये, नैकट्ये च।

ताडका • स्त्री०। राक्षसीभेदे। [(कोड़ा चाबुक)।

ताडनी • स्त्री० ताड्यतेऽनया तड आघाते ल्युट्। कशायाम्

ताडपत्र • न० ताडयति अच् ताड पत्रमिव। कर्णभूषणभेदे।

ताडि(डी) • स्त्री० चुरा० तड-इ। (ताडियात) इति ख्याते वृक्षभेदे।

ताण्डव • न० तण्डुना मुनिना प्रोक्तमनुष्ठानं यस्य अण्। "पुन्नृत्यं ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते" इत्युक्ते पुंसां नृत्ये, तृणभेदे, उद्धतनृत्ये च। [त्रि०।

ताण्डवप्रिय • पु० ताण्डवं प्रियं यस्य। शिवे। नृत्यप्रियमात्रे

तात • पु० तन+क्त दीर्घश्च। पितरि। अनुकम्प्ये, पूज्ये च त्रि०।

तात्पर्य • न० तत्परस्य भावः ष्यञ्। वक्तुरिच्छायाम्, अभिप्राये, तत्परतायाञ्च। [च।

तादर्थ्य • न० तस्मै इदम् तदर्थं तस्य भावः ष्यञ्। तदर्थत्वे, तदुद्देशे

तादात्म्य • न० स आत्मा स्वरूपं यस्य तस्य भावः ष्यञ्। अभेदे, स्वरूपे च। [क्विप्। तादृक्। टक्। तादृशः। एतादृगप्यत्रार्थे।

तादृक्ष • त्रि० तस्येव दर्शनमस्य दृश+क्स। तथाविधार्थे।

तान • पु० तन-घञ्। "विस्तार्य्यन्ते प्रयोगाय मूर्च्छनाशेषतां गताः। तानास्तेऽप्यूनपञ्चाशत् सप्तस्वरसमुद्भवाः" इत्युक्ते गानाङ्गे स्वरभेदे "तानप्रदायित्वमिवोपगन्तुम्" इति कुमारः। विस्तारे च। ज्ञानविषये न०।

तान्त्रिक • त्रि० तन्त्रं सिद्धान्तं तन्त्राख्यशास्त्रं वाधीते वेद वा ठक्। ज्ञातसिद्धान्ते, अथर्ववादिनि, तन्त्रशास्त्राभिज्ञे च।

ताप • पु० तप-घञ्। सन्तापे, कष्टे च।

तापस • न० तपसि साधु अण्। तमालपत्रे (तेजपात)। तपः अस्त्यस्य अण्। तपस्विनि त्रि०। दमनकवृक्षे, बकवृक्षे च पु०।

तापसतरु • पु० तापसप्रियवृक्षः। इङ्गुदीवृक्षे, तत्तैलादिना तापसानां सर्वकर्मनिर्वाहात्।

तापसप्रिय • पु० तापसानां प्रियः छायाप्रदत्वात्। प्रियालवृक्षे।

तापिच्छ(ञ्छ) • पु० तापिनं छादयति जयति वा छद-जि-वा ड। पृषो०। तमालवृक्षे। [वाहिनदीभेदे।

तापी • स्त्री० तापयति अच् गौरा० ङीप्। विन्ध्याचलस्थे पश्चिम-

तामरस • न० तामरे जले अस्ति सस ड। पद्मे, ताम्रे, स्वर्णे, धुस्तूरे, द्वादशाक्षरपादके छन्दोभेदे च।

तामलकी • स्त्री० ताम लिष् क्विप् ताम् कर्म०। भूम्यामलक्याम्।

तामस • पु० तमसि अन्धकारे अविद्यागुणे वा रतः अण्। सर्पे, उलूके, खले च। तमसा गुणभेदेन निर्वृत्तम् अण्। सांख्योक्ते तमोजन्ये अहङ्कारादौ त्रि०। तमसः राहोरपत्यम् अण्। राहुसुतेषु ज्योतिषोक्तेषु केतुषु। तमसा व्याप्ता अण् ङीप्। रात्रौ, जटामांस्याम्, तमोऽधिकायां स्त्रियाञ्च स्त्री०।

तामिस्र • पु० तमिस्रमस्त्यस्मिन् अ। सांख्योक्ते अष्टादशविधे विपर्य्ययरूपाज्ञानभेदे, भोगेच्छाप्रतिघातजे क्रोधे, तमिस्राचारिणि राक्षसे च। अन्धकारमये नरकभेदे न०।

ताम्बूल • न० तम-ऊलच् बुगागमः दीर्घश्च। (पान) इति ख्याते नागवल्लीदले, गुवाके च।

ताम्बूलकरङ्क • पु० ६त०। (पानबाटा) ताम्बूलाधारपात्रे।

ताम्बूलपत्र • पु० ताम्बूलमिव पत्रमस्य। पिण्डालौ।

ताम्बूलवल्ली • स्त्री० तम-क्विप् ताम्, बुल-मज्जने क पृ० दीर्घः कर्म०। ताम्बूलाख्या वल्ली। (पान) नागवल्ल्याम्। स्वार्थे कन् अत्रैवार्थे। [क्रयोपजीविनि जातिभेदे।

ताम्बूलिक • त्रि० ताम्बूलं पण्यमस्य ठक्। (तामूलि) ताम्बूलवि-

ताम्बूलिन् • त्रि० ताम्बूल+अस्त्यर्थे इनि। (तामूलि) जातिभेदे।

ताम्र • न० तम-रक् दीर्घश्च। धातुभेदे (तामा), कुष्ठरोगभेदे च। अरुणवर्णे पु०। तद्वति त्रि०। [न्याम्।

ताम्रकर्णी • स्त्री० ताम्रौ अरुणौ कर्णौ यस्याः। पश्चिमदिग्हस्ति-

ताम्रकार • पु० ताम्रं ताम्रमयं करोति कृ-अण्। (कांसारि) जातिभेदे।

ताम्रकूट * न० ताम्रस्य ताम्रवर्णस्य कूटमिव। (तामाकु) इति ख्याते पदार्थे। "संविदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम्" इति तन्त्रम्

ताम्रचूड * पु० ताम्रा चूडा यस्य। कुक्कुटे।

ताम्रत्रपुज * न० ताम्रञ्च त्रपु च ताभ्यां जायते जन-ड। कांस्ये, तस्योभयधातुजन्यत्वात्।

ताम्रपट्ट * न० ताम्रमयं पट्टम्। (पाटी) ताम्रमये लेखनपत्रे।

ताम्रपत्र * पु० ताम्रवर्णं पत्रमस्य। जीवशाके। कर्म०। ताम्रमये लेखनपत्रे न०। [इति रघुः।

ताम्रपर्णी * स्त्री० नदीभेदे "ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः"

ताम्रपल्लव * पु० ताम्राणि पल्लवानि यस्य। अशोकवृक्षे।

ताम्रपाकिन् * पु० पच्यते पाकः फलपुष्पादि ताम्रः पाकः यस्यास्य इनि। गर्दभाण्डवृक्षे।

ताम्रपुष्प * पु० ताम्राणि रक्तानि पुष्पाण्यस्य। भूमिचम्पके।

ताम्रपुष्पिका * स्त्री० ताम्राणि पुष्पाण्यस्याः ङीप् सञ्ज्ञायां कन् ह्रस्वः। रक्तत्रिवृति (लाल तेओडि)। [काश्च।

ताम्रपुष्पी * स्त्री० ताम्राणि पुष्पाण्यस्याः ङीप्। जवायाम्, धात-

ताम्रफल * पु० ताम्रं फलमस्य। अङ्कोठवृक्षे। [की)।

ताम्रमूला * स्त्री० ताम्रं मूलमस्याः टाप्। दुरालभायाम् (श्याल-

ताम्रवल्ली * स्त्री० कर्म०। मञ्जिष्ठायाम्।

ताम्रवीज * पु० ताम्रं वीजं यस्य। कुलत्थे।

ताम्रवृक्ष * पु० कर्म०। रक्तचन्दनवृक्षे, कुलत्थे च।

ताम्रवृन्त * पु० ताम्रं वृन्तमस्य। कुलत्थे, स्त्रीत्वमपि टाप्।

ताम्रशिखिन् * पु० ताम्रवर्णा शिखास्त्यस्य इनि। कुक्कुटे।

ताम्रसार * पु० ताम्रवर्णं सारमस्य। रक्तचन्दनवृक्षे। कर्म०। तस्सारे न०। [च।

ताम्रसारिक * पु० ताम्रः सारोऽस्त्यस्य ठन्। रक्तखदिरे, रक्तचन्दने

ताम्रिक * पु० ताम्रघटनं शिल्पमस्य ताम्रस्यायं वा ठक्। कांस्य कारे (कामारि) जातिभेदे, ताम्रनिर्मिते कर्परित पदार्थे च।

ताय * पालने विस्तारे च भ्वादि० आत्म० सक० सेट्। तायते अतायि अतायिष्ट। णिच्। अततायत्-त।

तार * पु० तॄ-स्वार्थे णिच्-अच्, प्रेरणे णिच् करणादौ घञ् वा। वानरभेदे, शुद्धमुक्तायाम्, प्रणवे, देशोपप्लवे (स्त्री), तरणे, शिरो-घातध्वनौ च। नक्षत्रे, नेत्रमध्यस्थकनीनिकायाञ्च स्त्री० न०। रूप्ये न०। अत्युच्चनादे, अत्युच्चे, निर्मले च त्रि०। महाविद्या-भेदे, वालिपत्न्याम्, वृहस्पतिभार्यायाञ्च स्त्री०।

तारक * पु० तारयति तॄ-णिच्-ण्वुल्। नाविके, भेलके, दैत्यभेदे च। नक्षत्रे, नेत्रमध्यस्थकनीनिकायाम् स्त्री० टाप् क्षिपा- केशवन् तारका। तारकजेतरि त्रि० तत्र स्त्रियां तारिका।

तारकजित् * पु० तारकं जितवान् जि भूते क्विप्। कार्त्तिकेये। तारकारातिरप्यत्र।

तारकित * न० तारका जाता अस्य इतच्। नक्षत्रयुक्ते आकाशे।

तारण * पु० तारयत्यनेन ल्युट्। भेलके। इत०। वर्षमध्ये भवति सामान्यं तारणे सुरवन्दिते" इत्युक्ते वत्सरभेदे तारयितरि त्रि०।

तारतम्य * न० तरतमयोर्भावः ष्यञ्। न्यूनाधिक्ये। निर्हन नमितयोर्द्वयोस्तारतम्यविधिमुक्तचेतसाम्" इत्युद्भटः।

तारपुष्प * पु० तारं निर्मलं शुभ्रत्वात् पुष्पमस्य। कुन्दवृक्षे।

तारमाक्षिक * न० तारस्य रूपस्य माक्षिकम् उपधातुभेदः। तुल्ये उपधातुभेदे।

तारशुद्धिकर * न० तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् मलशुद्धिं करोति कृ+ठक्। सीसके, तत्सम्पर्काद्धि रजतस्य शुद्धिर्लोकसिद्धा।

तारापति * पु० इत०। शिवे, चन्द्रे, वृहस्पतौ, वालिवानरे, सु

तारापीड * पु० तारा पीडमिव यस्य। चन्द्रे, कादम्बरीकथायां नृपभेदे च। [कृ

ताराभ्र * पु० तारो निर्मलः जलशून्यः अभ्रः मेघ इव शुभ्रता

तारिणी * स्त्री० तारयति तॄ+णिच्-णिनि। शिवपत्न्यां द्वितीया महाविद्यायाम्, तारणकर्त्र्यां स्त्रियाञ्च।

तार्किक * त्रि० तर्कं वेत्त्यधीते वा ठक्। तर्कशास्त्राध्येतरि, त भिज्ञे च। तर्कशास्त्रञ्च गौतमकणादवृहस्पत्यादिप्रणीतशास्त्र

तार्क्ष * पु०। कश्यपमुनौ। [रथे, अश्वकर्णवृक्षे, स्वाङ्गे च

तार्क्ष्य * पु० तार्क्षस्यापत्यम् यञ्। गरुडे, अरुणे, सर्पे, अश्वे, सु

तार्त्तीयीक * त्रि० तृतीय-स्वार्थे ईकक्। तृतीये।

ताल * पु० तल-घञ्, णिच्-अच् वा। स्वनामख्याते वृक्षे, शिव ताभ्याम् अङ्गुष्ठमध्यमाभ्यां परिमिते दीर्घपरिमाणभेदे, क तले, करास्फोटे (ताल), कांस्यमयवाद्यभेदे (करताल), स सुरौ च। लिङ्गपत्रे न०। "तालो द्वादशभिर्जानुभ्रमणात् परि कीर्त्तितः" इत्युक्ते द्वादशधा हस्तेन जानुमण्डलपरिभ्रम पर्लक्षिते कालरूपे मानभेदे, गीतादौ द्विमात्रादिकालक्रिय मानं च।

तालक * न० तल-ण्वुल्। द्वारपिधानयन्त्रे, हरीताले, पादप्रा

तालध्वज * पु० तालाङ्कितो ध्वजो यस्य। वलभद्रे।

तालनवमी * स्त्री० भाद्रशुक्लनवम्याम्। तद्दिने देवेभ्यो विधाने तालदानं स्मृतौ विहितम्।

तालपत्र * न० तालस्य पत्रमिव। कर्णभूषणभेदे ताडङ्के।

तालपत्रिका * स्त्री० तालस्य पत्रमिव पत्रमस्याः ङीप् सञ्ज्ञायां कन् ह्रस्वः। तालमूलीवृक्षे।

तालपत्री * स्त्री० तालस्य पत्रमिव पत्रमस्याः। मूषिकपर्ण्याम्।

तालपर्ण * न० स्त्री० तालस्य पर्णमिव पर्णमस्य। मुरानामगन्धद्रव्ये। स्त्रीत्वे ङीप्। शतावर्यां स्त्री० ङीप्।

तालमूली * स्त्री० तालस्य मूलमिव मूलमस्याः। मुषल्याम्। स्वार्थे कन्। तालमूलिकाप्यत्र।

तालवृन्त * न० ताले करतले वृन्तं बन्धनमस्य, तालस्येव वृन्तमस्य वा। व्यजने (पाखा)। स्वार्थे कन्। अत्रार्थे।

तालाङ्क * पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य। बलदेवे।

तालिक * पु० तालेन करतलेन निर्वृत्तः ठक्। चपेटे (चापड़) (हाततालि)। ताली+स्वार्थे कन्। तालमूल्याम् स्त्री०।

ताली * स्त्री० तालेन तविर्यासेन निर्वृत्ता अण्। (ताडी) तालजातसुरायाम्। तल+अन्तात् अच् गौरा० ङीष्। (ताड़ियात्) वृक्षभेदे, तालमूल्याम्, (भूदपामला) वृक्षभेदे, आढक्याम् (अड़र), तालीशपत्राख्ये वृक्षे, तालकोद्घाटनयन्त्रे (काटि) कुञ्चिकायाञ्च।

तालीश * न० तालीव रोगान् श्यति शो-ड। स्वनामख्याते वृक्षे।

तालीशपत्र * न० तालीशं तालीवद् रोगनाशकं पत्रं यस्य। स्वनामख्याते वृक्षे, भूम्यामलक्याञ्च।

तालु * न० तरत्यनेन वर्णाः तॄ-ञुण् रस्य लः। जिह्वेन्द्रियाधिष्ठाने (तेलो) स्थानभेदे। स्वार्थे कन् तालुकमप्यत्र।

तालुजिह्व * पु० तालु एव जिह्वा यस्य। कुम्भीरे, तस्य जिह्वाशून्यत्वेऽपि तालुनैव रसास्वादात्।

तावत् * अव्य० तत्परिमाणमस्य नि०। साकल्ये, अवधौ, माने, अवधारणे, प्रशंसायां, पक्षान्तरे, वाक्यभूषणे, तदेत्यर्थे च। "भर्त्तापि तावत् क्रथकैशिकानाम्" इति रघुः। तत्परिमाणवति वि०। स्त्रियां ङीप् तावती। [अतंकिष्ट त।

तिक * गतौ भ्वादि० आत्म० सक० सेट्। तेकते अतेकिष्ट चिच्।

तिक * आस्कन्दे वधे च स्वा० पर० सक० सेट्। तिक्नोति अतेकीत्।

तिक्त * पु० तिज-क्त। वरुणद्रुमे, कुटजे, रसभेदे (तेत) च। तद्वति वि०। पर्पटौषधौ न०। कटुकायां, पाठायां, छिक्कण्याञ्च स्त्री० टाप्।

तिक्तक * पु० तिक्त+संज्ञायां कन्। भूनिम्बे, (चिराता) चिरतिक्ते कृष्णखदिरे, निम्बे, इङ्गुदीवृक्षे, तिक्तार्थे, पटोले च। कटुतुम्ब्यां स्त्री० टाप्। [याम्।

तिक्तगन्धिका * स्त्री० तिक्तो गन्धो लेशोऽपि यस्याः। वराहक्रान्ता-

तिक्तगुञ्जा * स्त्री० गुञ्जेव तिक्ता राजदन्ता। करञ्जे।

तिक्ततण्डुला * स्त्री० तिक्तस्तण्डुलोऽन्तःसारोऽस्य यस्याः। पिप्पल्याम्।

तिक्ततुम्बी * स्त्री० कर्म०। कटुतुम्ब्याम् (तितलाउ) [शृङ्ग्याञ्च।

तिक्तदुग्धा * स्त्री० तिक्तं दुग्धं निर्यासो यस्याः। क्षीरिण्याम्, अज-

तिक्तपत्र * पु० तिक्तं पत्रमस्य। (काकरोल) कर्कोटके।

तिक्तपर्वन् * स्त्री० तिक्तं पर्व ग्रन्थिर्यस्याः। हिलमोचिकायाम्, दूर्वायाम्।

तिक्तपुष्पा * स्त्री० तिक्तानि पुष्पाण्यस्याः। (आकनादी) पाठायाम्।

तिक्तफल * पु० तिक्तानि फलानि यस्य। कतकवृक्षे (निर्मल्य)।

तिक्तभद्रक * पु० भद्रं करोति णिच् ण्वुल् तिक्तोऽपि भद्रकः कर्म०। पटोले। [कायाम् (कटकी) स्वार्थे कन् अत्रार्थे।

तिक्तरोहिणी * स्त्री० तिक्ता सती रोहति रुह-णिनि कर्म०। कटु-

तिक्तवल्ली * स्त्री० कर्म०। मूर्वालतायाम्।

तिक्तबीजा * स्त्री० तिक्तानि बीजानि यस्याः। कटुतुम्ब्याम्।

तिक्तशाक * पु० तिक्तः शाकोऽस्य। वरुणद्रुमे, खदिरवृक्षे च।

तिक्तसार * पु० तिक्तः सारो निर्यासोऽस्य। खदिरे। [म्ब्याम्।

तिक्तिका * स्त्री० तिक्ता स्वार्थे कन् ह्रस्वे अत इत्त्वम्। कटुतु-

तिग * आस्कन्दे हिंसायाञ्च स्वादि० पर० सक० सेट्। तिग्नोति अतेगीत्।

तिग्म * न० तिज-मक् जस्य गः। तीक्ष्णे। तद्वति वि०।

तिग्मरश्मि * पु० तिग्मा रश्मयोऽस्य। सूर्ये। तिग्मांश्वादयोऽप्यत्र।

तिघ * घातने स्वादि० पर० सक० सेट्। तिघ्नोति अतेघीत्।

तिज * तीक्ष्णीकरणे, चुरा० उभ० सक० सेट्। तेजयति ते अतीतिजत् त।

तिज * क्षमायां स्वार्थे सन् निशाने न सन् भ्वादि० आत्म० सक० सेट्। तितिक्षते तेजते। अतितिक्षिष्ट अतेजिष्ट। [न्याम्।

तितउ * पु० तन-डउ सन्वच्च डउ इति निर्देशात् न सन्धिः। चाल-

तितिक्षा * स्त्री० तिज-आत्मो स्वार्थे सन्-अ-टाप्। क्षमायां, पराऽपमानादिसहने, शीतोष्णादिद्वन्द्वसहने च। [नग्रोधे।

तितिक्षु * वि० तिज-सन्-उ। प्राणवियोगफलकभिन्नशीतादिसह-

तित्ति(रि)रि * पु० तित्ति इत्यव्यक्तशब्दं राति रा-क, ड वा। (तितिर) पक्षिभेदे।

तिथि(थी) * पु० स्त्री० अत-इथिन् पृ० वा ङीप्। पञ्चदशसु चन्द्रकलाक्रियारूपासु प्रतिपदादिषु, पञ्चदशसंख्यायाञ्च।

तिथिक्षय * पु० तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयः अपचयो यस्मिन्। दर्शे अमावास्यायाम्। ६त०। तिथीनां नाशे।

तिथिप्रणी * पु० तिथीन् प्रणयति सम्यक् निष्पादयति प्र+नी-क्विप्। चन्द्रे "मायन्तनौ तिथिप्रण्यः" इति भाष्यः।

तिन्तिडीक * न० तिम आर्द्रीभावे अलीकादयश्च ति नि०। चुक्रे। (तेतुल) वृक्षभेदे पु०। अ-लोपे। तिन्तिडयप्यत्रार्थे स्त्री०। ङस्य वा लत्वे तिन्तिलीकादयोऽप्यत्र।

तिन्दु * पु० तिज-कु-मृगय्वादि० नि०। (तेंदु) इति ख्याते वृक्षे। स्वार्थे कन्। (गाब) इति ख्याते वृक्षे पु० स्त्री० स्त्रीत्वे ङीप्।

तिप * क्षरणे भ्वादि० आत्म० सक० सेट्। तेपते अतेपिष्ट अतिप्त।

तिम * आर्द्रीभावे भ्वादि० पर० सक० सेट्। तेमति अतेमीत्।

तिम * आर्द्रीकरणे दिवा० पर० सक० सेट्। तिम्यति अतेमीत्।

तिमि * पु० तिम-इन्। मत्स्ये, समुद्रे, नक्रे महाकाये मत्स्यभेदे च "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव" इति रामायणम्।

तिमिङ्गिल * पु० तिमिं मत्स्यं गिरति गॄ-निगरणे अच् मुम् च। मत्स्यभेदे, तं गिरति तिमिङ्गिलगिलः। मत्स्यभेदे।

तिमित * वि० तिम-कर्त्तरि क्त। निश्चले, क्लिन्ने च (भिजे)।

तिमिर * न० तिम किरच्। अन्धकारे, नेत्ररोगभेदे च।

तिलित्थ • पु॰ तिल-इत्यच्। शब्दकर्षभेदान्, नाटाख्ये च।
...हरण * न० दारो छिद्यतेऽनेन ल्युट् , चिच् कर्म्मणि ल्यु वा । ...वीरणमूले (वेनार मूल) । दारकारके त्रि० ।

...कर पु० दिवु कौर्य्यतेऽभो कृ-अप् । तक्षणे । युवत्यां स्त्री० ।

...क्पति * पु० ६त० । दिशामधीश्वरेषु, "इन्द्रो वह्निः पितृपति-र्नैर्ऋतो वरुणो मरुत् । कुवेर ईशः पतयः पूर्व्वादीनामधीश्वराः" इत्युक्तेषु इन्द्रादिषु, "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी । सौम्यस्त्रिदशमन्त्री च पूर्व्वादीनामधीश्वराः" इत्युक्तेषु सूर्य्यादिषु च । "पञ्चमो दिक्पतिर्भूमिः" इति मन्वः । एवं दिक्पालादयोऽपि इन्द्रादिष्वेव ।

...म्बर * पु० दिक् शून्यमेवाम्बरं यस्य । शिवे, क्षपणकभेदे, "...दिगम्बरा मध्यमलमाङ्गुराणादमस्तकम् । चैतन्यव्याप्तिसंदृष्टे-र्नखाद्यङ्गैरपि" इत्युक्ते जीवस्य देहपरिमाणाङ्गीकारके, ...भेदे च । नग्ने त्रि० । कालिकायां स्त्री० ङीप् । दिगामग्न-...मिवावरकत्वात् । तमसि न० ।

...ज * पु० ६त० । "ऐरावतः पुण्डरीकः वामनः कुमुदोऽञ्जनः । ...दन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः" इत्युक्तेषु पूर्व्वादि-...षु भूमिधारणाय स्थितेषु ऐरावतादिषु गजेषु ।

...पु० दिह क्त । विपाक्तवाणे, वन्नो च । भावे क्त । लेपे, ...ने च न० । कर्म्मणि क्त । लिप्ते त्रि० ।

... * न० दिशो दीर्घांशो वंशः । एकदेशे । ६त० । पञ्च-... त्रि० ।

... * स्त्री० दो-खण्डने क्तिच् वा ङीप् । दैत्यमातरि ...पत्न्याम् । भावे क्तिन् न ङीप् । खण्डने ।

...पु० दितेर्जायते जन-ड । असुरे । दितिसुतादयोऽप्यत्र ।

... * पु० दिधिषूमात्मन इच्छति क्यच् क्विप् पु० वा ह्रस्वः । ...याः स्त्रियाः स्वामिनि ।

...स्त्री० दधाति पापं धिष्यते वा धा-धिष-वा उ नि०, ...र्य्ये स्यति सो-क्त वा पत्नम् । द्विरूढायां स्त्रियां, पुनर्भू-... "ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा । सा ...दिधिषुर्ज्ञेया पूर्व्वा तु दिधिषूः" स्मृता" इत्युक्तायां ज्येष्ठा-...यां सत्याम् ऊढायां कनिष्ठभगिन्याश्च ।

... * पु० ६त० । "भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत ...धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः" इत्युक्ते ..., ज्येष्ठाविवाहाभावे ऊढायाः कनिष्ठाया भगिन्याः

...ति समः । सूर्य्यकिरणोपलक्षिते षष्टिदण्डात्मके तद्दि-...चतुर्य्यामात्मके काले । तत्र मनुष्याणां षष्टिदण्डात्म-...ं सौरचान्द्रमासात्मकं तेषां हि चन्द्रलोकोपरि-...ाद्दृष्टमेव एव सूर्य्यस्य तल्लोके किरणस्पर्शसम्भवः ...पुनर्भूर्ह्रस्तेनाच्छादनाच्च न तत्सम्पर्कः । देवानाम-

न—५०

सुराणाञ्च सौरवर्षात्मकमहस्तद्विस्तरस्तु वाचस्पत्ये । ब्रह्मणो दिव्यमानेन युगसहस्रचतुष्कात्मकमिति विवेकः ।

दिनकर * पु० दिनं करोति स्वोदयेन कृ-ट, दिने करः किरणो यस्य वा । सूर्य्ये ।

दिनक्षय * पु० "एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तः" इत्युक्ते एकसावनदिनवृत्तितिथित्रयरूपे काले ।

दिनपति * पु० ६त० । सूर्य्ये, अर्कवृक्षे च । दिनेशादयोऽप्यत्र ।

दिनमणि * पु० दिने मणिरिव प्रकाशकत्वात् । सूर्य्ये, अर्कवृक्षे च ।

दिनृभ * सङ्घाते चु० आत्म० अक० सेट् । दिम्भयते अदिदिम्भत ।

दिनादि ० पु० ६त० । प्रातःकाले ।

दिनान्त * पु० ६त० । दिनावसाने, सायंकाले च । [दिम्भत् त ।

दिभ * प्रेरणे चुरा० उभ० सक० सेट् इदित् । दिम्भयति-ते अदि-

दिम्प * सङ्घाते चुरा० उभ० सक० सेट् । दिम्पयति ते अदिदिम्पत्-त ।

दिलीप * पु० सूर्य्यवंश्ये नृपभेदे रघोः पितरि ।

दिव * प्रीतौ स्वादि० पर० सक० सेट् इदित् । दिन्वति अदिन्वीत् ।

दिव ● जिगीषायां पणे व्यवहारे इच्छायां चाप्रायाश्च दिवा० पर० अक० सक० च सेट् । दीव्यति अदेवीत् । देवित्वा द्यूत्वा ।

दिव * कूजने चु० आत्म० सक० सेट् । देवयते अदिदेवत ।

दिव * अर्द्दे चु० उभ० सक० सेट् । देवयति ते अदीदिवत् त ।

दिव् * स्त्री० दिव-डिवि । स्वर्गे, आकाशे च । [दिवसे, वने च ।

दिव * न० दिव-क । स्वर्गे, "दिवौकसः" इत्यवादन्तता । आकाशे,

दिवस * पु० दीव्यन्त्यत्र दिव-असच् किच्च । "नाडीषष्टितमस्तत्र सावनो दिवसः स्मृतः । त्रिंशभागोऽर्कराशेस्तु दिवसः सौर उच्यते । चान्द्रस्तु तिथ्यवच्छिन्नो भौमो भूपरिधेर्मतः" इत्युक्तेषु सावनादिषु दिनेषु ।

दिवसमुख * न० ६त० । प्रभाते ।

दिवस्पति ● पु० ६त० अलुक् स० सत्वञ्च । इन्द्रे ।

दिवस्पृथिवी * स्त्री० द्वि० व० । दिवश्च पृथिवी च नि० सुट् । मिलितयोः भूमिस्वर्गयोः रोदस्योः ।

दिवा * अव्य० दिव-का । दिवसे ।

दिवाकीर्त्ति ● पु० दिवैव कीर्त्तिः तत्यं यस्य रात्रौ क्षुरकर्म्मनिषे-धात् । नापिते । ["पङ्कजानां दिवातनीम्" इति भट्टिः ।

दिवातन ● त्रि० दिवा भवः ट्यु तुट् च । दिवाभवे । स्त्रियां ङीप् ।

दिवान्ध ● पु० दिवा दिने अन्धः दर्शनाभावात् । पेचकादौ "दिवान्धाः प्राणिनः केचित्" इति चण्डी ।

दिवाभीत * पु० दिवा दिवसे भीतः । चौरे, चन्द्रे, पेचके च । "दिवाभीतमिवान्धकारम्" इति कुमारः ।

दिवि ● पु० दिव+कि । चाषपक्षिणि । [दिविभवादयोऽप्यत्र ।

दिविज ● पु० दिवि जायते जन-ड ह्रस्व० अलुक् स० । स्वर्गीये ।

नायकताकूपहीनं दिनं प्रा०। मेघाच्छन्ने दिवसे। दुष्टं सरूप-हीनं दिनं यस्मात् ५ब०। मेघान्धकारे, वर्षणे च।

दुर्द्धर * पु० दुर्+धृ-खल्। नरकभेदे, ऋषभौषधौ, भल्लातके, दैत्यभेदे च "दुर्द्धरं दुर्मुखश्चैव" इति चण्डी। दुःखेन मुमुक्षुभिर्द्धर्य्यते धार्य्यते, केनापि न धार्य्यते वा खल्। विष्णौ। दुःखधार्य्ये दुर्वर्षे च पदार्थे त्रि०। [कन्यारोहण्ये च स्त्री०।

दुर्द्धर्ष * त्रि० दुःखेन धृष्यते। प्रधोभ्ये, अप्रधृष्ये च। नागदमन्यां,

दुर्बल * त्रि० दुष्टं बलं यस्य। बलशून्ये, कृशे, अल्पमांसे च।

दुर्भग * त्रि० दुष्टं भगं भाग्यं यस्य। अल्पभाग्ये। पतिद्वेष्यायां स्त्रियां स्त्री०। [त्रि०।

दुर्भाग्य * न० दुष्टं भाग्यं प्रा०। दुरदृष्टे, पापे च। ६ब०। तद्वति

दुर्भिक्ष * अव्य० भिक्षाया अभावः अर्थाभावेऽव्ययीभावः अदन्तत्वादम् वतीयासप्तम्योर्वा तेन "दुर्भिक्षे राष्ट्रविप्लवे" इति "दुर्भिक्षमस्त्यम्" इत्यादि च सिद्धम्। भिक्षाया अभावे, तदुपलक्षिते काले, अल्पान्नकाले च।

दुर्मति * त्रि० दुष्टा मतिर्यस्य। विवेकप्रतिबन्धकपापेन कलुषितबुद्धौ जने। ६० वर्षमध्ये "भवेद्दे मध्यमा दृष्टिर्दुर्मतौ समुपस्थिते" इत्युक्तवर्षे वर्षभेदे पु०। प्रा० स०। दुष्टायां बुद्धौ।

दुर्मनस् * त्रि० दुष्टं चिन्तादिना व्याकुलं मनोऽस्य। विमनस्के। प्रतावर्यां स्त्री०।

दुर्मरा * स्त्री० दुःखेन म्रियते मृ-खच्। दूर्वायाम्।

दुर्मुख * पु० दुष्टं मुखमस्य। अश्वे, वानरे, नागभेदे, दैत्यभेदे च। अप्रियवादिनि त्रि०। [ममर्थवित्ते च।

दुर्मेधस् * त्रि० दुष्टा मेधाऽस्य असिच् समा०। मन्दबुद्धौ, विवेका-

दुर्योधन * पु० दुःखेन युध्यतेऽसौ युध-खनर्थे युच्। धृतराष्ट्रनृपतेर्ज्येष्ठपुत्रे नृपभेदे। दुःखेन योध्ये त्रि०।

दुर्लभ * पु० दुर् लभ-खल्। कर्पूरे। दुष्प्रापे त्रि० "मानुष्यं दुर्लभं लोके विद्या तत्र सुदुर्लभा" इति पुराणम्। दुरालभायां, श्वेतकण्टकार्य्यां च स्त्री०।

दुर्ललित * न० दुष्टं ललितम् इष्टम् लल-ईप्से क्त। अन्यायार्थनादिरूपे अलभ्यविषये आग्रहे (आब्दार), दुश्चेष्टिते च। दुष्टं ललितं यस्य। तादृशाग्रहवति (आवदेरे), दुश्चेष्टे च त्रि०।

दुर्व * वधे भ्वादि० पर० सक० सेट्। दूर्वति अदूर्वीत्। दूर्णः।

दुर्वर्ण * न० दुष्टोऽपि वर्णं रजतेऽनेन दुष्टं मलिनं वा वर्णयति युक्तमाणादनेन वर्णान्तरं करोति। रजते, एलवालुके च। दुष्टवर्णवति, मलिने च त्रि०।

दुर्वासस् * त्रि० दुष्टं वासोऽस्य। मलिनवस्त्रे। अत्रिपुत्रे महरोषशालिनि मुनिभेदे पु०। [इति मेदिनी, षण्डे, मूर्खे च।

दुर्विध * त्रि० दुष्टा विधा यस्य। दरिद्रे "विदधाते दरिद्रदुर्विधम"

दुर्हृद् * त्रि० दुष्टं हृदयं यस्य समासान्ते निपा० इत्यादेशः। शत्रौ। दुष्टचित्ते त्रि०। अत्र दुर्हृदयोऽपि।

दुल * उत्क्षेपे चुरा० उभ० सक० सेट्। दोलयति-ते अदूदुलत् त।

दुलि(ली) * स्त्री० दुल-इन् नि० विलुक् वा ङीप्। कमठ्याम्। मुनिभेदे पु०। [स्यात्" इति स्मृत्युक्ते महापातकजचिह्नवति।

दुश्चर्मन् * पु० दुष्टं चर्म यस्य। अनावृतमेढ्रे "दुश्चर्मा गुरुतल्पी

दुश्च्यवन * पु० दुःखेन च्यवनं पतनं यस्य, दुष्टः कुत्सितश्च्यवनो मुनिरस्य वा। इन्द्रे, स हि च्यवनेन कदाचित् कोपात् स्वपदात् पातितः।

दुष * वैकृते दिवा० पर० अक० अनिट्। दुष्यति अदुषत् अदुषत्।

दुष्कर * न० दुःखेन कीर्य्यते कॄ-खल्। आकाशे। कृ-खल्। दुःखेन कार्य्ये त्रि०।

दुष्कर्मन् * न० दुष्टं कर्म प्रा० स०। पापे। ६ब०। तद्वति त्रि०।

दुष्कृत * न० दुष्टं कृतं कृतिः। पापे। "सुकृतं दुष्कृतं लोके गच्छन्तमनुगच्छति" इति। क्तिन् दुष्कृतिरप्यत्र। ६ब०। तद्वति त्रि०।

दुष्ट * त्रि० दुष क्त। दुर्वृत्ते, अधमे, दुर्जने, दोषयुक्ते च। (कुड) कुष्ठे पु०। पुंश्चल्याम् स्त्री०। [च।

दुष्ठु * अव्य० दुर्+स्था-कु षत्वम्। निन्दायां, निकृष्टतायां, दुःस्थाने

दुष्पत्र * पु० दुष्टानि पत्राण्यस्य। चोरनामगन्धद्रव्ये।

दुष्प्रधर्षणी * स्त्री० दुःखेन प्रधृष्यते कर्मणि ल्युट्। वार्त्ताक्याम्।

दुष्प्रवेशा * स्त्री० दुःखेन प्रवेशो यत्र। कन्थारीवृक्षे। [पत्नी।

दु(ष्य)ष्मन्त * पु० चन्द्रवंश्ये राजभेदे भरतराजपितरि शकुन्तला-

दुह * दोहे अदा० उभ० द्विक० अनिट्। दोग्धि दुग्धे। अधुक्षत् अधुक्षत अदुग्ध।

दुह * वधे भ्वादि० पर० सक० सेट्। दोहति अदुहत्-अदोहीत्।

दुहितृपति * पु० ६त० अलुक् स०। जामातरि।

दुहितृ * स्त्री० दुह+तृच् गुणाभाव इट् च नि०। कन्यायाम्।

दू * खेदे दिवा० आत्म० अक० सेट्। दूयते अदविष्ट। दूनः।

दूत * पु० दु क्त दीर्घश्च। सन्देशहरे, वार्त्ताहरे च।

दूति(ती) * स्त्री० दु+ति वा ङीप्। कौटुम्बिकोः सन्देशहारिकायां स्त्रियाम्। "रतिर्दूतिपदे नियोजिता" इति कुमारः। [भार्ये च।

दूत्य * न० दूतस्य दूत्या वा भावः कर्म वा यत्। दूतकर्मणि, दूतका-

दून * त्रि० दू-क्त। आधकष्टादिना तापिते, कम्पिते च "दिवापि न दूने रचनै सितापि" इति नैषधम्। [कष्टे, पश्चात्ते च।

दूर * त्रि० दुःखेनेयते प्राप्यते दुर्+इण रक् इणो लोपश्च। [illegible]

दूरदर्शन * पु० दूरात् दर्शनं दृश+ल्युट्। गृध्रे।

दूरदर्शिन् * पु० दूरात् कार्यान्तरं दर्शनं यस्य शीलम्। पण्डिते। दूरात् दर्शके त्रि०।

दूरमूल * पु० दूरगतं मूलमस्य। मुञ्जतृणे।

दूर्वा * स्त्री० दूर्व हिंसायां च। स्वनामख्याते तृणभेदे।

दूर्वाकाण्ड * न० दूर्वायाः काण्डम्। दूर्वासमूहे।

दूर्वाष्टमी * स्त्री० भाद्रशुक्लाष्टम्यां, तस्यां हि दूर्वया देवपूजनं [illegible]

[illegible]। दूर्वाम्बत "मागधो दौर्वेनयमो दूर्वां चैव [illegible]" इति स्मृतौ तत्रार्थे दूर्वाशब्दप्रयोगात्।

दूत्य • पु० [illegible] मात्ववर्णे रागभेदे। दूत-[illegible]।
[illegible] [निखे (त्रिपुटि)।

दूतिका • स्त्री० [illegible] करोति दूत-[illegible]।

दूषित • त्रि० दूष-णिच्-क्त। [illegible], निन्दिते, दत्तदोषे च।

दूष्य • न० दूष-णिच्-यत्। [illegible] दूषणीये त्रि०। "दूष्यं [illegible]" इति [illegible]। [illegible],
[illegible]।

दृ • [illegible] अनिट्। [illegible]।

दृ • [illegible] अनिट् [illegible]। [illegible]।

दृक्[illegible] • स्त्री० [illegible]। [illegible]
[illegible]।

[illegible]

दृढसन्धि • त्रि० दृढः सन्धिः सन्धानं यस्य।

दृढधनिका • स्त्री० दृढं धनं यस्याः स्वार्थे [illegible]
मूर्वालताथाम्।

दृढस्कन्ध • पु० दृढः स्कन्धोऽस्य। क्षीरिकावृक्षे।

दृता • स्त्री० द्रियते दृ-क्त। आदृते।

दृति • स्त्री० दृ-क्तिन्। चर्मनिर्मितोदकपात्रे, [illegible]
(भिस्ति), मत्स्यभेदे च।

दृतिहर • पु० दृतिः चर्मपात्रं हरति हृ-अच्। कुक्कुरे।

दृन्फ • वधे तु० पर० सक० सेट्। दृफति दृम्फति [illegible]

दृन्भू • पु० दृभ-क्ल नि०। सूर्ये, वज्रे, सूर्ये, सर्पे, [illegible]

दृप • बाधने तु० पर० सक० सेट्। दृपति अदर्पीत् [illegible]

दृप • सन्दीपने वा चुरा० उभ० पक्षे भ्वादि० पर० [illegible]
दर्पयति ते दर्पति। अदीदृपत्-त अदर्पीत् त [illegible]

दृप • हर्षे गर्वे च दिवा० पर० सक० सेट। दृप्यति [illegible]
दर्पित्वा दृप्ता। दृप्तः। [धरात्" इति

दृप्त • त्रि० दृप क्त। गर्विते "[illegible]

दृफ • क्लेशे तु० सु० पर० सक० सेट्। दृफति अदर्फीत्

दृब्ध • त्रि० दृभ-क्त। ग्रथिते, भीते च।

दृभ • ग्रथने वा चुरा० उभ० पक्षे तु० पर० सक० सेट्
ते दर्भति। अदीदृभत् त अददर्भत् त अदर्भीत्।

दृभ • भये वा चुरा० उभ० पक्षे भ्वादि० पर० [illegible]
यति ते दर्भति। अदीदृभत् अददर्भत् त। अदर्भीत्

दृम्भ • [illegible] चुरा० उभ० सक० सेट्। दृम्भयति [illegible]

[illegible]

िव * पु· हरौ शिवं यस्य। सर्पभेदे। [मत्र देवति पर्यदेवीत्।
* रुतौ भ्वादि॰ पर॰ सक॰ सेट्।देवति पदेवीत्। अयमिदित्
भये भ्वादि॰ पर॰ सक॰ सेट्। देवति पदावीत् णिच् देवयति।
विजारे दिवा॰ क्रा॰ च भ्वादि॰ पर॰ सक॰ सेट्। दीव्यति
हणाति पदावीत्।
। भये क्रयादि॰ भ्वादि॰ पर॰ सक॰ सेट्। हणाति पदावीत्।
) पालने भ्वादि॰ पात्म॰ सक॰ पनिट्। दयते पदास्त।
* क्रीडने भ्वादि॰ पात्म॰ पक॰ सेट्। देवते पदेविष्ट।
* पु॰ दिव-पचाद्यच्। पमरे। द्योतनात्मके पात्मनि, "दीव्यति
क्रीडते यस्मादीप्यते द्योतते दिवि। तस्मादेव इति प्रोक्तः
स्तूयते सर्वदेवतैः" इत्युक्ते परमेश्वरे, ब्राह्मणस्योपाधौ च।
इन्द्रिये न॰। पूज्ये त्रि॰। नाट्योक्तौ राजनि पु॰।
क * पु॰ श्रीकृष्णस्य मातामहे देवक्याः पितरि नृपभेदे।
(दे)वकी * स्त्री॰ देवकस्य नृपतेः पात्मजा पुंयोगे केकयीतिवत्
ङीप्। श्रीकृष्णस्य मातरि वसुदेवस्य भार्य्यायाम्। पपत्यार्थेऽण्
देवकीति तत्रैव। [ताडयोऽप्यत्र।
देवकीनन्दन * पु॰ ६त॰। श्रीकृष्णे वसुदेवात्मजे। दे(दे)वकीसु-
कुसुम * न॰ देवानां प्रियं योग्यं वा कुसुमम् शाक॰। लवङ्गे।
खात * न॰ देवेन खातं खन-क्त। पकृत्रिमे जलाशये। ७त॰।
देवमन्दिरस्य खाते च।
खातबिल * पु॰ देवेन खातं विदारितं बिलम्। गुहायाम्।
गायन * पु॰ ६त॰। गन्धर्वे।
गिरि * पु॰ देवानां प्रियः गिरिः। पर्वतभेदे।
गुरु * पु॰ ६त॰। बृहस्पतौ। [श्चिके भारे।
च्छन्द * पु॰ देवैश्छन्द्यते प्रार्थ्यते छन्द+कर्मणि घञ्। मतय-
तद्भक्षक * न॰ देवैरद्यते भक्ष पद-क्त पन्धादेयः स्वार्थे कन्। कस्तूर्यां,
गन्धद्रव्ये च। [पञ्चसु वृक्षेषु।
तरु * पु॰ ६त॰। मन्दारपारिजातसन्तानकल्पवृक्षहरिचन्दनेषु
ता * स्त्री॰ देव+स्वार्थे तल् "क्वचित् स्वार्थिका पपि प्रत्ययाः
प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति भाष्योक्तेः स्त्रीत्वम्।
इन्द्रादौ सुरे।
ताड * पु॰ देवमिन्द्रियं ताडयति ताड-पण्। वृक्षभेदे, पग्नौ,
राहौ, मेघे च।
दण्डा * स्त्री॰ देवमिन्द्रियं दण्डयति दण्ड-पच्। नागबलायाम्।
दत्त * पु॰ देवा एनं देयासुः पाशिषि क्त। देवार्पिते तन्नामके
शङ्खे, पर्जुनशङ्खे "देवदत्तं धनञ्जय." इति गीता, शरीरस्थे
वायौ च। देवाय दत्तः। देवोद्देशेन त्यक्ते त्रि॰।
दारु * न॰ देवानां प्रियं दारु यस्य तत्काष्ठचन्दनस्य देवप्रिय-
त्वात्। स्वनामख्याते वृक्षे। पयं पुमानप्यत्र "पमुं पुरः पश्यसि
देवदारुम्" इति रघु। [पूरके, वेश्यायाञ्च।
दाली * स्त्री॰ देवमिन्द्रियं दालयति दाल-पण्। वनजम्बीर-

देवदीप * पु॰ देवेषु इन्द्रियेषु दीप इव रूपप्रकाशकत्वात्। लोचने।
देवदुन्दुभि * पु॰ देवानां दुन्दुभिरिव हर्षप्रदत्वात्। रक्ततुलस्याम्।
६त॰। देवढक्कायाम्। [त्रि ङीप्। वनबीजपूरके।
देवदूती * स्त्री॰ देवानि इन्द्रियाणि दूयन्ते पीड्यन्तेऽनया दु+
देवदेव * पु॰ देवेषु मध्ये दीव्यति दिव+पच्। महादेवे।
देवधान्य * न॰ देवानां योग्यं धान्यम्। (देधान) धान्यभेदे।
देवन * पु॰ दीव्यत्यनेन दिव-करणे ल्युट्। पाशके। भावे ल्युट्।
क्रीडायां, दीप्तौ, व्यवहारे, जिगीषायां, स्तुतौ च न॰। दीव्य-
त्यत्राधारे ल्युट्। लीलोद्याने, पद्मे च। [महाभारतम्।
देवनदी * स्त्री॰ ६त॰। गङ्गायाम्, "पसम्बाधा देवनदी" इति
देवनिर्मिता * स्त्री॰ देवैः निर्मिता। गुडूच्याम्।
देवपथ * पु॰ देवैरर्च्चिरादिभिरातिवाहिकैरुपलक्षितः पन्थाः पच्
समा॰। उत्तरमार्गे। देवानां पन्थाः। छायापथे (यमनाला)।
देवपुरोधस् पु॰ ६त॰। बृहस्पतौ।
देवप्रिय * पु॰ ६त॰। पीतभृङ्गराजे। बकपुष्पे न॰।
देवबला * स्त्री॰ देवानामिन्द्रियाणां बलं यस्याः ६ब॰। सहदेवी-
लतायाम्।
देववल्लभ * पु॰ ६त॰। पुन्नागवृक्षे।
देवभवन * न॰ देवानां भवनमिव। पश्वत्थवृक्षे। ६त॰। स्वर्गे।
देवभूय * न॰ देवस्य भावः भू-क्यप्। देवत्वे, देवसायुज्ये च।
देवमणि * पु॰ देवेषु मणिरिव प्रकाशकत्वात्। शिवे, पश्वस्य
कण्ठस्थे रोमावर्त्ते, कौस्तुभमणौ, महाश्वेतायाञ्च।
देवमातृक * त्रि॰ देवः पर्जन्यरूपीन्द्रः मातेव पालकोऽस्य। वृष्टि-
जलसम्पन्नव्रीहिपालिते देशे।
देवयान * न॰ ६त॰। देवरथे। देवैरुपलक्षितं यानं मार्गः। पर्चि-
रादिमार्गे। शुक्राचार्य्यकन्यायां स्त्री॰ ङीप्। [भूते।
देवयोनि * पु॰ देवा एव योनिः कारणमस्य। विद्याधरादौ देवांश-
देवर * पु॰ देव पर। पत्युः कनिष्ठभ्रातरि।
देवरथ * पु॰ ६त॰। देवानां नभोगमनसाधने विमानादौ याने।
देवराज * पु॰ देवानां राजा टच् समा॰। इन्द्रे। देवाधिपादयो-
ऽप्यत्र।
देवरात * पु॰ देवा एनं रायासुः क्त। पभिमन्युसुते परीक्षिन्नृपे।
देवर्षि * पु॰ वेदद्रष्टा ऋषिः देव एव सन् ऋषिः। नारदादिमुनौ।
देवल * पु॰ मुनिभेदे व्यासशिष्ये धौम्यस्य ज्येष्ठभ्रातरि। देवान्
प्रतिमार्थे लाति ला-क। देवोपजीविनि। स्वार्थे कन् पत्रैवार्थे
"देवकोपोपजीवी च नाम्ना देवलको भवेत्" इत्युक्ते विप्रे।
देवलता * स्त्री॰ दीव्यति प्रकाशते देवः कर्म॰। नवमल्लिकायाम्।
देवलोक * पु॰ ६त॰। स्वर्गे। देवस्य ईश्वरस्य सम्यग्दृश्यो लोकः।
"भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः। तपः सत्यञ्च
सप्तैते देवलोकाः प्रकीर्त्तिताः" इत्युक्तेषु भूरादिषु सप्तसु लोकेषु।
देववर्त्म * पु॰ ६त॰। वियद्धर्मणि।

देवद्रुम • पु० दीव्यति देवः कर्म० । सप्तपर्णवृक्षे । ६त० । मन्दारादि-
वृक्षेषु, गुग्गुलौ च ।

देवव्रत • पु० देवम् इन्द्रियसंयमनं व्रतमस्य । भीष्मे । [धीने च ।

देवसात् • अव्य० देवेभ्यो देयं तदधीनं साति वा । देवेभ्यो देये, तद-

देवसायुज्य • न० युनक्ति युज-क्विप् सह युजेन सयुजः तस्य भावः
सायुज्यं देवेन सायुज्यमेकासनयोगिता । देवसहयोगे ।

देवसेना • स्त्री० इन्द्रस्य सुतायां षष्ठीनाम्न्यां कार्त्तिकेयपत्न्याम्,
मातृकाभेदे च । ६त० । देवानां सेनायाञ्च । [च ।

देवसेनापति • पु० ६त० । कार्त्तिकेये । इन्द्रसुते, देवसेनानामीशे

देवस्व • न० "यद्धनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः" इत्युक्ते धने ।

देवहूति • स्त्री० स्वायम्भुवमनोः कन्यायाम् ।

देया • स्त्री० दिव-घञ् । पद्मचारिण्यां लतायाम्, पद्मनपत्याञ्च ।

देवागारिक • त्रि० देवागारे नियुक्तः ठन् । देवागारे नियुक्ते ।

देवाजीव • त्रि० देवं देवप्रतिमादिद्रव्यमाजीवति आ+जीव+अच् । (पूजारी)
देवले । त्रिनि देवाजीविन्यप्यत्र ।

देवात्मन् • पु० देवो विष्णुरात्मा यस्य । अश्वत्थे, तस्य विष्णुरूपत्वम्
"अश्वत्थरूपी भगवान्" इति स्मृतात् सिद्धम् ।

देवानांप्रिय • पु० अलुक् समासः । छागे । मूर्खे त्रि० ।

देवारि • असुरवर्गे शूपर्णेदे ।

देवार्ह • न० देवानर्हति अच् । सुरपर्णे । मधुरीलताया स्त्री० ।
[illegible] त्रि० । [देवयतनमप्यत्र ।

देवालय • पु० देवानामालयः । स्वर्गे, देवप्रतिमादीनां गृहे च ।

देवावास • पु० ६त० । अश्वत्थवृक्षे ।

देविका • स्त्री० दिव-ण्वुल् । [illegible]

देवी • स्त्री० [illegible] दुर्गायाम्, मूर्वायाम्, [illegible]

[illegible]

देशे, तदवधिके अन्तरयोजनादौ च । [साधुः ठन् । गुरौ ।

देशिक • पु० देशेषु प्रसितः ठन् । पथिके । देशो देशनोपदेशस्तत्र

देशिनी • स्त्री० दिशति दिश-करणस्य कर्त्तृत्वविवक्षायां णिनि ।
तर्जन्याम् ।

देश्य • दिश-ल्यत् । पूर्वपक्षे । देशमर्हति यत् । देशयोग्ये त्रि० ।

देह • पु० न० दिह-घञ् । स्थूलसूक्ष्मकार्य्यकारणरूपे शरीरे, ज्योति-
षोक्ते लग्ने च । भावे घञ् । लेपने पु० ।

देहधारक • पु० न० देहं धारयति धृ णिच्-ण्वुल् । अस्थि ।

देहभृत् • पु० देहं बिभर्त्ति भृ-क्विप् । जीवे ।

देहयात्रा • स्त्री० देहो याति गच्छत्यनेन या-करणे ष्ट्रन् न ङीप् ।
शरीररक्षासाधने भोजने । ६त० । मरणे, तदुपलक्षिते यमपुरी-
गमने च ।

देहली(लि) • स्त्री० देहं लेपनं लाति गृह्णाति ला-क-गौरा० ङीप् ङ-
वा ह्रस्वः । लेपनयोग्यायां द्वारपिण्डिकायां (देयाल), कपाटस्याऽ-
ध:काष्ठखण्डे च ।

देहसार • पु० ६त० । मज्जनि ।

देहात्मवादिन् • पु० देहमेव आत्मतया वदति वद-णिनि । चार्वाके ।

देहिन् • त्रि० देह+अस्त्यर्थे इनि । प्राणिनि, देहाभिमानिनि
जीवे च । [दायात् ।

दैप • शोधने भ्वादि० पर० सक० सेट् पित् । दायति अदासीत्

दैतेय • पु० दितेरपत्यम् दिति+ढक् । असुरे । स्त्र । दैतेयोऽप्यत्र ।

दैत्यगुरु • पु० ६त० । शुक्राचार्य्ये । दैत्याचार्य्यादयोऽप्यत्र । [विष्णौ ।

दैत्यनिषूदन • पु० दैत्यान् निषूदयति विनाशयति सूद-णिच्-ल्यु ।

दैत्यमेदज • पु० दैत्यानां मेदाज्जायते जन+ड । गुग्गुलौ । पृथिव्यां
स्त्री० मधुकैटभमेदजातत्वात् तस्यास्तथात्वम् ।

दैत्या • स्त्री० दैत्यस्य प्रिया यत् । दैत्यमात्र्यायाम्, सुरायां, मुरानाम-
गन्धद्रव्ये, चर्मकषायां च ।

दैत्यारि • पु० ६त० । विष्णौ ।

दैन • न० दीनस्य भावः । दीनतायाम् । दिने भवम् अण् । दिनभवे त्रि० ।

दैनन्दिन • त्रि० दिने दिने प्रतिदिनम् तत्र भवम् अण् [illegible]
प्रतिदिनभवे ।

दैनन्दिनप्रलय • पु० कर्म० । [illegible] प्रतिदिना-
[illegible]

दैन्य • न० दीनस्य भावः ष्यञ् । दीनतायाम्, कार्पण्ये च ।

दैव • न० [illegible]

दैवज्ञ * पु॰ दैवं पूर्वजन्मार्जितशुभाशुभं जनानां जन्मलग्नादिना जानाति ज्ञा-क ६त॰। गणके, ज्योतिर्विदि च। लग्नादिना शुभाशुभज्ञायां स्त्रियां स्त्री॰ टाप्।

दैवत * पु॰ न॰। देव एव देवता ततः प्रज्ञाद्यण्। देवे। देवतानां समूहे अण्। देवसमूहे न॰।

दैवतन्त्र * त्रि॰ दैवस्यैव तन्त्रमायत्तम्। भाग्याधीने।

दैवपर * त्रि॰ दैवमेव परं श्रेष्ठं यस्य। दैवमात्रे, [illegible] च।

दैवप्रश्न * पु॰ "नक्तं निर्गत्य यत्किञ्चिच्छुभाशुभकरं वचः। श्रूयते तद्विदुर्धीरा दैवप्रश्नम्" इत्युक्ते रात्रौ अकस्मात् [illegible] श्रूयमाणे शुभाशुभसूचके वाक्ये।

दैवलेखक * पु॰ दैवं लिखति। गणके।

दैववाणी * स्त्री॰ दैवस्येयम् अण् कर्म॰। आकाशवाण्याम्, संस्कृतभाषायाञ्च। [सात्त्विकांशसृष्टौ।

दैवसर्ग * पु॰ दैवरूपः सत्त्वगुणरूपः सर्गः। सांख्योक्तभूतसर्गमध्ये

दैवात् * अव्य॰ दैवमतति क्विप्। हठादित्यर्थे।

दैविक * न॰ देवो देवताऽस्य ठक्। "देवानुद्दिश्य यच्छ्राद्धं दैविकं तत् प्रचक्षते" इत्युक्ते देवोद्देश्यके श्राद्धे। देवस्येदं देवादागतं वा ठक्। देवादागते, देवसम्बन्धिनि च त्रि॰।

दैवी * स्त्री॰ देवस्येयम् अण्। सात्त्विकप्रकृतौ, "दैवी सम्पद् विमोक्षाय" इति गीता। देवसम्बन्धिन्याञ्च।

दैवोदासि * पु॰ दिवोदासस्यापत्यम् अत इञ्। प्रतर्दने नृपे।

दैव्य * न॰ दैवेन कृतम् देवानामिदं वा यञ्। भाग्ये। देवसम्बन्धिनि त्रि॰।

दैशिक * त्रि॰ देशेन निर्वृत्तं देशस्येदं वा ठक्। देशसम्बन्धिनि, स्थानीये देशव्यवहारभेदे, [illegible] च। स्त्रियां ङीप्।

दैष्टिक * त्रि॰ दिष्टं भागधेयमेव सर्वसाधनमिति यस्य मतिः ठक्। भाग्याधीनतावादिनि।

दो * छेदे दिवा॰ पर॰ सक॰ अनिट्। द्यति अदात्।

दोःशिखर * न॰ ६त॰। स्कन्धे। [स्त्री॰ ङीप्।

दोस् * पु॰ दुष डोस्। बाहौ, [illegible]। [illegible] त्रि॰। [illegible]

दोर्दण्ड * पु॰ दोर्दण्ड इव दोर्दण्डकार्यसाधकत्वात्। बाहुदण्डे। एवं भुजदण्डादयोऽप्यत्र।

दोर्मूल * न॰ ६त॰। कक्षे, बाहुमूले च।

दोल * पु॰ दुल-भावे घञ्। [illegible] दोलनरूपे व्यापारभेदे। दोलयात्रा दोलोत्सवोऽप्यत्र।

दोला * स्त्री॰ दुल-अच्-टाप् च वा। डोली ख्याते यानभेदे, प्रेङ्खादौ क्रीडार्थे दोलनयन्त्रे च। भावे [illegible]। [illegible]

दोलायमान * त्रि॰ दोलां दोलनमाचरति क्यङ्-शानच्। दोलनं कुर्वति, [illegible] च।

दोष * पु॰ दुष घञ्। दूषणे, [illegible] "[illegible]" [illegible]

कर्माधायके दुष्टप्रवृत्त्यादिभेदे, न्यायोक्तेषु रागद्वेषमोहेषु च।

दोषग्राहिन् * त्रि॰ दोषानेव गृह्णाति न गुणान् ग्रह-णिनि। "दोषग्राही गुणत्यागी पल्लवोऽपि हि दुर्जनः" इत्युक्ते दुर्जने।

दोषज्ञ * त्रि॰ दोषान् जानाति ज्ञा-क। पण्डिते, वातादिदोषज्ञे चिकित्सके च।

दोषत्रय * न॰ दोषाणां त्रयम्। वातपित्तकफेषु।

दोषा * अव्य॰ दुष-घञ्। रात्रौ।

दोषाकर * पु॰ दोषां रात्रिं करोति तस्मिन् काले किरणो यस्य वा। चन्द्रे। दोषाणामाकरः। दोषाश्रये पु॰। [काशाम्।

दोषाक्लेशा * स्त्री॰ दोषा रात्रौ क्लिश्यति अच् टाप्। [illegible]-

दोषैकदृक् * त्रि॰ दोषे एव न गुणे एका दृक् यस्य। खले।

दोस्(षा) * पु॰ दम करणे डोसि। भुजे, भागुरिमते टापि षत्वम्।

दोह * पु॰ दुह-कर्मणि घञ्। दुग्धे "[illegible]" इति स्मृतिः। आधारे घञ्। दोहनपात्रे। भावे घञ्। दोहने।

दोहद * पु॰ न॰ द्वयोः गर्भिणीतदपत्ययोर्हृदयमत्र नि॰। गर्भे "[illegible] दोहदलक्षणम्" इति रघुः। दोहमाकर्षं ददाति दा-क। (साद) गर्भिण्यभिलाषे, [illegible]। चिह्ने, गर्भलक्षणे च न॰। पु॰ [illegible]। दोहदवत्।

दोहदिनी * स्त्री॰ दोहदोऽस्त्यस्याः इनि। गर्भिण्याम् "[illegible]" रघुः।

दोहनी * स्त्री॰ दुह्यतेऽत्र आधारे ल्युट्। दोहनपात्रे।

दोहा * स्त्री॰ भाषाछन्दोभेदे।

दौत्य * न॰ दूतस्य भावः कर्म वा ष्यञ्। दूतस्य भावे, तत्कर्मणि च।

दौर्गसिंह * पु॰ [illegible] हरिः। [illegible]।

दौर्मनस्य * न॰ दुर्मनसो भावः ष्यञ्। [illegible] [illegible] च।

दौवारिक * पु॰ द्वारि नियुक्तः ठक्। द्वारपाले। [illegible] स्त्री॰।

दौष्कुलेय * त्रि॰ दुष्कुलस्यापत्यम् ढक्। निन्द्यकुलजाते।

दौहित्र * पु॰ दुहितुरपत्यम् अण्। दुहितुः सुते, "[illegible]" [illegible]

द्यावापृथिवी * स्त्री॰ द्वि॰ व॰। [illegible]

द्यु * अभिगमने अदा॰ पर॰ सक॰ अनिट्। द्यौति अद्यौषीत्।

द्यु * पु॰ [illegible]। [illegible], [illegible] च। [illegible] [illegible]

द्युक * [illegible]

द्युति * स्त्री॰ द्युत [illegible]। [illegible], [illegible] च।

द्युपति * पु० ६त०। सूर्य्ये, अर्कवृक्षे च। एवं दिवो मणिरिव। द्युम-ण्यादयोऽप्यत्र।

द्यूत * न० दिव+क्त। (जुया) इति ख्यातायां पाशकक्रीड़ायाम्, अप्राणिकरणकक्रीड़ायां, कैतवे च।

द्यूतकर ० त्रि० द्यूतं करोति कृ-ठक्। पाशकादिक्रीडाकारके (जुयारो)। ण्वुल्। द्यूतकारकोऽप्यत्र। क्विप्। द्यूतकृदप्यत्र।

द्यूतपूर्णिमा * स्त्री० द्यूतस्य द्यूतार्थे पूर्णिमा। आश्विनपौर्णमास्यां कोजागरपौर्णमास्याम्।

द्यूतप्रतिपद्(द) * स्त्री० चतुर्थ्यर्थे ६त०। कार्त्तिकशुक्लप्रतिपदि। "द्यूतप्रतिपदा नाम तत्र भावी महोत्सवः" इति स्मृतिः।

द्यूतवृत्ति * पु० द्यूतमेव वृत्तिर्जीविका यस्य। सभिके।

द्यै ० तिरस्कारे भ्वादि० पर० सक० अनिट्। द्यायति अद्यासीत्।

द्यो * स्त्री० द्युत-डो। स्वर्गे, आकाशे च।

द्योत * पु० द्युत-घञ्। प्रकाशे, आतपे च।

द्रढिमन् * पु० दृढस्य भावः इमनिच् द्रढादेशः। दृढत्वे, दार्ढ्ये च।

द्रप्स(प्स्य) * न० दृप्यन्त्यनेन स(प्स्य) अन् च। घनभिन्ने द्रवीभूते दधि।

द्रम ० गतौ भ्वादि० पर० सक० सेट्। द्रमति अद्रमीत्।

द्रम्म * पु० "वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणश्चतस्रः। ते षोड़श द्रम्मः" इत्युक्ते परिमाणभेदे (काहन)।

द्रव * पु० द्रु+अप्। रसे, पलायने, गतौ, वेगे, परीहासे च।

द्रवज * पु० द्रवात् रसात् जायते जन-ड। गुड़े। द्रवजातमात्रे त्रि०। [कारके पाषाणभेदे ... गुणभेदे।

द्रवत्व * न० द्रवति स्यन्दते द्रु-अच् तस्य भावः। न्यायोक्ते स्यन्दन-

द्रवद्रव्य * न० द्रवतीति द्रव कर्म०। दुग्धदधिघृतादौ निर्यासादौ द्रव्ये।

द्रवन्ती * स्त्री० द्रु-शतृ। नद्याम्, शम्बरमूषिकायां, मूषिकपर्ण्यां च।

द्रविड * पु० देशभेदे। तद्देशस्थे ब० व०।

द्रविण * न० द्रु-इनन्। वित्ते, काञ्चने, पराक्रमे, बले च।

द्रविणनाशन * पु० द्रविणं बलं नाशयति नश-णिच्-ल्यु। मीमा-[illegible]।

द्रव्य * न० द्रु-यत्। वित्ते, [illegible], [illegible], भेषजे, मद्ये, जतुनि, विनये, [illegible], न्यायोक्तेषु पृथिव्यादिषु गुणवत्सु नवसु। वैशेषिकोक्ते [illegible] पदार्थे। द्रविणस्य विकारः [illegible]। [illegible], [illegible] च त्रि०।

द्रष्टृ * त्रि० दृश-तृच्। [illegible], [illegible], साक्षिणि, "द्रष्टा दृशि: [illegible]" इत्युक्ते [illegible] च।

द्रा * [illegible] कुत्सायां च अदा० पर० अक० अनिट्। द्राति अद्रासीत्।

द्रा * स्त्री० द्रा [illegible] [illegible] च।

द्राक्ष * [illegible] [illegible] [illegible] सेट्। द्राक्षति अद्रा-क्षीत्।

द्राचा * स्त्री० द्राक्षि-अ नि० नलोपः। मृद्वीकायाम् (किसमि "द्राचे! द्रक्ष्यन्ति के त्वाम्" इति जयदेवः।

द्राघ * शोषणे अलमर्थे च भ्वादि० पर० सक० सेट्। द्राघ अद्राघीत्। णिच् अदद्राघत्। [अद्राघीत्। णिच् अदद्राघ

द्राघ ० आयासे शक्तौ भ्रमे च भ्वादि० पर० सक० सेट्। द्राघ

द्राघिमन् ० पु० दीर्घस्य भावः इमनिच् द्राघादेशः। दीर्घत्वे।

द्राघिष्ठ * त्रि० अतिशयेन दीर्घः इष्ठन् द्राघादेशः। अतिदीर्घे ईयसुन् द्राघीयस् इत्यप्यत्र। स्त्रियां ङीप्।

द्राड * विभेदे भ्वादि० आत्म० सक० सेट्। द्राडते अद्राडिष्ट।

द्रावक * पु० द्रु ण्वुल्। चन्द्रकान्तमणौ, जारे, विदग्धे, रसभेदे च।

द्राविड़ी * स्त्री० द्रविड़े जाता अण्। सूक्ष्मैलायाम्।

द्राह * जागरे भ्वादि० आत्म० अक० सेट्। द्राहते अद्राहिष्ट णिच् अदद्राहत्।

द्रु * गतौ भ्वादि० पर० सक० अनिट्। द्रवति। णिच् अदुद्रवत् त

द्रु ० अनुतापे स्वादि० पर० सक० अनिट्। द्रुणोति अद्रौषीत्।

द्रु * पु० द्रवत्यूर्द्धं द्रु-डु ड् वा। वृक्षे, शाखायाञ्च। गतौ स्त्री०।

द्रुघण ० पु० द्रुं हन्ति अनेन हन करणे अप् घनः कुत्वञ्च। मुद्गरे, परशुधे, ब्रह्मणि चतुर्मुखे, भूमिचम्पके च।

द्रुड ० मज्जने भ्वादि० पर० सक० सेट्। द्रोडति अद्रोडीत्।

द्रुड * मज्जने तुदा० कुटा० पर० सेट्। द्रुडति अद्रुडीत्।

द्रुण * कुटिलीकरणे तुदा० पर० सक० सेट्। द्रुणति अद्रोणीत्।

द्रुणस् * त्रि० द्रुरिव दीर्घा नासिकास्य नसादेशः अत्वञ्च। दीर्घ-नासिके जने। [ज्याम्, कर्णजलौकायाञ्च।

द्रुणी * स्त्री० द्रुण-क गौरा० ङीष्। काष्ठाम्बुवाहिन्याम् कच्छ-

द्रुत ० पु० द्रवत्यूर्द्धम् द्रु-क्त। वृक्षे। शीघ्रे नृत्यगीतवाद्येषु, शीघ्रे च न०। शीघ्रतायुते, द्रवीभूते, पलायिते च त्रि०।

द्रुपद * पु० भरतवंश्ये युधिष्ठिरादिः श्वशुरे नृपभेदे।

द्रुम * पु० द्रुः शाखास्त्यस्य म। वृक्षे, पारिजाते, कुबेरे च।

द्रुमामय ० पु० द्रुमस्यामय इव। लाक्षायाम्। [कारे।

द्रुमोत्पल * पु० द्रुमेषु मध्ये उत्पलमिव तदाकारपुष्पमस्य। कर्णि-

द्रुमश्रेष्ठ * पु० द्रुषु श्रेष्ठ इव। प्रियालवृक्षे। [ना द्रोण्यां द्रोहे।

द्रुह * जिघांसायां दिवा० पर० सक० सेट्। द्रुह्यति अद्रुहत्। द्रोह०

द्रुहिण * पु० द्रुह इनन् किच्च। सृष्टिकर्तरि चतुर्मुखे।

द्रू * वधे गतौ च स्वादि० क्र्यादि० च उभ० सक० सेट्। द्रूणोति द्रूणुते द्रूणाति द्रूणीते अद्रावीत् अद्रविष्ट।

द्रेक ० शब्दे उत्साहे च भ्वादि० आत्म० अक० सेट्। द्रेकते अद्रे-किष्ट। णिच् अदिद्रेकत्।

द्रै * स्वप्ने भ्वादि० पर० अक० अनिट्। द्रायति अद्रासीत्।

द्रोण * पु० द्रुण-घञ्, द्रुण वा। भारतप्रसिद्धे अश्वत्थामपितरि ब्राह्मण-भेदे, द्रोणकाके (दाँड़काक), वृश्चिके, मेघभेदे, [illegible] [illegible] वृक्षभेदे, आढ़कचतुष्टयरूपे परिमाणे, [illegible] च। [illegible]

शब्दे नपुंस दृश्यम्।

द्रोणकाक * पु॰ कर्म॰। काकभेदे (डाँड़काक)। [राशावाम्।

द्रोणगन्धिका * स्त्री॰ द्रोणपुष्पस्येव गन्धो यस्याः स्वार्थे कन्।

द्रोणि(णी) * स्त्री॰ द्रुण-इन् वा ङीप्। जलाद्याधारे पात्रभेदे, नदीभेदे, नीलञ्जनामगन्धद्रव्ये, काष्ठाम्बुवाहिन्याञ्च।

द्रौणोदन * पु॰ द्रोणीव दलमस्य। केतकीवृक्षे।

द्रोह ० द्रुह-घञ्। अनिष्टचिन्तने।

द्रोहचिन्तन * न॰ द्रोह एव चिन्तनम्। परानिष्टचिन्तने।

द्रौणायन * पु॰ द्रोणस्यापत्यं फक्। अश्वत्थाम्नि।

द्रौणिक * त्रि॰ द्रोणं स्वस्मिन् समावेशयति पचति वा ठक्। द्रोणमितधान्यवपनयोग्ये क्षेत्रे, द्रोणपचनयोग्ये पात्रे च।

द्रौपदी * स्त्री॰ द्रुपदस्यापत्यम् स्त्री अण्। द्रुपदराजात्मजायाम्।

द्वन्द्व * पु॰ द्वौ द्वौ सहाभिव्यक्तौ द्वन्द्वं रहस्यमर्यादेत्यादिना नि॰। व्याकरणोक्ते उभयपदार्थे प्रधाने समासभेदे। "द्युपि-पासे शोकमोहौ रागद्वेषौ तथैव च। कामक्रोधप्रभृतयो द्वन्द्व-शब्देन वर्णिताः॥" इत्युक्ते परस्परविरुद्धे शोकाशोकादौ शीतोष्णादौ, रहस्ये, कलहे, युद्धे, मिथुने, दुर्गे च।

द्वन्द्वचर ० पु॰ द्वन्द्वीभूय चरति चर-पचाद्यच्। चक्रवाके।

द्वय * न॰ द्वाववयवावस्य द्वावयवं वा द्वि-अयट्। द्वित्वसंख्यायां न॰ स्त्री॰ ङीप् "स्तनद्वयीजित्वरीति नैषधम् "स्तनद्वयं चारु-तया" इति कुमार॰। द्वित्वसंख्यान्विते त्रि॰। "द्वयं गतं सम्प्रति" इति कुमारः। स्त्रियां ङीप्।

द्वा(द्वा)स्थ * पु॰ द्वारि तिष्ठति स्था-क वा विसर्गलोपः। द्वारपाले। स्था कर्त्तरि क्त। द्वा(द्वा)स्थितोऽप्यत्र।

द्वाचत्वारिंशत् * स्त्री॰ द्व्यधिका चत्वारिंशत् द्वौ च चत्वारिंशच्च वा आत्वम्। (बेयाल्लिश) संख्याभेदे। द्वाविंशदादयोऽप्यत्र।

द्वादश ० त्रि॰ द्वादशानां पूरणः डट्। येन द्वादशसंख्या पूर्य्यते तस्मिन्। [संख्याभेदे। द्विरावृत्ता दश। विंशतिसंख्यायाम्।

द्वादशन् * पु॰ द्वौ च दश च द्व्यधिका वा दश आत्वम्। (बारो)

द्वादशकर * पु॰ द्वादश करा हस्ता यस्य। कार्त्तिकेये, बृहस्पतौ च। द्वादशहस्तादयोऽप्यत्र। [शस्त्रलोचनादयोऽप्यत्र।

द्वादशनेत्र ० पु॰ द्वादश नेत्राण्यस्य। षडानने कार्त्तिकेये। द्वाद-

द्वादशाङ्गुल * पु॰ द्वादश अङ्गुलयः प्रमाणमस्य तद्धितार्थे द्विगुः तद्धितस्य लुकि अच् समा॰। वितस्तिप्रमाणे।

द्वादशात्मन् * पु॰ द्वादश आत्मानो मूर्त्तयोऽस्य। सूर्य्ये, अर्कवृक्षे च।

द्वादशायुस् * पु॰ द्वादशवर्षमायुर्यस्य। कुक्कुरे।

द्वापर ० पु॰ द्वौ परौ प्रकारौ विषयौ वा यस्य पृ॰ आत्वम्। संशये सत्यत्रेतानन्तरे युगभेदे, द्व्यङ्कसंख्यान्वितपाशकपार्श्वे च।

द्वापराय * पु॰ पाशकस्य द्व्यङ्कसंख्यान्वितं पार्श्वं द्वापरं तस्य अयः उत्तानतया पतनम्। द्यूतभेदे, द्व्यङ्कान्वितपार्श्वस्योत्तानतया पतने च।

द्वामुष्यायण * पु॰ द्वयोरमुयोरपत्यम् नि॰। द्वयोः पुत्रे, गौतमे मुनौ च।

द्वार् * स्त्री॰ दृ-वरणे णिच्-विच्। गृहादिनिर्गमनस्थाने, प्रतीहारे, उपाये, मुखे च। [मुखे च।

द्वार * न॰ दृ-णिच्-अच्। गृहादिनिर्गमनस्थाने, प्रतीहारे, उपाये,

द्वारका * स्त्री॰ द्वारेण प्रशस्तद्वारेण कायति कै-क। समुद्रसन्निकृष्टे तीर्थभेदे। द्वारवत्यादयोऽप्यत्र।

द्वारकेश * पु॰ ६त॰। श्रीकृष्णे। [यवुल् च। एतावप्युक्तार्थे।

द्वारप * त्रि॰ द्वारं पाति रक्षति पा-क। द्वारपाले। पाल-अण्,

द्वारयन्त्र * न॰ ६त॰। तालके, (ताला) (कुलुप) इति ख्याते पदार्थे च।

द्वारावती * स्त्री॰ द्वाराणि मोक्षोपायाः सन्त्यस्याम् मतुप् पूर्व॰ दीर्घः। तीर्थभेदे "पुरी द्वारावती चैव सप्तैताः" इति पुराणम्। द्वार+मत्वर्थे ठनि द्वारिकाप्यत्र।

द्वारिन् * त्रि॰ द्वारं पाल्यत्वेनास्त्यस्य इनि। द्वारपाले।

द्वाविंशति * स्त्री॰ द्व्यधिका विंशतिः द्वौ च विंशतिश्च आत्वम्। (बाइश) संख्याभेदे।

द्वि * त्रि॰ द्वि॰ व॰ द्रु-ड। द्वित्वसंख्यान्विते।

द्विक * पु॰ द्वौ कौ ककारौ यत्र। काके, कोके। द्वाववयवौ कन्। द्वित्वसंख्यायाम्, तद्वति च न॰। "एकं द्विकं त्रिकञ्चैव" इति कारिका।

द्विककुद् * पु॰ द्वे ककुदे यस्य अन्त्यलोपः। उष्ट्रे।

द्विगु * पु॰ व्याकरणोक्ते समासभेदे। ६ब॰। गोद्वयस्वामिनि त्रि॰।

द्विगुण * त्रि॰ द्वाभ्यां गुण्यते गुण-घञर्थे क। द्वाभ्यां गुणिते।

द्विगुणाकृत * त्रि॰ द्विगुणं कृत्वा कृष्टम् डाच्+कृ-क्त। द्विवार-कृष्टे क्षेत्रे।

द्विज * पु॰ द्विर्जायते जन-ड वृत्तौ सङ्ख्याया वारार्थत्वम्। ब्राह्मणे, ब्राह्मणादिवर्णत्रये, "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" इति स्मृतिः। दन्ते, अण्डजे विहगादौ, तुम्बुरुवृक्षे च।

द्विजकुत्सित * पु॰ ३त॰। श्लेष्मातकवृक्षे तत्फलस्य द्विजानामभक्ष्य-त्वात् तत्रिन्द्यत्वम्।

द्विजदेव ० पु॰ द्विजेषु देव इव। ब्राह्मणे, ऋषौ च।

द्विजन्मन् * पु॰ द्वे जन्मनी यस्य। ब्राह्मणक्षत्रियवैश्यरूपवर्णत्रये, "मातुरग्रेऽधिजननं द्वितीयं मौञ्जीबन्धने" इति स्मृतिः, दन्ते, अण्डजे च।

द्विजबन्धु * पु॰ द्विजो बन्धुर्यस्य तद्योत्पन्नत्वात्। स्वकार्य्यरहि-तेषु जन्ममात्रोपजीविषु पञ्चसु ब्राह्मणक्षत्रियवैश्येषु।

द्विजराज * पु॰ ६त॰ टच् समा॰। चन्द्रे, अनन्ते, गरुडे च।

द्विजवर ० पु॰ द्विजेषु वरः। विप्रे। द्विजवर्य्यद्विजोत्तमादयोऽप्यत्र।

द्विजमत * पु॰ ३ब॰। राजमाषे (बरबटी)। [गन्धद्रव्ये च।

द्विजा * स्त्री॰ द्विर्जायते जन-ड टाप्। पालङ्क्या, भार्ग्या, रेणुका-

द्विरातिर ० पु० द्वे रात्री वसनो यस्य। "त्रासिचा पयियो देवजन- सो वर्षो द्विरात्रतः" इति मनुक्ते वर्षवये, "नानुरपेऽधिगन्तं द्विरोर्व लोष्टोविम्बर्व" इत्युक्ते द्वे वा तथात्वम्।

द्विजिह्व ० पु० द्वे जिह्वे यस्य। सर्पे। खले, चौरे, दुःसाध्ये च त्रि०।

द्वितय ० त्रि० द्वावयवावस्य द्वायवं वा द्वि-तयप्। द्वितयहरा- भिरे "दर्द शायी द्वितयेऽपि ते चत्रा:" इति भारवि: स्त्रियां ङीप्। द्वितयमयावाय न०।

द्वितीय ० त्रि० द्वयोः पूरणः तीय। द्वयोः पूरणे। चतुर्थ द्वितीय- कलांशकादने स्त्रियां स्त्री०। भावार्थेण्। द्वितीये भावे।

द्वितीयाश्रम ० द्वितीयं आश्रम आश्रम् डाप्-कल। द्विगाश्रमे पेरे। [द्वितयदन्ते द्वयाद्दौ स्त्रियां ङीप्।

द्विदत् ० त्रि० द्वौ दन्तावस्य वर्षाव दन्तस्य दतादेशः। द्विदन्तोपम-

द्विदेव ० पु० द्वौ देवावस्य अण् उत्तरपदवृद्धिः। विशाखानक्षत्रे तस्याः इन्द्राग्निदैवत्यात् तथात्वम्।

द्विधा ० अव्य० द्विप्रकारम् द्वि+धाच्। द्विप्रकारे।

[illegible]

द्विवचन ० न० द्वौ वक्ति द्वौ वा उच्यते अनेन। व्याकरणो- क्तौधके औत्वप्रभृतिप्रत्यये।

द्विवर्षा ० स्त्री० द्वे वर्षे वयःपरिमाणमस्य पार्ष्णिः ठञ् स्वार्थे कन् तस्य लुक्। द्विवर्षवयस्कायां गवि।

द्विवार्षिक ० त्रि० द्वयोर्वर्षयोः भवः ठञ् उत्तरपदवृद्धिः। भवे तण्डुलादौ।

द्विमुख ० पु० द्वौ मुखौ यस्य। "गोरथो नदिषः [illegible] ररः। द्विमुखाः पथवये मे परिवहन सगमः" इत्युक्ते [illegible]

द्विशस् ० अव्य० द्वौ द्वौ ददाति करोति वा। [illegible] वांसौ। [illegible]

द्विष ० वैरे चदा० उभ० सक० अनिट्। द्वेष्टि द्विष्टे [illegible]

द्विषत् ० पु० द्विष-शतृ। शत्रौ। [illegible]

द्विषन्तप ० पु० द्विषन्तं तापयति तप-णिच्-खच् मुम: [illegible]

द्विष्ठ ० त्रि० द्वयोस्तिष्ठति स्था-क सुषमा० षत्वम्। [illegible] संयोगादौ पदार्थे। [illegible]

द्विस् ० अव्य० द्वि+क्रियावृत्तिगणने सुच्। द्विरावृत्ति[illegible]

द्विसप्तति ० स्त्री० द्वाधिका सप्ततिः द्वौ च सप्ततिश्च वा (बाहात्तर) संख्यायां दे।

द्विहायन ० न० [illegible]

द्विहस्त ० त्रि० द्विहस्तं [illegible]

द्विहायनी ० स्त्री० द्वे हायने वयोमानं यस्याः ङीप्। [illegible]

[illegible]

सहायाच। घार्थेऽण्। द्विधाभेदश्रति त्रि०। [वनभेदे।

द्वैतवन * न० द्वे इते गते यस्मात् कर्म०। शोकमोहादिद्वन्द्वरहिते

द्वैतवादिन् * त्रि० द्वैतं वदति वद-णिनि। जीवेश्वरयोर्भेदाभ्युपगन्तरि नैयायिकादौ।

द्वैतीयीक * त्रि० द्वितीय एव स्वार्थे ईकक्। द्वित्वसंख्यापूरणेऽर्थे।

द्वैध * न० द्वि+प्रकारे धमुञ्। द्विप्रकारे।

द्वैप * पु० द्वीपिनो विकारः अञ्। व्याघ्रविशेषचर्मणि। तेन परिवृतो रथः पुनरञ्। द्वीपिचर्मणा परिवृते रथे।

द्वैपायन * पु० द्वीपमयनं जन्मभूमिर्यस्य द्वीपायनः स एव प्रज्ञाद्यण्। "द्वीपे न्यस्तस्तया बालस्तस्माद् द्वैपायनोऽभवत्" इत्युक्ते व्यासे।

द्वैमातुर * पु० द्वयोर्मात्रोरपत्यम् अण् उत्वं रपरत्वम्। दुर्गाचामुण्डाभ्यां पालिते गणेशे, जरासन्धे नृपे च। [द्रव्यभेदे।

द्व्यणुक * न० द्वयोरण्वोः संयुक्तयोर्भवः कन्। परमाणुद्वयजाते

द्व्यष्ट * न० द्वे ईमरूप्ये अश्नुते व्याप्नोति अश-क्त। ताम्रे।

द्व्यामुष्यायण * पु० अमुष्य प्रसिद्धस्यापत्यम् फक् आमुष्यायणः द्वयोरामुष्यायणः ६त०। "उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः" इत्युक्ते तव, मम चायमिति समयेन परिग्रहीते पुत्रभेदे। [जाते ज्वरादौ।

द्व्याहिक * त्रि० द्वयोरह्नोः समाहारः द्व्यहः तत्र भवः ठञ्। द्व्यह-

---

ध

ध * पु० धे-धा-वा ड। धर्मे, कुवेरे, ब्रह्मणि च। धने न०।

धक * नाशने चुरा० उभ० सक० सेट्। धकयति-ते अदधकत्-त।

धट * पु० धन+अच् टान्तादेशः। तुलायां (तराजु), दिव्यप्रमाणरूपे परीक्षाभेदे च।

धटक * पु० द्विचत्वारिंशद्रत्तिकात्मके परिमाणभेदे।

धण * ध्वाने भ्वादि० पर० सक० सेट्। धणति अधाणीत् अधणीत्।

धत्तूर * पु० धयति धातून् धा उर पृ०। धुस्तूरे। [अधनीत्।

धन * धान्योत्पादने जुहो० पर० अक० सेट्। दधन्ति अधानीत्

धन * रवे भ्वादि० पर० अक० सेट्। धनति अधानीत् अधनीत्।

धन * न० धन-अच्। वस्तुनि, अर्थे, स्नेहे, धनिष्ठानक्षत्रे च।

धनञ्जय * पु० धनं जयति जि-खच् मुम् च। अर्जुने, वह्नौ, नागभेदे, पोषणकरे देहव्यापिवायौ, ककुभवृक्षे, चित्रकवृक्षे च।

धनद * पु० धनं दयते दे-पालने। कुवेरे, हिज्जलवृक्षे च। दा-क। धनदातरि त्रि०। [नुचरत्वम्।

धनदानुचर * पु० ६त०। यक्षे, कुवेरस्य यक्षराजतया यक्षाणां तद-

धनदानुज * पु० ६त०। रावणे।

धनपति * पु० ६त०। कुवेरे।

धनपिशाची * स्त्री० धने पिशाचीव। धनाशायां, धनलोभे च।

धनहरी * स्त्री० धन हरति अच् गौरा० ङीष्। चोरनामकगन्धद्रव्ये।

धनाधिप * पु० ६त०। कुवेरे। धनानामधिपे त्रि०। धनाधिपत्यादयोऽप्यत्र।

धनिक * पु० न० धनिवत् कायति कै-क। धन्याके। धवे पु०। धनं विद्यतेऽस्यस्य ठन्। धनस्वामिनि उत्तमर्णे त्रि० "धनिकस्य यथारुचि" इति स्मृतिः। स्त्रियां टाप्। सा च प्रियङ्गुवृक्षे, वध्वां च।

धनिष्ठा * स्त्री० अतिशयेन धनवती इष्ठन् इनेर्लुक्। स्वनामख्याते नक्षत्रभेदे।

धनुष्पाट * पु० धनुष इव पाटो विस्तारोऽस्य। पियालवृक्षे।

धनुर्गुण * पु० ६त०। मौर्व्याम्।

धनुर्द्रुम * पु० ६त०। वंशे, तत एव धनुषो जननात्।

धनुर्द्धर * पु० धनुर्धारयति धृ-अच्। धानुष्के (तीरन्दाज)।

धनुर्वृक्ष * पु० धनुषः साधनं वृक्षः। भल्लातके, वंशे, अश्वत्थे च।

धनुर्वेद * पु० धनुषः उपचारात् तत्क्षेपणीयास्त्रप्रयोगादेः उपयोगी वेदः। यजुर्वेदस्योपवेदे शस्त्रास्त्रप्रयोगोपसंहारप्रतिपादकमन्त्रसहिते शास्त्रभेदे।

धनुष्क * पु० धनुः करे यस्य षत्वम्। धानुष्के (तीरन्दाज)।

धनुष्मत् * पु० धनुरस्त्यस्य मतुप् षत्वम्। धानुष्के।

धनुस् * पु० धन-उसि। पियालवृक्षे। धनुर्धरे त्रि०। चापे, मेषादितो नवमे राशौ च न०।

धन्य * पु० धनाय हितम् धनं लब्धा धनस्य निमित्तं संयोगः उत्पातो धनं प्रयोजनमस्य वा यत्। अश्वकर्णवृक्षे। श्लाघ्ये, कृतार्थे, पुण्यशीले, धनोपयोगिन्यर्थशास्त्रे, धनाय हिते, धनस्य कारके च त्रि०। आमलक्याम्, धन्याके च स्त्री० टाप्।

धन्याक * न० धन-आकन् पिनाकादि० नि०। (धनिया) इति ख्याते वृक्षे। [मरुभूमिवृते दुर्गभेदे।

धन्वदुर्ग * न० धन्वना मरुणा कृतं दुर्गम्। चतुर्दिशं पञ्चयोजन-

धन्व * न० सौ० धन्व+अच्। चापे।

धन्वन् * न० सौ० धन्व+कनिन्। धनुषि, मरुदेशे च।

धन्वन्तरि * पु० धन्वन् शिल्पशास्त्रं तस्यान्तमियर्ति ऋ-इन् शक०। "नारायणांशो भगवान् स्वयं धन्वन्तरिर्महान्। पुरा समुद्रमथने समुत्तस्थौ महोदधेः" इत्युक्ते स्वर्गवैद्यभेदे, दिवोदासे काशिराजे, विक्रमादित्यसभासदे पण्डितभेदे च। "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टेत्यादि। [तेन तस्या यासः कृत।

धन्वन्तरिग्रस्ता * स्त्री० ३त०। (कट्की) कटुकायाम्, रोगोपशमनाय

धन्वयवास * पु० धन्वनो मरुभूमेर्यवासः तत्रोत्पन्नत्वात्। दुरालभायाम्।

धन्वयास * पु० धन्वनो यासो निर्यास इव। दुरालभायाम्।

धन्वी * पु० धन्वं विद्यतेऽस्य इनि। अर्जुने, ककुभद्रुमे, दुरालभायाम्, बकुले च। विदग्धे, धानुष्के त्रि०।

धन्विस्थान * न० ६त०। "वैशाखं समपादञ्च वैशाखं मण्डलं तथा। प्रत्यालीढं तथालीढं स्थानान्येतानि धन्विनाम्।" इत्युक्तेषु

धातुष्कन्निमित्तेद्य ।

धन • ध्वाने भ्वा० पर० धनति अधनीत् ।

धनन • पु० धनन्त्यनेन धन-ल्यु । नर्त्ते । मत्स्याध्यक्षे, क्रूरे च वि० ।

धननि नी ० स्त्री० धन-अनि वा ङीप् । नाड्यां, शिरायां, हृद्-क्षिपामिन्यां, धीवर्यां, हरिद्रायाञ्च । [(चोपा) ।

धनिम • पु० भ्वा० धन-इत्र् मित्र-क्त पृ० कर्म० । संयतेषु वेदेषु

धर • पु० धृ+अच् । पर्वते, कूर्मराजे, वसुभेदे, कार्पासमूले च ।

धरण • पु० धृ+ल्युट् । पर्वतभेदे, लोके, गुणे, धान्ये, दिवाकरे, सेतौ च । चतुर्विंशतिरक्तिकामाने दशपलपरिमाणे च ।

धरणि, णी ० स्त्री० धृ अनि वा ङीप् । भूमौ, कन्दविशेषे, काष्ठाली, दमकर्णे च । [अपरारे च ।

धरणि, णी,धर • पु० धरणिं धरति धृ-अच् । पर्वते, विष्णौ,

धरा • स्त्री० धृ अच् । पृथिव्याम्, गर्भाशये जरायौ, मेदोवहायां नाड्याम् ।

धराधर • पु० धरां धारयति धृ+अच् । पर्वते, शेषनागे विष्णौ च ।

धरासुर • पु० धरायाः असुर इव । ब्राह्मणे । धरा भूः सुरादरोऽस्मिन् ।

धरित्री • स्त्री० धृ-इत्र् स्त्रीत्वात् ङीप् । भूमौ ।

धर्म • पु० न० । धृ मन् । [illegible]

[illegible]

धर्मलक्षण • न० धर्मो लक्ष्यतेऽनेन लक्ष+ल्युट् । "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्" इत्युक्ते धृत्यादौ दशके ।

धर्मवाणिजिक • पु० वणिगेव स्वार्थे ठक् वाणिजिकः उप० । कर्मफलाभिलाषुके । [दा

धर्मवैतंसिक • पु० पापेन धनमुपार्ज्यात्मनो धार्मिकत्वख्याप

धर्मशास्त्र • न० धर्मप्रतिपादकं शास्त्रम् । मन्वादिप्रयुक्ते स्मृति

धर्मशील • त्रि० धर्मः शीलं सततमनुष्ठेयं यस्य । धार्मिके ।

धर्मसंस्थापन • न० धर्मस्य सम्यक् अधर्मनिराकरणेन स्थापन वेदोदितधर्मव्यवस्थापने "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति पुराणम् ।

धर्मसंहिता • स्त्री० धर्मज्ञानार्थं संहिता यत्र रचिता सम्+धा+क्त मन्वादिप्रोक्ते धर्मप्रतिपादनार्थे शास्त्रे ।

धर्मात्मन् • पु० धर्मे आत्मा स्वभावो यस्य । धर्मानुगतचित्ते ।

धर्माधिकरण • पु० धर्मार्थमधिक्रियतेऽसौ कर्मणि ल्युट् । "कुलशीलगुणोपेतः सत्यधर्मपरायणः । प्रवीणः पेशलोऽध्यक्षो धर्माध्यक्षो ... यशो च मित्रे च धर्मशास्त्रविशारदः । विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत् ।" इत्युक्ते धर्माध्यक्षे । तत० । "धर्मशास्त्रानुसारेण अर्थशास्त्रनिरूपणम् । यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत् ।" इत्युक्ते विचारस्थाने न० ।

धर्माध्यक्ष • पु० "कुलशीलगुणोपेतः सर्वधर्मपरायणः । प्रवीणः पेशलोऽध्यक्षो धर्माध्यक्षोऽभिधीयते ।" इत्युक्ते धर्माधिकारे । तत० । सर्वधर्मस्य साक्षिणि परमेश्वरे च ।

धर्माभास • पु० धर्म इवाभासते धर्मत्वेनाभासनात् । "श्रुतिस्मृत्यविहितं यत् स धर्मः प्रकीर्तितः । अन्यशास्त्रेषु यः प्रोक्तो धर्माभासः स उच्यते" इत्युक्ते अन्यशास्त्रोक्ते अधर्मे धर्मे ।

धर्मासन • न० तत० । राज्ञा धर्मतो दर्शनार्थमासने । [ध

धर्मवत् • त्रि० धर्म+अस्त्यर्थे मतुप् । पुण्यवति, वस्तुगुणलक्षणधर्मयुक्ते

धर्मिष्ठ • त्रि० अतिशयेन धर्मी इष्ठन् इनलुक् । धार्मिके ।

धर्म्य • त्रि० धर्मादनपेतः धर्मेण प्राप्यो वा यत् । धर्मयुक्ते, धर्मजन्ये च । [धार

धर्ष • पु० धृष-घञ् । प्रागल्भ्ये, अमर्षे, शक्तिबन्धने, संहतौ, हिं

धर्षण • न० धृष-भावे ल्युट् । पराभवे, रमणे, अपमाने च कर्मणि ल्युट् । [illegible]

[illegible]

[illegible]

धव • पु० धू+अच् । [illegible]

[illegible]

...तनिका * स्त्री० कर्म०। खठिन्याम् (खड़ि)। ... कर्म०। यज्ञपशौ।
...त्पन * न० कर्म०। कुमुदे।
... * नं० धूयतेऽनेन धू-स्त। व्यजने।
...रणे पोषणे दाने च जुहो० उभ० सक० अनिट्। दधाति ... धधात् धधित। धविमम्।
... * स्त्री० धातुं करोति णिच् ण्वुण् पिप्पल्यादि० ङीप्। [(धाइ) गुल्मभेदे।
... पु० धा-तुन्। "धारणाद्धातवस्ते स्युर्वातपित्तकफाश्रयः" ...षु वातादिषु, "रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः" ...षु रसादिषु, "सुवर्णरूप्यताम्राणि हरितालं मनःशिला। ...गैरिकाञ्जनकासीससीसलोहं सहिङ्गुलम्। गन्धकोऽभ्रकमित्याद्या ...गिरिसम्भवाः॥" इत्युक्तेषु स्वर्णादिषु, "हेमताररनागाय... च तीक्ष्णकम्। कांस्यकं कान्तलोहञ्च धातवो नव ...ः॥" इत्युक्तेषु हेमादिषु नवसु, "हिरण्यं रजतं कांस्यं ...सीसकमेव च। रङ्गमायसं रैत्यञ्च धातवोऽष्टौ प्रकी-... इत्युक्तेषु अष्टसु, "सुवर्णं रजतं ताम्रं लौहं कुप्यञ्च ...त्रङ्ग सीसकञ्चैव इत्यष्टौ देवसम्भवाः॥" इत्युक्तेषु ...षु, लोकेषु सर्वधारणात् परमेश्वरे "स एव विधातुः" ... व्याकरणोक्ते गणपठिते क्रियावाचके भूप्रभृतौ ...

...तून् हन्ति हन-ठक्। काञ्जिके।
... धातून् द्रावयति स्वसम्बन्धात् द्रु+णिच् अण्। ...रणे।
... स्त्री० धातुरिव पुष्पमस्यस्य ठन्। (धाइफुल) धात-... [पुष्पाम्।
...धातुरिव पुष्पमस्याः ङीप्। (धाइफुल) धातुपु-... [रसरूपे प्रथमे धातौ च।
...[बिभर्ति भृ-क्विप्। पर्वते, देहस्थधातुपोषके ...धातुषु मध्ये माक्षिकम्। माक्षिके उपधातुभेदे।
... धातून् स्वर्णादीन् मारयति मृ-णिच्-णिनि। ...ना)।
... । गन्धके।
...। गैरिकमिव। कासीसे उपधातुभेदे।
...अच्। धनुर्गुणे प्रत्यञ्चि, शिवौ च। धारण-... ति०। [स्वार्थे कन् ह्रस्वः। धवेऽर्थे।
...पोषकं पुष्पं यस्याः। (धाइफुल) वृक्षभेदे।
...धतेऽस्मी धा-इन् शिच्यात् ङीप्। मातरि, ...म्। धामलक्याम्।
... पद्मसद्म। नालीमदसे। ६त०। धाम-... [धाम् ह्रस्वः। मन्वन्तरे।
...र्थे हस। वटमार्जार (धाइमा)। ...
... ल्युट्, संज्ञायां कन्। धन्याके।

धाना * स्त्री० धा-न-टाप्। धन्याके, अङ्कुरे, चूर्णे, सक्तुषु च। भृष्टयवे ब० व०।
धानाचूर्ण * न० धानानां भृष्टयवानां चूर्णम्। सक्तुषु (छातु)।
धानी * स्त्री० धीयतेऽस्याम् आधारे-ल्युट्-ङीप्। आधारे, यथा राजधानी मक्षधानीत्यादि। पीलुवृक्षे च।
धानुष्क * त्रि० धनुः प्रहरणमस्य ठञ् धनुषा जीवति ठञ् वा। धनुर्द्धरे। अपामार्गे स्त्री०।
धानुष्य * पु० धनुषे हितः यञ्। वंशे।
धानेय * न० धानाय साधु ढक्। धन्याके।
धान्य * न० धाने पोषणे साधु यत्। सतुषे तण्डुलादौ, शालिति-लयवादौ च। तद्भेदो वाचस्पत्ये। धन्याके, चतुस्तिलपरिमाणे, पूर्वदारुवृक्षे च।
धान्यकोष्ठक * न० ६त०। धान्यरक्षार्थे गृहे (गोला)।
धान्यत्वच् * स्त्री० ६त०। तुषे।
धान्यपञ्चक * न० ६त०। "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृणीयकम्। शिम्बिधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम्॥" इत्युक्तेषु शाल्यादिषु।
धान्यराज * पु० धान्येषु राजा टच् समा०। यवे। [गोधूमे।
धान्यवर्द्धन * न० धान्यस्य ऋणरूपस्य वर्द्धनं यत्र। (वाड़ी)
धान्यवीर * पु० धान्येषु वीर इव बलहेतुत्वात्। माषे।
धान्यशीर्षक * न० ६त०। धान्यस्य मञ्जर्याम्। धान्यपाकयोग्ये ...
धान्याम्ल * न० धान्यमिवाम्लमिति ... । काञ्जिके।
धान्यायन * पु० हानार्थे शिवार्थेन धान्यमिमितं ... । धन्याके। ... वाचस्पत्ये।
धान्यारि * न० धान्येषु अरिभूतमश्रम् मात्र०। काञ्जिके।
धान्योत्तम * पु० धान्येषूत्तमः। शालिधान्ये।
धामन् * न० धा-मनिन्। गृहे, देहे, रश्मौ, स्थाने, जन्मनि, त्विषि, ज्योतिषि, प्रभावे, स्वर्गे प्रभायां च।
धामनिधि * पु० धामानि तेजांसि निधीयन्तेऽत्र नि+धा+कि। सूर्ये, चन्द्रे च।
धामार्गव * पु० धाम्नोऽग्नौ भाति भा क। ... [... , घोषके च।
धाय्या * स्त्री० धीयते ... । ... धा+ण्यत् नि०। ...
धार * न० धाराभिर्निर्वृत्तम् अण्। "धाराभिः ... " ... इत्युक्ते ... वर्षजले।
धारणा * स्त्री० धृ-णिच्-युच्। ... । धारणा ... ।

धारा * स्त्री॰ धृ-णिच्-अङ्। घटादिच्छिद्रे, सन्ततौ, द्रवद्रव्यस्य सन्तत्या पतने, खड्गादेर्निशितांशे, उत्कर्षे, यशसि, अतिवृष्टौ, समूहे, मेघस्यासारवर्षणे, सदृशे, पुरीभेदे, "अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा" इत्युक्ते अश्वानां गतिपञ्चके, "इतीव धारामवधीर्य्य" इति नैषधम्। सैन्याग्रस्कन्धे च।

धाराकदम्ब * पु॰ धाराकालिकः कदम्बः शाक॰। प्रावृषेण्ये कदम्बभेदे। धारायां कदम्बं समूहो यत्र। मेघे।

धाराट * पु॰ धारार्थमटति धारा धारया वा अटति अच्। चातके, अश्वे, मेघे, मत्तमातङ्गे च।

धाराधर * पु॰ धारां धारयति धृ-णिच्-अच् [illegible]। मेघे "धाराधर! धरावारि धारय" इति चातकाष्टकम्।

धाराफल * पु॰ धारायुक्तानि [illegible] फलान्यस्य। मदनवृक्षे।

धारावाहिन् * त्रि॰ धारया सन्तत्या वहति वह-णिनि। सन्तत्या पातुके, क्रमेणाविच्छेदेन जायमाने च। स्वार्थे कन्। धारावाहिकोऽप्यत्रार्थे।

धारासम्पात * पु॰ धारायाः सम्पातः पतनम्। महावृष्टौ। [तिकाटासिञ्जु

धारास्नुही * स्त्री॰ धारायुता स्नुही शाक॰। त्रिधारायां स्नुह्याम्

धारिणी * स्त्री॰ धृ+णिनि। भूमौ, शाल्मलिवृक्षे च।

धारिन् * पु॰ धृ-णिनि। पीलुवृक्षे। धारणकर्त्तरि त्रि॰।

धार्त्तराष्ट्र * पु॰ धृतराष्ट्रे स्वराज्यदेशे भवः अण्। सर्पभेदे, कृष्णवर्णचञ्चुचरणोपलक्षिते श्वेतकाये हंसे च। धृतराष्ट्रस्यापत्यम् अण्। दुर्योधनादौ "निपतन्ति धार्त्तराष्ट्राः" इति वे[illegible]।

धार्मिक * त्रि॰ धर्मं चरति सततमनुशीलयति ठक्। धर्मशीले।

धार्ष्ट्य * न॰ धृष्टस्य भावः ष्यञ्। निर्लज्जत्वे।

धाव * गतौ शुद्धौ च भ्वादि॰ उभ॰ शीघ्रगतौ सक॰ सेट्। धावति अधाविष्ट। [illegible] पर॰।

धावक * पु॰ धाव-णिच् ण्वुल्। रजके। धाव-ण्वुल्। शीघ्रगे, धावनकर्त्तरि त्रि॰ (स्त्री॰ [illegible])।

धावन * न॰ धाव-ल्युट्। शोधने, शीघ्रगमने च। [च।

धावनि(नी) * स्त्री॰ धाव-अनि वा ङीप्। पृश्निपर्ण्यां, कण्टकार्य्यां।

धि * धृतौ तु॰ पर॰ सक॰ अनिट्। धियति अधैषीत्।

धिक् * अव्य॰ धा-डिकन् वा [illegible]। अनिष्टमध्येऽभिधाने, निर्भर्त्सने, निन्दायाम्, "धिग्धिक् शक्रजितम्" इति नाटकम्। निन्दनीये च। तद्योगे तु [illegible] "[illegible]" इत्यादि।

धिक्कार * पु॰ धिक्-कृ-घञ्। तिरस्कारे।

धिक्कृत * त्रि॰ [illegible]। निन्दिते।

धिक्ष * [illegible] भ्वादि॰ आत्म॰ सेट्। [illegible] [अधिन्वीत्।

धिन्व * [illegible] पर॰ सेट् [illegible]। धिनोति

धिष * [illegible] पर॰ सक॰ सेट्। [illegible]

[illegible]

धिषणा * स्त्री॰ धृष्णोत्यनया धृष-क्यु धिषादेशः। बुद्धौ।

धिष्ण्य * न॰ धृष-ण्य नि॰। स्थाने, गृहे, शक्तौ, नक्षत्रे च। अग्निभेदे, शुक्रे च पु॰। [अधैष्ट। धीत।

धी * अनादरे आराधने च दिवा॰ आत्म॰ सक॰ अनिट्। धीयते

धी * स्त्री॰ ध्यै-क्विप् सम्प्रसारणञ्च। बुद्धौ, ध्याने च।

धीगुण * पु॰ ६त॰। "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा। ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" इत्युक्तेषु अष्टसु बुद्धिधर्मेषु। [तादौ च

धीमत् * पु॰ धीः प्रज्ञात्यस्य मतुप्। बृहस्पतौ। बुद्धिमति,

धीर * अवज्ञायां अद॰ चुरा॰ उभ॰ सक॰ सेट्। नित्यमव॰ अवधीरयति ते अवादिधीरत् त। अवधीर्य्य।

धीर * त्रि॰ धियं राति रा-क, धियमीरयति ईर+अण् धी-क्रन् धैर्य्यान्विते, विनीते, बलयुते, पण्डिते च। ऋषभौषधौ, राज्ञे, बुद्धिप्रेरके बुद्धिसाक्षिणि परमेश्वरे च पु॰। कुङ्कुमे। नायिकाभेदे, काकोल्यां, महाज्योतिष्मत्यां, क्षिरायां विदा च स्त्री॰।

धीराधीरा * स्त्री॰ धीरा च अधीरा च। नायिकाभेदे।

धीरोदात्त * पु॰ नायकभेदे।

धीवर * पु॰ दधाति मत्स्यान् धा+ष्वरच् नि॰। कैवर्त्ते।

धीशक्ति * स्त्री॰ ६त॰ शुश्रूषादिषु अष्टसु धीगुणशब्दे दर्शितेषु बुद्धिगुणेषु।

धीसख * पु॰ धियः सखा टच् समा॰। अमात्ये, धीसचिवे च।

धु * कम्पने स्वादि॰ उभ॰ सक॰ अनिट्। धुनोति धुनीते। अधौषीत् अधोष्ट।

धुक्ष * सन्दीपने भ्वादि॰ आत्म॰ सक॰ सेट्। धुक्षते। अधुक्षिष्ट।

धुत * त्रि॰ धु क्त। त्यक्ते, कम्पिते च। [मार्गे।

धुनि(नी) * स्त्री॰ धुनोति वेतसादीन् धु-निक् वा ङीप्। नद्याम्

धुन्धुमार * पु॰ बृहदश्वनृपपुत्रे, इन्द्रगोपे कीटे, गृहधूमे (भुव) च।

धुर्(रा) * स्त्री॰ धुर्व-क्विप् वा टाप्। चिन्तायाम्, रथाद्यवयवे यानमुखे, भारे च। [प्रवादौ, भारवहे च। धवलवृषे पु॰।

धुरन्धर * त्रि॰ धुरं धारयति धृ-णिच् खच् मुम् ह्रस्वश्च। भारवाहे

धुरीण * त्रि॰ धुरं वहति ख। भारवाहके, श्रेष्ठे च।

धुर्य्य * त्रि॰ वहति यत्। भारवाहके, श्रेष्ठे च।

धुर्व * हिंसे भ्वादि॰ पर॰ सक॰ सेट्। धूर्वति अधूर्वीत्। धूर्णः।

धुवित्र * न॰ क्रु॰ धु-इत्र। यज्ञादौ वह्निधुवने।

धुस्तूर(स्तुर) * पु॰ धूम-क्विप् तुरच् च अस॰ पृ॰ वा ह्रस्वः। (धुतूरा) इति ख्याते वृक्षे। [अधावीत्।

धू * कम्पने भ्वादि॰ उभ॰ सक॰ सेट्। धवति ते अधावीत् अधविष्ट

धू * कम्पने वा चुरा॰ उभ॰ पक्षे तुदा॰ कु॰ पर॰ सक॰ सेट्। धूनयति ते धुवति अदूधुनत् अधुवीत्।

धू * कम्पने स्वा॰ क्र्यादि॰ स्वादि॰ उभ॰ सक॰ सेट्। धूनोति धूते

धुनाति धुनीते। अधावीत् अधविष्ट अधोष्ट "धूनोति चम्पकवनानि धुनोत्यशोकम्" इति "वायुर्विधूनयति" इति च कविरहस्यम्।

धूत * त्रि॰ धू-क्त। भर्त्सिते, कम्पिते, तर्कित्ते, त्यक्ते च।

धूनक * पु॰ धूनयति संधुक्षते वह्निम् धु॰ धू-ण्वुल् नुगागमः। यक्षधूपे (धुना)। [चद्रूधुपत्-त।

धूप * दीप्तौ चुरा॰ उभ॰ अक॰ दीपने सक॰ सेट्। धूपयति-ते

धूप * तापे अक॰ तापने सक॰ भ्वादि॰ पर॰ सेट्। धूपायति अधूपायीत् अधूपीत्। [गन्धद्रव्योत्थे धूमे, तत्साधनद्रव्ये च।

धूप * पु॰ धूपयति रोगान् दोषान् वा धूप-अच्। गुग्गुलुप्रभृति-

धूपन * पु॰ धूप-ल्यु। यक्षधूपे (धुना)।

धूपवृक्ष * पु॰ ६त॰ सरलवृक्षे। धूपोऽङ्गमस्य। धूपाङ्गमप्यत्र।

धूपित * त्रि॰ धूप-क्त वा आयाभावः। अध्वादिगमनेन श्रान्ते, सन्तापिते च। [धूमजे पदार्थे।

धूम * पु॰ धू-मक्। आर्द्रकाष्ठजाते मेघकज्जलयोः कारणे वह्नि-

धूमकेतन * पु॰ धूम केतनो यस्य। वह्नौ। धूम इव केतनः। तारापुच्छाकारे धूमकेतौ उत्पातभेदे।

धूमकेतु * पु॰ धूम इव केतुः। उत्पातरूपेऽग्रभस्वके तारापुच्छभेदे। ६ब॰। वह्नौ। धूमध्वजादयोऽप्यत्र।

धूमगन्धिक * न॰ धूमस्येव गन्धोऽस्त्यस्य ठन्। रोहिषतृणे।

धूममहिषी * स्त्री॰ धूमस्य महिषीव। कुज्झटिकायाम्।

धूमयोनि * पु॰ धूमो योनिरस्य। मेघे, मुस्तके च। ६त॰। वह्नौ, आर्द्रकाष्ठे च। [तद्वति त्रि॰।

धूमल * पु॰ धूमं धूमवर्णं लाति ला-क। कृष्णलोहिते वर्णे।

धूमाभ * पु॰ धूमस्येवाभा यस्य। धूम्रवर्णे। तद्वति त्रि॰।

धूमावती * स्त्री॰ महाविद्याभेदे। [हितं यत्। धूममाचने त्रि॰।

धूम्या * स्त्री॰ धूमानां समूहः पाशादि॰ य। धूमसमूहे। धूमाय

धूम्याट * पु॰ धूम्या इव अटति अट-अच्। (फिङ्गा) पक्षिभेदे।

धूम्र * पु॰ धूमं तद्वर्णं राति रा-क पृ॰। सिह्लके, खरलोमवर्णाभे कृष्णलोहिते वर्णे च। तद्वति त्रि॰।

धूम्रक * पु॰ धूम्र इव कायति कै-क। उष्ट्रे। [भेदे च।

धूम्रलोचन * पु॰ धूम्रे लोचने यस्य। कपोते, महिषासुरसेनापति-

धूम्रवर्ण * पु॰ धूम्रो वर्णोऽस्य। सिह्लके, कृष्णलोहितवर्णे च। तद्युक्ते त्रि॰। [हिते,:तस्यां धूममारत्वात्तथात्वम्।

धूम्रिका * स्त्री॰ धूम्रो वर्णः मारोऽस्त्यस्य ठन्। (सिंश) शिंशपा-

धूर * वधे गतौ च दि॰ आत्म॰ सक॰ सेट्। धूर्यते अधूरिष्ट। धूर्त्तः।

धूर्जटि * पु॰ जट-सङ्घाते इन् धूर्स्थेलोकवद्विस्तीर्णा जटिः सङ्घातोऽस्य। शिवे।

धूर्त * पु॰ धूर्व-धुर-वा क्त। धुस्तूरके, चोरकवृक्षे, नायकभेदे, "धूर्तोऽपरं धावति" इति मा॰ ३प॰। लौहकीटे, विड्लवणे च। द्यूतकारके, वञ्चके च त्रि॰।

धूर्त्तक * पु॰ धूर्त्त इव वञ्चक इव स्वार्थे कन्। शृगाले।

धूर्वह * त्रि॰ धुरं वहति वह-अच् रेफे इणो दीर्घः। भारवाहके धुरन्धरे। धुर्वह इति ह्रस्वयुक्तकल्पनं प्रामादिकम्।

धूलि(ली) * स्त्री॰ धू-लिक् वा ङीप्। रजसि, परागे च।

धूलिध्वज * पु॰ धूलिरिव ध्वजोऽस्य। वायौ।

धूलिपुष्पी * स्त्री॰ धूलिप्रचुरं पुष्पमस्याः ङीप्। केतक्याम्। स्वार्थे कन् ह्रस्वः। अत्रार्थे।

धूलिकदम्ब * पु॰ धूलीनां कदम्बं यत्र। कदम्बवृक्षे, वरुणवृक्षे, तिनिशवृक्षे च। ६त॰। धूलीसमूहे न॰।

धूश(ष)(स) * शोभने चुरा॰ उभ॰ सक॰ सेट्। धूश(ष)(स)यति ते अदूधुश(ष)(स)त् त।

धूसर * पु॰ धू-सर किच्च न णत्वम्। गर्दभे, उष्ट्रे, कपोते, तैलकारे, ईषत्पाण्डुवर्णे, कृष्णश्वेतवर्णे, शुभ्रपीतवर्णे च। तत्तद्वर्णवति त्रि॰। [हस्तिपिप्पल्याम्।

धूसरपत्रिका * स्त्री॰ धूसरं पत्रमस्त्यस्याः ठन्। (हातिशुँडा)

धृ * पतने भ्वादि॰ आ॰ अक॰ अनिट्। धरते अधृत।

धृ * स्थितौ अक॰ धृतौ सक॰ भ्वादि॰ उभ॰ अनिट्। धरति ते अधार्षीत् अधृत।

धृ * स्थितौ अक॰ धृतौ॰ सक॰ तुदा॰ आ॰ अनिट्। म्रियते अधृत।

धृ * धारणे, चुरा॰ उभ॰ सक॰ अनिट्। धारयति ते अदीधरत् त।

धृज * गतौ भ्वादि॰ पर॰ सक॰ सेट् इदित्। धृञ्जति अधृञ्जीत्।

धृतराष्ट्र * पु॰ चन्द्रवंश्ये दुर्योधनपितरि नृपभेदे, नागभेदे, पक्षिभेदे च।

धृति * स्त्री॰ धृ-क्तिन्। तुष्टौ, धारणे, यागे, विष्कम्भादिके अष्टमे योगे, सुखे, धारणायाम्, अवसादेऽपि शरीरादेः स्तम्भनशक्तौ, अष्टादशाक्षरपादके छन्दोभेदे, अष्टादशसङ्ख्यायाञ्च।

भावे क्तिन्। शासने। [नीतिमहानारत्नहितोपदेशादौ शास्त्रे।

नीतिशास्त्र न० नीतिबोधकं शास्त्रं शाक०। गुरुशुक्रकामन्दकप्रभृ-

नीरज ० न० निर्गत रजो यस्मात् वा जनादि-ड वा मूल० [illegible]

व दीर्घः। जलजमात्रे, पद्मे, मेघे, चन्द्रे, रैवतोनद्यां च।

नीड ० पु० नी-ड। कदम्बे, वम्बूके, नीलाशोकवृक्षे च।

नीर ० न० नी-रक्, निर्गतं रजो यस्मात् वा "स्फायितञ्चि" इति सूत्रेण रक्प्रत्ययः। जले, रसे च।

नीरज ० न० नीरे जायते जन-ड। पद्मे, मुक्तायां, कुष्ठौषधौ च। जलजातमात्रे त्रि०। जलजन्तुभेदे पु० (उदविड़ाल)।

नीरद ० पु० नीरं ददाति दा-क। मेघे, मुस्तके च। निर्गतो रदो दन्तो यस्मात्। दन्तशून्ये त्रि०।

नीरन्ध्र ० त्रि० निर्गतं रन्ध्रं यस्मात्। सान्द्रे, घने च।

नीरस ० पु० निर्गतः रसो यस्मात्। दाडिमे। रसहीने त्रि० "नीरसतरुरिह" इत्युद्भटः।

नीराजन ० न० [illegible] [illegible]

[illegible]

चन्दनभेदे च। मूलके न०। [illegible]

नीलकन्द ० पु० नीलः कन्दो मूलमस्य। विषकन्दे, [illegible]

नीलकुरण्टक ० पु० कर्म०। नीलझिण्ट्याम्। नीलझिण्टीवृक्षः

नीलताल ० पु० तलमेव तालं नीलं तालमस्य। हिन्ताले, [illegible] वृक्षे च।

नीलदूर्वा ० स्त्री० कर्म०। हरितवर्णदूर्वायाम्। [illegible]

नीलध्वज ० पु० नीलाकारो ध्वज इव। तालवृक्षे। [illegible]

नीलनिर्यासक ० पु० नीलवर्णो निर्यासो यस्य कप्। नीलासन वृक्षे। नीलवर्णनिर्यासे पु०। ६त०। तद्वति त्रि०।

नीलपत्र ० न० नीलं पत्रं पत्रं पुष्पदलं वा (पापड़ि) यस्य। नील वर्णे कुमुदे, गुण्डतृणे, अश्मन्तकवृक्षे, नीलासनवृक्षे, दाडिमे। कर्म० नीलवर्णपत्रे न०। ६त०। तद्वति त्रि०।

नीलपुष्प ० पु० नीलं पुष्पमस्य। नीलभृङ्गराजे, नीलाम्लाने। ग्रन्थिपर्णे न०। अपराजितायां स्त्री०। अतसी (मसिना) टाप्। स्वार्थे कन् तत्रैवार्थे।

नीलफला ० स्त्री० नीलं फलं यस्याः। जम्बूवृक्षे।

नीलमणि ० पु० कर्म०। (नीलम) इन्द्रनीलमणौ।

नीलमाष ० पु० कर्म०। माषभेदे (कालकलाइ)।

नीललोहित ० पु० नीलः कण्ठे लोहितः केशेषु। शिवे, [illegible] वर्णभेदे, [illegible] वर्णे च। तद्वति त्रि० कर्म०। [illegible] स्त्री०। [illegible]

नीलवर्षाभू ० पु० वर्षासु भवति भू+क्विप् कर्म०। [illegible]

नीलवल्ली ० स्त्री० कर्म०। [illegible] (परगाछा)।

नीलवासस् ० नीलं वासो वस्त्रं कर्म० नीलम् [illegible] शाक०। नीलवस्त्रं [illegible] "नीलीरक्तं [illegible]" [illegible] नीलवसनादयोऽप्यत्र। ६ब०। तद्वति त्रि०।

नीलवृन्त ० न० नीलं वृन्तमस्य। तूले।

नीलवृन्ता ० स्त्री० नीलवर्णं [illegible] पुष्पं फलं च [illegible] [illegible]

[illegible]

नीवाक * पु० नियतं वाको वचनं वच-घञ् दीर्घः। महार्घहेतो-
धान्यसञ्चयादरे। [क्रादि कडङ्गरीयैः" इति रघुः।
नीवार * पु० नि+वृ-घञ् दीर्घः। तृणधान्यभेदे "नीवारपा-
नीवि(वी) * स्त्री० निव्ययति निवीयते वा नि+व्ये-इन् यलोप-
दीर्घौ ङिष वा ङीप्। वणिजां मूलधने, कटीवस्त्रबन्धे च
"नीविं प्रति प्रणिहिते तु करे" इति साहित्यदर्पणे ३परि०।
नीवृत् * पु० स्त्री० नियतं वर्त्ततेऽत्र नि+वृत क्विप् दीर्घः।
देशे, जनपदे च।
नीशार * पु० नितरां शीर्य्यते हिमानिलावनानेन वा नि+शॄ-घञ्
दीर्घः। हिमानिलनिवारणे प्रावरणे, काण्डपटे च (कानात्)।
नीहार * पु० निह्रियते नि+हृ-घञ् दीर्घः। घनीभूते शिशिरे,
हिमे च।
नु * अव्य० नुदति नौति वा मित० डु। विकल्पे, अनुनये, अतीते,
प्रश्ने, हेतौ, वितर्के, अपमाने, अपदेशे, अनुतापे च। [णत्वम्।
नुड * वधे तुदा० कुटा० पर० सक० सेट्। नुडति अनुडीत्। न
नुति ० स्त्री० नु-क्तिन्। स्तवे, प्रणामे च।
नुत्त(न्न) * त्रि० नुद क्त तस्य वा नः। प्रेरिते, क्षिप्ते च।
नूतन * त्रि० नव एव नव+तन नवस्य नूः। अभिनवे, नवीने। न।
पूर्वोऽप्यत्र। [इन्द्रे।
नूद * पु० नुदति पापं क प० दीर्घः। ब्रह्मदारुवृक्षे ...
नूनम् * अव्य० नु+ऊन-अमि। वितर्के, निश्चिते, स्मरणे, वाक्य-
पूरणे, अनुमेयाधोगतिने च। [पादाङ्गदे।
नूपुर * न० नू-क्विप् नुवि पुरति पुर-अग्रगमने क। (नेपुर)
नृ * पु० नी-ऋन् डिच। मनुष्ये, पुरुषे च। जातौ ङीप्। नारी।
नृग * पु० इक्ष्वाकुवंश्ये नृपभेदे।
नृकरोटिका ० स्त्री० ६त०। नरकपाले।
नृचक्षस् * पु० नॄन् अहे पश्यति भक्ष्यत्वेन चक्ष-असुन् न ख्यादेशः।
राक्षसे। [नर्त्तयति।
नृत * नर्त्तने दिवा० पर० अक० सेट्। नृत्यति अनर्त्तीत् नर्त्तयति
नृत्त(त्य) * न० नृत-क्त क्यप् वा। तालमानयुक्ते सविलासाङ्गवि-
क्षेपरूपे नर्त्तने। [अवेत्" इत्युक्ते राजविशेषे, राजमात्रे च।
नृप * पु० नॄन् पाति पा-क। "चतुर्योजनपर्य्यन्तमधिकारी नृपो
नृपकन्द * पु० कन्दानां नृप इव राजद०। राजपलाण्डौ।
नृपति * पु० ६त०। कुबेरे, राजनि च। [इन्द्रादयोऽप्यत्र।
नृपद्रुम * पु० द्रुमाणां नृपः राजद०। राजवृक्षे, आरग्वधे च। राज-
नृपप्रिय * पु० ६त०। (वेङ्घरास) वंशभेदे तस्य दुर्गवेष्टनकारित्वा-
त्प्रियत्वम्। राजपलाण्डौ, शालिधान्ये, आम्रे च। राज-
वल्लभे त्रि०। केतक्यां, राजमुद्गीयां स्त्री०।
नृपलिङ्गधरा * स्त्री० नृपलिङ्गं धरं यस्याः। शाल्मलीवृक्षे?।
नृपसभ * न० नृपाणां सभा छाया संज्ञात्वात्। राजसमूहे, राजा
सदःसमाजाद्यास्।

नृपोचित * पु० नृपेषु उचितः। राजमाषे। राजयोग्ये त्रि०।
नृयज्ञ * पु० नृणां यज्ञः। अतिथिपूजने। नरयज्ञादयोऽप्यत्र।
नृवराह * पु० ना वराहः। अंशाभ्यां मनुष्यवराहाकृतौ भगवद-
तारभेदे। [परद्रोहिणि च।
नृशंस * त्रि० नॄन् शंसति शन्सु+हिंसायाम् अण्। घातुके, क्रूरे,
नृसिंह * पु० ना सिंहः। अंशाभ्यां मनुष्यसिंहाकृतियुक्ते भगवतो-
ऽवतारभेदे।
नॄ * नीतौ क्र्यादि० प्वादि० पर० सक० सेट्। नृणाति अनारीत्।
अणोपदेशत्वान्न णत्वम्। [नरयति। न णत्वम्।
नॄ * नये भ्वादि० पर० सक० सेट् घटा०। नरति अनारीत्। णिच्
नेजक * पु० निज-शौचे ण्वुल्। रजके। शोधकमात्रे त्रि०।
नेद * त्रि० नी-ष्ट्रन् प्रध्वौ, निर्वाहके नायके, प्रवर्त्तके, नायके च।
स्त्रियां ङीप्। निम्बवृक्षे पु०।
नेत्र * न० नयति नीयते वाऽनेन ष्ट्रन्। मन्थनदामनि, वस्त्रभेदे,
वृक्षमूले, रथे, जटायाम्, नाड्याम्, शलाकायाम्, चक्षुषि च।
प्रापयितरि, नयनसाधने, प्रवर्त्तके च त्रि०।
नेत्रच्छद * पु० नेत्रं छाद्यते अनेन छद+णिच्-घ ह्रस्वः। नेत्रपि-
धायके चर्ममये नेत्रपुटे।
नेत्रपर्य्यन्त * पु० नेत्रयोः पर्य्यन्तः कोणः सीमा। अपाङ्गे।
नेत्रमल * न० ६त०। चक्षुर्मले, दूषिकायाम् (पिचुटि)।
नेत्ररञ्जन * न० नेत्रे रज्यते अनेन रञ्ज-करणे ल्युट्। कज्जले।
नेत्ररोगहन् * पु० नेत्ररोगं हन्ति हन-क्विप्। वृश्चिकाल्यक्षुपे तस्य
हि नेत्ररोगनाशकत्वं वैद्यके प्रसिद्धम्।
नेत्राम्बु * न० ६त०। चक्षुर्जले अश्रुणि। [इक्षुभेदे।
नेत्रोपमफल * पु० नेत्रे उपमा यस्य तादृशं फलमस्य। (बादाम)
नेत्रौष(धि)धी * स्त्री० ६त० वा ङीप्। अजशृङ्ग्याम् ...।
नेदिष्ठ * त्रि० अतिशयेन अन्तिकः इष्ठन् नेदादेशः। अतिनिकटस्थे।
नेदीयस् * त्रि० अतिशयेन अन्तिकः ईयसुन् नेदादेशः। अत्यन्तनिकटे।
पश्चे। [कादम्बिनी...
नेपथ्य * न० नी विच् नेः पथ्यम्। भूषणे, वेशे, वेशस्थाने, न ट०
नेपाल * पु० हिमालयस्थे "अष्टौ राष्ट्राः समाख्याताः ...
नेपालदेशो देवेशि" इत्युक्ते देशभेदे।
नेपालकम्बल * पु० ६त०। कुथाख्ये वस्त्रभेदे।
नेपालनिम्ब * पु० ६त०। भूनिम्बे ..., निम्बभेदे च।
नेपालमूलक * न० ६त०। ... मूलभेदे।
नेपालिका * स्त्री० नेपाले भवा ठन्। मनःशिलायाम्।
नेम * पु० नी-मन्। अवधौ, काले, अर्द्धे, प्राकारे, ..., ...,
गर्त्ते, ... च। सर्वादिः ...।
नेमि * पु० नी-मि। तिन्तिडीवृक्षे, कूपसमीपे रज्जुधारणार्थे
विन्यस्तकाष्ठे, चक्रान्ते च। ...
... कूपसमीपे ... स्त्री० ...

नैमिश * न० ब्रह्मणा सृष्टस्य चक्रस्य नेमिः शीर्यतेऽत्र शृ ड। नैमिशारण्ये क्षेत्रे। स्वार्थेऽण्। नैमिशमप्यत्र।

नैकभेद * त्रि० न एके अनेके नशब्देन सुप्सुपेति स० नैके भेदा यस्य। अनेकप्रकारे उच्चावचे।

नैगम * पु० निगम एव प्रज्ञाद्यण्। नीत्याम्, उपनिषदि ब्रह्म-विद्यायां, तत्प्रतिपादके वेदान्ते च। निगमे भवः अण्। वणिग्जने, नागरे च। [उत्तमायां गतिः।

नैचिकी * स्त्री० नीचैरयन्त्रं चरति ठक् टिल्लोपः गो० ङीप्।

नैत्य(त्यि)क * न० नित्यमनुष्ठेयम् कन् ठन् वा। नित्यानुष्ठेये, "नैत्य(त्यि)कान्ते भुजिक्रिया" इति स्मृतिः।

नैपुण्य(ण) * न० पु० निपुणस्य भावः ष्यञ् अण् वा। दक्षतायाम्।

नैमित्तिक * त्रि० निमित्तादागतम् ठक्। पुत्रजन्मादिनिमित्तमाश्रित्य विहिते जातेष्ट्यादौ "नित्यं नैमित्तिकं चरेत्" इति स्मृतिः।

नैमित्तिकलय * पु० कर्म० "चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः" इत्युक्ते ब्रह्मदिनावसाने जगतां प्रलये। [त्वम्।

नैमिष * न० तीर्थभेदे निमिषेण विष्णुना तत्रासुरविनाशात् तथा-

नैमेय * पु० नि+मि-यत् स्वार्थेऽण्। विनिमये परीवर्त्ते।

नैयग्रोध * न० न्यग्रोधस्य विकारः अण् तस्य नलुक्। वटफलादौ।

नैयायिक * त्रि० न्यायं वेत्त्यधीते वा ठक्। न्यायज्ञे।

नैरन्तर्य * न० निरन्तरस्य भावः ष्यञ्। अविच्छेदे।

नैराश्य * न० निराशस्य निष्कामस्य भावः ष्यञ्। आशाशून्यत्वे "नैराश्यं परमं सुखम्" इति पुराणम्।

नैर्ऋती * स्त्री० निर्ऋतेरियम् अण्। दक्षिणपश्चिमायां विदिशि "नैर्ऋतीं दिशमाश्रयेत्" इति स्मृतिः।

नैर्मल्य * न० निर्मलस्य भावः ष्यञ्। निर्मलत्वे, स्वच्छत्वे। "विषयेष्वतिसरागो मानसो मल उच्यते। तेष्वेव हि विरागस्तु नैर्मल्यं समुदाहृतम्॥" इत्युक्ते विषयवैराग्ये च।

नैवेद्य * न० निवेद निवेदनमर्हति ष्यञ् नि+विद-णिच् कर्मणि यत् स्वार्थे अण् वा। "निवेदनीयं द्रव्यन्तु नैवेद्यमिति कथ्यते" इति स्मृत्युक्ते देवतोद्देशेन त्यक्तव्ये द्रव्ये।

नैषध * पु० निषधानां जनपदानामयम् अण्। नलनामनि भूपतौ, तदधिकृत्य कृते ग्रन्थे न०। तद्देशभवे, तत्सम्बन्धिनि च त्रि०।

नैष्कर्म्य * न० निष्कर्मणो भावः। विधिना सर्वकर्मत्यागे "न कर्मणामनारम्भात् नैष्कर्म्यम्" इति गीता।

नैष्किक * पु० निष्कं टङ्कं टङ्कशालायां तदगारे वा नियुक्तः ठक्। कोषाध्यक्षे, टङ्कशालायां नियुक्ते च।

नैष्ठिक * पु० निष्ठा मरणावधिः प्रयोजनमस्य ठक्। ब्रह्मचर्ये दार्ढ्येन मृत्युपर्यन्तं ब्रह्मचारिभेदे। नियततया स्थितः निष्ठा तत्र भवः ठक्। निष्ठायां स्थितौ भवे त्रि०। स्त्रियां ङीप्। नैष्ठिकी।

नैसर्गिक * त्रि० निसर्गेण स्वभावेन निर्वृत्तः ठक्। स्वाभाविके।

नैस्त्रिंशिक * त्रि० निस्त्रिंशः प्रहरणमस्य ठक्। खड्गधारिणि।

नो * अव्य० नह-डो। अभावे।

नोचेत् * अव्य० नो च चेत् च द्व०। निषेधे।

नोपस्थातृ * त्रि० न० उपतिष्ठति स्था+तृच्। दूरस्थे। "शीते ऽस्वादौ क्रियाद्वेषो नोपस्थाता निरुत्तरः" इति स्मृत्युक्ते दृष्टिभेदे। [कन्। नौकायाम्।

नौ * स्त्री० नुद डौ। जलोपरि प्लवनसाधने तरणिभेदे। स्वार्थे

नौकादण्ड * पु० ६त०। नौकायाः चालनार्थं पार्श्वद्वयस्थे काष्ठे (दाँड़)। [ ]

न्यक्कार * पु० न्यक्+कृ-घञ्। नीचकरणे, तिरस्कारे च। [त्रि।

न्यग्रोध * पु० न्यक् रुणद्धि रुध-अच्। वटवृक्षे, शमीवृक्षे, बाहुद्वयविस्तारकृतव्यामरूपपरिमाणे (वाम), सर्वाधिवाससुखितिस्थिते विष्णौ, विषपर्ण्यां, मोहनोपधौ च। मूषिकपर्ण्यां स्त्री० ङीप्।

न्यग्रोधपरिमण्डला * स्त्री० "स्तनौ सुकठिनौ यस्या नितम्बे विशालता। मध्ये क्षीणा भवेद् या सा न्यग्रोधपरिमण्डला" इत्युक्तलक्षणायां नार्य्याम्। [मुनिभेदे च।

न्यङ्कु * पु० नितरामञ्चति नि+अन्च-उ कुत्वम्। मुनिभेदे, वर्गी

न्यङ्कुभूरुह * पु० न्यङ्कुरिव भूरुहः। स्योनाकवृक्षे। तस्य वर्गीकारत्वात्तथात्वम्।

न्यच् * त्रि० निम्नमञ्चति नि-अन्च+क्विन्। नीचे निम्ने।

न्यञ्चित * त्रि० नि+अन्च-क्त। अधःक्षिप्ते।

न्यस्त * त्रि० नि+अस-क्त। क्षिप्ते, त्यक्ते, विसृष्टे, निहिते च।

न्याद * पु० नि+अद-घञ् न घसादेशः। भोजने।

न्याय * पु० नि+इ-इन् वा घञ्। उचिते, गौतमोक्ते शास्त्रे, तदुक्ते प्रतिज्ञादिपञ्चकप्रतिपादकवाक्यविशेषे, नीतौ, सदाचारे, भोगे, युक्तौ, युक्तिमूलदृष्टान्तभेदे च।

न्याय्य * त्रि० न्यायादनपेतं यत्। उचिते, युक्तियुक्ते च।

न्यास * पु० नि+अस कर्मणि, भावे वा घञ्। स्थाप्यद्रव्ये (गच्छित), अर्पणे, विन्यासे, सन्न्यासे च। [प्रतिबिम्बे च स्त्री।

न्युङ्ख * पु० नि+उङ्ख-ष्यञ्। सामवेदाङ्गेषु षट्सु प्रणवेषु। मनोज्ञे,

न्युब्ज * त्रि० नि+उब्ज-घञ् कुत्वाभावः। अधोमुखे, कुब्जे (कुँजो), यज्ञपात्रभेदे (दर्भमयस्रुचि) पु०। कर्मरङ्गफले न०।

न्यून * त्रि० न्यूनयति नि+ऊन-परिमाणे अच्। ऊने, गर्ह्ये च।

प

प * पु० पत-पा-वा ड। पवने, पातरि, पर्णे, पाने च।

पक्कण * पु० पचति पच क्विप् कण-अप् कर्म०। शबरालये।

पक्ष्मन् * त्रि० पच-स्विद् ततो मन्। पार्श्वनिवृत्ते।

* त्रि॰ पच क्त तस्य वः। परिणते, दृढे, विनाशोन्मुखे, क्षत- [र्ण रि त्रि॰।
पाके च।

कृत् * पु॰ पक्वं करोति कृ क्विप् तुक्॰। निम्बवृक्षे। पाकक-

* परिग्रहे चुरा॰ उभ॰ सक॰ सेट्। पक्षयति ते अपपक्षत् त।

* परिग्रहे अद॰ चुरा॰ उभ॰ सक॰ सेट् पक्षं भ्वादिश्च पर॰।
पक्षति पक्षयति ते अपपक्षत् त अपक्षीत्।

* पु॰ पक्ष-अच्। शुक्लकृष्णप्रतिपदादिपञ्चदशान्तपञ्चदशति-
थ्यात्मके काले, खगानां पतत्रे (पाखा), शरस्य पुङ्खे पत्रे।
केशात् परः समूहार्थे, यथा केशपक्ष इत्यादि। पार्श्वे, गृहे,
न्यायोक्ते सन्दिग्धसाध्यवति पदार्थे, यथा पर्वतो वह्निमान्।
विरोधे, बले, सहाये, सख्यौ, चुल्लीरन्ध्रे, राजकुञ्जरे, अंशे, वलये,
समूहे, पिच्छे, देहार्द्धे च। [सहाये।

क * पु॰ पक्ष इव कायति कै-क। पार्श्वद्वारे (खिड़की)।

ता * स्त्री॰ पक्षस्य भावः। न्यायोक्ते अनुमानेच्छाभावसमा-
नाधिकरणे साध्यवत्तानिश्चयाभावे यत्र वह्न्यादिकं साध्यते तत्र
धर्मिणि वह्निमत्त्वनिश्चयाभावे एव पक्षत्वं तत्र तन्निश्चयसत्त्वे
तु अनुमानेच्छासत्त्व एव पक्षता नेतरथेति न्याये स्थितम्।

ति * स्त्री॰ पक्षस्य मूलम् ति। पक्षारम्भके प्रतिपदि तिथौ,
खगानां पक्षस्य मूले च (डाना)।

द्वार * न॰ पक्षे पार्श्वे द्वारम्। (खिड़की) पार्श्वस्थे द्वारे।

पात * पु॰ पक्षे अन्याय्यसाहाय्ये पातः अभिनिवेशः। अन्या-
य्यसाहाय्ये।

पातिता * स्त्री॰ पक्षपात+अस्त्यर्थे इनि तस्य भावः तल्।
साहाय्यकरणाभिनिवेशे, पक्षाभ्यां पतने च "न परं पथि
पक्षपातिता" इति नैषधम्।

पक्षान्त * पु॰ पक्षस्यान्तो यत्र। अमावास्यायां पूर्णिमायाञ्च तिथौ।

पक्षिणी * स्त्री॰ पक्षतुल्ये अहनी विद्येते अस्या इनि। आगा-
मिवर्त्तमानदिनाभ्यां युक्तायां रात्रौ।

पक्षिन् * पु॰ पक्ष+अस्त्यर्थे इनि। खगे, विहङ्गे च।

पक्षिल * त्रि॰ पक्षः साहाय्यमस्त्यर्थे इलच्। साहाय्यकारके। न्याय-
भाष्यकारे वात्स्यायनमुनौ पु॰।

पक्ष्मन् * न॰ पक्ष-मनिन्। नेत्रावरके लोम्नि, पद्मादेः केशरे,
सूत्रादेरल्पभागे, खगादेः पक्षे च।

पङ्क * पु॰ न॰ पचि अच् नि॰ कुत्वम्। कर्दमे, पापे च।

पङ्क(ङ्के)ज * न॰ पङ्के जायते जन-ड पक्षे अलुक् समा॰। पद्मे,
सारसपक्षिणि च। पङ्कजन्मादयोऽप्यत्र। [सारसपक्षिणि च।

पङ्केरुह * न॰ पङ्के रोहति रुह क तत्पु॰ वा अलुक् समा॰। पद्मे,

पङ्कमण्डूक * पु॰ पङ्के मण्डूक इव। शम्बूके।

पङ्कार * पु॰ पङ्कमृच्छति ऋ अण् उप॰ स॰। शैवले, सेतौ च।

पङ्किल * त्रि॰ पङ्क+अस्त्यर्थे इलच्। कर्दमवति देशे।

पङ्क्ति * स्त्री॰ पचि+क्तिन्। एकजातीयवस्तूनां श्रेणौ, दशाक्षर-

पादके दशाक्षरपादके च छन्दोभेदे, दशसंख्यायाञ्च, तेन पङ्-
क्तिरथ इति दशरथसंज्ञा। पृथिव्यां, गौरवे, पाके, प्रपञ्चे च।

पङ्क्तिदूषक * पु॰ पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानां विप्राणा-
मावलिं दूषयति दुषि-णिच्-ण्वुल् वा उप॰ स॰। अपाङ्क्तेये
श्राद्धादौ अभोजनीये कितवादौ। विस्तरस्तु वाचस्पत्ये।

पङ्क्तिपावन * पु॰ पङ्क्तिं श्राद्धे भोजनार्थमुपविष्टानामावलिं
पुनाति पू-णिच्-ल्यु। श्राद्धभोजनार्थमुपविष्टानां पङ्क्तिपवि-
त्रताकारके विप्रादिविशिष्टादौ। विस्तरस्तु वाचस्पत्ये।

पङ्क्तिबीज * पु॰ पङ्क्तिभूतानि बीजानि यस्य। बर्बुरवृक्षे।

पङ्गु * त्रि॰ खञ्जि-कु-पङादेशः नुक् च। गतिहीने। स्त्रियां ऊङ्।
शनैश्चरे पु॰। [पचक पक्तिमः पचा।

पच * पाके भ्वादि॰ उभ॰ सक॰ अनिट्। पचति ते अपाक्षीत्

पच * व्यक्तीकारे भ्वादि॰ आत्म॰ अनिट्। पचते अपक्त। पेच।

पच * विस्तारे चुरा॰ उभ॰ सक॰ सेट् इदित्। पञ्चयति ते अप-
पञ्चत् त।

पचनी * स्त्री॰ पच्यन्तेऽनया ल्युट्। वनबीजपूरके जम्बीरभेदे।

पचम्पचा * स्त्री॰ पचति पच+ अच पू॰ मुम् निपात॰। दारुहरि-
द्रायाम्।

पज * आवरणे भ्वादि॰ पर॰ सक॰ सेट् इदित्। पञ्जति अपञ्जीत्।

पज्र * पु॰ स्त्री॰ पद्भ्यां ब्रह्मचरणाभ्यां जायते जन ड। शूद्रे,
"पद्भ्यां शूद्रोऽजायत" इति श्रुतिः। [स्त्रियां ङीष् च।

पञ्चक * न॰ पञ्चानामवयवम् कन्। पञ्चसंख्यायां, ज्योतिषोक्ते

पञ्चकषाय * पु॰ न॰ कर्म॰ "जम्बूशाल्मलिवाट्यानां बकुलं बदरं तथा।
कषायाः पञ्च विज्ञेयाः" इत्युक्तेषु पञ्चसु कषायेषु।

पञ्चकोल * न॰ "पञ्चकोलं कणामूलं कणा चव्याग्निनागरैः" इत्युक्ते
पाचनभेदे।

पञ्चकोष * पु॰ पञ्च कोषाः इवावरकाः यस्य। वेदान्तोक्ते अन्नमया-
दिपञ्चकोषाभिमानिनि जीवे। कर्म॰ द्वि॰। पञ्चसु अन्नमयादि-
कोषेषु तु देहादिषु न॰।

पञ्चगव्य * न॰ [illegible]

"[illegible]" [illegible]

पञ्चसु।

पञ्चचूडा * स्त्री॰ पञ्च चूडा यस्याः। अप्सरोभेदे।

पञ्चजन * पु॰ [illegible]

भेदे च [illegible]

पञ्चतन्त्र * पु॰ न॰ "[illegible]

[illegible]" इति [illegible]

[illegible] च।

पञ्चतप * त्रि॰ पञ्च [illegible]

[illegible]

[illegible]।

पञ्चतन्मात्र ● न० तदेव तन्मात्रं पञ्चानां तन्मात्राणां समाहारः। सांख्यादिसिद्धेषु महाभूतकारणीभूतेषु शब्दस्पर्शरूपरसगन्धमात्राधारेषु पञ्चसु सूक्ष्मभूतेषु।

पञ्चतय ● न० पञ्चानामवयवः पञ्चावयवा येषां वा तयप्। पञ्चसंख्यायाम्। तद्युक्ते त्रि०।

पञ्चत्व ● न० पञ्चानां पृथिव्यादिभूतानां भावः त्व। मरणे, तत्र हि देहारम्भकभूतानां स्वस्वांशस्य स्वेषु स्वेषु प्रवेशः इति तस्य पञ्चरूपता। तल्। पञ्चताप्यत्र।

पञ्चदश ● त्रि० पञ्चदशानां पूरणः डट्। येन पञ्चदशसंख्या पूर्य्यते तस्मिन्। स्त्रियां ङीप्। सा च चन्द्रस्य पक्षयोः पञ्चदशकलाक्रियारूपायां पूर्णिमायाममावास्यायाञ्च तिथौ, विद्यारण्यप्रणीते वेदान्तग्रन्थभेदे च।

पञ्चधा ● अव्य० पञ्चप्रकारम् पञ्चन्+धाच्। पञ्चप्रकारे।

पञ्चन् ● त्रि० पचि-विस्तारे कनिन्। (पाँच) संख्यायुक्ते।

पञ्चनख ● पु० स्त्री० पञ्च नखा यस्य। हस्तिनि, व्याघ्रे च। पञ्चनखयुक्ते त्रि०। ते च शशकादयः "शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः। भक्ष्यान् पञ्चनखेष्वाहुः" इति मनुः।

पञ्चनद ● पु० पञ्च नद्यो यत्र। "वितस्ता इरावती चन्द्रभागा शतद्रु [illegible] विपाशा च तेन पञ्चनदः स्मृतः" इत्युक्ते (पञ्जाब) इति ख्याते देशभेदे। पञ्चानां नदीनां समाहारः। काशीखण्डोक्तासु "किरणा धूतपापा च पुण्यतोया सरस्वती। गङ्गा च यमुना चैव पञ्चनद्यः प्रकीर्त्तिताः" इत्युक्तासु बिन्दुमाधव-[illegible] पञ्चसु नदीषु।

पञ्चपर्वी ● स्त्री० [illegible] पर्वाणि [illegible]। (गोरक्षपा-[illegible]) [illegible]।

पञ्च[illegible] ● न० समा० द्वि०। "[illegible]-[illegible]। [illegible]" इत्युक्ते [illegible] "[illegible]" [illegible]" इति [illegible] [illegible] [illegible]।

[illegible]

[illegible]

पञ्चमहायज्ञ ● पु० महान् यज्ञः महायज्ञः ततः कर्म०। गृहस्थकर्त्तव्येषु स्वाध्यायपाठाग्निहोत्रयागातिथितर्पणबलिकर्माख्येषु पञ्चसु पञ्चसूनादोषापनोदकेषु कर्मसु। पञ्चयज्ञशब्दोऽप्यत्रार्थे।

पञ्चमास्य ● पु० पञ्चमः स्वरभेदः आस्ये तदेकदेशकण्ठे यस्य। कोकिले, "पञ्चमं रौति कोकिलः" इति हि स्मर्य्यते।

पञ्चमूल ● न० समा० द्वि०। [illegible] कारिकाः। पञ्चमूलमिति ख्यातम्" इत्युक्ते पाचनभेदे।

पञ्चरत्न ● न० समा० द्वि०। "विद्रुमं हीरकं नीलपद्मरागश्च मौक्तिकम्। पञ्चरत्नमिदं प्रोक्तम्" इत्युक्तेषु पञ्चसु रत्नेषु।

पञ्चरात्र ● न० "रात्रन्तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्। [illegible] रात्रमिति ख्यातम्" इत्युक्ते पञ्चज्ञानसाधने नारदादुक्ते भेदे। [[illegible]

पञ्चलाङ्गलक ● न० पञ्चभिर्लाङ्गलैः स्वर्णमयैः कायति कै-क. [illegible]

पञ्चलोहक ● न० लोहं धातुः समा० द्वि०। "सुवर्णं रजतं [illegible] रङ्गं नागं तथैव च। पञ्चलोहमिति प्रोक्तम्" इत्युक्ते [illegible]

पञ्चवटी ● स्त्री० वटो वृक्षः समा० द्वि०। "[illegible] वटधात्र्यशोककः। [illegible] पञ्चवटीत्युक्ता" इत्युक्तेष्वश्वत्थादिषु पञ्चसु वृक्षेषु, रामायणप्रसिद्धे वनस्थानभेदे च।

पञ्चवक्त्र ● पु० पञ्च वक्त्राणि यस्य। शिवे, रुद्रावतारे [illegible], विस्तारे पच् पचं वक्त्रमस्य। सिंहे। पञ्चास्य[illegible]ऽप्यत्र।

पञ्चवल्कल ● न० समा० द्वि०। "न्यग्रोधोडुम्बराश्वत्थ[illegible] वल्कलम्। पञ्चवल्कलमित्युक्तम्" इत्युक्तेषु वटादिवल्कलेषु।

पञ्चबाण ● पु० पञ्च बाणा यस्य। "सम्मोहनोन्मादनौ च [illegible] स्तापनस्तथा। स्तम्भनश्चेति कामस्य बाणाः पञ्च प्रकीर्त्तिताः" इत्युक्तबाणयुक्ते कामे। पञ्चशरादयोऽप्यत्र।

पञ्चशस्य ● न० समा० द्वि०। "धान्यमुद्गतिला माषाः [illegible] वा। पञ्चशस्यमिति प्रोक्तम्" इत्युक्तेषु [illegible]।

पञ्चशाख ● पु० पञ्च शाखा अङ्गुलयो यत्र। हस्ते।

पञ्चशिख ● पु० मुनिभेदे, "वोढुः पञ्चशिखस्तथा" इति तर्पण[illegible]

पञ्चसुगन्धिक ● न० "कर्पूर[illegible] केन। समांशभागेन च योजितेन मनोहरं पञ्चसुगन्धिकं स्यात्" इत्युक्तेषु मिलितसुगन्धिद्रव्येषु।

पञ्चसूना ● स्त्री० पञ्चसूनाः प्राणिवधस्थानानि। "[illegible] [illegible] [illegible]" [illegible] पञ्च [illegible]।

[illegible] ● पु० पञ्च [illegible]। [illegible]

वैकं प्रदर्शितायां स्वर्गमेघादिषु पञ्चसु स्थानेषु अग्नित्वेनोपासनरूपायां विद्यायाम् "पञ्चाग्नयो ये च त्रिणाचिकेताः" इति श्रुतिः। पञ्चाग्निमति च।

पञ्चाङ्ग * न॰ समा॰ द्वि॰। "त्वक् पत्रं कुसुमं मूलं फलञ्चैकस्य शाखिनः। पञ्चस्थं तु पञ्चाङ्गम्" इत्युक्ते एकवृक्षस्थत्वगादिषु पञ्चसु, "तिथिर्वारश्च नक्षत्रं योगः करणमेव च। पञ्चाङ्गमेतदिष्टं यम्" इत्युक्तेषु तिथ्यादिषु च। पञ्च अङ्गानि यस्य। "जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्। पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते" इति तन्त्रोक्तपुरश्चरणभेदे, पञ्च अङ्गानि आयत्तानि यस्य। कूर्मे पु॰, तस्य हि हस्तपादयोर्मुखपाङ्गपञ्चकस्य यथेष्टं सङ्कोचविकाशयोः स्वेच्छया करणादायत्तत्वम्।

पञ्चाङ्गुल * पु॰ पञ्च अङ्गुलय इव पत्राकारा यस्य अच् समा॰। एरण्डवृक्षे। पञ्चाङ्गुलयुक्ते त्रि॰।

पञ्चामृत * न॰ समा॰ द्वि॰। "दुग्धं च शर्करा चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तम्" इत्युक्तेषु पञ्चसु दुग्धादिषु।

पञ्चाम्र * न॰ "अश्वत्थ एकः पिचुमर्द एको द्वौ चम्पकौ त्रीणि च केशराणि। सप्तैव ताला नव नारिकेलाः पञ्चाम्रवापी नरकं न याति" इत्युक्तेषु अश्वत्थादिषु।

पञ्चाल * पु॰ देशभेदे। तद्देशस्थे ब॰ व॰।

पञ्चाली * स्त्री॰ पञ्चं प्रपञ्चमलति पर्याप्नोति अल-अण्। वस्त्रकृतपुत्तलिकायां, गानभेदे च (पाञ्चाली)। [भेदे, तत्संख्यातेषु च।

पञ्चाशत् * स्त्री॰ पञ्चदशतः परिमाणमस्य नि॰। (पञ्चाश) संख्या-

पञ्चेन्द्रिय * न॰ समा॰ द्वि॰ "श्रोत्रत्वङ्नेत्ररसनघ्राणं पञ्चेन्द्रियं मतम्" इत्युक्तेषु ज्ञानेन्द्रियेषु, श्रोत्रादिषु, "वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि च" इत्युक्तेषु वागादिषु कर्मेन्द्रियेषु च पञ्चसु। [कङ्काले। विहङ्गादिबन्धनस्थाने न॰।

प(पि)ञ्जर ० पु॰ न॰ पजि (पिजि) वा अरच्। शरीरास्थिवृन्दे

पञ्जन ० पु॰ पजि-अलच्। कोलकन्दे।

पञ्जि(ञ्जी) ० स्त्री॰ पजि-इन् वा ङीप्। सूत्रसाधनतालिकायां (पाइज)। स्वार्थे कन्। तत्र पाणिनीयसूत्रवृत्तिभेदे, तिथिवारादिपञ्चाङ्गबोधिकायां पत्रिकायाञ्च (पाँजि)।

पट * गतौ भ्वादि॰ पर॰ सक॰ सेट्। पटति अपाटीत् अपटीत्।

पट * दीप्तौ चुरा॰ उभ॰ अक॰ सेट्। पाटयति ते अपीपटत् त।

पट * वेष्टने अद॰ चु॰ उभ॰ सक॰ सेट्। पटयति ते अपपटत् त।

पट * त्रि॰ पट्यते वेष्ट्यते पट+अच्। वस्त्रे। स्त्रियां गौ॰ ङीप्। पियालवृक्षे पु॰। पुरस्कृते त्रि॰।

पटकार * पु॰ पटं करोति कृ-अण्। तन्तुवाये। [पटच्चरादयोऽप्यत्र।

पटकुटी * स्त्री॰ पटनिर्मिता कुटी शा॰। पटमये गृहे (तांबु)।

पटच्चर * न॰ पट्यते आवेष्ट्यते पट अनि, भूतपूर्वे पटत्+चरट्। जीर्णवस्त्रे। पटमिव वेष्टित इव चरति चर-अच्। चौरे पु॰।

पटल * न॰ पट-वेष्टने कलन्। (चाल) छदिषि। क्लीबत्वमत्र गौ॰ ङीप्। छदे, ग्रन्थभेदे च पु। [वामके कुङ्कुमादिचूर्णे।

पटवासक * पु॰ पटान् वासयति सुरभीकरोति वास-ण्वुल्। वसन-

पटह * पु॰ न॰। पटेन हन्यते हन, पट इत्युग्रं शब्दं जहाति वा हा-ड। ढक्कावाद्ये। समारम्भे पु॰।

पटि(टी) * स्त्री॰ पट-इन् वा ङीप्। पटभेदे, कुम्भिकावृक्षे च।

पटीर * न॰ पट-ईरन्। चालन्याम्, मूलके, केदारे, मेघे, वंशसारे, खदिरे, उदरे, कन्दर्पे, चन्दने च। "परिपीतपटीररसैरलसः" इत्युद्भटः। उच्चे, हरणीये च त्रि॰।

पटीयस् ० त्रि॰ अतिशयेन पटु ईयसु। अतिशयकार्यदक्षे।

पटु ० त्रि॰ पट-उ। निपुणे, नीरोगे, तीक्ष्णे, स्फुटे, निष्ठुरे, धूर्ते च। स्त्रियां वा ङीप्। पटोले पु॰। लवणे, पांशुलवणे, छत्राके च न॰।

पटुजातीय * त्रि॰ पटुप्रकारः जातीयर्। पटुप्रकारे।

पटुपर्णी * स्त्री॰ पटूनि पर्णान्यस्याः। स्वर्णक्षीरीवृक्षे।

पटुरूप * त्रि॰ प्रशस्तः पटुः प्राशस्त्ये रूपम्। अतिशयदक्षे।

पटोल * पु॰ पट-ओलच्। स्वनामख्याते लताभेदे। वस्त्रभेदे न॰।

पटोली(लिका) * स्त्री॰ अल्पकः पटोलः ङीप्। (झिङ्गा) ख्यातायां लतायाम्। स्वार्थे कन्। तत्रैवार्थे।

पट्ट * न॰ पट+क्त नेट् ट वा तस्य नेत्त्वम्। नगरे। चतुष्पथे, राजादिनिर्देशपत्रे (पाट्टा), पीठे, "ललाटपट्टम्" इत्युद्भटः। फलके (ढाल), राजसिंहासने, व्रणादिबन्धे, कौषेये (रेशम), पेषणे च। पाषाणे पु॰।

पट्टज * न॰ पट्टात् जायते। पट्टनिर्मिते वस्त्रे (रेशमिकापड़)।

पट्टदेवी * स्त्री॰ पट्टे राजासने देवी कृताभिषेका स्त्री। राजमहिष्याम् (पाटरानी)। पट्टमहिष्यादयोऽप्यत्र। [प्रधाननगरे।

पट्ट(त्त)न * न॰ पट(त)न्ति जना यत्र पट-तन वा तनन् नेट्।

पट्टरङ्ग * न॰ पट्टं रज्यतेऽनेन रञ्ज+करणे घञ्। (बक्कम्) इति ख्याते पदार्थे। ल्युट्। पट्टरञ्जनमप्यत्र।

पट्टशाक * पु॰ कर्म॰ (नालिता) शाकभेदे।

पट्टिकालोध्र * पु॰ पट्टिकाकारः लोध्रः। (पटियालोध) लोध्रभेदे। पट्टिलोध्रादयोऽप्यत्र।

पट्टिन् * पु॰ पट्ट+अस्त्यर्थे इनि। रक्तलोध्रे।

पट्टिश * पु॰ पट्ट+अस्त्यर्थे इशच्। पूतिकरञ्जे। [ठीत् अपठीत्।

पठ * लिखिताक्षरवाचने भ्वादि॰ पर॰ सक॰ सेट्। पठति अपा-

पड * गतौ भ्वादि॰ आत्म॰ सक॰ सेट् इदित्। पण्डते अपण्डिष्ट।

पड * संहतौ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सेट् इदित्। पण्डयति-ते पण्डति अपपण्डत्-त अपण्डीत्।

पण * व्यवहारे (क्रयविक्रयादौ) स्तुतौ च भ्वादि॰ आत्म॰ सक॰ सेट्। पणायति-ते पणते, व्यवहारे तु पणायति इत्येव। अपणायीत् अपणीत् अपणिष्ट।

पण * पु॰ पण्यतेऽनेन पण-अप्। मूल्ये, ... , ...

(पणमा) ख्याते द्रव्ये च। भावे घञ्। स्तुतौ, द्यूते, ग्लहे, परा- क्रये, (इदं देयमित्येवं) नियमे, व्यवहारे च "सा काकिनी ताश्च पणश्चतस्रः" इत्युक्ते चतुःकाकिनीपरिमाणे च।

पणन * न॰ पण+भावे ल्युट्। विक्रये।

पणव * पु॰ स्त्री॰ पणं व्यवहारं वाति वा+क। पटहभेदे "पणवा- नकगोमुखाः" इति गीता।

पणाया * स्त्री॰ पण स्वार्थे आय-ततः अ। व्यवहारे "न चोप- लेभे वणिजां पणायाः" इति भट्टिः।

पणायित * त्रि॰ पण-आय-क्त। स्तुते। आयाभावपक्षे पणितमप्यत्र।

पणितव्य * त्रि॰ पण-तव्य। विक्रेतव्ये, स्तोतव्ये, व्यवहार्ये च। यत् पण्यमप्यत्र। [बुद्धौ स्त्री॰ टाप्।

पण्ड * पु॰ पण-ड तस्य नेत्त्वम्। क्लीबे, निष्फले च। तत्सानुमारिण्यां

पण्डापूर्व * न॰ पण्ड फलासाधनमपूर्वम्। वस्तुतः फलसाधनयोग्ये [illegible] धर्माधर्माकर्त्रदृष्टे, यथा सन्ध्यावन्दनादेरभावे दुरदृष्टं प्रायश्चित्तं सन्ध्यादेर्वन्दने तु तत्त्वानुत्पत्त्या फलानुपहितं दुरदृष्टं नाशयतीति तत्पण्डापूर्वमिति मीमांसा।

पण्डित * पु॰ पण्डा तत्त्वानुगा बुद्धिर्जाताऽस्य तार॰ इतच्। शास्त्र- तात्पर्यज्ञे विदुषि।

[illegible] * स्त्री॰ [illegible]। [illegible] (हाटवाजार) [illegible] च। [illegible]।

[illegible] * स्त्री॰ [illegible]।

[illegible] * पु॰ [illegible] पा+औरच्। [illegible] [पणपतत्-त।

पत * [illegible]। पतयति ते

पत * [illegible]। [अपपत्।

पत * [illegible]। पतति

पतग * पु॰ [illegible]। [illegible]।

पतङ्ग * पु॰ [illegible]। सूर्ये, शलभे [illegible] च।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

मद्दे, केतौ, छन्दोग्रन्थोक्ते लघुगुरुज्ञापनार्थे च।

पताकिन् * त्रि॰ पताका+अस्त्यर्थे इनि। पताकाधारि [illegible] योद्धे तदाकारवति रिष्टसूचके चक्रभेदे पु॰।

पति * पु॰ पा-डति। भर्त्तरि। अधिपतौ त्रि॰। स्त्रियां

पतित * त्रि॰ पत+क्त। चलिते, गलिते, धर्मादिभ्रष्ट इष्टवति जने च "पतितानां न दाहः स्यात्" इति

पतिंवरा * स्त्री॰ पतिं वृणोते वृ-खच्। स्वेच्छया पति- कायां कन्यायाम्, कृष्णजीरके च। [स्वयंवरा

पतिवत्नी * स्त्री॰ पतिरस्त्यस्या मतुप् नि॰ नुक्, मस्य व

पतिव्रता * स्त्री॰ पतिः पतिसेवनं व्रतं यस्याः। सत्यां [illegible]

पत्ति * पु॰ पद-तिन्। सेनायाम्। क्तिन्। गतौ, (१ग ३अश्व, ५सेना:) एतत्संख्यान्विते सेनाभेदे च स्त्री॰

पत्नी * स्त्री॰ पति+यज्ञसम्बन्धे ङीप् नुक् च। पति- विधिना ऊढायां योषिति।

पत्र * न॰ पत-ष्ट्रन्। वाहनमात्रे, पर्णे, पक्षिणां पक्षे, लेख- द्रव्ये, धातुमयपत्राकारे द्रव्ये च। लिप्यां स्त्री॰ ङीप्।

पत्रगुप्त * पु॰ ३त॰। (तिकाटाशिज्र) वृक्षे।

पत्रघना * स्त्री॰ पत्रैर्घना। सातलावृक्षे।

पत्रदारक * पु॰ पत्राकारः दारकः यस्य॰। (करात्) क्रकचे

पत्रपुष्प * पु॰ पत्रम् पुष्पमिव सुगन्धि [illegible] तुलस्याम्। स्वार्थे कन्। तुलस्यां स्त्री॰ टाप्।

पत्रभङ्ग * पु॰ पत्रस्येव भङ्गः रचना यस्य। स्तनादौ [illegible] कस्तूर्यादि लेप्ये तिलकादौ। गौरा॰ पत्रभङ्गीत्यप्यत्र।

पत्ररथ * पत्रं पक्षः रथ इव गतिसाधनं यस्य। पक्षिणि।

पत्रलेखा * स्त्री॰ पत्रस्य लेखा। चन्दनादिना पत्राकाररेख [illegible]। स्तनादौ तथालेख्ये तिलकादौ।

पत्रवल्ली * स्त्री॰ पत्रस्य वल्ली श्रेणीव। चन्दनादिना लेख्ये [illegible] तिलकाकार पदार्थे।

पत्रशाक * पत्रैण शाकः। [illegible]

पत्रसूचि * स्त्री॰ पत्राणां सूचिरिव। कण्टके।

पत्राङ्ग * न॰ पत्रे [illegible] पत्रनाशकत्वा [illegible] (रक्त) चन्दने, रक्तचन्दने च।

पत्राङ्गुलि * स्त्री॰ पत्रलिखिताङ्गुलिरिव। चन्दनादिना [illegible] लेख्ये पत्रचित्राङ्गुल्याकार तिलकभेदे।

[illegible] * न॰ [illegible]

[illegible] * पु॰ [illegible]

[illegible] * स्त्री॰ [illegible] [illegible]

[illegible]

[illegible] * स्त्री॰ पद-इन् [illegible]

[illegible] * पु॰ [illegible]

[illegible]

…तीर्थ • न॰ पत्तनता क्षर्वा (रेशम) वस्त्रस्य क्षर्वा पादप्। पद-
क्षमे, क्षौमेवे च। पथेषु उर्वी यस्य। ज्योतिरूपे पु॰।

…द • गतौ भ्वादि॰ पर॰ सक॰ सेट्। पथति अपथत्।

…थ • गतौ वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट् इदित्।
पन्थयति ते पन्थति अपपन्थत् त अपन्थीत्।

…थ • पु॰ पथ-अच्। मार्गे, पथि च।

…थिक • त्रि॰ पन्थानं गच्छति पथिन्+ष्कन्। देशान्तरयानाय
मार्गस्थितं पथिगन्तरि। [कृतिमद्राक्षायाम्।

…थिका • स्त्री॰ पथे पथिगमनाय हिता पाथेयसमत्वात् ठन्।

…थिद्रुम • पु॰ पथ+इन् कर्म॰। खदिरवृक्षे।

…थिन् • पु॰ पथ+इन्। (पथ) म्यार्गे पथनि।

…थ्य • त्रि॰ पथे र्दिष्टक्षानुसारिमार्गाय हितम्। चिकित्सोपयो-
गिनि रोगिभिर्से वस्तुनि, हितकारके च। हरितकीवृक्षे, वन्ध्या-
कर्कोट्याश्च स्त्री॰।

…पथ्याक्ष • पु॰ कर्म॰। नन्तुमीनमाके।

पद • स्थैर्ये भ्वादि॰ पर॰ सक॰ सेट्। पदति अपादीत् अपदीत्।

पद • गतौ दिवा॰ आत्म॰ सक॰ अनिट्। पद्यते अपादि।

पद • गतौ चद॰ चुरा॰ आत्म॰ सक॰ सेट्। पदयते अपपदत।

पद • न॰ पद+अच्। चिह्ने, स्थाने, पादे, पदार्थे, त्राणे, वस्तुनि,
शब्दभेदे (सुप्तिङन्तरूपे), प्रदेशे, श्लोकपादे च।

पद् • न॰ पद-क्विप्। पादे। किरणे पु॰।

पदग • त्रि॰ पदेन गच्छति गम-ड। पदातिके।

पदन्यास • पु॰ पदस्य गोप्यदेशदेशयुगलस्य न्यासः तथाभावरं
यत्र। गोक्षुरवृक्षे। ६त॰। पदस्थापने।

पदवि,वी • स्त्री॰ पद-अवि वा ङीप्। पथि। [गामिनि।

पदाजि • पु॰ पादाभ्यामजति इन् वीभावाभावः पदादेशः। पाद-

पदाति • पु॰ पादाभ्यामतति अत-इन् पदादेशः। पदगामिनि।

पदार्थ • पु॰ पदस्याभिधेयोऽर्थः शाक॰। अभिधेये, वस्तुमात्रे सर्वेषां
शब्दबोध्यतासद्भावात्।

पदग • पु॰ पद्भ्यां गच्छति गम-ड। पादेन गामिनि।

पद्धति(ती) • स्त्री॰ पद+हन-क्तिन् वा ङीप्। पथि, पङ्क्तौ, पूजा-
दिप्रयोगबोधकग्रन्थभेदे च।

पद्म • न॰ पद+मन्। कमले, गजकुम्भादिस्थे बिन्दुसमुदाये, कम-
लाकारेण सैन्यादेरभिनिवेशनरूपे व्यूहभेदे, निधिभेदे, "खर्व-
दमहापद्म" इति पर्यायशब्दोक्तायां, दशार्बुदसंख्यायां, तन्त्रसं-
स्थानेषु, पुष्करमूले, सीसके धातौ, शरीरस्थे नाडीचक्रभेदे च।

पद्मकन्द • पु॰ ६त॰। शालूके।

पद्मकाष्ठ • न॰ ६त॰। ओषधिभेदे। [इति। भूर्जपत्रवृक्षे।

पद्माकिन् • पु॰ पद्मकानि गजबिन्दुजालानि सन्त्यस्य [illegible]

पद्मकेसर • पु॰ ६त॰। किञ्जल्के, पद्मपराग[illegible] पीतवर्णे
किञ्जल्के पदार्थे।

पद्मगर्भ • पु॰ पद्मं विष्णुनाभिपद्मं गर्भमुत्पादकं यस्य। चतुर्मुखे
ब्रह्मणि। कर्म॰। कमलमध्ये न॰।

पद्मचारिणी • स्त्री॰ पद्ममिव चरति स्थानं परित्यज्य दूरं गच्छति
इति। स्थलपद्मिन्यां भ्रमिके लताभेदे।

पद्मनाभ • पु॰ पद्मं नाभौ यस्य अच्। विष्णौ। [नमूने।

पद्मपत्र • न॰ ६त॰। कमलपत्रे। पद्मस्य पत्रं शाकमिव। कम-

पद्मपुराण • न॰ पद्ममधिकृत्य कृतमन्यत् तस्य तुल्यं कर्म॰। महा-
पुराणान्तर्गते पुराणभेदे।

पद्मपुष्प • पु॰ पद्ममिव पुष्पं यस्य। कर्णिकारवृक्षे।

पद्मबन्ध • पु॰ पद्माकारो बन्धः सन्निवेशः। शब्दालङ्कारभेदे।

पद्मबन्धु • पु॰ ६त॰। सूर्ये, भ्रमरे च। पद्ममित्रादयोऽप्यत्र।

पद्मभू • पु॰ पद्मं विष्णोर्नाभिपद्मं भूरुत्पत्तिस्थानं यस्य। चतुर्मुखे
ब्रह्मणि। पद्मयोन्यादयोऽप्यत्र।

पद्मराग • न॰ पद्मस्येव रागो यस्य। रक्तवर्णे मणिभेदे (मानिक)।

पद्मलाञ्छन • पु॰ पद्मं लाञ्छनमस्य। सूर्ये, ब्रह्मणि, नृपे, कुबेरे च।

पद्मवासा • स्त्री॰ कमलवासाधारे पद्म ६त॰। सरस्वत्यां, लक्ष्म्याम्,
लवङ्गे च। पद्म निवासो निलयो यस्याः। पद्मनिवासादयोऽ-
प्यत्र।

पद्मवीज • न॰ ६त॰। कमलवीजे (कमलगाहा)।

पद्मवीजाभ • न॰ पद्मवीजमिवाभाति आ+भा-क। (माखना)
जलजफलभेदे। [देव्यां, कुसुम्भपुष्पे च।

पद्मा • स्त्री॰ पद्ममस्त्यस्य अर्श आद्यच्। लक्ष्म्याम्, लवङ्गे, मनसा-

पद्माकर • पु॰ ६त॰। पद्मयुक्ते तडागे वा अगाधे जलाशये।

पद्माट • पु॰ पद्ममटति अट-अच्। चक्रमर्दवृक्षे (दादमर्दन)।

पद्मावती • पु॰ पद्म+अस्त्यर्थे मतुप् मस्य वः दीर्घश्च। (पद्मा) नदी-
भेदे, मनसादेव्यां, पद्मचारिणीलतायाञ्च।

पद्मासन • न॰ पद्ममिवासनम्। योगशास्त्रप्रसिद्धे आसनभेदे।

पद्मिनी • स्त्री॰ पद्मानां समूहः, सन्निकृष्टदेशो वा इनि। कमल-
समूहे, तद्युक्तदेशे, सरोवरस्थनलतायां, स्त्रीभेदे च।

पद्मिनीकान्त • पु॰ ६त॰। सूर्ये। पद्मिनीप्रियादयोऽप्यत्र। [त्रि॰।

पद्मिन् • पु॰ पद्मं बिन्दुजालमस्त्यस्य इनि। हस्तिनि। पद्मयुक्ते

पद्मेशय • पु॰ पद्मे शेते शी-अच् अलुक् समा॰। विष्णौ।

पद्य • न॰ पदं चरणमर्हति पद+यत्। कविकृते चतुश्चरणात्मके
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" इत्युक्ते वाक्य-
भेदे। पद्यायां स्त्री॰। पद्भ्यां जातः यत्। शूद्रे पु॰। पदं विध्यति
यत्। शर्करायां स्त्री॰। [यौत् पदनादिष्ट यत्निष्ट।

पन • स्तुतौ भ्वादि॰ आत्म॰ सक॰ सेट्। पनायते पनायति अपना-

पनस • पु॰ पन-असच्। (काँटाल) कण्टकिफले। [न॰।

पन्न • त्रि॰ पद+क्त। पतिते, च्युते च। पद नत्। अधोनुसरणे

पन्नग • पु॰ पन्नमधोनुगं यथा तथा गच्छति, पद्भ्यां न गच्छति वा,
गम ड। सर्पे, पद्मकाष्ठे च। जातौ ङीप्। सर्पाम्।

पशुहनने। "या वेदविहिता हिंसा नियतास्मिंश्चराचरे। अहिं- सामेव तां विद्यात्" इति मनूक्तेस्तस्या अहिंसात्वेन हि माम- [गते।
स्यम्।

परम्परीण * त्रि० परम्परया धारयागतः ख। अविच्छेदमन्त्राद्या-

परवश * त्रि० परस्य वशः आयत्तः। पराधीने।

परवत् * त्रि० परः परायत्तताऽस्त्यस्य मतुप् मस्य वः। पराधीने।

परशु * पु० परं शृणाति शॄ-कु डिच। परश्वधे (टाङ्गी) अस्त्रभेदे। स्पृश-यत् पृ आदेशः पर्शुरप्यत्र, अस्त्रमात्रे च।

परशुराम * पु० परशुधारी रामः शाक०। जमदग्निजे भगवदव- तारभेदे, येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता।

परश्व(स्व)ध * पु० शिव-ड शो हरिः परस्य शं धयति, परस्य स्वं काष्ठं धयति वा धे-क। कुठारे अस्त्रभेदे।

परस्पर * त्रि० पर+वीप्सायां द्वित्वम् सुट् च। अन्योन्यस्मिन् पदार्थे। स्त्रीनपुंसकयोस्तु सार्वविभक्तिक आमु अमुच्। पर- स्परां परस्परमिति सर्वविभक्तौ।

परस्मैपद * न० परस्मै परोद्देशेन पदं फलबोधनं यस्मात्। व्याक- रणोक्तेषु तिबादिषु। अस्तितेन, ञितश्च धातोरुक्तरतिबादि- भिर्नवभिर्हि परमार्थमेव फलं बोध्यते।

परा * अव्य० पृ-आ। प्रातिलोम्ये, प्राधान्ये, धर्षणे, आभिमुख्ये, त्यागे, विक्रमे, भृशार्थे, गतौ, भङ्गे, अनादरे, तिरस्कारे, प्रत्या- वृत्तौ च। अव्याकर्त्र्यां "परा वागनपायिनी" इत्युक्ते मूला- धारस्थे शब्दभेदे, "अथ परा यया तदक्षरमधिगम्यते" इति श्रुत्- त्तायां ब्रह्मविद्यायाञ्च स्त्री०।

पराक * पु० "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराको नाम" इत्युक्ते द्वादशाहोपवाससाध्ये प्रायश्चित्तरूपे व्रतभेदे।

पराक्पुष्पी * स्त्री० पराक् पुष्पं यस्याः। अपामार्गे।

पराक्रम * पु० परा+क्रम घञ् न वृद्धिः। बले देहजसामर्थ्ये।

पराग * पु० परागच्छति परा+गम-ड। धूलिमात्रे, पुष्परजसि, "स्फुटपरागपरागतपङ्कजम्" इति माघः। स्नानीयद्रव्ये कुङ्कुम- चूर्णादौ, उपरागे, चन्दने च। [गिरिभेदे।

पराङ्मुख * त्रि० पराक् प्रत्यावृत्तं मुखं यस्य। विमुखे बाह्यकार्यान् [प्रतिकूलार्थे च।

पराच् * त्रि० परा अञ्चति अञ्च-क्विन्। प्रत्यक्तत्त्वभिन्ने दृश्यप्र- पञ्चविषये बाह्ये वस्तुनि। [प्रतिलोमिने सम्बन्धार्थे च।

पराचित * त्रि० परैराचितः पुष्टः व्याप्तो वा आ+चि क्त। परेण

पराचीन * त्रि० पराक्भव पराच्+ख। पराङ्मुखे, परकालिके च।

पराजय * पु० परा+जि-अच्। पराभवे (हारि)।

पराधीन * त्रि० परोऽधि इति वाक्ये समासे अधुनालादात् ख, परस्याधीनो वा। परायत्ते। [अदूरदेशे न०।

पराच * त्रि० परस्यात्मनः अमन। परावरश्चेति। इति।

पराभव * पु० परा+भू-अप्। तिरस्कारे, पराजये, विनाशे च।

परामर्श * पु० परा+मृश-घञ्। युक्तौ, विवेचने, व्याप्त्याश्रये अर्थ-

विशिष्टतया पक्षस्य ज्ञाने च। यथा वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञानम्।

परायण * न० परमयनं अन्तम्। अत्यन्तासक्तौ, उत्तमाश्रये च। ब० व०। आसक्ते, यथा धर्मपरायणः धर्मे अत्यन्तासक्तः। तत्- परे, अभीष्टे च त्रि०।

परारि * अव्य० पूर्वतरे वर्षे पूर्वतर+अरि परादेशः नि०। पूर्वतर- वत्सरे गततृतीयवत्सरे। परोऽरि। अत्यन्तगवौ पु०।

परारु * पु० पराऋच्छति परा+ऋ-उण्। कार+कारवेल्लके (उच्छा)।

परार्द्ध * न० ऋध-अच् कर्म०। चरमसंख्यायां "पारे परार्द्धे गणितं यदि स्यात्" इति नैषधम्। कर्म०। ब्रह्मण आयुषो द्वितीयार्द्धे।

परार्द्ध्य * त्रि० परार्द्धे चरमसंख्यामुपचारात् श्रेष्ठत्वमर्हति यत्। श्रेष्ठे "परार्द्ध्यवर्णास्तरणा" इति रघुः।

परावर्त * पु० परा+वृत-घञ्। परीवर्ते, विनिमये च।

परावह * पु० परा+वहति परा+वह-अच्। सप्तवायुमध्ये परि- वहवायोरूर्ध्वस्थे वायुभेदे।

पराशर * पु० व्यासपितरि मुनिभेदे।

पराश्रया * स्त्री० परमाश्रयति आ+श्रि-अच्। वन्दाकाम् (पर- गाछा) अन्याश्रयवति त्रि०।

परासन * न० परा+अस-ल्युट्। मारणे।

परासु * त्रि० परागताः असवो यस्य। मृते।

परास्कन्दिन् * पु० परान् आस्कन्दति णिनि। चौरे।

परास्त * त्रि० परा+अस क्त। निरस्ते, पराजिते च।

पराह्ण * पु० परमुत्तरमहः कर्म० टच् समा० पुंस्त्वम्। अपराह्णे।

पराह्न * पु० परमह्नः एकदेशिस० टच् समा० अह्नादेशः णत्वम्। दिवसस्य चरमभागे, अपराह्णे ऽत्यन्तकाले च।

परि * अव्य० पृ-इन्। सर्वतो भावे, वर्जने, आरोपे, दोषे, कथन- प्रकार ख्याने, निरसने, पूजायां, भूषणे, उपरमे, शोके, सन्तोष- भाषणे, अतिशये, व्याप्तौ, नियमे च।

परिकर * पु० परि+कृ-अप्। पर्यङ्के, परिवारे, समारम्भे, समूहे, प्रगाढगात्रबन्धे, विवेके, अलङ्कारविशेषे च।

परिकर्मन् * न०। कर्म कङ्कणादि, अङ्गसंस्कारः। ब०। देहसंस्कारे, कुङ्कुमाद्युपलेपनादिरूपे, भूषणे, परिकर्मगुणेषु सङ्कलन- व्यवकलनगुणनभागवर्गवर्गमूलघनघनमूलरूपेषु अष्टविधेषु गणित- रीतिषु च। ब० स०। सेवके त्रि०।

परिक्रम * पु० परि+क्रम घञ् न वृद्धिः। क्रीडायां, भ्रमणे, अनु- क्रमे, परितो गमने च। [देवे।

परिक्रिया * स्त्री० परितः क्रिया वेष्टनम्। परिखादिना दुर्गादेः

परिक्षित् * पु० अभिमन्योः पुत्रे... अर्जुनपौत्रे नृपभेदे। परीक्षिदप्यत्र।

परिखा * स्त्री० परितः खन्यते खन-ड। दुर्गादेः परितः खाते जलपूर्णगर्ते...

परिगत * त्रि॰ परि+गम-क्त। भ्रान्ते, ज्ञाते, विस्मृते, चेष्टिते, वेष्टिते, गते च।

परिग्रह * पु॰ परि+ग्रह-अप्। स्वीकारे, सैन्यपश्चाद्भागे च। कर्मणि अप्। भार्य्यायां, परिजने च। करणे अप्। मूले, शपथे च।

परिघ * पु॰ परि+हन-अप् नि॰। परिघातात्मके लौहमुद्गरादौ, लौहमुखे नगुडे मुद्गरे, शूले, काचघटे, गृहे, विष्कम्भादिषु अन्तर्गते योगे च। [शपथे च।

परिचय * पु॰ परि+चि-अच्। ज्ञातस्य पौनःपुन्येन ज्ञाने, संस्तवे,

परिचर्य्या * स्त्री॰ परिचर+यत्+टाप्। सेवायाम्।

परिचाय्य * पु॰ परिचीयते संस्क्रियतेऽस्मौ चि-ण्यत्। यज्ञाग्नौ।

परिचारक * पु॰ परि+चर-ण्वुल्। सेवके, भृत्ये च।

परिच्छद * पु॰ परि+छद+घ कृत्यः। उपकरणे, वस्त्रादिनेपथ्ये, वस्त्रादिभूषणे, परिवारे च। "सेना परिच्छदस्तस्य" इति रघुः।

परिच्छेद * पु॰ परि+छिद-घञ्। विभिन्नवस्तुनि इयत्ताकरणे, ग्रन्थादिप्रकरणे ग्रन्थस्य विच्छेदस्थाने च।

परिणय * पु॰ परितो नयः। विवाहे, प्रतिवाप्यो प्रने च।

परिणत * त्रि॰ परि+नम-क्त णत्वम्। परिपक्वे, वृद्धिं गते, पश्चात्पश्चात् प्राप्ते, निम्नंतादेशावनतिशीले गजे च।

परिणय * पु॰ परि+नी अच्। विवाहे। [[illegible]भेदे च।

परिणाम * पु॰ परि+नम घञ्। प्रकृतेरन्यथाभावे, विकारे, भोगे,

परिणाह * पु॰ परि+नह घञ्। विस्तारे।

[illegible] * पु॰ परि+नी [illegible]। [illegible]

[illegible]

[illegible] * पु॰ [illegible] [illegible] [रणे च।

[illegible]

[illegible]

[illegible]

परिपन्थिन् * पु॰ परि+पन्थ-इनि। शत्रौ।

वर्जयित्वा गच्छति वा कन् मन्यादेशः। शत्रौ।

परिपाक * पु॰ परि+पच-घञ्। नैपुण्ये, उत्तमपाके च।

परिपाकिनी * स्त्री॰ परिपाक+मत्वर्थे इनि। त्रिवृति [illegible]

परिपाटि(टी) * स्त्री॰ परि+चु॰ पट-इन्। अनुक्रमे, [illegible]

परिपुष्करा * स्त्री॰ परितः पुष्करं सुखं यस्याः। (गोमुक्) [illegible] लतायाम्। [माने मुक्ताकारे [illegible]

परिपेल * न॰ परि+पेल-अच्। कैवर्त्तीमुस्तके, [illegible]

परिपेलव * न॰ परितः पेलवं मृदुता यस्य। कैवर्त्तीमुस्ते।

परिप्लव * न॰ परि+प्लु-अच्। चञ्चले, अस्थिरे च।

परिबर्ह * पु॰ परि-वर्ह-घञ्। नृपयोग्ये हस्त्यश्वादौ [illegible]

परिभ(भा)व * पु॰ परि+भू-अप घञ् वा। अनादरे, तिरस्कारे।

परिभाषण * न॰ परि+भाष-ल्युट्। निन्दया दूषणे, [illegible] नियमे च। [मनाहृत्य समुदायार्थे विधिविशेषे

परिभाषा * स्त्री॰ परि+भाष-अ। कृत्रिमसंज्ञायाम्,

परिभूत * त्रि॰ परि+भू-क्त। तिरस्कृते, अनादृते च।

परिमण्डल * त्रि॰ परितो मण्डलम्। वर्त्तुलाकारे।

परिमल * पु॰ परि-मल-अच्। कुङ्कुमचन्दनादिमर्द्दने, [illegible] सुगन्धौ, परितः सम्बन्धे च। "सतां परिमलः" इत्युद्भटः।

परिमाण * न॰ परिमीयतेऽनेन परि+मा-ल्युट्। [मान [illegible] तुलप्रस्थादिभिर्द्रव्यस्य परिच्छेदे।

परिमित * त्रि॰ परि+मा-क्त। कृतपरिमाणे, युक्ते, [illegible]

परि(री)रम्भ * पु॰ परि+रभ-घञ् मुम् च वा दीर्घः। [illegible]

परिवत्सर * पु॰ संवत्सरपञ्चकान्तर्गते वत्सरभेदे।

परिवर्जन * न॰ परिवर्ज्यतेऽनुभिरनेन वृज णिच्-ल्युट्। [illegible] वृज+भावे ल्युट्। त्यागे।

परि(री)वर्त * पु॰ परि+वृत-भावे घञ् वा दीर्घः। [illegible] आधारे घञ्। युगान्ते काले, ग्रन्थविच्छेदे, [illegible] कर्मणि घञ्। कूर्मराजे। भावे ल्युट्। परिवर्त्तने [illegible]

परिवह * पु॰ परि+वह-अच्। [illegible]

परि(री)वाद * पु॰ परि+वद-घञ् वा दीर्घः। अपवादे [illegible] परीवादः" इति मनुः।

परिवादिनी * स्त्री॰ परितो वदति [illegible] विनि। सप्ततन्त्रीयुक्तायां वीणायाम्, [illegible]

परि(री)वाप * पु॰ परि+वप-घञ् वा दीर्घः। [illegible] [illegible]। [illegible] ल्युट्। परिवापणमप्यत्र।

[illegible]

[illegible]

[illegible]

[illegible]

परिविन्न * त्रि॰ परिविद्यतेऽसौ कर्मणि क्त। अनुजस्य विवाहकाले अनूढे ज्येष्ठे। तादृश्यां भगिन्यां स्त्री॰। ज्येष्ठानूढताकालेऽनुजोद्वाहरूपः दोषः परिवेदनं तेन दुष्यत इति तस्य परिवेदनकर्मत्वम्।

परिवित्ति * पु॰ परिविद्यते परिवेदनजन्यदोषेण दूष्यतेऽसौ परि+विद+कर्मणि क्तिच्। प्रागूढानुजस्यानूढे ज्येष्ठे।

परिवृढ * त्रि॰ परि+वृह-क्त। अधिपे प्रभौ।

परिवेत्तृ * पु॰ परि+विद तृच्। ज्येष्ठेऽनूढे साग्निदारपरिग्रहरूपपरिवेदनकर्मणि अनुजे भ्रातरि।

परिवेदन * न॰ परि वर्जयित्वा उचितकालं वेदनं विवाहः लाभो वा। ज्येष्ठे अनूढे अकृताग्न्याधाने च कनिष्ठस्य विवाहकरणे, अग्न्याधानकरणे च दुरदृष्टजनके स्मृत्युक्ते दोषे।

परिवेदनी ० स्त्री॰ परिविद्यते यया परि+विद-करणे ल्युट् ङीप्। यामूढ्वा परिवेदनदोषो भवति तस्यां स्त्रियाम्, "परिवेत्ता परिवित्तिः यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः" इति मनुः।

परिवेश ● पु॰ परि+विश-व्याप्तौ भावे घञ्। वेष्टने, मेघादिस्थकाञ्जायमाने चन्द्रार्कमण्डलस्य वेष्टनाकारे "वातार्द्यैर्मण्डलीभूताः सूर्येन्द्वोरमितः कराः। नानाभा भान्ति दृश्यन्ते परिवेशस्तु स स्मृतः" इत्युक्ते सप्तमे पदार्थे। [पात्रे दाने।

परिवेषण * न॰ परि+विष णिच् ल्युट्। भोजनार्थमन्नादेः भोजन

परिव्याध * पु॰ परि+व्यध कर्त्तरि ण। अम्बुवेतसे।

परिव्राज् * पु॰ परि+व्रज क्विप् नि॰। सर्वकर्माणि परित्यज्य आत्ममात्रलाभमिति चतुर्थाश्रमिणि यतौ।

परिव्राज(क) * पु॰ परित्यज्य सर्वकर्माणि व्रजति व्रज अच् ण्वुल् वा। चतुर्थाश्रमिणि यतौ। [प्रतिपादके धर्मे।

परिशिष्ट ● न॰ परि+शिष क्त ग्रन्थशेष+अन्यार्थं अच्। अवशिष्टांश

परिश्रम ● पु॰ परि+श्रम-घञ् न वृद्धिः। व्यायामे, खेदकारके आयासे च।

[illegible] ● पु॰ परि+नि-आधारे घञ् सभायाम्।

परिषद् * स्त्री॰ परितः सीदन्त्यस्याम् सद+क्विप्। सभायां, धर्मोपदेशकपण्डितसमूहात्मके च। [परिषदि च।

[illegible] * पु॰ परितः सीदति गच्छति सद अच्। अनुचरे, पार्षदे,

[illegible] * त्रि॰ परिषद् [illegible] अच्। सभासदे।

[illegible] * त्रि॰ [illegible] परि+स्कन्द-घञ् वा। [illegible] पादुके। [illegible]

[illegible] ० पु॰ परि+स्कृ घञ् सुट् च। भूषणे, [illegible] [illegible] च। [illegible] च।

[illegible] * त्रि॰ परि+स्कृ क्त सुट् च। भूषिते, [illegible]

[illegible] * पु॰ परि+[illegible] घञ्। [illegible]

[illegible] * पु॰ [illegible] [illegible] [illegible]

मृत्यौ, विधाने च।

परिसर्प * पु॰ परितः सृप्यते सृप-घञ्। परितोवेष्टने, सम- [ल्पात् गमने च।

परिसर्या * स्त्री॰ परि+सृ-यत्। सर्वतोगमने।

परिस्पन्द * पु॰ परि+स्पन्द-घञ्। समन्तात् चलने, कुसुमादिकृते रचनाभेदे, परिष्कारे, परिजने च।

परि(री)स्रुत् ● स्त्री॰ परिस्रवति द्राक्षादिना निर्गच्छति स्रु-क्विप् वा दीर्घः। मदिरायाम्। त्रि॰। परिस्रुताश्च। [अनादरे च।

परि(री)हार ० पु॰ परि+हृ घञ् वा दीर्घः। त्यागे, दोषावहरणे,

परि(री)हास * पु॰ परि+हस-घञ् वा दीर्घः। केलौ।

परीक्षक * त्रि॰ प्रमाणेन परीक्षते परि+ईक्ष-ण्वुल्। प्रमाणोद्भावनेन विषयनिश्चायके।

परीक्षण * न॰ परि+ईक्ष-ल्युट्। प्रमाणेन वस्तुनिश्चयने।

परीक्षा ● स्त्री॰ परि+ईक्ष अ। दृष्टादृष्टवाक्यमोचने, प्रमाणेन वस्तुनिश्चयने, स्मृत्युक्ते दृष्टादृष्टमात्रे तुलादिप्रमाणे च।

परीष्टि * स्त्री॰ परि+इष-क्तिन्। अन्वेषणादौ, परिचर्यायाञ्च।

परीसार * पु॰ परि+सृ घञ्। सर्वतोगमने।

परुत् * अव्य॰ पूर्वस्मिन् वर्षे उत् [illegible]। [illegible]

परुष ● त्रि॰ पृ [illegible] उ। [illegible] [illegible]

परुष ● न॰ पु॰ [illegible] [illegible] [illegible] [illegible] [illegible] वचः, कठोरे च त्रि॰।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

र्णनर * पु॰ पर्णनिर्मितः नराकारः शवः। अस्थ्यलाभादौ मृत्यु...
दाहे शवप्रतिनिधीभूते पर्णनिर्मिते नराकारे।
भेदिनी * स्त्री॰ पर्णानि भिनत्ति भिद णिनि। प्रियङ्गुवृक्षे।
लता * स्त्री॰ पर्णप्रधाना लता शाक॰। ताम्बूलीलतायाम्।
वल्ली * स्त्री॰ पर्णप्रधाना वल्ली शाक॰। पलाशीलतायाम्।
शाला * स्त्री॰ पर्णनिर्मिता शाला शाक॰। पत्रनिर्मिते कुटीरे
शन * पु॰ पर्णानि अश्नाति अश-ल्यु। मेघे, तस्य पत्रभक्षण-
काले गलत्सालयाभ्रमभव इति प्रसिद्धिः।
स(मि) * पु॰ पर्णानि अस्यति अस-अच् इन् वा। तुलस्याम्।
* पु॰ पर्ण+अस्त्यर्थे इनि। वृक्षे। मापपर्णी स्त्री॰ ङीप्।
अपानवायुक्रियायां भ्वादि॰ आत्म॰ अक॰ सेट्। पर्दते अप-
ष्ट।
गतौ भ्वादि॰ पर॰ सक॰ सेट्। पर्पति अपर्पीत्।
न॰ पृ+प। गृहे, नवतृणे, खञ्जवाहनसाधने पीठादौ।
पु॰ पर्प+अटन्। (चेतपापड़ा) क्षुपभेदे, मुद्गादिचूर्णकृते
पर) इति ख्याते पिष्टकभेदे, सौराष्ट्रमृत्तिकायाम्, उत्तर-
भवे सुगन्धिद्रव्ये च स्त्री॰ गौरा॰ ङीप्।
ती भ्वादि॰ पर॰ सक॰ सेट्। पर्वति अपर्वीत्।
पु॰ परिगतोऽङ्कम् प्रा॰। खट्वायाम्, योगपट्टे "पर्यङ्क-
बन्धादिगुणितभुजगाङ्के च" इत्यादि न्यच्छकटिकम्।
दका * स्त्री॰ पर्यङ्क इव पादा यस्याः सञ्ज्ञायां कन्।
ध्याम्।
* पु॰ पर्यङ्कस्य योगपट्टस्य बन्धः बन्ध-घञ्। योगपट्ट-
देन पृष्ठजानुजङ्घाबन्धने "पर्यङ्कबन्धं निविड़ं बिभेद"
मार॰। ल्युट्। पर्तवार्थे न॰।
न॰ परितोऽटनम्। पुनःपुनर्भ्रमणे।
* पु॰ परितोऽनुयोगः प्रश्नः। दूषणार्थे जिज्ञासायाम्,
द्वापि पर्यनुयोगस्थानवकाशः" इति दायभागः।
परिगतोऽन्तं सीमाम्। पाशकनादेः शेषसीमायाम्।
स्त्री॰ पर्यन्तस्य शेषसीमायाः भूः। ग्रामादेः शेष-
, परिसरे च।
परित्यज्य प्राप्तकालिकमर्यादाम् अयः इण-अच्।
व्यवहारातिक्रान्ते आचारे।
॰ परि+अव+स्था-घञ्। विरोधे, प्रतिपक्षवादे
तद्वार्थे न॰। वञ्। तत्कर्तरि त्रि॰।
परि-अव सो क्त। विच्छिन्ने, पतिते, पर्वे च।
॥+अस-ल्युट् पु॰। पर्यवसानं, पर्यवसने (शिव)।
पर्यवसानम्।
परि+आप्-क्त। पर्याप्ते, प्राप्ते, सामर्थ्ये, विरा-
च। कर्मणि क्त। यथेष्टे, प्राप्ते च त्रि॰।
...पर्यावर्णे, ...

प्राप्ती, सामस्त्येन प्राप्ती, न्यायमतसिद्धे समुदाये, वर्त्तमा...
यानां सर्वत्र सम्बन्धभेदे च।
पर्याय * पु॰ परि+इण-घञ्। अनुक्रमे, प्रकारे, अवसरे, नि...
द्रव्यधर्मभेदे, समार्थबोधके शब्दे च। [क्रमेण श...
पर्यायशयन * न॰ पर्यायेण क्रमेण शयनम्। यामिकभट...
पर्युदञ्चन * न॰ पर्युदच्यते उद्ध्रियते कर्मणि ल्युट्। ऋणे।
पर्युदस्त * त्रि॰ परि+उद्+अस-क्त। निवारिते, फलप्रत्यवा...
शून्यतया भेदार्थकनञा निषिध्यमाने "यथा रात्रौ श्राद्धं
कुर्वीत" इति, अत्र हि रात्रौ श्राद्धे न फलं न वा प्रत्यवायः इ...
रात्रिः पर्युदस्ता तद्भिन्नामावास्यायां श्राद्धम्।
पर्युदास * पु॰ परि+उद्+अस-घञ्। निवारणे, फलप्रत्यवायशून्य...
तया भेदार्थकनञा बोध्ये "प्राधान्यं हि विधेर्यत्र प्रतिषेधेऽप्र-
धानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्" इत्यु-
लक्षणे निषेधे च। विस्तरस्तु वाचस्पत्ये।
पर्युषित * त्रि॰ परिक्रम्य स्वकालमतिक्रम्य उषितम् वस-क्त।
(वासि) यातयामादौ पदार्थे, "यातयामं गतरसं पूति पर्युषि-
तञ्च यत्" इति मनुः। [पदार्थपरीक्षायाम्, अन्वेषणायाञ्च।
पर्येषणा * स्त्री॰ परितस्तर्कादिना एषणा परीक्षा। तर्कादिद्वारा
पर्व * पूर्त्तौ भ्वादि॰ पर॰ सक॰ सेट्। पर्वति अपर्वीत्।
पर्वत * पु॰ पर्व-अतच्, पर्वाणि भागाः सन्त्यस्य त वा। गिरौ,
भूधरे, दानार्थं कल्पिते पर्वताकारे गुडादिशैलदर्शके, मुनिभेदे
"नात्र चित्रमनु त प्रययौ यत् पर्वतस्तु खलु" इति नैषधम्,
मत्स्यभेदे (पावदा), वृक्षे, शाकभेदे च।
पर्वतमोचा * स्त्री॰ इत॰। गिरिकदल्याम्। [गायत्र्याञ्च।
पर्वतवासिनी * स्त्री॰ पर्वते वसति वस-णिनि। आकाशमांस्याम्,
पर्वतीय * पु॰ पर्वते भवः छ। (पाहाड़ीया) जातिभेदे "पर्वतीय-
गणैरभूत्" इति रघुः। पर्वतजातमात्रे त्रि॰।
पर्वन् * न॰ पॄ-वनिप्। उत्सवे, ग्रन्थौ (गांट), लक्षणभेदे, प्रस्तारे,
ग्रन्थविच्छेदस्थाने, "चतुर्दश्यष्टमी चैव ह्यमावास्या च पूर्णिमा।
पर्वाण्येतानि राजेन्द्र। रविसंक्रान्तिरेव च" इति स्मृत्युक्तेषु
पञ्चसु कालभेदेषु च।
पर्वयोनि * पु॰ पर्व ग्रन्थिर्योनिरुत्पत्तिस्थानं यस्य। इक्षुप्रभृतौ वृक्षे।
पर्वरुह * पु॰ पर्वणि रोहति रुह-क्विप्। दाड़िमे। [दूर्वा]।
पर्ववल्ली * स्त्री॰ पर्वप्रधाना ग्रन्थियुक्ता वल्ली। मालादूर्वायाम् (गाट-
पर्वसन्धि * पु॰ पर्वणः सन्धिः। पञ्चदश्याः (पूर्णिमायाः अमावास्या-
याश्च) प्रतिपदश्चेत्तिथ्योरन्तराले चन्द्रसूर्य्योपरागयोग्ये काले।
पर्शुका * स्त्री॰ पर्शुरिव आयति प्रकाशते कै-क। पार्श्वस्थे अस्थ्नि।
तस्य परशुसदृशाकारत्वात् तथात्वम्। पर्शुश्चात्र।
पर्ष * सेके भ्वादि॰ आत्म॰ सक॰ सेट्। पर्षते अपर्षिष्ट।
पर्षद् * स्त्री॰ पृष सदि। सभायाम्, धर्मादेशकपण्डितसमाज
च। ततः अस्त्यर्थे मतुप्। सभासदे त्रि॰।

पल * गतौ भ्वादि० पर० सक० सेट् ज्वला० । पलति अपालीत् ।
पल * रक्षणे चुरा० उभ० सक० सेट् । पालयति-ते अपीपलत्-त ।
पल * न० पल-अच् । मांसे, पामिषे, कर्षचतुष्टयपरिमाणे, शास्त्रीयतोलकचतुष्टये, लौकिकसाष्टरक्तिद्विमापकाधिकतोलकत्रितयपरिमाणे, षष्टिगुर्वक्षरोच्चारणयोग्ये दण्डषष्टिभागे, विनाडिकाख्ये काले च । पाताले (तुच्छधान्ये) पु० । [(राज) ।
पलगण्ड * पु० पलं मांसं गण्डति गण्डमिव करोति । लेपनकरे
पलङ्कष * पु० पलं मांसमुद्दिश्य कषति हिनस्ति खच् । राक्षसे, कणगुग्गुलौ च । रास्नायां, लाक्षायाम्, गुग्गुलौ, गोक्षुरे, महाश्रावण्यां, पलाशे, मक्षिकायाञ्च स्त्री० टाप् । [क । राक्षसे पु० ।
पलल * न० पल कलच् । मांसे, पङ्के, तिलचूर्णे च । पलं लाति ला-
पलाण्डु * पु० पल मांसमण्डति अण्ड उ । (पेयाज) मूलभेदे "पलाण्डुं कवकानि च" इति मनुः । [नान्यस्थानगमने ।
पलायन * न० परा-अय-ल्युट् रस्य लः । भयादिना स्थानत्यागे-
पलाल * पु० पल कालन् । शस्यशून्ये धान्यकाण्डे (नाडा) (पोयाल)
पलालदोहद * पु० पलालं दोहदं यस्य । आम्रवृक्षे, पलालवेष्टने हि तस्य हार्दः ।
पलाश * न० पल गतौ पचाद्यर्थे क पलं चलनमश्नुते, पलं वियोगिनां मांसमिवाश्नाति शोषकत्वाद्वा अश-अण् । स्वनामख्याते वृक्षे "नवपलाशपलाशवनम्" इति माघः । पर्णसवर्णत्वात् हरिद्वर्णे पु० । तद्वति त्रि० । लाक्षायां, लताभेदे च स्त्री० गौ० ङीप् ।
पलाशक * पु० पल मांसमश्नाति ण्वुल् । शट्याम्, पलाशवृक्षे च ।
पलाशपर्णी * स्त्री० पलाशवृक्षस्येव पर्णमस्याः । अश्वगन्धायाम् ।
पलाशिन् * पु० पलाशानि सन्त्यस्य इनि । वृक्षे । [भिण्ड्यां गवि च ।
पलिक्नी * स्त्री० पलित+ङीप् नि० । वृद्धायां योषिति, बालग-
पलित * न० पल-भावे क्त । केशादौ जरया जातायां श्वेततायाम्, मांसादेर्वलिपरीतभावे च । कर्त्तरि क्त । वृद्धे । स्त्रियां पलिता । योषिति तु पलिक्नीत्युक्तम् ।
पल्यङ्क * पु० परिगतोऽङ्कं रस्य लः । शय्यायाम् (पालङ्क) ।
पल्ययन * न० परि-इण-ल्युट् रस्य लः । घोटकसज्जाभेदे (जिन्) ।
पल्युल * छेदने, पूतौ च अद० चुरा० उभ० सक० सेट् । पल्युलयति ते अपपल्युलत् त । [लयति ते अपपल्यूलत् त ।
पल्यूल * छेदने पवित्रताकरणे च अ० चु० उभ० सक० सेट् । पल्यू-
पल्ल * गतौ भ्वादि० पर० सक० सेट् । पल्लति अपल्लीत् ।
पल्ल * पु० पल्ल अच् । स्थूलकुशूलके, वृहति धान्यादिस्थापनस्थाने च (पालुइ) (मराइ) ।
पल्लव * पु० पल्यते सम्य० णिच् पल्, लूयते लू-अप् कर्म० । अभिनवे पत्रविस्तारे, "नवोऽपि पल्लवे" इति नैषधम्, तद्युक्तशाखायां, विस्तारे, बले, अलक्तकरागे, शृङ्गारे, चापले च ।
पल्लवद्रु * पु० पल्लवप्रधानः द्रुः । अशोकवृक्षे ।
पल्लवित * त्रि० पल्लवं नूतनपत्रं विस्तारो वा जातः अस्य तार० इतच् । पल्लवयुक्ते, विस्तारयुक्ते च "द्विपवितं पल्लवितञ्च विभ्रमम्" इति नैषधम् ।
पल्लि(ल्ली) * स्त्री० पल्ल इन् वा ङीप् । क्षुद्रग्रामे, कुट्याम्, गेहे च । पल्लं गृहमाश्रयत्वेनास्त्यस्याः अच् । गृहगोधिकायाम् स्त्री० ङीप् ।
पल्लिका * स्त्री० पल्ल्यां गृहे कायति कै+क । गृहगोधिकायाम् ।
पल्वल * पु० न० पल-वल । क्षुद्रे सरसि (डोवा) । "स पल्वलजलेऽधुना" इति भामिनीविलासः । [कर्त्तरि अच् । वायौ ।
पव * पु० पू+अप् । धान्यादेः शोधने बहुलीकरणे च व्यापारे ।
पवन * पु० पू+युच् । धान्यादेः शोधने बहुलीकरणे च व्यापारे । कर्त्तरि ल्यु । वाते । भावे ल्युट् । शोधने न० । करणे ल्युट् । जले न० । आधारे ल्युट् । आमघटादिपाकस्थाने (पोयान) । "पवनोपरिपङ्कलेप." इत्युद्भटः ।
पवनव्याधि * पु० पवनजनितो व्याधिर्यस्य शाक० । उद्धवे, धुन्वन् पवनव्याधेः" इति माघः । कर्म० । वायुरोगे पु० ।
पवनात्मज * पु० ६त० । हनुमति, भीमे, वह्नौ च "वायोरग्निः" इति श्रुतेस्तस्य वायुजातत्वात्तत्सुतत्वम् । पवनसुतादयोऽप्यत्र ।
पवनाश * पु० पवनमश्नाति अश अण् । सर्पे । वायुभक्षके त्रि० । युच् । पवनाशनोऽप्यत्र ।
पवमान * पु० पूञ्-शानच् । वायौ ।
पवि * पु० पू-इन् । वज्रे ।
पवित * त्रि० पू+क्त । पवित्रे, शुचे च । मरिचे न० ।
पवित्र * स्त्री० न० पू-इत्र । यज्ञाद्यर्थे, कुशे "पवित्रामि वैष्णवी" इति यजुर्मन्त्रः । ताम्रे, जले, वर्षणे, घर्षणे, अर्घोपकरणे, यज्ञोपवीते, मधुनि, घृते, "अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं सर्वकर्मसु" इत्युक्ते कुशद्वये च न० । व्रतादिना शुद्धे त्रि० । तिलवृक्षे, पुत्रजीववृक्षे च पु० । तुलस्यां, हरिद्रायां, नदीभेदे च स्त्री० । [वृक्षे च ।
पवित्रक * पु० पवित्र+स्वार्थे कन् । अश्वत्थे, उदुम्बरे, कुशे, दमन-
पवित्रारोपण * न० पवित्रस्य यज्ञोपवीतस्य विष्णवे आरोपणं दानं यत्र । श्रावणशुक्लद्वादश्यां केशवोद्देशेन यज्ञोपवीतदानरूपे उत्सवे । पवित्रारोहणमप्यत्र ।
पश(ष) * बाधे भ्वादि० उभ० चाल० सक० सेट् । पश(ष)ति ते अपशी(षी)त् अपाशी(षी)त् अपशि(षि)ष्ट ।
पश(ष) * स्पर्शे, गतौ, अनुपसर्गात् बन्धे, बाधे च अद० चुरा० उभ० सक० सेट् । पश(ष)यति ते अपपश(ष)त् त । [श(ष)त् त ।
पश(ष) * बन्धे चुरा० उभ० सक० सेट् । पाश(ष)यति ते अपीप-
पशु * पु० सर्वमविशेषेण पश्यति दृश+कु पशादेशः । मृगादौ सोमयज्ञाङ्गलतति जन्तुभेदे, देवे च । दर्शनार्थेऽव्ययम् ।
पशुपति * पु० पशूनां सर्वत्र समदर्शिनां देवानां पतिः । महादेवे ।
पशुराज * पु० पशूनां राजा टच् समा० । सिंहे ।

पशुहरितकी * स्त्री॰ पशूनां हरीतकीव हितकारित्वात्। आम्रा-तकफले।

पश्चात् * अव्य॰ अपर+प्रथमापञ्चमीसप्तम्यर्थे आति पश्चादेशः। प्रथमाद्यर्थवृत्तेरपरशब्दस्यार्थे, चरमे, अधिकारे च।

पश्चात्ताप * पु॰ पश्चात् चरमस्तापः। अनुशये, कृतस्य कर्मणोऽनु-चितत्वधिया अनुशोचने च।

पश्चार्द्ध * पु॰ अपरमर्द्धं पश्चादेशः। शेषार्द्धे, अपरभागे, "पश्चार्द्धेन प्रविष्टः शरपतनभयात्" इति शकुन्तला।

पश्चिम * त्रि॰ पश्चात् भवः डिमच्। शेषभवे। प्रतीच्यामस्ताचल-सन्निकृष्टायां दिशि स्त्री॰। [चौरभेदे।

पश्यतोहर * पु॰ पश्यन्तमनादृत्य हरति हृ-अच् अलुक् इत॰।

पश्यन्ती * स्त्री॰ दृश-शतृ-ङीप्। परादिशब्दचतुष्टयमध्ये शब्द-भेदे। विस्तारो वाचस्पत्ये।

पश्वाचार * पु॰ पशुर्द्वैतः समदर्शी तस्येवाचारः। तन्त्रोक्ते वैदिक-मार्गानुसारिणि आचारे। [अपासीत् अपसिष्ट।

[प]स * बाधे, दन्त्ये च भ्वादि॰ उभ॰ सक॰ सेट्। पसति ते अपसीत्

[पं]स * नाशने चुरा॰ उभ॰ सक॰ सेट् इदित्। पंसयति ते अपपंसत्

[...]त। [पारदाः पह्लवास्तथा" इति मनुः।

[पह्ल]व * पु॰ म्लेच्छधारिम्लेच्छजातिभेदे, "शका जवनकाम्बोजाः

[पा] * पाने भ्वादि॰ पर॰ सक॰ अनिट्। पिबति अपात्। णिच् पाययति। [पालयति।

[पा] * रक्षणे अदा॰ पर॰ सक॰ सेट्। पाति अपासीत्। णिच्

[पांशव] * पु॰ पांशोर्विकारः अण्। (पाङ्गा) लवणभेदे। पांशुजादयो-ऽप्यत्र। [त्रिन॰ शुष्कगोमये, कर्पूरभेदे च।

[पांशु](सु) * पु॰ पश-पंसि-वा कु॰ दृ॰। धूलौ, अस्यार्थचिरस-

[पांशुचत्व]र * न॰ पांशुभिः सञ्चितगोमयैः पतमस्य। वास्तूकशाके।

प्रतिक्षिप्त ० त्रि० प्रति+क्षिप-क्त । प्रेषिते, [illegible], [illegible] तिरस्कृते च । [illegible]

प्रतिग्रह ० पु० प्रति+ग्रह-अप् । स्वीकारे, [illegible]

प्रतिघ ० पु० प्रति+हन ड [illegible] । प्रतिघाते, कोपे च ।

प्रतिघातन ० न० प्रति-हन+स्वार्थे णिच्-ल्युट् । मारणे ।

प्रतिच्छन्दस् ० न० छन्दोऽभिप्रायः प्रतिगतश्छन्दः । [illegible] प्रतिरूपे, अनुरोधे च । [illegible]

प्रतिच्छाया ० स्त्री० प्रतिरूपा छाया प्रा० । प्रतिमायां, [illegible]

प्रतिजागर ० पु० जागरस्य प्रतिनिधिः । [illegible]

[illegible]

पदप्राप्तौ, कर्त्तव्यतावधाने च "विषादलुप्तप्रतिपत्तिविस्मितम्" इति रघुः।

प्रतिपत्फला २ स्त्री॰ प्रतिपत् फलं यस्याः। कुष्माण्डवेले (कोट चुम्बो)। [क्विप्। पक्षाद्यके तिथौ।

प्रतिपद् ● स्त्री॰ प्रतिपद्यते उपक्रम्यते पक्षोऽनया प्रति+पद-

प्रतिपन्न * त्रि॰ प्रति+पद-क्त। अवगते, स्वीकृते, "प्रतिपन्न हि विरोधिनेऽपि" इति कुमारः। विक्रान्ते च। [च।

प्रतिपादन * न॰ प्रति+पद-णिच्-ल्युट्। दाने, बोधने, प्रतिपत्तौ

प्रतिप्रसव * पु॰ प्रति+प्र+सू-अप्। निषिद्धस्य पुन प्राप्तिसम्भावनायाम्। [बोधके त्रि॰।

प्रतिबन्ध * पु॰ प्रति+बन्ध-घञ्। कार्य्यप्रतिघाते। ल्युट्। प्रति-

प्रतिबन्धि(वन्दि) * पु॰ प्रति+बन्ध (वन्द) वा इन्। अनिष्टान्तरसम्बन्धके वाक्ये।

प्रतिबल * पु॰ प्रतिकूलं बलं यस्य। शत्रौ "प्रतिबलजलधेः" इति वेणी॰। प्रतिरूपं बलं यस्य। तुल्यबले त्रि॰ "यो मे प्रतिबलो लोके" इति चण्डी।

प्रतिभय ● त्रि॰ प्रतिगतं भयमस्मात्। भयहेतौ, भयङ्करे च।

प्रतिभा * स्त्री॰ प्रति+भा-अ। बुद्धौ, प्रत्युत्पन्नबुद्धौ च।

प्रतिभू * पु॰ प्रतिनिधिर्भवति भू-क्विप्। लग्नके (जामिन)।

प्रतिमा * स्त्री॰ प्रति+मा-अ। गजदन्तस्य बन्धे, सदृशीकरणे, सदृशमृत्तिकाशिलादिमूर्त्तौ। "प्रतिमायां शिलाबुद्धिः" इति पुराणम्। ब॰। उत्तरपदस्थः। सदृशे त्रि॰। यथा देवप्रतिमः।

प्रतिमान * न॰ प्रतिमीयतेऽनेन प्रति-मि मा-वा ल्युट्। प्रतिबिम्बे, प्रतिमायां, गजकुम्भयोरधोभागे, तद्दन्तयोर्मध्यस्थाने च।

प्रतिमुक्त * त्रि॰ प्रति+मुच-क्त। परिहिते, परित्यक्ते च।

प्रतियत्न * पु॰ प्रति+यत-नङ्। वाञ्छायाम्, उपग्रहे, निग्रहादौ, बन्द्यां, सतो गुणान्तराधानरूपे संस्कारे, ग्रहणे, प्रतिग्रहे च। प्रतिरूपो यत्नो यस्य ब॰। प्रतियत्नयुक्ते त्रि॰।

प्रतियातना * स्त्री॰ प्रति+यात्यतेऽनया चु॰ यत-युच्। प्रतिमायाम् मा॰ म॰। तुल्यरूपयातनायाम्।

प्रतियोगिन् * त्रि॰ प्रतिरूपं युज्यते प्रति+युज+घिनुण्। प्रतिकूलसम्बन्धवति। यथा अभावस्य प्रतिकूलसम्बन्धवत्त्वात् घटादिस्तस्य प्रतियोगी। विरुद्धपक्षे च।

प्रतिरूप * न॰ प्रतिगतं रूपम्। प्रतिच्छायायां, प्रतिबिम्बे च। प्रतिगतं रूपमस्य ब॰। सदृशे त्रि॰। स्वार्थे कन्। अत्रैवार्थे।

प्रतिविरोध * पु॰ प्रति+वि+रुध-भावे घञ्। बाधे, प्रतिबन्धे, निरोधे, तिरस्कारे, चौर्य्ये च। कर्त्तरि अच्। चौरे। तत्तुल्यविन्यस्तावयव। [अच् समा॰। वामे, विपरीते च।

प्रतिलोम * त्रि॰ प्रतिगतं लोम आनुकूल्यमस्मात् प्रति+लोमन्

प्रतिलोमज * पु॰ प्रतिलोमात् जातः जन-ड। उत्तमवर्णस्त्रियाम्, अधमवर्णात् जाते सङ्कीर्णवर्णे च।

प्रतिवचन * न॰ प्रतिरूपं वचनम्। प्रतिवाक्ये, उत्तरे, विरुद्धवाक्ये च।

प्रतिवात * त्रि॰ प्रतिगतो वातो यतः। यस्मात् प्रदेशात् वायुः प्रत्यागच्छति तस्मिन् देशे "प्रतिवातेऽनुवाते च" इति मनुः।

प्रतिवादिन् * पु॰ त्रि॰ प्रतिकूलं वदति वद-णिनि। प्रतिपक्षे व्यवहारे प्रत्यर्थिनि अभियोज्ये (आसामी) "कारणे प्रतिवादिनि" इति स्मृतिः।

प्रतिवासि(वेशि)न् * त्रि॰ प्रत्यासन्नं वसति (विशति) प्रति+वस-(विश) वा णिनि। (पड़सि) गृहासन्नवासिनि। स्त्रियां ङीप्। "दृष्टिं हि प्रतिवासि(वेशि)नि" इति साहि॰ द॰।

प्रतिविधान * न॰ प्रति+वि+धा-ल्युट्। प्रतीकारे।

प्रतिबिम्ब * न॰ प्रतिरूपं बिम्बम्। बिम्बसादृश्ये, प्रतिच्छायायाञ्च।

प्रतिविषा * स्त्री॰ प्रतिगतं विषं यया। अतिविषायाम् (आतइच)

प्रतिशासन * न॰ प्रति+शास-ल्युट्। भृत्यादेर्निकृष्टस्य नियोगे।

प्रतिश्याय * पु॰ प्रति+श्यै-ण। पीनसरोगे।

प्रतिश्रय * पु॰ प्रतिश्रीयते प्रति+श्रि-अच्। यज्ञगृहे, सभायां, गृहे, आश्रये च।

प्रतिश्रव * पु॰ प्रति+श्रु-अप्। स्वीकारे। [च।

प्रतिश्रुत् * स्त्री॰ प्रतिरूपं श्रूयते श्रु-क्विप्। प्रतिशब्दे, प्रतिध्वनौ

प्रतिषेध ● पु॰ प्रति+सिध-घञ्। निषेधे "मा कुरु" इत्यादिना निवारणे। ल्युट्। तत्रैवार्थे न॰।

प्रतिष्टम्भ * पु॰ प्रति+स्तम्भ-घञ् षत्वम्। प्रतिबन्धे।

प्रतिष्ठा * स्त्री॰ प्रति+स्था-अङ्। स्थितौ, व्रतयागादेः समाप्तौ, चतुरक्षरपादके छन्दोभेदे, कूपादेः संस्कारे, व्रतानां समाप्तौ कर्त्तव्ये कर्मभेदे, आश्रये च "ब्रह्म पुच्छं प्रतिष्ठा" इति श्रुतिः।

प्रतिसर * पु॰ प्रति-सृ+अच्। सैन्यपश्चाद्भागे, हस्तसूत्रे च।

प्रतिसर्ग * पु॰ प्रतिरूपः प्रतिकूलो वा सर्गः। ब्रह्मणः सृष्टितुल्यायां मरीच्यादिसृष्टौ, प्रलये च। [निकायाम् (परदा)।

प्रतिसीरा * स्त्री॰ प्रतिसिनोति सीयते वा रक् दीर्घश्च। जव-

प्रतिसूर्य्यक * पु॰ प्रतिरूपः सूर्य्यः स्वार्थे कन्। उपसूर्य्यकमण्डले (सूर्य्यसभा), तत्समवर्णे कृकलासे च।

प्रतिसृष्ट * त्रि॰ प्रति+सृज-क्त। प्रत्याख्याते, प्रेषिते च।

प्रतिसीमा * स्त्री॰ प्रतिनिहिता सीमा सीमवल्ली। मत्स्यपत्रलताम्।

प्रतिहत * त्रि॰ प्रति+हन-क्त। द्विष्टे, रुद्धे, निरस्ते, प्रतिस्खलिते च।

प्रति(ती)हार * पु॰ प्रति+हृ-घञ् वा दीर्घः द्वारे अण्। द्वारदेशे, मायाकारे च त्रि॰ स्त्रियां ङीप्। ण्वुल्। द्वारपाले त्रि॰। णिनि। प्रतीहारीत्यप्यत्र, मायाकारे च। [त्रि॰।

प्रतीक * पु॰ प्रति-कन् नि॰ दीर्घः। अवयवे। प्रतिरूपे, विलोमे च

प्रतीक्षा ● स्त्री॰ प्रति+ईक्ष-अ। अपेक्षायाम्।

प्रतीक्ष्य * त्रि॰ प्रति+ईक्ष-ण्यत्। पूज्ये "प्रतीक्ष्यं तत्प्रतीक्ष्याये

पिदप्यक्षे” इति माघः। [प्रतीच्योऽप्यत्र।
प्रतीचीन * वि० प्रतीच्यां भवः ख। पश्चिमदिग्भवे। यत्।
प्रतीत * वि० प्रति-इण-क्त। ख्याते, ज्ञाते, हृष्टे, सादरे च।
प्रतीति * स्त्री० प्रति+इण-क्तिन्। ज्ञाने, ख्यातौ, आदरे, हर्षे च।
प्रतीप * वि० प्रति+अप्-कर्म० अच् नि०। प्रतिकूले। चन्द्रवंश्ये नृपभेदे पु०। [णिनि। भार्य्यायाम्।
प्रतीपदर्शिनी * स्त्री० प्रतीपं प्रतिकूलं दर्शयति दृश-णिच्
प्रतीर ० न० प्रतीर्य्यते प्र+तीर-क। तटे, तीरे च।
प्रतीवाप * पु० प्रति+वप-घञ् दीर्घः। गलितस्वर्णादेरवचूर्णने।
प्रतोद * पु० प्रतुद्यतेऽनेन तुद-घञ्। अश्वादिताड़नदण्डे (चावुक्)।
प्रतोली * स्त्री० प्र+तुल अच् गौरा० ङीप्। रथ्यायाम्, पुराभ्यन्तरवर्त्मनि, इट्टादौ निर्मिते पथि च।
प्रत्न * त्रि० प्र+त्न। पुरातने।
प्रत्यक्पर्णी * स्त्री० प्रत्यञ्चि पर्णान्यस्याः ङीप्। अपामार्गे। प्रत्यक्पुष्प्यप्यत्र। [द्रवन्त्यां, मूषिकपर्ण्याञ्च।
प्रत्यक्श्रेणी * स्त्री० प्रतीची श्रेणीव अस्याः न कप्। दन्ती·
प्रत्यक्ष ० अव्य० प्रतिरूपमक्षम् अव्ययी० अच्। इन्द्रियजन्ये ज्ञानभेदे। अर्श आद्यच्। तद्विषये त्रि०।
प्रत्यग्र * वि० प्रतिगतमग्रमग्रत्वम् प्रा०। नूतने, शोधिते च।
प्रत्यग्गिरा ० स्त्री० देवीभेदे।
प्रत्यच् * त्रि० प्रति+अन्च क्विन्। पश्चिमकाले, पश्चिमदेशे च पश्चिमायां दिशि स्त्री० ङीप्। प्रतीची।
प्रत्यनीक ० पु० प्रतिकूलमनीकं यस्य। रिपौ, विघ्ने च।
प्रत्यन्त * पु० प्रतिगतोऽन्तम् प्रा०। म्लेच्छदेशे। सन्निकृष्टदेशे त्रि०। [पर्वते।
प्रत्यन्तपर्वत * पु० प्रत्यन्तः सन्निकृष्टः पर्वतः। बृहत्पर्वतसमीपस्थे
प्रत्यभियोग * पु० प्रतिरूपोऽभियोगः। अभियुक्तेन प्रतिवादिना वादिनं प्रति अभियोगान्तरकरणे।
प्रत्यभिवाद * पु० प्रति+अभि+वद-णिच् घञ्। अभिवादस्य प्रतिरूप आशीर्वचनादौ। ल्युट्। प्रत्यभिवादनमप्यत्र न०।
प्रत्यय * पु० प्रति+इण्-अच्। शपथे, ज्ञाने, विश्वासे, अधीने, शब्दे, छिद्रे आचारे, विषये, ख्यातौ, कारणे, “अवैमि ते प्रत्ययमुत्तमम्” इति कुमारः, व्याकरणोक्ते प्रकृतिनिमित्तकत्व विधीयमाने शब्दभेदे च।
प्रत्यर्पित * त्रि० प्रति+अर्प-क्त। दत्ते, विन्यस्ते, प्रतिगते च।
प्रत्यर्थिन् * त्रि० प्रत्यर्थयते प्रति-अर्थ+णिच्-णिनि। शत्रौ, प्रतिकूलार्थके त्रि०। व्यवहारे प्रतिवादिनि।
प्रत्यवेक्षण * न० प्रति+अव+ईक्ष-ल्युट्। प्रतिदिनं यत्नेन ... दुर्दर्शने।
प्रत्यवसान ० न० प्रति+अव+सो-ल्युट्। भोजने।
प्रत्यवसित * त्रि० प्रति+अव+सो-क्त। भुक्ते।

प्रत्यवस्कन्द * पु० प्रति+अव+स्कन्द-घञ्। व्यवहारे चतुर्विधोत्तरमध्ये उत्तरभेदे। ल्युट्। “अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा। प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत्” इति स्मृत्युक्तलक्षणे उत्तरभेदे, औषधभेदे च न०।
प्रत्यवस्थातृ * त्रि० प्रत्यवतिष्ठते प्रतिपक्षतया विवदते प्रति+अव+स्था-तृच्। प्रतिपक्षवादिनि शत्रौ।
प्रत्यवाय * पु० प्रति+अव+इण्-अच्। पापे।
प्रत्याख्यात * त्रि० प्रति+आ-ख्या-क्त। निराकृते, दूरीकृते च।
प्रत्याख्यान * न० प्रति+आ+ख्या-ल्युट्। निराकरणे।
प्रत्यादिष्ट * त्रि० प्रति+आ+दिश-क्त। निरस्ते।
प्रत्यादेश * पु० प्रति+आ+दिश-घञ्। निराकरणे।
प्रत्यालीढ * न० प्रति+आ+लिह-क्त। “आलीढं दक्षिणं पादं प्रत्यालीढन्तु वामकम्” इत्युक्ते वामपादसङ्कोचेन दक्षिणपादप्रसारणरूपे धन्विनां स्थितिविशेषे। आस्वादिते त्रि०।
प्रत्यासन्न * त्रि० प्रति+आ+सद क्त। अतिनिकटस्थे।
प्रत्याहार * पु० प्रति+आ+हृ-घञ्। योगशास्त्रप्रसिद्धे इन्द्रियाणां स्वस्वविषयेभ्यो निराकरणे। [निष्प्रयोजनार्थे सेनाप्रधानार्थे च।
प्रत्युत्क्रम * पु० प्रति+उद्+क्रम-घञ् न वृद्धिः। युद्धार्थोद्योगे, प्रथ·
प्रत्युत्तर ० न० प्रतिरूपमुत्तरमस्य। उत्तरस्योत्तरवाक्ये।
प्रत्युत्थान * प्रति+उद्+स्था-ल्युट्। अभ्युत्थाने, आगतस्य सत्कारार्थमासनादुत्थितौ च। [वितर्कौ।
प्रत्युत्पन्नमति * त्रि० प्रत्युत्पन्ना तत्कालोचिता मतिर्यस्य। तत्कालो·
प्रत्युद्गमनीय * न० प्रति+उद्+गम-अनीयर्। धौतवस्त्रयुग्मे, “गृहीतप्रत्युद्गमनीयवस्त्रा” इति कुमारः पाठान्तरं प्रत्येति न गुरुत्वम्। समुपस्थानयोग्ये, पूजनीये च त्रि०।
प्रत्यूष * पु० प्रत्यूषति रुजति कामुकान् ऊष-रुजायां क। प्रभाते, अष्टवसुमध्ये वसुभेदे च। अस्। प्रत्यूषस्। प्रभाते।
प्रत्यूह * पु० प्रति+ऊह-घञ्। विघ्ने।
प्रथ * ख्यातौ भ्वादि० आत्म० सक० सेट् घटा०। प्रथते अप्रथिष्ट। णिच् प्रथयति। अङ् प्रथा। [अपप्रथत् अ।
प्रथ ० ख्यातौ अद० विक्षेपे सक० चुरा० उभ० सेट्। प्रथयति ते
प्रथम ० त्रि० प्रथ अमच्। प्रधाने, आद्ये च। जसि सर्वनामताऽपि।
प्रथा * स्त्री० प्रथ-अङ्। ख्यातौ।
प्रथित ० त्रि० प्रथ-क्त। ख्याते। [च।
प्रथिमन् * पु० पृथोर्भावः पृथु+इमनिच् प्रथादेशः। पृथुत्वे, स्थूलत्वे
प्रथुक * पु० प्रथ-कुकन्। चिपिटके।
प्रदर * पु० प्र-दॄ-अप्। विदारणे, भङ्गे, योनिरोगभेदे च।
प्रदीप * पु० प्र+दीप-क। दीपे। [विशदे। प्रकाशके त्रि०।
प्रदीपन * पु० प्रदीपयति अग्निम् प्र+दीप+णिच्-ल्यु। क्षारे
प्रदेश * पु० प्र+दिश+घञ्। एकदेशे, “निजः प्रदेशादय” इति कुमारः। देशमात्रे च, तर्ज्जन्यङ्गुष्ठमानपरिमाणे, भित्तौ च।

प्रदेशन * न० प्रदिश्यते दिश-ल्युट्। नृपादेरुपहारे (भेटी)।
प्रदेश(शि)नी * स्त्री० प्रदिश्यतेऽनया प्र+दिश-करणे ल्युट् ङीप्।
तर्जन्यां तया हि वस्तु निर्दिश्यते। णिनि। प्रदेशिनी अत्रैवार्थे।
प्रद्युम्न * पु० प्रकृष्टं द्युम्नं बलं यस्य। कन्दर्पे, वैष्णवागमोक्ते चतु-
र्व्यूहात्मकविष्णोरंशभेदे च।
प्रद्रव * पु० प्र+द्रु अप्। पलायने। घञ् प्रद्रावोऽप्यत्र।
प्रधन * न० प्र+धा-क्यु। युद्धे।
प्रधान ० न० प्र+धा-ल्युट्। सांख्यमतसिद्धायां सत्त्वरजस्तमोरू-
पगुणत्रयात्मिकायां प्रकृतौ, तत्कार्ये बुद्धितत्त्वे, परमात्मनि,
प्रशस्ते सचिवे च। सेनापत्यादौ पु०। श्रेष्ठे त्रि०।
प्रधि * पु० प्रधीयन्ते काष्ठान्यत्र प्र+धा कि। चक्रावयवकाष्ठास-
ञ्जनस्थाने रथनाभौ।
प्रधूपिता * स्त्री० प्र+धूप-क्त। सन्तापितायां "व्यसनप्रधूपिताम्"
इति कुमारः। ज्योतिषोक्तायां सूर्याक्रान्तायां दिशि च।
प्रपञ्च * पु० प्र+पचि-विस्तारे घञ्। विस्तारे, वैपरीत्ये, सञ्चये,
प्रतारणे, संसारे च।
प्रपथ्या ० स्त्री० प्रकृष्टा पथ्या प्रा० स०। हरीतक्याम्।
प्रपद * न० प्रारब्धं पदम् प्रा० स०। पादस्याग्रभागे।
प्रपन्न ० त्रि० प्र+पद क्त। शरणागते, "प्रपन्नार्त्तिहरे देवि!" इति
चण्डी।
प्रपा * स्त्री० प्रपीयतेऽस्यां पा-ड। पानीयगृहे (जलसत्र)।
प्रपाठक * पु० प्रकृष्टः पाठोऽत्र कप्। वेदस्याध्यायावयवेंऽशभेदे।
प्रपात * पु० प्रपतत्यस्मात् पत-घञ्। तटरहिते निरवलम्बे पर्वत-
स्थाने, निर्झरे, कूले, अवस्कन्दे च। भावे घञ्। पतने।
प्रपितामह * पु० प्रगतः पितामहो यस्मात् प्रकृष्टः पितामहो
वा। दक्षादिप्रजापतिरूपाणां प्रजाजनकानामुत्पादके चतुर्मुखे
ब्रह्मणि, पितामहपितरि च। तत्पत्न्याम् स्त्री० ङीप्।
प्रपुन्नाड(ट) * पु० पुमांसम् नाडयति नाटयति नड-भ्रंशे नट-अच-
स्पन्दने वा अण् प्रकृष्टः पुन्नाडः (पुन्नाटः) प्रा० स०। चक्रमर्दे
(चाकुन्दा) वृक्षे। ह्रस्व त्वे प्रपुनाडोऽप्यत्र दद्रुमर्दने च।
प्रपूरिका * स्त्री० प्रकर्षेण पूर्यते कण्टकैः पूर-घञ् टाप् स्वार्थे
कन्। कण्टकार्याम्।
प्रपौण्डरीक * पु० पुण्डरीक+स्वार्थेऽण्। प्रकृष्टं तदिव पुष्पं यस्य।
गजमनुष्याणां चक्षुर्हितकारके ग्रामपर्णीतुल्यपत्रके वृक्षभेदे।
प्रपौत्र * पु० प्रगतः कारणतया पौत्रम्। पौत्रस्य पुत्रे, तत्कन्यायां
स्त्री० ङीप्।
प्रफुल्ल * त्रि० प्र+फुल्ल-विकाशने अच्। विकाशयुक्ते। प्र+फल-क्त
उत्वभावे अत इत्त्वम्। प्रफुल्तमप्यत्र। "लोध्रद्रुमं सानुमतः
प्रफुल्लम्(लतम्)" इति रघुः।
प्रबन्ध * पु० प्र+बन्ध-घञ्। सन्दर्भे, ग्रन्थादेः रचने च।
प्रबन्धकल्पना * स्त्री० ६त०। "प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः
कथां विदुः" इत्युक्तलक्षणायामल्पसत्यायां बहुमिथ्याकथायाम्।
प्रबाल * न० प्रकर्षेण बलति अवकम्पते ज्वलादित्वात् णः। नवप-
त्रे "पुष्पं प्रबालोपहितं यदि स्यात्" इति कुमारः। रक्तवर्णे
मणिभेदे (मुगा), वीणादण्डे च।
प्रबोध * पु० प्र+बुध घञ्। प्रकृष्टबुद्धौ, निद्राराहित्ये च।
प्रबोधन * पु० प्र+बुध-णिच्-ल्युट्। कालादिहेतुभिः पूर्वगन्धस्य
न्यूनतायां प्रयत्नविशेषेण तदुद्बोधने।
प्रबोधनी * स्त्री० प्र+बुध्यतेऽनया प्र+बुध-ल्युट्। दुरालभायाम्।
प्रबुध्यते हरिरत्र। कार्त्तिकशुक्लैकादश्याम्। प्र+बुध-णिच्-
णिनि ङीप्। प्रबोधिनी तत्रैवार्थे।
प्रभञ्जन ० न० प्रभनक्ति तृणादीन् प्र+भन्ज-युच्। वायौ।
प्रभद्र * पु० प्रकृष्टं भद्रमस्मात् ५ब०। निम्बवृक्षे।
प्रभव * पु० प्रभवत्यस्मात् प्र+भू-अप्। आद्यप्रकाशस्थाने, उत्पा-
दके, "क्व सूर्यप्रभवो वंशः" इति रघुः। ६०वर्षमध्ये वत्सरभेदे
च। प्र+भू भावे अप्। पराक्रमे, जन्मनि च।
प्रभा ० स्त्री० प्र+भा-अङ्। दीप्तौ।
प्रभाकर ० पु० प्रभां करोति कृ-अच्। सूर्ये, मीमांसकभेदे च।
प्रभाञ्जन ० पु० प्रभयाञ्जयति अन्ज-णिच्-ल्यु। शोभाञ्जने।
प्रभात * न० प्र+भा-भावे क्त प्रकृष्टं भातमत्र। प्रातःकाले। प्र+भा-
कर्त्तरि क्त। प्रभायुक्ते त्रि०।
प्रभाव * पु० प्र+भू-घञ्। राज्ञां कोषदण्डजाते तेजसि, तेजसि,
सामर्थ्ये, विक्रमे, शान्तौ, उद्भवे च।
प्रभाष * पु० प्र+भाष-अच्। अष्टवसुमध्ये वसुभेदे, प्रकृष्टकथने च।
प्रभास * पु० तीर्थभेदे "प्रभासः पुष्कराणि च" इति स्नानमन्त्रः।
प्रभिन्न * पु० प्र+भिद-क्त। स्रवन्मदे गजे। प्रभेदवति त्रि०।
प्रभु * पु० प्र+भू-डु। विष्णौ, शब्दे, पारदे च। स्वामिनि, अधि-
पतौ च त्रि०।
प्रभूत * त्रि० प्र+भू-क्त। प्रचुरे, उद्गते, भूते, उन्नते च।
प्रभृति * अव्य० प्र+भृ-क्तिच्। तदारभ्येत्यर्थे। ब० उत्तरपदस्थः
तदादिके त्रि०। [भेदे
प्रभेद * पु० प्रभिद्यतेऽनेन प्र+भिद-घञ्। प्रकारे। भावे घञ्।
प्रभ्रष्टक ० न० प्र+भ्रन्श-क्त ततः कन्। चूडातोलम्बमाने माल्ये।
प्रमथ * पु० प्र+मथ-अच्। शिवानुचरभेदे, अश्वे च। हरितक्यां
स्त्री०।
प्रमथन ० न० प्र+मथ-ल्युट्। बधे, क्षोभने, विलोडने च।
प्रमथाधिप * पु० ६त०। शिवे, महादेवे च।
प्रमद * पु० प्र+मद-अप्। हर्षे। प्रमाद्यत्यनेन अप्। धुस्तूरफले
न०। कर्त्तरि अच्। प्रमत्ते त्रि०।
प्रमदवन * न० प्रमदस्य हर्षस्य वनम्। राज्ञोऽन्तःपुरस्थे वने।
प्रमदा * स्त्री० प्रमाद्यत्यनया अप्। उत्तमयोषिति।
प्रमदावन * न० प्रमदाया उचितं वनम्। अन्तःपुरसेवनयोग्ये वने।

प्रमदाकाननादयोऽप्यत्र।
प्रमनस् * त्रि॰ प्रहृष्टं मनो यस्य हृष्टपदलोपः। प्रहृष्टचित्ते।
प्रमा * स्त्री॰ प्र+मा-अङ्। यथार्थज्ञाने, भ्रमभिन्ने ज्ञाने च।
प्रमाण * न॰ प्रमीयतेऽनेन। प्रमाज्ञानसाधने इन्द्रियादौ, मर्य्यादायाम्, शास्त्रे, सत्यवादिनि, हेतौ, प्रमातरि च। "न प्रमाणं यदीन्दुः" इति मुद्राराक्षसम्। भावे ल्युट्। यथार्थज्ञाने।
प्रमातामह * पु॰ प्रारब्धो मातामहो येन प्रारब्धपदलोपः। मातामहपितरि। तत्पत्न्यां स्त्री॰ ङीप्।
प्रमाद * पु॰ प्र+मद-घञ्। कर्त्तव्ये अकर्त्तव्यत्वधिया ततो निवृत्तौ अकर्त्तव्ये कर्त्तव्यत्वधिया तत्र प्रवृत्तौ वा अनवधानतायाम्।
प्रमापण * न॰ प्र+मीञ्-हिंसायां स्वार्थे णिच्-आत्वे पुक् ल्युट्। मारणे।
प्रमिति * स्त्री॰ प्र+मा-क्तिन्। प्रमायां, यथार्थज्ञाने च।
प्रमीत * त्रि॰ प्र+मीञ्-हिंसायां क्त। मृते। "प्रमीतौ पितरौ यस्य" इति स्मृतिः। यज्ञार्थे हतपशौ च।
प्रमीला * स्त्री॰ प्र+मील-अ। तन्द्रायाम्।
प्रमुख * न॰ प्रकृष्टं मुखमारम्भः। तदादित्वे। ब॰ उत्तरपदस्थः। तदादिके, मान्ये, प्रथमे, प्रधाने, श्रेष्ठे च त्रि॰। पुन्नागवृक्षे, समूहे च पु॰।
प्रमुद् * त्रि॰ प्रकृष्टा मुद् यस्य। हृष्टे, हर्षयुक्ते च।
प्रमुदित * त्रि॰ प्र+मुद क्त। हृष्टे, हर्षयुक्ते च।
प्रमेह * पु॰ प्र+मिह-घञ्। रोगभेदे।
प्रमोचनी * स्त्री॰ प्रकर्षेण मुच्यते निस्त्वचीक्रियते भोजनार्थम् मुच-कर्मणि ल्युट् ङीप्। गोडुम्बायाम् (गोमुक)।
प्रमोद * पु॰ प्र+मुद-हर्षे घञ्। हर्षे।
प्रयत * त्रि॰ प्र+यम-क्त। पवित्रे, नियमयुक्ते च।
प्रयत्न * पु॰ प्र+यत-नङ्। कार्य्यानुकूले यत्नभेदे। "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्" इति न्यायोक्ते त्रिविधयत्ने स चात्मगुण इति वैशेषिकादयः बुद्धिधर्म इति सांख्यादयः। प्रयासे च।
प्रयाग * पु॰ प्रकृष्टो यागो यस्मात् ५ब॰। गङ्गायमुनयोः सङ्गमस्थाने तीर्थभेदे, इन्द्रे, यज्ञे च। ५ब॰। अश्वे, अश्वमेधाङ्गत्वात्तस्य तथात्वम्। कर्म॰। प्रकृष्टे यज्ञे। [मादरातिशये।
प्रयाम * पु॰ प्र+यम घञ्। महार्घतारूपात् धान्यादौ अनाला-
प्रयास * पु॰ प्र+यस-घञ्। प्रयत्नपदार्थे, प्रयाने च।
प्रयुत * न॰ दशलक्षसंख्यायां, तत्संख्याते च "अयुतप्रयुतकोटयः" इति लीलावती।
प्रयोक्तृ * त्रि॰ प्र+युज-तृच्। प्रयोगकर्त्तरि, ऋणदानादौ अधमर्णेऽधमर्णे उत्तमर्णे, प्रयोगकर्त्तरि च। [च।
प्रयोग * पु॰ प्र+युज-घञ्। अनुष्ठाने, कर्मारम्भे, निदर्शने, प्रयो
प्रयोजक * त्रि॰ कार्य्यादौ प्रवर्त्तके प्रेरके प्र+युज-ण्वुल्। निकृष्टस्य भृत्यादेः प्रेरके, व्याकरणोक्ते हेतुसंज्ञे कर्त्तरि च।
प्रयोजन * न॰ प्र+युज-ल्युट्। कार्य्ये, उद्देश्ये, हेतौ च।
प्रयोज्य * त्रि॰ प्रयोक्तुं शक्यते प्र+युज-शक्यार्थे यत्। निये- तिकृष्टे भृत्यादौ। [प्रयोज
प्ररूढ * त्रि॰ प्र+रुह-क्त। प्रवृद्धे, बद्धमूले, जाते च। भावे घञ्।
प्ररोह * पु॰ प्र+रुह-अच्। अङ्कुरे "प्रबालप्ररोह इव" इति रघुः। आरोहे च।
प्रलम्ब * पु॰ दैत्यभेदे। प्र+लम्ब-अच्। प्रकर्षेण लम्बमाने त्रि॰।
प्रलम्बघ्न * पु॰ प्रलम्बं हन्ति हन-टक्। बलदेवे। प्रलम्बहादयोऽप्यत्र।
प्रलय * पु॰ प्रलीयतेऽस्मिन् प्र+ली-अच्। सृष्टपदार्थानां नाशकरणे काले, ब्रह्मणो दिनावसाने च। भावे घञ्। नाशे, मूर्च्छायां च "प्रलयान्तोन्मिषिते विलोचने" इति कुमारः।
प्रलाप * पु॰ प्र+लप-घञ्। अनर्थकवाक्ये, निष्प्रयोजने वचने, दिवाक्ये च।
प्रलापहन् * पु॰ प्रलापं हन्ति हन-क्विप्। कुलत्थजातेऽन्ने।
प्रवचन * न॰ प्र+वच-ल्युट्। वेदार्थज्ञाने, प्रकृष्टवाक्ये च।
प्रव(ब)ण * पु॰ प्र+व(ब)ण-अच्। चतुष्पथे, निम्नस्थाने, उदरे, नम्रे, आयते, प्रगुणे क्षीणे, द्रुते, स्निग्धे, आसक्ते, धीरे च त्रि॰।
प्रवयस् * त्रि॰ प्रकृष्टं वयोऽस्य। प्रवृद्धे।
प्रवर * पु॰ प्र+वृ-अप्। सन्ततौ, गोत्रे, गोत्रप्रवर्त्तकमुनिव्यावर्त्तकमुनिगणे च। श्रेष्ठे त्रि॰। अगुरुचन्दने न॰।
प्रवर्ग * पु॰ प्र+वृज-घञ्। होमाग्निभेदे।
प्रवर्त्तक * त्रि॰ प्रवर्त्तयति प्र+वृत-णिच्-ण्वुल्। प्रवृत्तिजनके।
प्रवर्त्तना * स्त्री॰ प्र+वृत-णिच् युच्। प्रवृत्तिजनकव्यापारे विधौ। "अस्ति प्रवर्त्तनारूपमनुरूपं चतुर्ष्वपि" इति भर्त्तृहरिः।
प्रवर्ह * त्रि॰ प्र+वृह-अच्। श्रेष्ठे, प्रधाने च।
प्रवह * पु॰ प्र+वह-अच्। वायुभेदे। भावे अप्। नगरादहिर्गमने।
प्रवहण * न॰ प्र+वह-करणे ल्युट्। मनुष्यवाह्ये यानादौ, स्त्रीवाहने कर्णीरथे (महापाल)।
प्रवाणी * स्त्री॰ प्र+वे-ल्युट्-ङीप्। तन्तुवायशलाकायाम् (माकु)।
प्रवाद * पु॰ प्र+वद-घञ्। परम्परागतवाक्ये, परस्परकथोपकथने च।
प्रवारण * न॰ प्र+वृ णिच्-ल्युट्। काम्यदाने काम्यस्य वस्तुनो दाने।
प्रवास * पु॰ प्र+वस-घञ्। विदेशवासे।
प्रवासन * न॰ प्र+वस-णिच् ल्युट्। विदेशवासने, "सीताप्रवासन- पटौ." इत्युत्तरचरितम्। मारणे च।
प्रवासिन् * त्रि॰ प्र+वस-णिनि। विदेशवासिनि, "प्रवासी कुत्र [मायाति" इति षट्पञ्चाशिका।
प्रवाह * पु॰ प्र+वह घञ्। स्रोतसि, अनवच्छिन्नगति, व्यवहारे, उत्तमा
प्रवाहिका * स्त्री॰ प्रवाहयति मलं ण्वुल्। ग्रहण्याम्।

प्रबाहु * पु॰ प्रकृष्टो बाहुः। कूर्परस्याधोभागे। [च।

प्रविदारण * न॰ प्र+वि+-दृ-णिच्-ल्युट्। युद्धे, विदारणे, चाकीर्णे

प्रविश्लेष * त्रि॰ प्रकर्षेण विश्लेषो यस्य। विधुरे, परमविश्लेषे च।

प्रविषा ० स्त्री॰ प्रहतं विषं यया। अतिविषायाम् (आतइच्)।

प्रवीण ० त्रि॰ विनया प्रगायति प्र+वीणा+णिच्-अच्। निपुणे।

प्रवृत्ति * स्त्री॰ प्र+वृत+क्तिन्। प्रवाहे, वार्त्तायाम्, अवन्त्यादिदेशे, हस्तिमदे, न्यायोक्ते चिकीर्षाकृतिसाध्यताज्ञानाधीने प्रयत्नभेदे च।

प्रवृद्ध ० त्रि॰ प्र+वृध-क्त। वृद्धियुक्ते, प्रौढ़े च।

प्रवेक * त्रि॰ प्र+विच-घञ्। प्रधाने।

प्रवे(णि)णी * स्त्री॰ प्र+वेण इन् वा ङीप्। गजस्कन्धस्थे चित्रकम्बले।

प्रवेल * पु॰ प्र+वेल-अच्। पीतमुद्गे (सोनामुग)।

प्रवेश ० पु॰ प्र+विश-घञ्। अन्तर्गमने।

प्रवेशन * न॰ प्रविश्यतेऽनेन विश-करणे ल्युट्। प्रधानद्वारे, सिंहद्वारे च। भावे ल्युट्। प्रवेशे।

प्रवेष्ट * पु॰ प्र+वेष्ट-अच्। बाहौ, बाहुनीचभागे, हस्तिदन्तमांसे, गजपृष्ठस्थाने च। [ष्यान्त स्त्री॰।

प्रव्रजित * पु॰ प्र+व्रज-क्त। सन्न्यासिनि। मांसी, मुण्डीर्य्यां, ताप-

प्रव्रज्या * प्र+व्रज-क्यप्। सन्न्यासे, सर्वकर्मत्यागेन विधानेनाश्रमान्तरगमने। [क्त। सन्न्यासभ्रष्टे।

प्रव्रज्यावसित * पु॰ प्रव्रज्यातः सन्न्यासात् अवसितः च्युतः अव+सो-

प्रशंसा * स्त्री॰ प्र+शन्स-अ। गुणाविष्कारेण स्तुतौ।

प्रशमन * न॰ प्र+शम-णिच्-ल्युट्। वधे, शान्तकरणे च। "लब्धप्रशमनस्वास्थ्यम्" इति रघुः। शान्तौ च "सर्वाबाधाप्रशमनम्" इति चण्डी।

प्रशस्त * त्रि॰ प्र+शन्स-क्त। प्रशंसनीये, श्रेष्ठे, सेवे च। [प्रेरणे।

प्रश्न * पु॰ प्रच्छ-नङ्। जिज्ञासायाम्, ज्ञातुमिच्छया कथनाय

प्रश्नी * स्त्री॰ प्रच्छ+निङ्-ङीप्। कुम्भिकायाम् (पाना)।

प्रश्रय ० पु॰ प्र+श्रि-अच्। प्रणये।

प्रश्रित * त्रि॰ प्र-श्रि-क्त। विनीते।

प्रष्ठ * त्रि॰ प्र+स्था-क नि॰ षत्वम्। अग्रगामिनि, श्रेष्ठे च।

प्रष्ठौही * स्त्री॰ प्रष्ठं प्रथमगर्भं वहति वह+ण्वि। प्रथमगर्भिण्याम्।

प्रष्ठवाह् * पु॰ प्रष्ठं वहति ण्वि। युगपार्श्वस्थे वृषादौ, युगपार्श्वे प्रथमयोजिते, दम्ये च। [सिट्। विप् प्रसदति।

प्रस * प्रसवे तनौ च सक॰ दिवा॰ आत्म॰ सेट् उदा॰। प्रस्यते अप-

प्रसक्त * त्रि॰ प्र+सन्ज-क्त। प्रसङ्गविषये।

प्रसक्ति ० स्त्री॰ प्र+सन्ज-क्तिन्। प्रसङ्गे, व्याप्तौ, अनुमितौ च।

प्रसङ्ग * पु॰ प्र+सन्ज-घञ्। व्याप्तौ, सम्बन्धभेदे, स्मृतस्योपेक्षानर्हत्वरूपे सङ्गतिभेदे, प्राप्तस्य अन्योद्देशेन कृतकर्मणोऽन्यस्य सिद्धिरूपे अन्यार्थकार्य्यनिर्वाहे, प्रसक्तौ, प्रस्तावे च।

प्रसत्ति ० स्त्री॰ प्र+सद क्तिन्। नैर्मल्ये, प्रसन्नतायाम्।

प्रसन्न ० त्रि॰ प्र+सद-क्त। निर्मले, सन्तुष्टे, कृतानुग्रहभेदे च। सुरायां स्त्री॰।

प्रसन्नता * स्त्री॰ प्रसन्नस्य भावः तल्। प्रसादे, अनुग्रहभेदे च।

प्रसभ * न॰ प्रगता सभा सभाधिकारोऽस्मात्। बलात्कारे, "प्रसभोद्धृतारिः" इति रघुः।

प्रसर * पु॰ प्र+सृ-अप्-अच् वा। प्रभवे, वेगे, समूहे, युद्धे, नीवारे, निकटाभिगमने, व्रणादेर्विसरणे, सैन्यादेः सर्वतो व्याप्तौ च।

प्रसरण * न॰ प्र+सृप-ल्युट्। सैन्यानां सर्वतोव्याप्तौ। अस्य स्त्रीत्वे तत्र ङीप्।

प्रसव ० पु॰ प्र+सू-अप्। गर्भमोचने, उत्पत्तौ, कार्य्यरूपे फले च "यदमराचरं विश्वं प्रसवस्तस्य गीयते" इति कुमारः। [(बोटा)

प्रसवबन्धन * न॰ प्रसवस्य पुष्पस्य बन्धनम् बन्ध+करणे ल्युट्। वृन्ते

प्रसवित्री * स्त्री॰ प्र+सू-तृच्। जनन्याम्।

प्रसव्य * त्रि॰ प्रगतं सव्यं वामत्वम्। प्रतिकूले।

प्रसहा * स्त्री॰ प्र+सह-अच्। वृहत्याम्।

प्रसह्य * अव्य॰ प्र+सह-ल्यप्। हठादित्यर्थे। "प्रसह्य तेजोभिरसंख्यतां गते." इति माघः।

प्रसह्यचौर ० पु॰ प्रसह्य बलात्कारेण चौरः। (डाकात) बलात्कारचौरे। [प्रसत्ते, देशभेदेषु, गृहजनभुक्तावशिष्टे च।

प्रसाद * पु॰ प्र+सद-घञ्। नैर्मल्ये, अनुग्रहे, काव्यगुणभेदे, शान्तौ,

प्रसादना ० स्त्री॰ प्र+सद-णिच् युच्। सेवायाम्।

प्रसाधक ० त्रि॰ प्रसाधयति भूषयति प्र+सिध णिच् ण्वुल्। निष्पादकेऽलङ्कर्त्तरि च स्त्रियां टाप्। "प्रसाधिकालम्बितमग्रपादम्" इति रघुः। नीशारे स्त्री॰ टाप्।

प्रसाधन * न॰ प्र+सिध-णिच्-ल्युट्। अलङ्करणे वेशे। करणे ल्युट्। कङ्कतिकायाम् स्त्री॰ ङीप्।

प्रसाधित * प्र+सिध-णिच्-क्त। अलङ्कृते, निष्पादिते च।

प्रसारण * न॰ प्र+सृ णिच्-ल्युट्। विस्तारकरणे, क्रियाभेदे च।

प्रसारणी * स्त्री॰ प्र+सृ+णिच् ल्यु गौरा॰ ङीष्। (गन्धभादाल) लताभेदे।

प्रसारिणी * स्त्री॰ प्र+सृ णिनि। [illegible]

प्रसारिन् * त्रि॰ प्र+सृ णिनि। विस्तारकारके।

प्रसित * त्रि॰ प्र+सो-क्त। आसक्ते। [[illegible]

प्रसिति * स्त्री॰ प्र+सि-बन्धने करणे क्तिन्। [illegible]

प्रसिद्ध * त्रि॰ प्र+सिध-क्त। [illegible], [illegible] च।

प्रसू * स्त्री॰ प्र+सू-क्विप्। [illegible], [illegible], [illegible], [illegible]।

प्रसूति * स्त्री॰ प्र+सू क्तिन्। प्रसवे, [illegible], [illegible], [illegible] च।

प्रसूतिका * स्त्री॰ प्रसूति कन्। [illegible]।

प्रसूतिज * न॰ प्रसूत्या [illegible] जन+ड। दुःखे, [illegible] [illegible]।

प्रसून * न॰ प्र+सू क्त [illegible]। पुष्पे फले च। [illegible] त्रि॰।

प्लवङ्ग • पु० प्लवन् सन् गच्छति गम-ड खच् मुम्। वानरे, मृगभेदे, द्रुमभेदे च।

प्लवग • पु० प्लवन् सन् गच्छति गम+ड पृ०। वानरे, भेके च।

प्लवङ्गम • पु० प्लवन् सन् गच्छति गम+खच् मुम्। वानरे, भेके च।

प्लाक्ष • न० प्लक्षस्य फलम्, तस्य विकारस्तस्य फलं वा अण् न लुक्। प्लक्षफलजे, तद्विकारे, तत्समुदाये च।

प्लावन • न० प्लु-णिच्-ल्युट्। (वन्यान) [illegible] समन्तात् [illegible]।

प्लावित • त्रि० प्लु+णिच्-क्त। जलादिना समन्तात् व्याप्ते।

प्लिह • गतौ भ्वादि० आत्म० सक० सेट्। [illegible]।

प्लि(प्ली)हन् • पु० प्लिह कनिन् पृ० वा दीर्घः। (पिला) वामकुक्षिस्थे मांसखण्डे, तद्वृद्धिहेतुके रोगभेदे च।

प्ली • गतौ क्र्यादि० पर० सक० अनिट्। प्लीनाति अप्लैषीत्।

[illegible] • पु० [illegible]। (ऐंडा) दाडिमतुल्यकुसुमवति वृक्षभेदे। [illegible]।

[illegible] • पु० [illegible]। (गेंडा) [illegible] च।

प्लु • गतौ [illegible] भ्वादि० आत्म० अक० अनिट्। [illegible]।

[illegible]

फ

[illegible]

फञ्जिपत्रिका • स्त्री० भन्ज-इन् पृ० फञ्जि रोगस्य [illegible] यस्याः। भार्ङ्ग्याम् (बडुरजानि)।

फञ्जि(ञ्जी) • स्त्री० भन्ज-इन् पृ० वा ङीप्। भार्ङ्ग्याम्। ([illegible] झाटि)। [टाप्। सा च [illegible]

फट • पु० स्त्री० स्फट-विशरणे अच् पृ०। सर्पाणां फणायाम् [illegible]

फट् • अव्य० स्फुट-क्विप् पृ०। योगे, तन्त्रोक्ते अस्त्रमन्त्रे [illegible] च। [अफाणीत् अफणीत्। फेणतुः [illegible]

फण • धनायासेनोत्पत्तौ भ्वादि० पर० सक० सेट्। फणति [illegible]

फण • गतौ भ्वादि० पर० सक० सेट्। फणति अफाणीत् [illegible] वा घटादि। णिचि फाणयति फणयति।

फण • पु० स्त्री० फण+अच्। दर्व्याकारे सर्पशिरसि [illegible]। [illegible]

फण(णा)धर • पु० फणं(णां) धरति धृ अच्। सर्पे। [illegible]

[illegible] • पु० [illegible]। [illegible] सामान्ये च। [illegible]

फणिप्रिय • पु० फणिनां पापमदत्वात् प्रियः। वायौ। [illegible]

फणिफेन • न० फणिनां फेनमिव। (आफिङ्) अहिफेने।

फणिलता • स्त्री० फणिसदृशी दीर्घा, फणिन आख्या [illegible] नागवल्ल्याम् (पानलता)।

फणिवल्ली • स्त्री० [illegible]।

[illegible] • स्त्री० [illegible] समासान्।

फणिन् • पु० फणा अस्त्यस्य इनि। सर्पे। [illegible]

[illegible] • पु० [illegible]। अनन्ते, वासुकौ च।

फल • [illegible] भ्वादि० पर० सक० सेट्। फलति अफालीत् [illegible]

फल • [illegible] भ्वादि० पर० सक० सेट्। [illegible]

[illegible]

फर्ब्बी (फाबीर) फलगुदृश्यकरणे उत्सवे।

फल्य * न० फलाय हितं यत्। पुष्पे।

फाणि * पु० श्वाय नि पृ०। गुडविकारे, करम्भे, दधिमिश्रितसक्तौ [च।

फाणित * न० फण-णिच्-क्त। गुडविकारभेदे (फेणी)।

फाण्ट * न० फण क्त नि०। अनायासेन कृते। "शिशोत्पलोष्ठे शृतिता: फाण्ट इत्यभिधीयते" इत्युक्ते क्वाथभेदे।

फाल * न० फलाय शस्याय हितम् अण्, फल्यते विदार्यते भूमिरनेन वा घञ्। स्वनामख्याते लाङ्गलमुखस्थे लौहभेदे। फालमस्यास्य अच्। बलदेवे, महादेवे च पु०। फलस्य विकारः अण्। कार्पासवस्त्रे त्रि०। फालकरणके दिव्यपरीक्षाभेदे न०। फलेषु भव अण्। जम्बीरनीबुकादौ पु०।

फाल्गुन * पु० फल-उनन् गुक् च स्वार्थे प्रज्ञाद्यण्। अर्जुने मध्यमपाण्डवे, चैत्राद्यवधिके एकादशे द्वादशे च नक्षत्रे च स्त्री० ब० व० ङीप्। फल्गुनीभिर्युक्ता पौर्णमासी अण्। चान्द्रफाल्गुनमासपौर्णमास्यां स्त्री० ङीप्। सास्मिन् मासे अण्। चैत्रावधिके द्वादशे मासे पु०। वर्षस्य हि चैत्रादित्वम्।

फाल्गुनिक * पु० फाल्गुनी फल्गुनीनक्षत्रयुक्ता पौर्णमासी अस्मिन् मासे ठक्। चैत्रावधिके द्वादशे मासे।

फु * पु० फल डु। मन्त्रोच्चारणपूर्वके फुत्कारे, तुच्छवाक्ये च।

फुट * त्रि० स्फुट-क पृ०। विदीर्णे, सम्फुटिते च।

फु(फू)त् * अव्य० फल-डुति पृ० वा दीर्घः। अनुकरणशब्दे।

फुल्ल * विकाशे भ्वादि० पर० सक० सेट्। फुल्लति अफुल्लीत्।

फुल्ल * त्रि० फुल्ल+विकाशे अच्। विकसिते पुष्पे।

फेण(न) * पु० स्फाय-न पृ० मतान्तरे णत्वम्। दुग्धजलादेरुपर्युपरिस्थे बुद्बुदाकारे पदार्थे (फेना) अस्य णान्तत्वमपि "फेनश्रेण्यो नदीनिनदैः समतोयिरे। यथा सारस्वता मन्त्रा यन्त्रे फेनसङ्गता." इत्युक्तौ पद्ये यन्त्रे रेफेण कल्पसुरकारेण संयुता इत्यर्थः। हिमे च। गुडविकारभेदे स्त्री० ङीप्।

फेणा(ना)ग्र * न० ६त०। बुद्बुदे।

फेणि(नि)ल * त्रि० फेन+अस्त्यर्थे इलच्। फेनविशिष्टे। कोलिफले, मदनवृक्षफले च न०। बदरवृक्षे, अरिष्टवृक्षे च पु०।

फेरव * पु० फे इत्यव्यक्तं रवोऽस्य। शृगाले, राक्षसे च। तद्गुणयोगात् धूर्त्ते, हिंस्रे च त्रि०।

फेरु * पु० फे इत्यव्यक्तं रौति रु-डु। शृगाले।

फेल(ला) * न० स्त्री० फेल-अच् वा टाप्। भुक्तसमुज्झिते, उच्छिष्टे [च।

फेल * गतौ भ्वादि० पर० सक० सेट्। फेलति अफेलीत्। चङि न ह्रस्वः।

ब

ब * पु० वल ड। सूचने, तन्तुसन्ताने, वपने, वरुणे, घटे, ...

पर्वते, दैत्यभेदे, नागभेदे च। [गुलुञ्चकन्दे।

बलाह्वकन्द * पु॰ बलं सामर्थ्यमाह्वयति आ+ह्वे-क तादृशः कन्दः।

बलि * पु॰ बल-इन्। पूजोपहारे, "ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम्" इति चण्डी, राजग्राह्ये भागे, उपप्लवे, चामरदण्डे, गृहस्थकर्त्तव्यपञ्चयज्ञमध्ये भूतयज्ञे, "बलिकर्म ततः कुर्य्यात्" इति स्मृतिः, दैत्यभेदे विरोचनपुत्रे च "येन बद्धो बली राजा दानवेन्द्रो महाबली" इति रक्षाबन्धनमन्त्रः। जरया श्लथचर्मणि स्त्री॰ वा ङीप्। "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः" इति स्मृतिः। उदरावयवे। "वलित्रयं चारु बभार बाला" इति कुमारः। गुह्यस्थे अङ्कुराकारे मांसपिण्डे, गृहदारुप्रभेदे च (पाड) स्त्री॰ स्वार्थे कन्। तत्र, पतिवलायाञ्च।

बलिध्वंसिन् * पु॰ बलिं ध्वंसयति स्वस्थानात् पातयति ध्वन्स-णिच्-णिनि। विष्णौ, वामनावतारेण हि तस्य तथात्वम्।

बलिन(भ) * त्रि॰ बलि+मत्वर्थे-इन भ वा। जरया शिथिलचर्मवति।

बलिन् * त्रि॰ बलमस्त्यस्य इनि। बलवति। उष्ट्रे, महिषे, वृषे, शूकरे, बलरामे, कुन्दवृक्षे, कफे, माषे च पु॰। (बेलिमाड़ा) क्षुपे स्त्री॰ ङीप्।

[illegible]लिपुष्ट * पु॰ बलिना पूजोपहारद्रव्येण पुष्टः पुष-क्त। काके।

[illegible]लिप्रिय * पु॰ बलिनं प्रीणाति प्री+क। लाभद्रुमे।

बलिभुज् * पु॰ बलिं पूजोपकरणद्रव्यं गृहस्थदत्तबलिं वा भुङ्क्ते क्विप्। काके।

बलि(ली)मुख * पु॰ बलि(ली)युक्तं मुखमस्य शाक॰। वानरे।

बलिष्ठ * त्रि॰ अतिशयेन बली बलिन्+इष्ठन्। अत्यन्तबलवति। उष्ट्रे पु॰।

बलिसद्मन् * न॰ ६त॰। पाताले। बलिपुरादयोऽप्यत्र।

बलीक * पु॰ न॰ [illegible] बल+ईकन् नि॰। पटलप्रान्ते (छाच)।

बलीयस् * त्रि॰ अतिशयेन बली बलिन्+ईयसुन्। अत्यन्तबलवति।

बलीवर्द * पु॰ [illegible] ददाति दा-[illegible] नि। वृषे।

बल्य * न॰ बलाय हितं बल+यत्। प्रधानधातौ, शुक्रे, बलसाधने च। [illegible] स्त्री॰।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

भ्वादिरिति वोपदेवः। [विपुले च। [illegible]

ब(व)हु * त्रि॰ बं(वं)हि+कु नलोपः। [illegible]

ब(व)हुकण्टक * पु॰ ब(व)हूनि कण्टकान्यस्य। [illegible] क्षुपभेदे।

[illegible]

ब(व)हुकण्टा * स्त्री॰ ब(व)हवः कण्टाः कण्टका [illegible]

ब(व)हुकन्द * पु॰ ६ब॰। शूरणे (ओल)। कर्कट्यां स्त्री॰।

ब(व)हुकर * त्रि॰ ब(व)हूनि किरति कॄ-अच्। [illegible] करे। सम्मार्जन्यां स्त्री॰ गौ॰ ङीप्। कृ+अच् [illegible] अनेककार्य्यकरे त्रि॰।

ब(व)हुकर्णिका * स्त्री॰ ब(व)हवः कर्णा इव पर्णान्यस्य। [illegible] ण्याम्।

[चम्पककलिकायां, औरे [illegible]

ब(व)हुगन्ध * पु॰ ६ब॰। कुन्दुरुके। त्वचे (तेजपात) [illegible]

ब(व)हुगन्धदा * स्त्री॰ ब(व)हुगन्धं ददाति दा-क। कस्तूर्य्याम्।

ब(व)हुग्रन्थि * पु॰ ६ब॰। झावुके (झाउ)।

ब(व)हुच्छिन्ना * स्त्री॰ ब(व)हु यथा स्यात् तथा छिद्यते [illegible] तस्य, दस्य च नः। कन्दगुडूच्याम्। [illegible]

ब(व)हुतिक्ता * स्त्री॰ ब(व)हु यथा तथा तिक्ता [illegible]

ब(व)हुतिथ * त्रि॰ ब(व)हूनां पूरणः ब(व)हु+डट् ति[illegible] ख्यसम्याते, "काले गते बहुतिथे" इत्युद्भटः।

ब(व)हुत्र * अव्य॰ ब(व)हुषु त्रल्। अनेकेषु कालादिषु।

ब(व)हुत्वच् * पु॰ ६ब॰। भूर्जपत्रवृक्षे। स्वार्थे कन् तत्रै[illegible]

ब(व)हुदुग्ध * पु॰ ब(व)हूनि दुग्धानीव चूर्णानि [illegible] गोधूमे। प्रचुरक्षीरवत्यां गवि, स्नुहीवृक्षे च स्त्री॰। अत इत्वम्। स्नुहीवृक्षे।

ब(व)हुधा * अव्य॰ ब(व)हु+प्रकारे धाच्। अनेकप्रकारे।

ब(व)हुपत्र * न॰ [illegible] न्याम्, [illegible] स्त्री॰ [illegible] महाशतावर्य्याञ्च।

ब(व)हुपर्ण * पु॰ ६ब॰। सप्तच्छदवृक्षे तस्य प्रतिपर्वे [illegible] सप्तपर्णत्वात्। अनेकपर्णयुक्ते त्रि॰। मेथिकायां स्त्री॰ ङीप्। स्वार्थे कन्। आखुकर्ण्यां स्त्री॰ टाप्। [illegible]

ब(व)हुपाद्(द) * पु॰ ६ब॰। वा अन्त्यलोपः। वटवृक्षे [illegible]

ब(व)हुपुत्र * पु॰ ब(व)हवः पुत्रा इव पर्णान्यस्य। [illegible] पुत्रा इव मूलान्यस्य। शतमूल्यां स्त्री॰ ङीप्।

ब(व)हुपुष्प * पु॰ ६ब॰। निम्बवृक्षे। स्वार्थे कन् [illegible] धातक्यां स्त्री॰। [तुष्यप्रचुरतुषत्वात् [illegible]

ब(व)हुप्रज * त्रि॰ ६ब॰। बहुसन्तानवति। शूकरे पु॰। [illegible]

ब(व)हुफल * पु॰ ६ब॰। कदम्बवृक्षे, विकङ्कते, [illegible] फलयुक्ते त्रि॰। माषपर्ण्यां, धात्रिकायां, [illegible] (नया), क्षुद्रकारवेल्यां, भूम्यामलक्यां स्त्री॰। [illegible]

[illegible]खम्। भूमिवदर्यां स्त्री०। पामनक्षां स्त्री० ङीप्।
[illegible]री ० स्त्री० ६ब० संज्ञात्वात् न कप्। तुलस्याम्।
[illegible] * पु० ६ब०। मौमके। चनेकमल्लयुते त्रि०।
[illegible]र्ण ० स्त्री०। वनकार्पासे। नानाकारवति त्रि०।
[illegible] ० त्रि० ६ब०। चनेकमूलवति। शिवे पु०। संज्ञायां
[illegible]पशीरे न०। शतावर्य्यां स्त्री० टाप्। माकन्द्यां ङीप्।
[illegible] * स्त्री० ६ब०। महाज्योतिष्मत्याम्। नानारसवत्यां
[illegible]
[illegible] * पु० ६ब०। मञ्जरसे (धुना), शिवे, विष्णौ, हिरण्यगर्भे,
केशे च। नानारूपवति त्रि०।
[illegible]मन् ० त्रि० ६ब०। चनेकरोमवति, रोमशे च। मेषे पु०।
[illegible] ० त्रि० ब(व)हि-कुमच् नि० नलोपः। चनेकसंख्यान्विते
[illegible]। ब(व)हुनि माति मा-क। चग्नौ, कृष्णवर्णे च पु०।
[illegible] त्रि०। कृष्णपक्षे पु० "ब(व)हुलेऽपि गतं निशाकरं"
कुमारः। चाकाशे न०। नीलिकायां, नीलवर्णायां गवि
[illegible]। कमण्डलु पु०। ब(व)हुलः। प्रचुरे त्रि०। चग्निदेवत
[illegible]कृत्तिकानक्षत्रे स्त्री० टाप् ब० व०।
[illegible]ला * स्त्री० ६ब०। एलायाम्।
[illegible]द ० पु० ६ब०। रक्तयोभाञ्जने।
[illegible]न ० त्रि० ब(व)हुल+भू-क्त-च। (चागडा) बुपखा
[illegible]करणेन राशीकृते चमस्ते धान्ये, राशीकृतमात्रे च।
[illegible] * पु० ६ब०। पियाले (पियामाल)।
[illegible] * पु० ब(व)हुनि वाद्यति चण्, ततः कन्, वृद्ध
[illegible] वेशालके (लोना चाता)। [श। (कुकुर) कुक्कुराहवे।
[illegible]विस्तीर्णा * स्त्री० ब(व)हु यथा तथा विस्तीर्णा वि-स्तृ-
[illegible]।
[illegible]बीज * पु० ६ब०। (चाता) चाम्रवे हवे। प्रचुरबीजवति
[illegible]
[illegible]वीर्य * पु० ६ब०। विभीतके (बयडा), तण्डुलीयशाके
[illegible]टेमाक), शाल्मलिद्रुमे, मरुवके च। भूम्यामलक्यां स्त्री०।
[illegible]व्रीहि * त्रि० ६ब०। चनेकधान्यादियुक्ते। व्याकरणोक्ते
[illegible] चन्यपदार्थप्रधाने समासभेदे पु०।
[illegible]म् * चव्य० ब(व)हु+शस्। चनेकवारानित्यर्थे "गुणकृत्ये
[illegible]हुयो नियोजिताः" इति कुमारः।
[illegible] * पु० ६ब०। रक्तखदिरे। चनेकशोलयुते त्रि०।
[illegible] * पु० ब(व)हुभि चाशं गम+मज्ञायां कर्त्तरि चण्।
[illegible]
[illegible] * स्त्री० ६ब०। [illegible]। चनेक[illegible]
[illegible] ० पु० ६ब०। खदिरे। चनेकसारवति त्रि०।
[illegible] * स्त्री० ब(व)हु [illegible] मूल[illegible]।
[illegible]वति त्रि०। [illegible] त्रि०
[illegible] स्त्री० ६ब०। चनेक[illegible] ब(व)हु[illegible]

ब(व)हुसवा * स्त्री० ब(व)हु यथा तथा सवति सु-चच्। शल्लकी-
वृक्षे। चनेकधा चरणवति त्रि०।
ब(व)हृच * पु० ६ब० चच् समा०। ऋग्वेदे। सूक्ते न०। तदभिज्ञे
त्रि०। तत्पत्न्यां स्त्री०। [बा(वा)हुते यथा(वा)डिष्ट।
वा(वा)ड ० चाप्लावने सक० चाने चक० भ्वादि० चात्म० सेट्।
वाडव * न० वडवानां समूहः चण्। घोटकसमुदाये। वाड-घञ्
वन-घञ् नस्य डः वा वाडो हडि तं वाति वा-क। ब्राह्मणे
पु०। वडवायां जातः चण्। चौर्वे समुद्रस्थे कालाग्निभेदे पु०।
दाडवाग्न्यादयोऽप्यत्र पु०।
वाडवेय * पु० द्वि० वडवायाः चपत्ये ढक्। चश्विनीकुमारयोः।
वाड्य * न० वाडव+समूहे यत्। विप्रसमुदाये।
वा(वा)ण * पु० वण-शब्दे वण गतौ वा संज्ञायां कर्त्तरि घञ्। शरे,
गोस्तने (बांट), विरोचनसुते दैत्यभेदे, केवले च। शरपुङ्खे
स्त्री०। नीलझिण्ट्याम् पु० स्त्री०। मेदिन्यां दन्त्योष्ठ्यादि-
त्वेन पठितः। रायमुकुटादयः वण शब्दे इति धातुपाठनिरूप-
मादुरतोऽप्योभयविधादित्वम्।
वा(वा)णलिङ्ग वाणदैत्येन संपूज्याविष्कृतस्य नर्मदायां लिङ्गस्य
शिवलिङ्गभेदे। विस्तरो वाचस्पत्ये।
वाणिज्य * न० वणिजो भावः कर्म वा ब्राह्मणादित्वात् ष्यञ्।
क्रयविक्रयादौ "वाणिज्येन गतस्य मे रजयते." इति मा० इ०।
वाणि(णी) * स्त्री० वण-इ णिच। वस्त्रादीनां वयनक्रियायाम्। वा
ङीप्। वस्त्रादीनां वयनक्रियायां, वाक्ये, सरस्वत्यां च।
वा(वा)दर * पु० स्त्री० ब(व)दर+चाद्यर्थे चण्। कार्पासवृक्षे। ब(व)दर-
स्येदं तस्य विकारो वा चण्। कार्पासमूत्रे न०। तत्कार्यादौ
त्रि०। [बा(वा)दरिमत्र।
वा(वा)दरायण * पु० ब(व)दर्यां भवः फक्। वेदव्यासे। ऋषि-
वाध ० विलोडने भ्वादि० चात्म० सक० सेट्। वाधते चवाधिष्ट।
एदित् न इमस्य।
वाध * पु० वाध घञ्। प्रतिरोधे। न्यायमते साध्याभाववन्नवति। यथा
वह्निर्द्रुतो बह्निमान् ह्रदो वाध। वाध कर्मणि घञ्। प्रति-
बन्धके त्रि०। भावे घञ्। [illegible]
वाधक * त्रि० वाध ण्वुल्। प्रतिबन्धके। [illegible]
[illegible] [illegible]। [illegible]
[illegible] * न० [illegible] भावः ब्राह्मणादित्वात् ष्यञ्। [illegible]
[illegible] * पु० स्त्री० [illegible] ढक् [illegible] च। [illegible]
[illegible]।
[illegible] * पु० [illegible]। [illegible] च।
[illegible] ० पु० न० (बाला) [illegible]। [illegible] त्रि०। [illegible]
पु०। [illegible]
[illegible], [illegible], [illegible] च पु०।
[illegible] * [illegible]+[illegible]। [illegible], [illegible]

बुद्धि • स्त्री॰ बुध-क्तिन्। ज्ञाने, सांख्योक्ते सुखदुःखादिविषयसंवित्ति प्रकृतिपरिणामभेदे, अन्तःकरणविशेषे, वेदान्तोक्ते निश्चयात्मकवृत्तिमति अन्तःकरणे च।

बुद्धीन्द्रिय • न॰ ६त॰। "मनः कर्णौ तथा नेत्रे रसना त्वक् च नासिके। बुद्धीन्द्रियमिति प्रोक्तम्" इत्युक्तेषु इन्द्रियेषु।

बुद्बुद • न॰ बुद-क पृ॰ द्वित्वम्। जलस्य गोलाकारे विकारभेदे।

बुध • ज्ञापने भ्वादि॰ पर॰ सक॰ अनिट्। बोधति अबोधीत् [illegible] गुणः।

बुध • ज्ञाने भ्वादि॰ उभ॰ सक॰ सेट्। बोधति ते। अबुधत् अबोधीत्। अबोधि अबोधिष्ट। ज्वला॰ वाण प्रत्यये च। बोधः बुधः।

बुध • ज्ञाने दिवा॰ आत्म॰ सक॰ अनिट्। बुध्यते अबोधि अबोधिष्ट।

बुध • पु॰ बुध-क। पण्डिते, स्वनामख्यातायां तारायां चन्द्रेण जनिते पुत्रे ग्रहभेदे, तस्य रोहिण्या प्रतिपाल्यत्वात् रौहिणेयत्वम्।

बुधरत्न • न॰ बुधप्रियं रत्नं शाक॰। मरकतमणौ।

बुधा • स्त्री॰ बोधति ज्ञापयति रोगिनं बुध-ज्ञापने क। जटामांस्याम्।

बुधाष्टमी • स्त्री॰ बुधवारयुताष्टमी शाक॰। चैत्रपौषवर्जितमासादि मासे काले बुधवारयुतायां शुक्लपक्षाष्टम्यां, तत्कर्तव्ये व्रते च।

बुधित • त्रि॰ भ्वादि॰ उभ॰ बुध-क्त-इट्। ज्ञाते।

बुध्न • न॰ बन्ध नक् नलोपः बुधादेशश्च। वृक्षमूले, मूलमात्रे च। "पृथुबुध्नोदराकृतिः" इति घटविशेषणे माघे दृश्यम्।

बुन्द • निशामने भ्वादि॰ उभ॰ सक॰ सेट्। बुन्दति ते। अबुन्दत् अबुन्दीत्। अबुन्दिष्ट। क्त्वा वेट्।

बुन्ध • निशामने भ्वादि॰ उभ॰ सक॰ सेट् क्त्वा वेट्। बुन्धति ते अबुधत् अबुन्धीत् अबुन्धिष्ट।

बुस • सर्गे चुरा॰ उभ॰ सक॰ सेट्। बुसयति ते अबुबुसत् त।

बुभुक्षा • स्त्री॰ भुज-सन् अ। भोजनेच्छायां क्षुधायाम्।

बुभुक्षित • त्रि॰ बुभुक्षा+तार॰ इतच्। क्षुधार्ते, "बुभुक्षितः किं द्विकरेण भुङ्क्ते" इत्युद्भटः।

बुस्त • सम्माने चुरा॰ उभ॰ सक॰ सेट्। बोस्तयति ते अबुबुस्तत् त।

बुस • न॰ बुस्यते उत्सृज्यते बुस-कर्मणि क पृ॰ वा दीर्घः। (भूसा) तुच्छधान्ये [illegible]।

[illegible]

[illegible]

बोधयितृ त्रि॰। तृच्। बोधयितृ त्रि॰। णिच्-ल्युट्। [illegible] त्रि॰।

बोधकर • पु॰ बोधं निद्रान्ते जागरणं करोति कृ-अच्। निद्रान्ते प्रबोधकारे वैतालिके। ज्ञापके त्रि॰।

बोधन • न॰ बुध-णिच् ल्युट्। ज्ञापने, ज्ञानसाधनात् गन्धादेर्दूरस्थानां उद्दीपने, जागरणे च। "प्रातर्बोधनं हरेः" इति पुराणम्। "मायाद्यं बोधनं कुर्यात्" इति स्मृतिः।

बोधनी • स्त्री॰ बोधयति [illegible] तत्र वा बुध-णिच्-ल्युट्। पिप्पल्यां, तया हि मूर्छितो बोध्यते। कार्तिकशुक्लैकादश्यां, तत्र हि हरेर्बोधनम्।

बोधि • पु॰ बुध-इन्। समाधिभेदे अश्वत्थवृक्षे च। ज्ञातरि त्रि॰।

बोधिसत्त्व • पु॰ कर्म॰। बुद्धभेदे। [illegible] पु॰।

बौद्ध • न॰ बुद्धेन प्रोक्तम्। बुद्धप्रोक्ते निरीश्वरवादे शास्त्रे। "तद्बौद्धम्" इति पुराणम्। बौद्धमतानुयायिनि त्रि॰। [illegible]

[illegible]

ब्रह्मदारुवृक्षे च ।

ब्र(व्र)ह्मतीर्थ * न० ६त० । पुष्करतीर्थे, पुष्करमूले च ।

ब्र(व्र)ह्मत्व * न० ब्र(व्र)ह्मणो भावः त्व । ऋत्विग्विशेषस्य ब्र(व्र)ह्मणो धर्मे, शुद्धतुरीयब्र(व्र)ह्मभावे च ।

ब्र(व्र)ह्मदण्ड * पु० ६त० । विप्रकृते अभिशापरूपे दण्डने "ब्र(व्र)ह्मदण्डहता ये च" इति स्मृतिः । विप्रस्य यष्टौ च ।

ब्र(व्र)ह्मदर्भा * स्त्री० ब्र(व्र)ह्मणो दर्भो यन्त्रमस्याः । यमान्याम् ।

ब्र(व्र)ह्मदाय * पु० ब्र(व्र)ह्मणि(णे) वा वेदाध्ययनसमाप्तौ, विप्राय वा राज्ञा दीयते दा+कर्मणि घञ् । समावृत्तविप्राय देये धने "ब्र(व्र)ह्मदायागतां भूमिं हरेयुर्ब्रा(व्रा)ह्मणीसुताः" इति स्मृतिः ।

ब्र(व्र)ह्मदारु * पु० ब्र(व्र)ह्मणो विप्रस्य हितः दारुः । अश्वत्थाकारे वृक्षभेदे ।

ब्र(व्र)ह्मन् * न० वृह-मनिन् वृंहेर्नोऽच्चेति नकारस्याकारे रत्वम् । वेदे, तपसि, सत्ये, तत्त्वे, यथार्थे, तुरीये सर्वगुणातीते विशुद्धे चित्स्वरूपे च । हिरण्यगर्भे, विप्रे, ऋत्विग्विशेषे च पु० । उज्ज्वलदत्तेन दन्त्योष्ठ्यादित्वमेव साधितम्, मेदिनीकारेण ओष्ठ्यादित्वेन कीर्त्तनात्तथात्वमपि किन्तु तन्मूलं मृग्यम् ।

ब्र(व्र)ह्मनाल * न० काश्यां मणिकर्णिकासमीपस्थे तीर्थभेदे ।

ब्र(व्र)ह्मनिर्वाण * न० ब्र(व्र)ह्मणि निर्वाणं निर्वृतिः । ब्र(व्र)ह्मभावलाभे, सकलानर्थनिवृत्तिरूपे परमानन्दे च ।

ब्र(व्र)ह्मपर्णी * स्त्री० ब्र(व्र)ह्मेव विस्तीर्णं मूलादारभ्य स्थितानि पर्णान्यस्याः ङीप् । पृश्निपर्ण्याम् ।

ब्र(व्र)ह्मपवित्र * पु० ब्र(व्र)ह्मेव वेदोक्तकर्मणि वा पवित्रः । कुशे ।

ब्र(व्र)ह्मपादप * पु० ब्र(व्र)ह्मणः प्रियः वैदिककर्मयोग्यत्वात् विप्र- ब्र(व्र)ह्मचारिधार्य्यदण्डार्थत्वाद्वा । पलाशवृक्षे ।

ब्र(व्र)ह्मपुत्र * पु० ब्र(व्र)ह्मणः पुत्र इव कपिलवर्णत्वात् । विषभेदे, उत्तरदेशप्रसिद्धे नदभेदे च । सरस्वत्यां नद्यां स्त्री० । तस्याः पितामहजातत्वं पुराणप्रसिद्धम् । [सत्यलोके, काश्यां च ।

ब्र(व्र)ह्मपुरी * स्त्री० ६त० ब्रह्मोपासनास्थाने हृदये, तदाधारस्थाने

ब्र(व्र)ह्मबन्धु * पु० ब्र(व्र)ह्मा विप्रो बन्धुरुत्पादको यस्य । विप्राचाररहिते निन्द्यकर्मकारिणि जात्या विप्रे, विप्रतुल्ये भट्टादौ च ।

ब्र(व्र)ह्मभूय * न० ब्र(व्र)ह्मणो भावः भू-क्यप् । ब्र(व्र)ह्मभावे, तत्सायुज्ये च । [त्मको यज्ञः । वेदाध्ययनाध्यापनादौ ।

ब्र(व्र)ह्मयज्ञ * पु० ब्र(व्र)ह्मनिमित्तकस्तदध्ययनतदध्यापनादिनिमि-

ब्र(व्र)ह्मयष्टि * स्त्री० ब्र(व्र)ह्मणो यष्टिरिवालम्बनत्वात् । (वामनहाटि) वृक्षे ।

ब्र(व्र)ह्मरन्ध्र * न० ६त० । उत्तमाङ्गस्थिते ब्रह्मप्राप्तिहेतुके छिद्रस्थाने । तच्छिद्रेण निष्क्रमणे हि जीवस्य ब्र(व्र)ह्मप्राप्तिः श्रूयते ।

ब्र(व्र)ह्मराक्षस * पु० ब्र(व्र)ह्मा विप्रोऽपि कुकर्मभिः राक्षसः । राक्षसरूपतां प्राप्ते भूतभेदे "अपहृत्य च विप्रस्वं भवति ब्र(व्र)ह्मराक्षसः" इति मनुः ।

ब्र(व्र)ह्मर्षि * पु० ब्र(व्र)ह्मा विप्रः ऋषिर्मन्त्रद्रष्टा वा

ष्मतां । वेदस्मर्तृषु वसिष्ठादिषु ऋषिषु ।

ब्र(व्र)ह्मर्षिदेश * पु० ६त० । "कुरुक्षेत्रं च मत्स्याश्च पा

सेनकाः । एष ब्र(व्र)ह्मर्षिदेशो वै" इति मनूक्ते ,

चतुष्टये । [ब्र(व्र)

ब्र(व्र)ह्मलोक * पु० ६त० । ब्रह्माधिष्ठाने भुवने, सत्य

ब्र(व्र)ह्मवर्चस * न० ब्र(व्र)ह्मणा वेदाध्ययनेन तदनुष्ठ

वर्चः तेजः अच् समा० । वेदाध्ययनजन्ये तेजसि "ब्र

कामस्य कुर्य्याद्विप्रस्य पञ्चमे" इति मनुः ।

ब्र(व्र)ह्मवादिन् * पु० ब्र(व्र)ह्म वेदं वदति पठति

पाठके । ब्र(व्र)ह्म शुद्धं चैतन्यं सर्वात्मकतया वद

वेदान्तप्रतिपाद्यसर्वात्मकब्र(व्र)ह्मणि । शुद्धचैतन्यं

यति । ब्र(व्र)ह्मबोधके शास्त्रे ।

ब्र(व्र)ह्मविद्या * स्त्री० ६त० । शुद्धचैतन्यात्मकस्य ब्र

ब्र(व्र)ह्मबि(वि)न्दु * पु० ब्र(व्र)ह्मणि वेदपाठकाले

वेदाध्ययनकाले निःसृतजलबि(वि)न्दौ ।

ब्र(व्र)ह्मवैवर्त्त * न० अष्टादशमहापुराणमध्ये अष्टाद

ब्र(व्र)ह्मशल्य * पु० ब्र(व्र)ह्मेव सूक्ष्मं शल्यं कण्ट

(शायला) वृक्षभेदे ।

ब्र(व्र)ह्मसंहिता * स्त्री० वैष्णवाचारसिद्धान्ते अध्याय

ब्र(व्र)ह्मसायुज्य * सह युनक्ति युज-क्विप् सयुक् तस्य

६त० । ब्र(व्र)ह्मभावे ।

ब्र(व्र)ह्मसू * पु० ब्र(व्र)ह्माणं सूतवान् सू-क्विप् । चत

विष्णोर्मूर्त्तिभेदे अनिरुद्धे, तस्यावतारभेदे उषापते

ब्र(व्र)ह्मसूत्र * न० ब्र(व्र)ह्मणि वेदग्रहणकाले उचित

पवीते, ब्र(व्र)ह्मप्रतिपादके शारीरकसूत्रे च ।

ब्र(व्र)ह्महत्या * स्त्री० हन्-क्यप् ६त० । विप्रहनने ।

ब्र(व्र)ह्महन् * त्रि० ब्र(व्र)ह्माणं हतवान् हन+क्विप्

कारिणि । "ब्र(व्र)ह्महा न भवत्यन्यो ब्र(व्र)ह्महा

यस्तस्यामाहितो गर्भः स तेन ब्रा(व्रा)ह्मणो हतः" इ

पतौ, "च्युतोत्पतनजिज्ञासु जीवोत्तिष्ठाङ्गलिध्वनिः

च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" इत्यादिस्मृत्यु

ब्र(व्र)ह्महत्यापापयुक्ते च पु० ।

ब्र(व्र)ह्महुत * न० ब्र(व्र)ह्मणे विप्राय अतिथये हुतं द

महदस्यकर्त्तव्यपञ्चयज्ञान्तर्गतेऽतिथिपूजनरूपे यज्ञभे

ब्र(व्र)ह्माञ्जलि * पु० ब्र(व्र)ह्मणे वेदपाठाय अञ्जलिः गु

ञ्जलिः, स्वरविशेषज्ञापनार्थं वा अञ्जलिः सङ्कुचितप

पाठार्थं गुरुनिकटे कार्य्ये विनयाञ्जलौ, स्वरविशेष

कृतसङ्कोचे पाणिद्वये च ।

ब्रह्माणी * पु० ब्र(व्र)ह्माणम् आनयति जीवयति अन-णि

णत्वम् । ब्रह्मयतौ "हमयुक्ते विमानेऽस्या धावसूत

धायाता ब्र(ब्र)ह्मणः सक्तिः ब्र(ब्र)ह्माणी मामिधीयते" इति चण्डी। "ब्रह्माणी ब्र(ब्र)ह्मजननात्" इति पुराणम्। ब्रह्म-शब्दात् ङीप् आनुक् चेति तत्पाणिनीयम्।

ब्र(ब्र)ह्माण्ड • न० ६त०। "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिन् जज्ञे स्वयं ब्र(ब्र)ह्मा सर्वलोकपितामहः" इति मनूक्ते ब्र(ब्र)ह्मण उत्पादके अण्डाकारे भुवनकोषे "ब्र(ब्र)ह्माण्डमाण्डोदरभाग्यविपिण्डितपिण्डमा" इति चौरचरितम्। तत्प्रमाणाद्यपादिकं तु वाचस्पत्ये।

ब्र(ब्र)ह्मावर्त • पु० "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्र(ब्र)ह्मावर्तं प्रचक्षते" इति मनूक्ते देशभेदे।

ब्र(ब्र)ह्मासन • न० ब्र(ब्र)ह्मणो ध्यानार्थमासनम्। ईशराध्यानार्थे आसने स्वस्तिकपद्मासनादौ। [(बामनहाटी) शाकभेदे।

ब्र(ब्र)ह्मी • स्त्री० ब्रह्मण इयम् अण् टिलोपः ङीप्। पु० न हृद्धिः।

ब्र(ब्र)ह्मौदन • न० मेधास्वरस्मादिकारके घृतभेदे। विस्तरो वाचस्पत्ये।

ब्र(ब्र)ह्मोपनेतृ • पु० ब्र(ब्र)ह्माणं विप्रमुपनयते तर्क तुदन्तहेतुत्वात् उप+नी तृच्। पलाशवृक्षे "विप्रस्य पालाशो दण्डः" इति स्मृतिः।

ब्रा(ब्रा)ह्म • न० ब्रह्मण इदम्, तेन प्रोक्तम् वा अण् टिलोपः। अङ्गुष्ठमूले तीर्थे, तेन हि तीर्थेन द्विजाचमनं विहितमिति तस्य तत्-सम्बन्धित्वम् "ब्रात्वा ब्रा(ब्रा)ह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" इति स्मृतिः। ब्रा(ब्रा)ह्मोक्ते अष्टादशपुराणान्तर्गते पुराणभेदे च। विवाहभेदे, पारदे च पु०। सरस्वत्यां, सोमलतायां, ब्राह्मीशाके (बामनहाटी) शाकभेदे च स्त्री० "चाहनानां गुरुकुलात् विप्राणां पूजको भवेत्। नृपाणामक्षयो ह्येष ब्रा(ब्रा)ह्मो धर्मो विधीयते" इति मनूक्ते चातुर्धर्मभेदे पु०। मत्स्यभेदे स्त्री० ङीप्। "ब्रा(ब्रा)ह्मी नारायणी तथा" इति तन्त्रम्।

ब्रा(ब्रा)ह्मण • पु० ब्रह्म वेद वेत्ति अधीते वा ब्रह्मणो जातावित्यण् टिलोपः। ब्रह्मणो मुखजातत्वात् ब्रह्मणोऽपत्यम् अण् तेन न टिलोपः। विप्रे जातिभेदे। ब्राह्मणी स्त्री०। "ब्राह्मणो जातोऽसि ब्राह्मणः" इत्युक्तेः [illegible] तत्सम्बन्धिनि त्रि०। स्त्रियां ङीप् तत्पत्न्यां स्त्री० ङीष्।

ब्रा(ब्रा)ह्मणबुव • पु० ब्रा(ब्रा)ह्मणं ब्रवीति आत्मानं ब्राह्मणत्वेन ब्रूते। "जिह्व-[illegible]ऽपि [illegible] सन्ध्यादिकञ्च च। [illegible] पुमान् ब्रा(ब्रा)ह्मणबुव उच्यते" इत्युक्ते कदाचारविप्रे।

ब्रा(ब्रा)ह्मणयष्टि • स्त्री० ६त० वा ङीप्। (बामनहाटी) गुल्मभेदे भार्ङ्यम्। भार्ङ्याम्, विपदन्ते च।

ब्रा(ब्रा)ह्मसुहूर्त • न० ब्रा(ब्रा)ह्मो मुहूर्तः [illegible] यत्र। [illegible]

ब्रा(ब्रा)ह्ममुहूर्त • पु० ब्रा(ब्रा)ह्मो देवताऽस्य अण् टिलोपः [illegible] "ब्रा(ब्रा)ह्मे मुहूर्ते बुध्येत" [illegible]

उच्यते" इत्युक्ते दण्डद्वयात्मके काले।

ब्रा(ब्रा)ह्मीकन्द • पु० ६त०। ब्रा(ब्रा)ह्मी इव कन्दो यस्य। वाराही-कन्दे। [वर्णोपत।

ब्रू • कथने अदा० उभ० द्विक० सेट्। ब्रवीति-आह ब्रूते। अवोचत्

भ

भ • न० भा-क। नक्षत्रे, मेषादिराशौ, ग्रहे च। शुक्राचार्ये पु०। भष-ड। भ्रमरे, भ्रान्तौ च। छन्दःशास्त्रोक्ते आदिगुरुके अन्त्यौ द्वौ लघुयुक्ते वर्णत्रिके च पु०। [भिमके च त्रि०।

भक्त • पु० न० भज+क्त। अन्ने, ओदने च। भक्तियुक्ते, तदासक्ते,

भक्तदास • पु० भक्तेन अन्नमात्रदानेन दासः भक्तेन दासभावः। पञ्चदशदासान्तर्गते दासभेदे। "भक्तदासश्च विज्ञेयः" इति स्मृतिः।

भक्तमण्ड • पु० न० ६त०। भक्तस्य निःस्रावे (माड)।

भक्ति • स्त्री० भज क्तिन्। सेवायाम्, आराधनायाम्, गौणवृत्तिविशेषे, विभागे, श्रद्धायाम्, उपचारे, अवयवे, अनुरागे, श्रद्धायाम्, रचनायाम्, "भक्तिर्विपर्ययेण" इत्यादि।

भक्तिपीन • पु० भक्तिरेव पीनः [illegible] [illegible]

भक्तिमत् • पु० भक्तिरस्य अस्त्यर्थे मतुप्। [illegible]

भक्ष • अदने चुरा० उभ० सक० सेट्। [illegible]

[illegible]

भक्षकार • पु० त्रि० भक्ष्यं करोति कृ+अण्। [illegible]

[illegible]

भक्षणी • स्त्री० [illegible]

भक्षालाबु • स्त्री० [illegible]

भग • पु० भज घ। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

भगीरथ • पु० सूर्य्यवंश्ये दिलीपराजपुत्रे नृपभेदे। येन गङ्गा भुवि-नयनमानीता।

भग्न • त्रि० भन्ज-क्त। पराजिते, खण्डिते च "भग्नं भग्नं धनुर्दुर्दैवेन..." इति नाटकम्।

[illegible] • पु० भग्नः [illegible]। [illegible]।

भङ्ग • पु० भन्ज-घञ्। पराजये, खण्डे, भेदे, तरङ्गे, कौटिल्ये, भक्तौ, [illegible], गमने, जलनिर्गमे च। [illegible], [illegible] (भाङ्) स्त्री०।

भङ्गि(ङ्गी) • स्त्री० भन्ज-इन् वा ङीप्। विच्छेदे, कौटिल्ये, विन्यासे, तरङ्गे, भेदे, व्याजे च।

भङ्गुर • त्रि० भन्ज-घुरच्। कुटिले, नश्वरे, [illegible], नदीवक्रे च। [illegible] (वानरच्) स्त्री०।

भङ्गा • न० [illegible]।

भज • भासे सेवायाम् भ्वा० उभ० सक० अनिट्। भजति ते अभाक्षीत्। [illegible]। [भञ्ज त।

भञ्ज • [illegible] चुरा० उभ० सक० सेट्। [illegible] ते [illegible]।

भञ्ज • [illegible] चुरा० उभ० सक० सेट् इदित्। [illegible] ते [illegible]। [illegible]

[illegible]

भण्टु(ण्टू)क • पु० भटि-उक, ऊक वा। श्योनाकवृक्षे।

भण्ड • पु० भडि अच्। परिहासवाक्यभाषके (भांड) "त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः" इति चार्वाकवाक्यम्।

भण्डिर(ल) • पु० भडि-इरच्, इलच् वा। शिरीषवृक्षे। [illegible] शुभे, शिल्पिनि, दूते च।

भण्डी • स्त्री० भडि-अच् गौरा० ङीष्। मञ्जिष्ठायाम्, शिरी[illegible] स्वार्थे कन् [illegible]। तत्रैवार्थे।

भण्डीर • पु० भडि-ईरन्। तण्डुलीयशाके, शिरीषवृक्षे च। [illegible] ङीप्। मञ्जिष्ठायाम् स्त्री०। [मञ्जिष्ठा[illegible]

भण्डीरलतिका • स्त्री० भडि-ईरन् [illegible] मता लतिका [illegible]

भद • दीप्तौ, शुभकरणे, मोदे च भ्वादि० आत्म० अक० सेट् [illegible] भन्दते अभन्दिष्ट। [illegible]

भद • कल्याणकरणे चुरा० उभ० सक० सेट् इदित्। भन्दय[illegible]

भद्रक • पु० भदि-ण्वुल् नलोपः। मोदभेदे। पूजिते त्रि०।

भद्र • न० भदि+रक् नि० नलोपः। मङ्गले, मुस्तके, [illegible] ज्योतिषोक्ते [illegible] स्त्री० न०। [illegible], [illegible], [illegible], रामचन्द्रे, [illegible] च पु०। ज्योतिषोक्तायां द्वितीयासप्तमीद्वादशीति[illegible] च स्त्री०। साधौ, श्रेष्ठे च त्रि०। स्वार्थे कन्। [illegible] [illegible] पु०।

[illegible]

भद्रवल्ला * स्त्री॰ भद्राय वलति चलति वल+अच्। (गन्धभादाल) लताभेदे, गन्धिकायां, माधवीलतायाञ्च। (मून) गोपवल्लयाम्।
भद्रवल्ली * स्त्री॰ कर्म॰ संज्ञायां कन् ङ्रस्वः अत इत्त्वम्। (अनन्त-
भद्रश्रय * न॰ भद्राय श्रीयते श्री-अच। चन्दनरसे।
भद्रश्री * पु॰ भद्रा श्रीर्यस्य। चन्दनवृक्षे।
भद्रालपत्रिका * स्त्री॰ भद्रायालति पर्य्याप्नोति अल-अच् तादृशं पत्रं यस्याः कन् अत इत्त्वम्। गन्धाल्याम् (गान्धाल)।
भद्राली * स्त्री॰ भद्रायालति पर्य्याप्नोति अल+अच् गौरा॰ ङीष्। गन्धाल्याम् (गान्धाल)। (दीर्घः। कट्फलवृक्षे।
भद्रावती * स्त्री॰ भद्र-अस्त्यर्थे मतुप् मस्य वः संज्ञायां पूर्वपद-
भद्राश्रय * पु॰ ६त॰। चन्दने। [नृपासने।
भद्रासन * न॰ भद्राय लोकक्षेमायास्यतेऽत्र आस-आधारे ल्युट्।
भद्रवल्ली * स्त्री॰ भमिल्वचक्रशब्दस्य भरमालाति गृह्णाति आला-क-गौरा॰ ङीष्। (डांश) मक्षिकायाम्। स्वार्थे कन्। अत्रैवार्थे।
भय * न॰ बिभेत्यस्मात् भी-अच्। भयहेतौ। भावेऽच्। दैन्याद्यङ्के, परतः स्वानिष्टसम्भावनारूपे वा चित्तवृत्तिभेदे, नाटकप्रसिद्धे रसभेदे च। [कुक्कुटशिखायां च पु॰।
भयङ्कर * त्रि॰ भयं करोति कृ-अच् मुम् च। भयजनके। रसभेदे,
भयनाशिनी * स्त्री॰ भयं नाशयति नश-णिच्-णिनि। त्रायमाणा-लतायाम्। [च। भयङ्करे त्रि॰।
भयानक * पु॰ बिभेत्यस्मात् भी+आनक। व्याघ्रे, राहौ, रसभेदे
भर * पु॰ भृ-अप्। अतिशये। कर्त्तरि अच्। भरणकर्त्तरि त्रि॰।
भरण * न॰ भृ-ल्युट्। वेतने, पोषणे, धारणे च। अश्विन्यवधिके द्वितीये नक्षत्रे, घोषकलतायाञ्च स्त्री॰ ङीप्।
भरण्य * न॰ भरणाय हितम् यत्। मूल्ये, वेतने च। क्लीवत्वमपि।
भरण्यभुज् * त्रि॰ भरण्यं वेतनं भुङ्क्ते भुज-क्विप्। वैतनिके कर्म-करे।
भरत * पु॰ भरं तनोति तन ड। (जडभरत) इति ख्याते मुनिभेदे, नाट्यशास्त्रस्य, अलङ्कारशास्त्रस्य च कर्त्तरि मुनिभेदे। शबरे, तन्तुवाये, क्षेत्रे, कैकयीसुते रामानुजे च। भरतेन प्रोक्तं भारतं नाट्यशास्त्रमधीयते अण् तस्य लुक्। नटेषु। दुष्मन्तेन शकुन्तलायामुत्पादिते नृपभेदे पु॰। तस्यापत्यानि इञ् तस्य बहुषु लुक्। भरतवंश्ये नृपे पु॰ ब॰ व॰।
भरतखण्ड * न॰ भरतस्य नृपस्य विहितं खण्डम्। भारतवर्षान्त-र्गते कुमारिकाख्ये खण्डे।
भरतवर्ष * न॰ ६त॰। भारते वर्षे।
भरताग्रज * पु॰ ६त॰। दशरथज्येष्ठपुत्रे श्रीरामे।
भरद्वाज * पु॰ ज्येष्ठस्य भ्रातुरुतथ्यस्य पत्न्यां ममतायां बृहस्पतिना जनिते मुनिभेदे। [पक्षिणि। भरिणी।
भरित * पु॰ भृ इतच्। हरिद्वर्णे। भृते त्रि॰। स्त्रियां ङीप् नस्य
भर्ग * पु॰ भ्रस्ज-घञ् भर्जादेशो कुत्वम्। शिवे, ज्योतिःपदार्थे, आदित्यान्तर्गते ऐश्वरे तेजसि, "आदित्यान्तर्गतं वर्चो भर्गाख्यं तन्मुमुक्षुभिः। जन्ममृत्युविनाशाय दुःखस्य त्रिविधस्य च। ध्यानेन पुरुषैर्येण द्रष्टव्यं सूर्य्यमण्डले" इति याज्ञवल्क्यः। तस्य तेजस ऐश्वरत्वं "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति गीतायामुक्तम्। भावे घञ्। भर्जने च। [धातरि च त्रि॰।
भर्त्तृ * पु॰ भृ-तृच्। स्वामिनि, अधिपतौ, राजनि च। पोषके,
भर्त्तृदारक * पु॰ भर्त्तुरधिपस्य राज्ञः दारकः पुत्रः। नाट्योक्तौ राज-कुमारे। तत्कन्यायां स्त्री॰ कन्। भर्त्तृदारिका।
भर्त्तृहरि * पु॰ भर्त्ता हरिरिव। स्वनामख्याते वाक्यपदीयादि-ग्रन्थकर्त्तरि विक्रमादित्यस्य ज्येष्ठे भ्रातरि राजभेदे।
भर्त्स * अधिक्षेपे चुरा॰ उभ॰ सक॰ सेट्। भर्त्सयति ते अबभर्त्सत् त।
भर्त्सन * न॰ भर्त्स-ल्युट्। अपकारवचने, अधिक्षेपे, तिरस्कारायाप-कारार्थकशापोक्तौ च। युच्। भर्त्सनाप्यत्र स्त्री॰।
भर्म्यपत्रिका * स्त्री॰ भर्म्यं निन्दनीयं पत्रमस्याः कप् अत इत्त्वम्। महानीलीवृक्षे।
भर्भ * हिंसायां भ्वादि॰ पर॰ सक॰ सेट्। भर्भति अभर्भीत्।
भर्म(न्) * न॰ भृ-मन्, मनिन् वा। स्वर्णे, भृतौ, नाभौ, धुस्तूरे च।
भर्व * हिंसे भ्वादि॰ पर॰ सक॰ सेट्। भर्वति अभर्वीत्। [निष्ट।
भल * वधे दाने निरूपणे च भ्वादि॰ आ॰ सक॰ सेट्। भलते अभ-
भल * निरूपणे चुरा॰ आत्म॰ सक॰ सेट्। भालयते अबीभलत।
भलता * स्त्री॰ भाति+भा+क कर्म॰। राजबलालतायाम्।
भल्ल * दाने, वधे, निरूपणे च भ्वादि॰ पर॰ सक॰ सेट्। भल्लति अभल्लीत्।
भल्ल * पु॰ भल्ल-अच्। भल्लूके। अस्त्रभेदे पु॰ न॰। स्वार्थे कन् भल्लूके पु॰। वा गौरा॰ ङीप् तत्रैव। स्वार्थे कन्। भल्लातकेऽप्यत्र।
भल्लपुच्छी * स्त्री॰ भल्लस्य पुच्छमिव पुष्पमस्याः ङीष्। (गोरक्षत-ण्डुला) क्षुपभेदे।
भल्लात * पु॰ भल्लं भल्लास्त्रमिवातति स्पर्शेन अत-अच्। (भेला) वृक्षभेदे। स्वार्थे कन्। अत्रैव। गौ॰ ङीष्। भल्लातक्यप्यत्र।
भल्लूक * पु॰ भल्ल-उ(ऊ)क। (भालुक) जन्तुभेदे।
महादान ० न॰ कर्म॰। विनायकादिग्रहपूजापूर्व्वं तुला

पौडशपदार्थदाने "अथातः सम्प्रवक्ष्यामि महादानस्य

इत्युपक्रम्य "आद्यन्तु सर्व्वदानानां तुलापुरुषसञ्ज्ञकम्"

षोड़शदानान्यभिधाय "विनायकादिग्रहलोकपाल

दिव्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्र

चतुष्टयं स्यात्। जप्यानि सूक्तानि तथैव चैषामनु

यथास्वरूपम्" इत्युक्ते मात्स्ये। विस्तरस्तु मत्कृतत

दिपद्धतौ ज्ञेयः।

महादारु * न॰ कर्म॰ देवदारुणि।

महादेव * पु॰ कर्म॰। "ब्रह्मादीनां सुराणाञ्च मुनीनां ब्र

नाम्। तथा महत्त्वात् देवोऽयं महादेवः प्रकीर्त्तितः"

"महती पूजिता विश्वे मूलप्रकृतिरीश्वरी। तस्या दे

तेन महादेवस्तेन स्मृतः" इत्युक्ते च शिवे। [बृह

महाद्रुम * पु॰ कर्म॰। अश्वत्थवृक्षे, तस्य विष्णुरूपत्वात् म

महाधन * पु॰ महत् मूल्यरूपं धनमस्य। बहुमूल्ये

सिह्लके, मनोभवलक्षे च। कर्म॰ पु॰। अतिधनवति त्रि॰

महाधातु * पु॰ कर्म॰। स्वर्णे।

महानदी * स्त्री॰। ओड्रदेशस्थे नदीभेदे, समुद्रगामिन्यां

महानन्द ० पु॰ महान् अतिवृहत् आनन्दो यत्र। मोक्षे।

अतिशयानन्दे पु॰। "माघमासस्य या शुक्ला नवमी

जिता। महानन्देति सा प्रोक्ता" इत्युक्तायां माघशुक्ल

सुरायां, नदीभेदे च स्त्री॰।

महानन्दि * पु॰ कलौ चन्द्रान्तकस्य महापद्मनृपभेदस्य पि

महानवमी * स्त्री॰ कर्म॰। आश्विनशुक्लमधिकृत्य "ततोऽ

यस्मात् सा महानवमी स्मृता" इत्युक्तायाम् आश्विन

म्याम्।

महानस * न॰ महदनः महायाम् अच। पाकस्थाने।

महानाटक ० न॰ दृश्यकाव्यनाटकभेदे "एतदेव यदा स

साहित्यदर्पणे ६ परि॰।

महानाद ० पु॰ महान् नादोऽस्य। गजे, गर्जन्मेघे, सिंहे, उ

महानिद्रा * कर्म॰। मरणे, तत्र पुनः प्रत्युत्थानाभावात्।

महानिम्ब * पु॰ कर्म॰। (घोड़ानिम) वृक्षभेदे।

महानिशा * स्त्री॰ "महानिशा तु विज्ञेया मध्यमप्रह

इत्युक्ते रात्रेर्मध्यमप्रहरद्वये। [जम्ब्वाञ्च। तन्त्रभे

महानील ० पु॰ कर्म॰। भृङ्गराजे, मणिभेदे, नागभेदे,

महानुभाव * पु॰ महान् अनुभाव आशयो यस्य। महाशये।

महापद्मविष 'शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः

इति योगीयं महापञ्चविषाभिध।" इत्युक्तं पञ्चविधे विषे। [ऽपि च।

…ता • स्त्री॰ महत् पद्ममस्याः। महापद्मवृक्षे।

…पद्म • पुं॰ कर्म॰। नागभेदे, दिग्गजविशेषे, निधिभेदे, पुरभेदे च।

…पद्म • पुं॰ कर्म॰। पद्मनामकं नागभेदे, कुबेरस्य निधिभेदे, संख्याविशेषे च। "शतं पद्मं महापद्म" इति भागवतम्।

पद्मार्थादिसंख्यायां, तत्संख्यान्विते, तृणभेदे च।

महापातक • न॰ "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुस्तत्संसर्गश्च पञ्चमः।" इत्युक्ते पञ्च पातके।

पातकेषु।

महापिण्डीतक • पुं॰ कर्म॰। मदनवृक्षे, विपुलमदनवृक्षे। महापीलु • पुं॰ कर्म॰। मधुपीलौ पत्रिमधुरत्वात् हि महत्वम्। महत्पात्रम्।

पुराण • न॰ "पुराणानि दिशन्तीह … च। सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।" इत्युक्ते पुराण। महापुराणं विष्णुपुराणादि … पुराणभेदे।

महापुरुष • पुं॰ कर्म॰। पुरुषोत्तमे, नारायणे च। "वन्दे महापुरुष ते चरणारविन्दम्" इति भागवतम्।

महापुरुषदन्ता • स्त्री॰ महापुरुषस्य विष्णोः दन्ता इव … शतावर्याम्।

महापुष्पा • स्त्री॰ महत् गन्धपुष्पमस्याः … अपराजितायाम्।

महाप्रलय • पुं॰ कर्म॰। ब्रह्मणो दिनावसाने … प्रलये।

महाप्रसाद • पुं॰ "…" इत्युक्ते देवनैवेद्यादौ, प्रसाद इत्युक्ता …

विपुलप्रसादायाम्।

महाप्राण • पुं॰ महान् प्राणो … वर्णविशेषे … कर्म॰। …

…

महाफल • पुं॰ महत् फलमस्य … स्त्री॰।

[illegible]

नवधा व्यासवचनैर्महाभारतमिदं स्मृतम्।

महाभीता • स्त्री॰ कर्म॰। महा पुनर्नवायाम् लज्जालौ च हि महौ॰

…महाभीता पतिभीरुत्वम्। पतिभीरौ त्रि॰।

महाभूत • न॰ कर्म॰। महान्ति च तानि भूतानि च। पृथिव्यादिषु पञ्चसु भूतेषु। "तं देवा …

… पृथिव्यां … महाभूतसमाधिना" इति रघुः।

महाभृङ्ग • पुं॰ कर्म॰। नीलभृङ्गराजे।

महाभोग • पुं॰ कर्म॰ … भोगिविशेषे।

महामनस् • त्रि॰ महत् उदारं मनो यस्य। उदारचित्ते।

महामाय • पुं॰ "…" इत्युक्ते …

माया च … महामाया …

मायायाम्।

महामाया • स्त्री॰ कर्म॰ … महत्त्वम्। … "महामाया …"

… इति चण्डी।

महामात्र • पुं॰ कर्म॰। … प्रधानामात्ये …

महामुद्रा • पुं॰ …

[illegible]

महाराष्ट्र * पु॰ कर्म॰ । (महाराष्ट्रा) देशभेदे । तद्देशः कारणत्वेन अस्त्यस्या अच् गौरा॰ ङीप् । जलपिप्पल्यां, शाकभेदे च स्त्री॰ ।

महारिष्ट * पु॰ कर्म॰ । गिरिजाते निम्बभेदे । अत्यशुभे न॰ ।

महारोग * पु॰ कर्म॰ । "उन्मादो राजयक्ष्मा च श्वासस्त्वग्दोष एव च । मधुमेहश्चाश्मरी च तथोदरभगन्दरौ । इत्येतेऽष्टौ महारोगा महापातकसम्भवाः" इत्युक्ते महापातकजन्येषु उन्मादादिषु रोगेषु ।

महारौरव * पु॰ रुरोरयम् अण् कर्म॰ । "महारौरवसञ्ज्ञस्तु ऊर्द्धाधस्ताम्रसंपुटे । धम्यते खदिराङ्गारैः मथ्यते कालमव्ययम्" इत्युक्ते नरकभेदे ।

महार्घ * वि॰ महानर्घो मूल्यं यस्य । बहुमूल्ये ।

महार्णव * पु॰ कर्म॰ । महासमुद्रे ।

महार्द्रक * न॰ कर्म॰ । वनार्द्रके ।

महालय * पु॰ महान् आत्यन्तिको लयो यत्र । परमात्मनि । कर्म॰ । बृहदालये, तीर्थस्थाने, विहारे, भौराश्विनकृष्णपक्षे च न॰ । "तस्यां दद्यात् न यद्दत्तं पितॄणां वै महालये" इति स्मृतिः ।

महालक्ष्मी * स्त्री॰ कर्म॰ । चण्ड्या द्वितीयचरितदेवतारूपे "सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्" इत्युक्तलक्षणे अष्टादशभुजान्विते दुर्गामूर्त्तिभेदे, तन्त्रोक्ते लक्ष्मीभेदे च ।

महालोध * पु॰ कर्म॰ । लोध्रभेदे (पाठिया लोध) ।

महावरा * स्त्री॰ वृणोति विघ्नं, याति वृ-अच् कर्म॰ । दूर्वायाम् ।

महावराह * पु॰ कर्म॰ । बृहद्वराहरूपधारिणि भगवदवतारभेदे ।

महावरोह * पु॰ महान् अवरोहोऽस्य । वटवृक्षे ।

महावल्ली * स्त्री॰ कर्म॰ । माधवीलतायाम् ।

महावाक्य * न॰ कर्म॰ । परस्परसंबद्धार्थके वाक्यसमुदायरूपे एकवाक्ये "वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते" इति मीमांसकाः । वेदान्तोक्ते ब्रह्मविद्याप्रतिपादके "तत्त्वमस्या" द्युपनिषद्वाक्ये, दानादौ अभिलापवाक्ये च ।

महाविद्या * स्त्री॰ कर्म॰ । "काली तारा महाविद्या षोडशी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः" इत्युक्तासु काल्यादिषु दशसु देवीषु ।

महाविषुव * न॰ [illegible] । तत्र [illegible] ... [illegible]

[illegible]

[illegible]

खेततुरङ्गे, कोकिले, धत्तूरे, एकवीरवृक्षे, महा[illegible] क्षीरकाकोलीवृक्षे स्त्री॰ ।

महावीर्य * पु॰ द्व॰ । वाराहीकन्दे, परमात्मनि च । [illegible] वति त्रि॰ । वनकार्पास्यां, महायां सूर्यपत्न्यां च स्त्री॰ ।

महावृहती * स्त्री॰ कर्म॰ । वार्त्ताक्याम् ।

महावृक्ष * पु॰ कर्म॰ । स्नुहीवृक्षे, बृहत्तरौ च ।

महाव्याधि * पु॰ कर्म॰ । महारोगे, कुष्ठादौ रोगे च ।

महाव्याहृति * स्त्री॰ कर्म॰ । वैदिके भूर्भुवःस्वरात्मके मन्त्[illegible]

महाव्रण * न॰ कर्म॰ । (नालिघा) दुष्टव्रणे ।

महाव्रत * न॰ कर्म॰ । अतिशयव्रते शारदीयदुर्गापूजादौ "[illegible] महापुण्यं शङ्कराद्यैरनुष्ठितम्" इति पुराणम् । द्वादश[illegible] प्रायश्चित्तात्मके व्रतभेदे च ।

महाशङ्ख * पु॰ कर्म॰ । तन्त्रे वीराचारप्रसिद्धे नृकपाला[illegible] "नृललाटास्थिखण्डेन रचिता जपमालिका । महा[illegible] माला ताराविद्याजपे प्रिया" इत्युक्ते माल्यभेदे, बृहच्छ[illegible] "पौण्ड्रं दध्मौ महाशङ्खम्" इति गीता ।

महाशठ * पु॰ कर्म॰ । राजधुस्तूरे । अतिधूर्त्ते त्रि॰ ।

महाशणपुष्पी * स्त्री॰ शणस्येव पुष्पमस्य ङीप् कर्म॰ । [illegible] पुष्पाम् । स्वार्थे कन् । तत्रैवार्थे । [

महाशता * स्त्री॰ शत मूलानि सन्त्यस्य अच् कर्म॰ । बृ[illegible]

महाशतावरी * स्त्री॰ कर्म॰ । बृहच्छतावर्य्याम् ।

महाशय * त्रि॰ महान् उदार आशयो यस्य । महानुभावे ।

महाशाखा * स्त्री॰ महती शाखास्याः । नागबलायाम् ।

महाशालि * पु॰ कर्म॰ । स्थूलशालौ । [शीतवे[illegible]

महाशीता * स्त्री॰ महती शीता शीतलवीर्य्या । शतमूल्याम्

महाशुक्ति * स्त्री॰ महती मुक्ताकारणत्वेन प्रशस्यात् मुक्तादेतौ शुक्तौ । [

महाशूद्र * पु॰ कर्म॰ । आभीरे (आहीर) जातिभेदे । [illegible]

महाश्मशान * न॰ कर्म॰ । काश्याम्, समूलकर्मसहितस[illegible] पुनरनुत्पादनाय नाशाधारत्वात् तस्यास्तथात्वम् ।

महाश्यामा * स्त्री॰ कर्म॰ । श्यामालतायां, शिंशपाभेदे च ।

महाश्रावणिका * स्त्री॰ कर्म॰ । (मुनगुडी) क्षुपभेदे ।

महाश्वेता * स्त्री॰ कर्म॰ । सरस्वत्याम्, कृष्णभूमिकुष्माण्डे[illegible]

महाष्टमी * स्त्री॰ कर्म॰ । "आश्विने शुक्लपक्षस्य भवेद्या[illegible] ष्टमी । महाष्टमीति सा प्रोक्ता" इत्युक्तायामाश्विनशुक्ला[illegible]

महासर्ज * पु॰ कर्म॰ । असनवृक्षे, पनसवृक्षे च (आटाम) ।

महासह * पु॰ कर्म॰ । पुष्पप्रधाने कुब्जवृक्षे । माषपर्ण्याम्, [illegible] वृक्षे च स्त्री॰ । अतिसहे त्रि॰ ।

महासांतपन * न॰ कर्म॰ । [illegible] स्मृत्युक्ते व्रतभेदे

महासार * पु॰ महान् सारोऽस्य । दुष्खदिरे । [गुणयुक्ते[illegible]

महासुगन्धा * स्त्री॰ सु[illegible] कर्म॰ । [illegible]

...न * पु॰ महती सेनाऽस्य। कार्त्तिकेये। बृहत्सेनाधिपती
...व॰।
...क्रम * पु॰ महान् स्कन्धोऽस्य। उष्ट्रे।
...ह्राम * पु॰ कर्म॰। अट्टहासे, उच्चैर्हासे।
...हिगन्धा * पु॰ अहेर्गन्धो हिंसा यस्मात् अहिगन्धो नकुलः मम
त्वे नाख्यस्य अच् कर्म॰। गन्धनाकुल्याम्। [त्रि॰।
...हाघ्नया * स्त्री॰ कर्म॰। कपिकच्छ्वाम् (आलकुषी)। अतिशयं
महि(ही) * स्त्री॰ मह+इन् वा ङीप्। पृथिव्याम्। ङीबन्तन्तु
मानवदेशस्थे नदीभेदेऽपि।
महिका * स्त्री॰ मह्यते मह-क्वुन्। हिमे।
महिमन् * पु॰ महतो भावः इमनिच् डित्त्वेन टिलोपः। महत्त्वे.
ईश्वरैश्वर्यभेदे च।
म(मि)हिर * पु॰ मह-(मिह) किरच्। सूर्य्ये।
(हि,ही)ला * स्त्री॰ मह इलच्। योषिति, प्रियङ्गुलतायां, रेणुका
गन्धद्रव्ये, मत्तायां स्त्रियाञ्च। एलच्। महेलापि, योषिति।
महिष * पु॰ मह-टिषच्। स्वनामख्याते पशुभेदे, महिषासुरे च।
राज्ञः कृताभिषेकायां स्त्रियां, महिषजातिस्त्रियाम्, ओषधि-
भेदे च स्त्री॰ ङीप्। [वाहनादयोऽप्यत्र।
महिषध्वज * पु॰ महिषो ध्वजश्चिह्नं वाहनत्वेनास्य। यमे। महिष-
...मर्द्दिनी * स्त्री॰ महिषं महिषासुरं मृद्नाति, मृद-णिनि-
ङीप् ६त॰। दुर्गाभेदे। [पर्वतीय। स्वार्थे कन्।
...हिषाक्ष * पु॰ महिषस्याक्षीव अच्। गुग्गुलुभेदे। स्वार्थे कन्।
...हिषासुर * पु॰ रम्भासुरेण महिष्यामुत्पादिते असुरभेदे, महिषा-
ख्यगुग्गुलौ च। [भूमिजगुग्गुलौ।
महिषासुरमथन * पु॰ महिषासुरामर्द्दनः ग्रथ्नाति भू-अच्।
महीक्षित् पु॰ महीं क्षयते ईष्टे क्षि+ऐश्वर्य्ये क्विप् तुक् च। नृपे।
महीज * न॰ मह्या जायते जन-ड। आर्द्रके। मङ्गलग्रहे, नर-
कासुरे च पु॰। [धरोऽप्यत्र।
...ध्र * पु॰ महीं धारयति धृ-क। पर्व्वते। अच्। मही-
...प्राचीर * न॰ मह्याः प्राचीरमिवावरकत्वात्। समुद्रे।
महीभृत् * पु॰ महीं बिभर्त्ति धारयति पालयति वा भृ-क्विप्।
पर्व्वते, भूमिपाले च। ["महतो महीयान्" इति श्रुतिः।
महीयस् * त्रि॰ अतिशयेन महान् महत्+ईयसु। अतिमहति।
महीयमान * त्रि॰ महीयते मही+क्यङ्॰ शक्-शानच्। पूज्ये,
...हे च "महीयमाना भवताऽतिमात्रम्" इति भट्टिः।
महीरुह * पु॰ मह्यां रोहति रुह+क। वृक्षे, शाके च।
महीलता * स्त्री॰ मह्या लतेव। (केंचो) किञ्चुलुके।
महेच्छ * त्रि॰ महती इच्छा यस्य। महाशये।
महेन्द्र * पु॰ महान् इन्द्रः इन्द्रस्यापि नियन्तृत्वात्। परमेश्वरे,
...मर्हेन्द्रपर्व्वतभेदे च।
महेन्द्रनगरी स्त्री॰ महेन्द्रस्य इन्द्रस्य नगरी वा अटवी। अमरावतीभेदे।
महेन्द्रपुरी * स्त्री॰ ६त॰। अमरावत्याम्। महेन्द्रनगर्य्यादयोऽप्यत्र।
महेन्द्रवारुणी * स्त्री॰ महेन्द्रस्य वरुणस्य तयोरियं प्रियत्वात्
अण् देवताद्वन्द्वे उत्तरपदवृद्धिः। (माकाल) लताभेदे।
महेरणा * स्त्री॰ महं गजोत्सवमीरयति ईर॰ णिच् ल्युट्। शल्लकीवृक्षे।
महेश * पु॰ कर्म॰। शिवे। महेश्वरोऽप्यत्र "महेश्वरस्त्र्यम्बक एव
नापरः" इति रघुः।
महेशबन्धु * पु॰ ६त॰। बिल्ववृक्षे।
महैला ० स्त्री॰ कर्म॰। स्थूलैलायाम् (बड एलाची)।
महोक्ष * पु॰ महान् उक्षा अच् समा॰। वृषभे, "महोक्षं वा
महाजं वा श्रोत्रियाय प्रकल्पयेत्" इति मनुः।
महोटी * स्त्री॰ महान्ति फलापेक्षया स्थूलानि उटानि पर्णा-
न्यस्याः ङीप्। वृहत्यां, अन्यत्रे च।
महोत्पल * पु॰ कर्म॰। पद्मे, सारसपक्षिणि च।
महोत्सव * पु॰ कर्म॰। मनस्तसुखजनकव्यापारे।
महोत्साह * त्रि॰ महान् उत्साहो यस्य। अत्यन्तोद्यमयुक्ते।
महोदधि * पु॰ कर्म॰। समुद्रे।
महोदय * पु॰ महान् उदयो वृद्धिराधिपत्यं वा यत्र। कान्यकुब्ज-
देशे। तद्देशस्थे पुरभेदे न॰। कुशस्थलादियोगात् "अमा-
वास्यां ग्रहणम्" इत्यादिलक्षणात् "किञ्चिदूने महोदयः"
इत्युक्ते किञ्चिदूने योगभेदे पु॰। मागधनाथां स्त्री॰। [त्रि॰।
महोदरी * स्त्री॰ महदुदरं यस्याः। शतमूल्याम्। वृहदुदरयुक्ते
महोदय * पु॰ कर्म॰। तालवृक्षे। अत्यन्तोन्नतियुक्ते त्रि॰।
महोरग * पु॰ कर्म॰। वृहत्सर्पभेदे। महोरगाख्योऽप्यत्र अच
तगरमूले न॰।
महोल्का * स्त्री॰ कर्म॰। वृहदुल्कायाम्।
महोषध * न॰ कर्म॰। शुण्ठ्याम्, लशुने, वाराहीकन्दे, वत्स-
विषे, पिप्पल्याम्, अतिविषायां, वीर्य्यदोषधमाने च।
महौषधि * स्त्री॰ कर्म॰। दूर्व्वायां, लज्जालुके "महदेवी ...
ब्राह्मी वचा शान्तिदा तथा। सहदेवी तथा भिषी ...
च सुवर्चला। महौषध्यष्टकं प्रोक्तम्" इत्युक्ते देवादौ...
द्रव्यभेदे। स्त्रीत्वरूपाणां ङीप्।
मा * शब्दे अक॰ माने सक॰ जु॰ प॰ अनिट्। मिमीते ...
मा * माने अदा॰ पर॰ सक॰ अनिट्। माति अमासीत्।
मा * माने दिवा॰ आत्म॰ सक॰ अनिट्। मायते अमास्त ...
मा * अव्य॰ इदन्तस्मात् देवादिकात् मा-धातोः क्विप् ...
धातोर्ङित्त्वेन न्द्रे ङिष्यद्वहारात् न माङ्योगे ...
निषेधम्। ङिदनुबन्धगुरुत्वमुदिपदन् न ङि॰ ...
अङ्ग्रामः अ॰दे॰ "मा निषाद! प्रतिष्ठा त्वमगमः ...
हृदयम्। मा क-टाप्। लक्ष्म्याम्, मातरि च ...
क्विप्। माने स्त्री॰।
मांस * न॰ मन स दीर्घश्च। "मांसभक्षयितामुत्र ...

…া • স্ত্রী৹ মানেব ত্রায়তি ত্রৈ+ক। অপমানাদি, ব্রহ্মাণ্ড্যাদিষু বণ্ডোমিহদেবীমূর্তিষু, মর্ত্যমন্দোৎপাদকেষু ব্রহ্মাদিক্ষোময়-স্বামহর্দেষু, অবস্থে, ঘরে চ। মাত্র+স্বার্থে কন্। মাত্রমন্ত্রার্থে।

…বন্ধু • পু৹ ৬ত৹। মাতুঃ পিতুঃ বন্ধুঃ পুত্রা মাতুর্মাতৃঃবন্ধুঃ মনাঃ। মাতুর্মাতুলসুতায় বিশেষ্যা মাত্রবন্ধবঃ" ইত্যুক্তেষু মাতৃঃ [প্রত। বসীয়াদিষু। মাত্রবান্ধবীঃপ্রভব।

• স্ত্রী৹ ৬ত৹। মাতুর্ধর্মিন্যাম্। অনুক্রম৹। মাতুঃপ্রমা-… তন্-

…য় • পু৹ মাত্রবন্ধুলোয়ম্ ঢক্। মাতুর্ধর্মিনীপুত্রে। …

…ষ • পু৹ মাত্রবন্ধুলোয়ম্ ঢক্। মাত্রস্বসীয়োঃপ্রভব।

…য়া স্ত্রী৹ ঙীপ্। অণ্। মাত্রস্বসীয়োঃপ্রভব।

…ণ্ডী • স্ত্রী৹ মাতুঃ প্রমাতুঃ নিষ্ঠীব। বামকরণে।

• ন৹ মা-ত্রন্। মাত্রত্বে, অবধারণে চ। পরিচ্ছেদ, অন্তে, পরিমাণে, কর্ণভূষণাম্, বিত্তে, মধুর্যমাত্রকালে বর্ণাবয়বপ্রভেদে, "কালেন যাবতা পাণিঃ পর্যেতি জানুমণ্ডলে। মা মাত্রা কবিভিঃ প্রোক্তা" ইত্যুক্তেষু হ্রস্বদীর্ঘপ্লুতাদিষু চ স্ত্রী৹। মৌল-…। "মাত্রাস্পর্শাস্ত কৌন্তেয় শীতোষ্ণসুখদুঃখদাঃ। আগমাপায়িনো বিষয়াঃ মা-ত্রন্। ইন্দ্রিয়স্পর্শ। [অপ্র। কৌল্যা চ" ইতি গীতা।

…মাত্রাপতাকা • স্ত্রী৹ ছন্দোগ্রন্থোক্তে মাত্রাপ্রস্তারানুগুণে পতাকাকারে…

মাত্রামর্কটী • স্ত্রী৹ ছন্দোগ্রন্থোক্তে মাত্রাপ্রস্তারানুগুণে মর্কটীপ্রকারভেদে। টীকাকবক্রমভেদে।

মাত্রামেরু • পু৹ ছন্দোগ্রন্থোক্তে মাত্রাপ্রস্তারানুগুণে মেরুচক্রে।

মাত্রাবৃত্ত • ন৹ মাত্রয়া কৃতং বৃত্তম্। আর্যাদৌ ছন্দোভেদে।

মাত্সর্য • ন৹ মৎসরস্য ভাবঃ ষ্যঞ্। পরগুণদ্বেষে "মাত্সর্যমুৎসার্য বিচার্য" ইতি মাঘ৹। [অসম্যক্ত্ব।

মাথ • মথে মন৹ ঘঞ্। স্বাদি৹ পর৹ সেট্। ইদিৎ। মান্থতি

মাথ • পু৹ মথ-ঘঞ্। পথি, মন্থনে চ।

মাথুর • ত্রি৹ মথুরায়াং ভবো মথুরায়া আগতো বা অণ্। মথুরাস্থ…

মাদ • পু৹ মদ্+ঘঞ্। দর্পে, হর্ষে চ।

মাদক • ত্রি৹ মাদয়তি মদ-ণিচ্ ণ্বুল্। মত্ততাকারকে দ্রব্যে

মাদন • ন৹ মাদয়তি মদ-ণিচ্-ল্যু। মদনে। কামদেবে, মদন…

…মাদৃশ • ত্রি৹ অহমিব দৃশ্যতে দৃশ-ক্স…। [বিশেষ্যাম্।

মাদৃক্(শ্) • ত্রি৹ মদ্বৎ দর্শনমস্য…

…মাদ্রী • স্ত্রী৹ মদ্রে ভবা অণ্। পাণ্ডুরাজস্য দ্বিতীয়ভার্যায়াম্ অতি-…

মাধব • পু৹ মায়া ধবঃ। লক্ষ্মীপতৌ। মধু+স্বার্থে অণ্। বৈশাখে "… মাধবলাবিন্যয় কন্যা" ইতি কুমার। মধুরে দ্রব্যভেদে …

…[illegible]

মাধবচাম্পা • স্ত্রী৹ মাধবে বৈশাখে মাধবস্য ক্রমুকস্য বা হস্তা। বারা-[ত্রি৹। হীকন্দে।

মাধবোচিত • ন৹ মাধব উচিতো যস্য। কক্কোলকে। মাধবপ্রিয়ে

মাধবোদ্ভব • পু৹ মাধবে বৈশাখে উদ্ভবতি প্রভবতি উদ্+ভূ-অচ্। [নির্মিতাপুষ্পে। মধুরমধূকে ত্রি৹। (খিরনী) রাজাদন্যাম্।

মাধুর • ন৹ মধু-রাতি মধুরোহপি দদাতি রা+ক স্বার্থে অণ্। মাধুর্যে বিশ্বাস্য ক্ষীরকে।

মাধুরী • স্ত্রী৹ মধুরস্য ভাবঃ অণ্ মাধুর্যে, মধুরত্বে চ "অধরবরমাধুরীধারা" ইতি ঙীপ্। মাধুর্যং, মধুরত্বে চ। মদিরায়াম্। ইত্যুক্ত। মধুর+স্বার্থে অণ্। মদিরায়াম্।

মাধ্যন্দিন • ন৹ মধ্যন্দিনস্যেদং অণ্। মধ্যাহ্নে। মধ্যন্দিনেন প্রোক্তা শাখা অণ্। শুক্লযজুর্বেদীয়শাখাভেদে।

মাধ্বীক • স্ত্রী৹ মধুনা মধুকপুষ্পেণ নির্বৃত্তম্ ঠক্। মধু-… স্বার্থে ঠক্। দ্রাক্ষাজনে "মাধ্বী… অনুভবতি মধ্বী। মধু দধ স্বার্থে ঠক্। …কবিঃ।

মাধ্বীক। বিনা ন ভবতি" ইতি …।

মাধ্বীকফল • পু৹ মাধ্বীকমিব মধুরং ফলমস্য। মধুনারিকেলে। [মধুপৰ্ণিকায়াম্।

মাধ্বীকপুষ্প • পু৹ মাধ্বীকমিব মধুরা পু৹ কর্মধা৹।

মাধ্বীমধুরা • পু৹ মাধ্বীকমিব …। কর্কটশৃঙ্গ্যাম্।

[illegible]

মান • বিচারে …

[illegible]

মান • ন৹ মা ল্যুট্। …

[illegible]

मान्धातृ * पु॰ मामिन्द्रं धयति धे-तृच्। "मामयं धास्यतीत्यस्मात् मान्धाताधो प्रकीर्त्तितः" इति निरुक्तेः युवनाश्वराजपुत्रे नृपभेदे।

मान्य * पु॰ मान-अर्चायां कर्मणि ण्यत्। पूज्ये।

मामक * त्रि॰ मम इदम् अस्मद्+कन् ममादेशः। मत्सम्बन्धिनि। खञ्। मामकीनोऽप्यत्र।

माया * स्त्री॰ मा-यत् वा नेत्त्वम्। छद्मनि, कापट्ये, इन्द्रजालादौ, मिथ्याबुद्धिहेत्वज्ञानभेदे, कृपायां, दम्भे, लक्ष्म्यां, बुद्धमातरि, ईश्वरस्योपाधौ, अघटनभाविकायां शक्तौ च। [(बाजीकर)।

मायाकृत् * पु॰ मायामिन्द्रजालं करोति कृ-क्विप्। मायाकरे

मायादेवीसुत * पु॰ ६त॰। बुद्धे।

मायावत् * त्रि॰ माया+अस्त्यर्थे मतुप् मस्य वः। मायाविशिष्टे। कंसराजे पु॰। कामपत्न्यां स्त्री॰ ङीप्। [ङीप्। बिड़ाले पु॰।

मायाविन् * त्रि॰ माया+अस्त्यर्थे विनि। मायाकरे। स्त्रियां

मायिक * त्रि॰ मायास्त्यस्य ठन्। मायाकरे। इनि मायीत्यप्यत्र।

मायु * पु॰ मा-उ। देहस्थे पित्ते धातौ। [सम्बन्धिनि त्रि॰।

मायूर * न॰ मयूराणां समूहः तस्येदं वा अण्। मयूरसङ्घे। मयूर-

मायूरी * स्त्री॰ मयूरस्येदं प्रियत्वात् अण् ङीप्। अजमोदायाम्।

मार * पु॰ मृ-घञ्। मरणे। मारयति मृ-णिच्-अच्। कामदेवे, विघ्ने, धुस्तूरे च। [मारिभये, (बाज) पक्षिभेदे च।

मारक * पु॰ मृ-णिच्-ण्वुल् मृ-णिच्-घञ् स्वार्थे कन् वा। मारणे,

मारकस्थान * न॰ मारणकारणे स्थाने। "अष्टमं चायुषः स्थानमष्टमादष्टमञ्च यत्। तयोरपि व्ययस्थानं मारकस्थानमुच्यते" इत्युक्ते जन्मलग्नात् सप्तमे द्वितीये च स्थाने।

मारि * स्त्री॰ मृ-णिच्-इन्। मारणे। वा ङीप् मारीत्यप्यत्र। "मारीभये राजभये" इति वटुकस्तवः।

मारिष * पु॰ रिष-हिंसायाम् निषेधार्थकमाशब्देन स॰। नाट्योक्तौ आर्य्ये, हिंसानिवारकतया तस्य तथात्वम्। तण्डुलीयशाके, दक्षमातरि च स्त्री॰ टाप्।

मारीच * पु॰ ताडकाराक्षसीपुत्रे रावणानुचरे राक्षसविशेषे।

मारुतव्रत * न॰ "प्रविश्य सर्वभूतानि यथा चरति मारुतः। तथा चरैः प्रवेष्टव्य व्रतमेतद्धि मारुतम्" इत्युक्ते राज्ञां धर्मभेदे।

मारुतात्मज * पु॰ ६त॰। हनुमति, भीमे च। इञ्। मारुतिरप्यत्र।

मारुतापह * पु॰ मारुतं वायुदोषमपहन्ति अप+हन-ड। वरुणवृक्षे। वायुदोषनाशके त्रि॰।

मार्कण्ड * पु॰ मृकण्डोरपत्यम् अण् पु॰। मुनिभेदे। ढक् मार्कण्डेयोऽप्यत्र। तत्पृष्टे लताभेदे स्त्री॰। [राजे।

मार्केव * पु॰ मारयति क्षिप-मारि केयर्मे मे कूयते कू-अच्। भृङ्ग-

मार्ग * संस्कारे अन्वेषणे च चुरा॰ उभ॰ सक॰ सेट्। मार्गयति अममार्गत् त।

मार्ग * अन्वेषणे वा चुरा॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। मार्गयति-ते मार्गति अममार्गत्-त। अमार्गीत्। "नृपदेर्गीत्" इति भट्टिः। भ्वादि॰ आत्म॰ इत्यन्ये तेन मार्गते, माण इत्यादि सिद्धम्। [प्रमाणम् वाचस्पत्ये द्र

मार्ग * पु॰ मृज-शुद्धौ मार्ग अन्वेषणे वा घञ्। पथि। तद्वि

मार्गण * न॰ मार्ग-ल्युट्। अन्वेषणे, याचने, प्रणये च। श ल्यु। याचके त्रि॰। शरे पु॰।

मार्गशिर * पु॰ मृगशिरया युक्ता पौर्णमासी अण् मा यत्र मासे रण्। चान्द्रे अग्रहायणे मासि। तत्पौर्णमास्यां स्त्री॰ ङीप्

मार्गशीर्ष * पु॰ साधनं मार्गशिरवत्। अग्रहायणे मासि। पौर्णमास्यां स्त्री॰ ङीप्।

मार्गित * त्रि॰ मार्ग+क्त। अन्वेषिते। [ते अममार्जत्

मार्ज * मार्जने सक॰ ध्वनौ अक॰ चुरा॰ उभ॰ सेट्। मार्जय

मार्जन * न॰ मृज-ल्युट्। प्रोञ्छनादिना निर्मलीकरणे। त तत्त्वार्थे स्त्री॰ सा च मुरजध्वनौ च। करणे ल्युट्। सम्मा न्याम् (झाटा)। स्त्री॰ ङीप्।

मार्जार(ल) * पु॰ मृज-आरन् वा रस्य लः। बिड़ाले, रक्तचित्र खट्टासे च। ततः संज्ञायां कन्। मयूरे। [स्वार्थे कन्। तत्रैव

मार्जारगन्धा * स्त्री॰ मार्जारस्येव गन्धो यस्याः। मुद्गपर्णी

मार्जारी * स्त्री॰ मृज-आरक् गौ॰ ङीप्। कस्तूर्य्याम्, खट्टासज मार्जारयोषिति च।

मार्जारी(ली)य * पु॰ मार्जार+(ल)स्वार्थे छ, मृज-आरीयक् लत्वम् वा। बिड़ाले, शूद्रे च। कायशोधने पु॰।

मार्जित * त्रि॰ मार्ज-क्त। शोधिते, दधि-खण्डमधुसर्पिर्मरिचा कृते कर्पूरादिवासिते भक्ष्यभेदे च (रसा)।

मार्त्तण्ड * पु॰ मृते अण्डे भव अण् शक॰। सूर्य्ये। तस्य च म ण्डत्वम् "मारितश्च यतः प्रोक्तमेतदण्ड त्वयोदितम्। तस्मा सुतस्तेऽय मार्त्तण्डाख्यो भविष्यति" इति पुराणोक्तम्। [वि

मार्त्तिक * न॰ मृत्तिकया निर्मितम् अण्। शरावे (शरा)। मृ

मार्दङ्गिक * त्रि॰ मृदङ्गं तद्वादनं शिल्पमस्य ठक्। मृदङ्गवादके

मार्दव * न॰ मृदोर्भावः। मृदुत्वे, परदुःखासहिष्णुतायाम्, भावे च "अभितप्तमयोऽपि मार्दवं भजते कैव कथा" इति र

मार्ष * पु॰ मृष-क्त तत. स्वार्थे अण्। तण्डुलीयशाके।

मार्ष्टि * स्त्री॰ मृज-क्तिन्। शोधने। [इत्युक्ते जातिमे

माल * पु॰ मल-संग्रहाय कर्त्तरि घञ्। "माला भिन्ना किरात

मालक * न॰ मल-ण्वुल्। स्थलपद्मे, (माला) नारिकेलपात्रभेदे

मालती * स्त्री॰ मां लक्ष्मीं शोभा वा लतति वेष्टते लत-अ ६त॰ ङीप्। जातीलतायां, युवत्यां, काकमाच्यां, नदीभे विशल्यायां, ज्योत्स्नायां, निशायाञ्च।

मालतीतीरज * पु॰ मालत्या नदीभेदस्य तीरे जायते जन-ड टङ्कणे (सोहागा)। मालतीतीरभवादयोऽप्यत्र।

मालतीपत्री * स्त्री॰ माल्यास्तद्वामकजात्या इव पत्रमस्या

जातीपत्राम् (जैयत्री)। [जातीफले।

मालतीफल * न॰ मालत्यास्तद्वामकजात्याः फलम्। (जायफल)

मालभारिक * त्रि॰ मालानां भारोऽस्त्यस्य ठन् पूर्वपदह्रस्वः। मालानां भारवति।

मालव * पु॰ अवन्तिदेशे (मालयोयारदेशे) रागभेदे च।

मालविका * स्त्री॰ मालवे भवा ठक्। त्रिवृति (तेवोड़ि)।

मालश्री * स्त्री॰ मालं मलनं जटादिना दुष्टत्वं श्यति सो+क गौ॰ ङीष्। केशपुष्टिकारके वृक्षे, रागिणीभेदे च।

मालाकण्ट * पु॰ मालाकारः कण्टः कण्टको यस्य। अपामार्गे।

मालाकन्द * पु॰ मालाकारः कन्दो यस्य। मूलभेदे।

मालाकार * पु॰ मालां करोति कृ-अण्। (माली) वर्णसङ्करभेदे। माल्यकारके त्रि॰।

मालाग्रन्थि * पु॰ मालया ग्रन्थिरस्य। मालादूर्वायाम्।

मालातृण * न॰ मालाकारं तृणम् भूस्तृणे। स्वार्थे कन्। तत्रैव।

मालादीपक * न॰ अलङ्कारोक्ते अर्थालङ्कारभेदे।

मालादूर्वा * स्त्री॰ मालाकारा दूर्वा। (गाठिदूर्वा) दूर्वाभेदे।

मालारिष्टा * स्त्री॰ मालाभूतमरिष्टं यस्याः ब॰। पाठायाम्।

मालाली * स्त्री॰ मालामलति भूषयति अल+अण्-ङीप्। पृक्कायां (पिड़िङ्गशाके)। स्वार्थे कन्। तत्रैव।

मालिक * पु॰ माला तन्निर्माणं शिल्पमस्य ठन्। मालाकारे जातिभेदे, पक्षिभेदे, रजके च। माल्यकारके च त्रि॰।

मालिका * स्त्री॰ मालेव कन् अत इत्वम्। नवमल्लिकायां, ग्रीवाभरणे, नदीभेदे, सुरायाम् अतस्याम्, पुष्पमाल्ये च। "पापापमालिकाख्याता" इति लक्ष्मीध्यानम्।

मालिन् * पु॰ माला शिल्पमस्त्यस्य इनि। मालाकारे। माल्यवति त्रि॰। मालाकारपत्न्यां, पञ्चदशाक्षरपादके छन्दोभेदे, गौर्याम्, चम्पानगर्यां, मन्दाकिन्यां, कण्वाश्रमान्तिकस्थे नदीभेदे, अग्निशिखावृक्षे, दुरालभायां च स्त्री॰ ङीप्।

मालु * स्त्री॰ मल-उण्। पत्रलतायां (पानलता), नार्यां च।

मालुधान * पु॰ मालुरिव पत्नलेव धीयतेऽसौ धा-कर्मणि ल्युट्। (मालुयासाप) सर्पभेदे। लताभेदे स्त्री॰ ङीप्।

मालूर * पु॰ मां लक्ष्मीं परीयां लुनाति लू रक्। बिल्वे, कपित्थे च।

मालेय * त्रि॰ मालाया साधुः ढक्। मालारचनानिपुणे।

माल्य न॰ मालायै हितं यत्। पुष्पे। स्वार्थे ष्यञ्। पुष्पमालायाम्, मूर्ध्नि स्थायां पुष्पमालायाञ्च।

माल्यपुष्प * पु॰ मालायै हितं पुष्पमस्य। शणवृक्षे। शणपुष्प्याम् स्त्री॰ ङीप्। स्वार्थे कन्। तत्रैवार्थे।

माल्यवत् * त्रि॰ माल्यमस्त्यस्य मतुप् मस्य वः। माल्ययुक्ते, केतुमालेलावृतवर्षयोः सीमाभूते पर्वतभेदे, सुकेशराक्षसपुत्रे राक्षसभेदे च।

मामन्द्रिक * त्रि॰ मेति मन्दं निषेधाय वदति ठक्। निषेधकारके।

माष * पु॰ मष-संज्ञायां घञ्। (माषकलाइ) व्रीहिभेदे "दशार्धगुञ्जं प्रवदन्ति माषम्" इत्युक्ते "गुञ्जाभिर्दशभिर्माषः" इत्युक्ते च परिमाणभेदे।

माषकलाय * पु॰ माषाख्यः कलायः। स्वनामख्याते व्रीहौ।

माषपर्णी * स्त्री॰ माषस्येव पर्णान्यस्याः ङीप्। वनमाषे।

माषभक्तबलि * पु॰ माषमिश्रितं भक्तमेव बलिः पूजोपहारद्रव्यम्। माषमिश्रिते भक्तरूपे पूजोपहारे।

माषवर्धक * पु॰ माषं माषपरिमितं स्वर्णं वर्धयति आच्छिनत्ति अपहरति वृध+छेदने ण्वुल्। स्वर्णकारे।

माषीण * न॰ माषाणां भवनं क्षेत्रं खञ्। माषव्रीहिभवनयोग्ये क्षेत्रे। यत्। माष्यमप्यत्र।

मास् * पु॰ माति परिच्छिनत्ति स्वगत्या कालम् मा-असुन्। चन्द्रे, त्रिंशद्दिनात्मककालरूपे मासि च।

मास * पु॰ मा एव अण्। चन्द्रे, त्रिंशद्दिनात्मके काले च। स च सौरसावननाक्षत्रचान्द्रभेदाच्चतुर्विधः। मासयन्त्रमत्रायम् चण् चान्द्रे मासे तु मुख्यः। मस्यते परिमीयते मस-परिमाणे करणे घञ् अक्षगुञ्जात्मके शब्दार्थे। मास स्वार्थे कन् तत्रैवार्थे।

मासन * न॰ मासं नयति नी ड। सोमराजीलतायाम्।

मासप्रमित * पु॰ मासं प्रमातुमारब्धः। प्र+मा-क्त। कलाः इति स॰। प्रतिपच्चन्द्रे। [भक्षणकृ।

मासर * पु॰ मस-परिणामे घञ् मासं परिणामं राति रा-क।

मासान्त * पु॰ मासस्य सौरस्य चान्द्रस्य वान्तः अवसानम्। मासावसाने संक्रान्त्यादौ।

मासिक * त्रि॰ मासे भवः कालाट्ठञ्। मासभवे। प्रेतोद्देशेन मृतसजातीयतिथौ, प्रतिमासम् अमावास्यायाञ्च कर्तव्ये श्राद्धे न॰। "मासिकानि स्वकीये तु" इति स्मृतिः। "पितृणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः" इति स्मृतिः।

माक्षु * अव्य॰ मन-क्षिप्-अप। शिघ्रार्थे।

माह * माने भ्वादि॰ उभ॰ सक॰ सेट्। माहति ते अमाहीत् अमाहिष्ट। अदित् न ह्रस्वः। [माहाकुलीनोऽप्यत्र।

माहाकुल * त्रि॰ महाकुले भवः अण्। महाकुलोद्भवे। अञ्।

माहात्म्य * न॰ महात्मनो भावः ष्यञ्। महिमनि, महत्त्वे च।

माहिष * न॰ महिष्या इदम् अण् महिषीदुग्धादौ। महिषस्येदम् अण्। तस्य द्रव्यादौ त्रि॰। [रजोनिभेदे।

माहिष्य * पु॰ महिष्यां भवः ष्यञ्। क्षत्त्रेण वैश्यायामुत्पन्ने सङ्करजातिभेदे।

माहेन्द्र * पु॰ महेन्द्रस्यायम् अण्। ज्योतिषोक्ते महेन्द्रादिदैवत्ये क्षणभेदे। पूर्वस्यां दिशि, इन्द्रवरुणशक्तौ स्त्री॰ ङीप्।

माहेय * पु महा गौः तस्या अपत्यम् मही+ढक्। मङ्गले, नरकासुरे च। गोमात्रे स्त्री॰ ङीप्।

माहेश्वर * त्रि॰ महेश्वरादधिगतम् तत्र आगत अण् महेश्वरस्य मार्गे। दर्शनकाद्याः स्त्री॰ ङीप्। तस्येदम् अण्। "माहेश्वरी

द्रुम * पु॰ मीनुम+पतिशये नमच् नि॰। शिवे।
स् * पु॰ मिष-क्सु नि॰। शिवे।
* पु॰ मी-नक्। मत्स्ये, मेषादितो द्वादशे राशौ, भगवदवतार-
भेदे च। [ण्यच।
केतन * पु॰ मीनः केतनं यस्य। कन्दर्पे। मीनध्वजादयो-
नेत्रा * स्त्री॰ मीनस्य नेत्रमिव पन्थिरस्याः। गण्डदूर्वायाम्।
मीनाक्षीत्यादयोऽप्यत्र।
ाण्डा * स्त्री॰ मीनस्याण्डमिव तदाकारा रेणुकाऽस्त्यस्य अच् गौरा॰
ङीष्। शर्करायाम्। [मीत्। घटि न ह्रस्वः।
। ० शब्दे अक॰ गतौ सक॰ भ्वादि॰ पर॰ सेट्। मीमति अमी
ांसक * पु॰ मीमांसां वेत्त्यधीते वा वुन्। मीमांसाशास्त्रज्ञे,
तदध्येतरि च। मान स्वार्थे सन्-ण्वुल्। सिद्धान्तकारके।
ांसा * स्त्री॰ मान-विचारे स्वार्थे सन् च। विचारपूर्वकतत्त्वनि-
र्णये, तत्प्रतिपादकग्रन्थभेदे च। स च ग्रन्थ कर्मब्रह्मविषयभेदेन
द्विविधस्तत्र कर्मकाण्डविषयसंशयनिवारणप्रतिपादको ग्रन्थो
जैमिनिप्रणीतः स च पूर्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंश-
यनिर्णायकग्रन्थः स च वेदान्तत्वेन प्रसिद्धः। [वा ह्रस्वः।
* निमेषे भ्वादि॰ पर॰ अक॰ सेट्। मीलति अमीलीत्। घटि
लन * न॰ मील-ल्युट्। मुद्रणे, सङ्कोचने च।
लित * त्रि॰ मील+क्त। अप्रफुल्ले, सङ्कुचिते च "मीलितं यद-
भिरामताधिकं" इति काव्यप्रकाशः।
* स्थूलीभवने भ्वादि॰ पर॰ अक॰ सेट्। मीवति अमीवीत्।
* पु॰ मोचयति कोशान् ण्यर्थे मुच+डु। मनोज्ञे। [पलाण्डौ।
न्दक * पु॰ मुदः मुदे कन्दो यस्य कप् पृ॰ मुदो दलोपः।
० पु॰ मुच+क पृषो॰ चस्य कः। मोक्षे, उत्सर्गे च।
ट * पु॰ मकि-उट पृषो॰। शिरोभूषणे।
न्द * पु॰ मुकुं ददाति दा+क पृ॰ मुम्। "मुकुमव्ययमाख्यात
निर्वाणमोक्षवाचकम्। तद्ददाति च यो देवः मुकुन्दस्तेन
कीर्त्तितः" इति निरुक्ते विष्णौ।
कुम् * अव्य॰ मकि+उमुच् पृषो॰। निर्वाणमोक्षे।
कुर * पु॰ मकि+उरच् पृषो॰। दर्पणे, वकुलवृक्षे, कुलालदण्डे,
मल्लिकावृक्षे, कोलीवृक्षे, चोरके च। [देहे, आत्मनि च।
कुल * पु॰ न॰ मकि+उलच् पृ॰। ईषद्विकाशितकलिकायाम्,
कुष्टक * पु॰ मकुर्गतौ क्लमस्तं स्तकति स्तक-अच् पृ॰ षत्वम्।
वनमुद्गे (मुगानी)।
कूलक * पु॰ मकि-ऊलच् कन्। दन्तिवृक्षे।
क्त * त्रि॰ मुच क्त। त्यक्ते, प्राप्तमोक्षे, आनन्दिते च।
क्तरसा * स्त्री॰ मुक्तो रसो यस्याः। रास्नायाम्।
क्तसङ्ग * त्रि॰ मुक्तः सङ्गो विषयासक्तियेन। त्यक्तसर्वविषयासङ्गे।
परिव्राजके च पु॰। [विन। वद्धदानशीले
क्तहस्त * त्रि॰ मुक्त दानाय प्रसारितः न बद्ध इति यावत् हस्तो

मुक्ता * स्त्री॰ मुच-क्त। रास्नायाम्, (मति) शुक्तिजे रत्नभेदे च।
मुक्तापुष्प * पु॰ मुक्तेव शुभ्रं पुष्पमस्य। कुन्दवृक्षे।
मुक्ताप्रसू * स्त्री॰ मुक्तां प्रसूते प्र+सू-क्विप् ६त॰। शुक्तौ। [हारे।
मुक्ताप्रालम्ब * पु॰ मुक्तया मुक्ताविशिष्टतया प्रालम्बते अच्। मुक्ता-
मुक्ताफल * न॰ मुक्ता फलमिव। मौक्तिके, लवलीफले (नोयाड),
कर्पूरे, वोपदेवकृते भक्तिप्रधाने ग्रन्थभेदे च "चतुरेण चतुर्वर्ग-
चिन्तामणिप्रणिन्यया। हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत्"
इति तद्ग्रन्थान्तश्लोकः।
मुक्तालता * स्त्री॰ मुक्ताया लतेव। मुक्ताहारे।
मुक्तावली * स्त्री॰ मुक्ताया आवली हारभेदः। मुक्ताहारे। ६त॰।
मुक्तश्रेणौ, भाषापरिच्छेदग्रन्थटीकायां सिद्धान्तमुक्तावल्यां च।
मुक्तास्फोट * पु॰ स्फुट-घञ् विदीर्य्यते स्फोटः मुक्तायै स्फोटः। शुक्तौ।
मुक्ति * स्त्री॰ मुच क्तिन्। मोचने संसारबन्धनराहित्ये मतभेदेन
आत्यन्तिकदुःखनिवृत्तौ, ब्रह्मस्वरूपावाप्तौ च देहेन्द्रियाभ्यामा-
त्मनो बन्धशून्यत्वे च।
मुक्तिमण्डप * पु॰ मुक्तिप्रदो मण्डपः शाक॰ त॰। काशीस्थे जगन्ना-
थक्षेत्रस्थे च मण्डपभेदे तीर्थे। [सिद्धके।
मुक्तिमुक्त * पु॰ मुक्तिर्मोचनं तया मुक्तो रहितः संश्लिष्ट इति यावत्।
मुख * न॰ खन-अच् डित् धातोः पूर्वं मुट् च। "सन्ताखता यतः खाते
तस्मादाहुर्मुखं बुधा" इत्युक्ते देहावयवभेदे। "ओष्ठौ च दन्त-
मूलानि दन्ता जिह्वा च तालु च। गलो गलादि सकलं सप्ताङ्गं
मुखमुच्यते" इत्युक्ते गलादिसप्तात्मकावयववति वदने। गृहस्य
निःसरणवर्त्मनि, छद्ममण्डपादेः प्रवेशनिर्गमे, आरम्भे, उपाये,
नाटकादौ सन्धिभेदे, नाटकादिशब्दभेदे, आद्ये, प्रधाने, शब्दे,
नाटके, वेदे च। लकुचवृक्षे पु॰ (डेओ)।
मुखगन्धक * पु॰ मुखस्य गन्धो यस्य सेवनात् कप्। पलाण्डौ।
मुखचपला * स्त्री॰ आर्य्याछन्दोन्तरभेदे छन्दोभेदे।
मुखज * पु॰ ब्रह्मणो मुखाज्जायते जन-ड। विप्रे, "ब्राह्मणोऽस्य
मुखमासीत्" इति श्रुतिः। [पलाण्डौ।
मुखदूषण * पु॰ मुखं दूषयति सेवनात् दुर्गन्धेन दूष-णिच्-ल्यु।
मुखधौता * स्त्री॰ मुखं धौतं यया धाव-क्त ऊठ् पर॰ नि॰। ब्राह्म-
णयष्टौ (वामनहाटि)।
मुखानिरीक्षक * त्रि॰ मुखमितरस्य निरीक्षते निर्+ईक्ष ण्वुल्।
अलसे स हि अन्यो यदि मत्कार्यं कुर्य्यात् तदा नाहं करोमी-
त्याशयेन इतरमुखं निरीक्षमाणः स्वकार्य्ये न प्रवर्त्तते इति तस्य
तथात्वम्।
मुखपूरण * न॰ मुखं पूरयति पूर-ल्यु। गण्डूषमितजलादौ।
मुखप्रिय * न॰ मुखं प्रीणाति प्री क उप॰ स॰। नरङ्गे। मुखरो-
चकमात्रे त्रि॰।
मुखभूषण * न॰ मुखं भूषयति भूष-ल्यु। ताम्बूले। मुखमण्डने।
मुखमण्डनक * पु॰ मुखस्य मण्डनमिव इवार्थे कन्। तिलकवृक्षे।

मुद्रिका * स्त्री॰ मुद्रेव मुद्रा वा मुद्रा कन्। स्वर्णरौप्यादिनिर्मिते अङ्गुलिभूषणे अङ्कनसाधनयोग्ये पदार्थे।
मुद्रित * त्रि॰ मुद्रा जाताऽस्य इतच्। अप्रकाशिते, अङ्किते च।
मुधा * अव्य॰ मुह+का पृ॰ हस्य धः। मिथ्याशब्दार्थे।
मुनि * पु॰ मन+इन् पृ॰ उच्चम्। दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते" इत्युक्तलक्षणे निरस्तैषणे वीतरागादौ जने। ते च मन्वत्रिविष्णुहारीतादयः। सप्तसंख्यायाञ्च।
मुनिखर्जूरी * स्त्री ६त॰। खर्जूरीभेदे। [सप्तच्छदे (छातिम)।
मुनिच्छद * पु॰ मुनिसंख्याताः सप्तसंख्याः छदाः प्रतिपर्णे यस्य।
मुनितरु * पु॰ मुनिरगस्त्यनामकस्तरुः। वकवृक्षे। [वकवृक्षे च।
मुनिद्रुम * पु॰ मुनीनां प्रियो मुनिनामको वा द्रुमः। श्योनाकवृक्षे,
मुनिपुत्रक * पु॰ मुनेः पुत्र इव संज्ञायां कन्। दमनकवृक्षे, खञ्जने च। ६त॰। ऋषिसुते।
मुनिपुष्प * न॰ मुनिद्रुमस्य पुष्पं भीमो भीमसेनवदुत्तरपदलोपः। वकपुष्पे। [भोजनाभावे च।
मुनिभेषज * न॰ मुनीनां भेषजमिव। हरीतक्याम्, अगस्त्ये मुनौ,
मुनीन्द्र * पु॰ मुनिः इन्द्र इव। बुद्धे। ७त॰। ऋषिश्रेष्ठे।
मुम्ब * गत्यां भ्वादि॰ पर॰ सक॰ सेट् क्त्वा वेट्। मुम्बति अमुम्बीत्।
मुम्बा * स्त्री॰ ताजकप्रसिद्धे जन्मवर्षावधि एकैकवर्षे लग्नत एकैकराश्यन्तरे लग्नस्य गतिभेदे। मुथहाप्यत्र।
मुम्बज * न॰ मुनियोग्यमन्नम्। नीवारकन्दादौ।
मुमुक्षु * त्रि॰ मोक्तुमिच्छुः मुच-सन्-उ। मोक्षेच्छावति, संसारबन्धनात्मोक्षेच्छावति च। यतौ पु॰।
मुमूचान * पु॰ मुच-कान पृ॰ दीर्घः। मेघे। मुक्तवति त्रि॰। "द्रुपदादिव मुमूचानः" इति वेदमन्त्रः।
मुमूर्षु * त्रि॰ मर्त्तुमिच्छुः मृ+सन्-उ। आसन्नमरणे।
मुर * वेष्टने तुदा॰ पर॰ सक॰ सेट्। मुरति अमोरीत्।
मुर * पु॰ मुर-क। दैत्यभेदे, "पार्थनाथ दिवन् मुराम्" इति माघः।
मुर * पु॰ मुर-क। वेष्टने। स्वनामख्याते गन्धद्रव्ये स्त्री॰ टाप्।
मुरज * पु॰ मुरात् वेष्टनात् जायते जन ड। मृदङ्गे वाद्यभेदे।
मुरजफल * पु॰ मुरज इव फलं यस्य। पनसवृक्षे। मृदङ्गफलादयोऽप्यत्र।
मुररिपु * पु॰ ६त॰। विष्णौ। मुरारिमुरमथनादयोऽप्यत्र।
मुरला * स्त्री॰ मुरं लाति ला-क। नर्मदायाम्। "मुरलामारुतोद्धूतम्" इति रघुः। वंशीनाम्नि वाद्ये गौरा॰ ङीप्।
मुरलीधर * पु॰ मुरलीं धरति धृ-अच्। श्रीकृष्णे. मुरलीवादनादयोऽप्यत्र। [भावे क्त। मूर्त्तम मूर्च्छितम्।
मुर्च्छ * मोहे ह्रद्धौ च भ्वादि॰ पर॰ सक॰ सेट्। मूर्च्छति अमूर्च्छीत्।
मुर्मुर * पु॰ मुर क। पृ॰ द्वित्वम्। तुषाग्नौ, कन्दर्पे, सूर्याश्वे च।
मुर्व * बन्धे भ्वादि॰ पर॰ सक॰ सेट्। मूर्वति अमूर्वीत् निष्ठायामनिट्।
मुल * रोपणे चुरा॰ उभ॰ सक॰ सेट्। मोलयति ते अमूमुलत् त।
मुषटी * स्त्री॰ मुष घटच गौरा॰ ङीष् पृ॰। तिलकल्के।
मुष(स)ली * स्त्री॰ मुष मुस वा अलच् पृ॰ षस्य सः गौरा॰ ङीप्। तालमूल्याम्, गृहगोधिकायाम्। स्वार्थे कन् अत्रार्थे।
मुष * वधे भ्वादि॰ पर॰ सक॰ सेट्। मोषति अमोषीत्।
मुष * छेदने दिवा॰ पर॰ सक॰ सेट्। मुष्यति अमुषत् अमोषीत्। पुषादिरयमित्यन्ये।
मुष * लुण्ठने क्र्यादि॰ पर॰ द्विक॰ सेट्। मुष्णाति अमोषीत्।
मुष(स)(श)ल * पु॰ मुष+कलच्। पृ॰ षस्य वा सः (शः) वा। अयोऽग्रे स्वनामख्याते धान्यादिकण्डनसाधने पदार्थे।
मुषा * स्त्री॰ मुष-क-टाप्। धातुद्रावणे पात्रभेदे (मुची)।
मुषित * त्रि॰ मुष-क्त। अपहृतद्रव्ये जने।
मुष्क * पु॰ मुष टाप्। पुरुषचिह्नभेदे अण्डकोषे (अण्टामाइल) वृषे, तस्करे, मांसले च। स्वार्थे कन् तत्रैवार्थे।
मुष्कशून्य * पु॰ ३त॰। वृषणरहिते राज्ञामन्तःपुररक्षके (खोजा)।
मुष्टि * पु॰ स्त्री॰ मुष क्तिच्। बद्धपाणौ, पलपरिमाणे, कुडवाष्टभागे च। क्तिन्। मोषणे स्त्री।
मुष्टिक * पु॰ मुष्ट्या कायति कै-क। कंसराजमल्लभेदे। मुष्टिर्मोषणं प्रयोजनमस्य कन्। स्वर्णकारे।
मुष्टिकान्तक * पु॰ ६त॰। बलदेवे तस्य मुष्टिकासुरहननात्तथात्वम्।
मुष्टिन्धय * पु॰ मुष्टिं धयति धे-खच् मुम् च। बालके।
मुष्टिबन्ध * पु॰ मुष्टेर्बन्धो यत्र। संग्रहे। ६त॰। मुष्टिबन्धने।
मुस * खण्डने दिवा॰ पर॰ सक॰ सेट्। मुस्यति अमुसत् अमोसीत्। पुषादिरयमित्यन्ये।
मुस(ष)(श)लिन् * पु॰ मुस(ष)(श)ल+अस्त्यर्थे इनि। बलदेवे।
मुस(ष)(श)ल्य * त्रि॰ मुस(ष)(श)लेन वेध्यः यत्। मुषलवेध्ये।
मुस्त * सङ्घाते चुरा॰ उभ॰ सक॰ सेट्। मुस्तयति ते अमुमुस्तत् त।
मुस्त * पु॰ स्त्री॰ मुस्त-अच् स्त्रीत्वे टाप्। मुस्तके। (मुता) स्वार्थे कन्। अत्रैवार्थे अस्त्री॰। स्थावरविषभेदे पु॰।
मुस्ताभ * न॰ मुस्तेव भाति भा-क। (नागरमुथा) मुस्तकभेदे।
मुह * मोहे वैचित्त्ये दिवा॰ उभ॰ अक॰ सेट्। मुह्यति अमुहत् मोहिता मोग्धा, मोढा।
मुहिर * पु॰ मुह+किरच्। कामे, मूर्खे च।
मुहुस् * अव्य॰ मुह-बाहु॰ उस्। पौन पुन्ये।
मुहूर्त्त * स्त्री हुर्च्छ क्त धातोर्मुट् च। द्वादशक्षणमिते काले पञ्चदशधा विभक्तस्य दिनस्य पञ्चदशभागे, किञ्चिन्न्यूनाधिकघटिकाद्वयरूपे काले च।
मू * भ्वादि॰ आ॰ सक॰ सेट्। मवते अमविष्ट। [त्रि॰।
मूक * पु॰ मू-कक्। मत्स्ये, दैत्यभेदे, दीने, वाक्शक्तिरहिते च
मूढ * त्रि॰ मुह-क्त। मूर्खे, बाले, जडे, मोहिते च।

मूत्र * त्रि॰ मूत्र-क्त। द्रुते, मूत्रिते च।

मूत्र * क्लीबे चद॰ चु॰उभ॰ सक॰ सेट्। मूत्रयति ते अमुमूत्रत् त।

मूत्र * न॰ मूत्र घञ्। शरीरात् उपस्थात् चरितजले।

मूत्रदोष * पु॰ मूत्रस्य दोषो यस्मात् दुष-घञ् [illegible]। प्रमेहरोगे।

मूत्रनिरोध * पु॰ मूत्रं निरुणद्धि नि+रुध-अण्। मूत्रनिरोधक-[illegible]। [illegible]।

मूत्रफला * स्त्री॰ मूत्रमिव फलं यस्याः। त्रपुषाम् (शसा), कर्कटी-

मूत्रमार्ग * पु॰ मूत्रमार्गे [illegible] मूत्रमार्गेऽपि [illegible]।

मूत्राघात * पु॰ [illegible]। मूत्रे [illegible] रोगविशेषे।

मूर्ख * पु॰ मुह-ख मूरादेशः। मूढे, [illegible], [illegible]। "[illegible]" इति स्मृतिव्याख्यायां [illegible]।

मूर्छन * स्त्री॰ मूर्छ-ल्युट्। "[illegible] मूर्छना [illegible]" [illegible] "[illegible]मूर्छनाम्" इति माघः।

मूर्छा * स्त्री॰ मूर्छ-अ टाप्। मोहे, [illegible]।

मूर्छित * त्रि॰ मूर्छा [illegible]। मूर्छां [illegible]। [illegible]

[illegible] * त्रि॰ [illegible]। मूर्छिते, [illegible]।

मूर्त * त्रि॰ मूर्छ क्त। मूढे, [illegible], [illegible]। [illegible]

[illegible]

मूलकपर्णी * स्त्री॰ मूलकवृक्षस्येव पर्णानि यस्य। शोभाञ्जने।

मूलकमूला * स्त्री॰ मूलकस्येव मूलमस्याः। [illegible]

मूलकर्मन् * न॰ मूलेन मन्त्रौषधादिना यत् वशीकरणादि [illegible] औषधादिना वशीकरणकर्मणि।

मूलकृच्छ्र * न॰ मूलेन आदिमहाघमूलेन कृच्छ्रम्। व्रतभेदे। [illegible] यथा। "मूलकृच्छ्र स्मृतो मूलैः" इति स्मृतौ [illegible]

मूलज * न॰ मूलाज्जायते जन-ड। आर्द्रके। उत्पलादौ पु॰। मूलनक्षत्र जातमात्रे त्रि॰।

मूलत्रिकोण * न॰ "सिंहो वृषश्च मेषश्च कन्या धन्वी [illegible] पर्कादीनां त्रिकोणानि" इत्युक्ते रव्यादीनां क्रमेण [illegible] राशिषु। [तस्मिन् (पुं॰) मूलधनादौ [illegible]

मूलद्रव्य * न॰ कर्म॰। मूलधने यदालम्ब्य वाणिज्यादि [illegible]

मूलपर्णी * स्त्री॰ मूलमारभ्य पर्णान्यस्याः ङीप्। मण्डूकपर्णी।

मूलपुष्कर * न॰ पुष्करस्य मूलं राज॰ पर॰। पुष्करमूले।

मूलपाली * स्त्री॰ पू-तप् गौ॰ ङीष् मूलं प्रधाना [illegible] [illegible] जायाम्।

मूलप्रकृति * स्त्री॰ मूलीभूता प्रकृतिः। [illegible] [illegible] [illegible] [illegible] "मूलप्रकृतिरविकृतिः" इति [illegible] तुमोयाच।

मूलफलद * पु॰ मूलेन फलं ददाति [illegible] दा-क। पनसवृक्षे।

मूलभ * पु॰ मूलं भमस्य यस्याः। मोरटालतायाम्।

स्त्री॰ मूष+गो॰ ङीप्। स्वर्णादिटङ्कणपात्रे (मूषी)।
॰ पु॰ स्त्री॰ मूष+कोकन् स्त्रीत्वे टाप्। उन्दुरौ।
ङौ तुदा॰ सार्वधातुके मृङि याशीर्लिङि च आत्म॰ अन्यत्र
पर॰ अनिट्। म्रियते। अमृत। ममार। मर्त्तासि मृषीष्ट।
॰ पु॰ मुनिभेदे।
संघाते भ्वादि॰ पर॰ सक॰ सेट्। मर्चति अमर्चीत्।
अन्वेषणे याचने च अद॰ चुरा॰ आत्म॰ सक॰ सेट्। मृग-
ते अममृगत।
अन्वेषणे दिवा॰ पर॰ सक॰ सेट्। मृग्यति अमर्गीत्।
॰ पु॰ मृग+क। पशुमात्रे, हरिणे, गजभेदे, अश्विन्यवधिके
पञ्चमे नक्षत्रे। अद॰ चुरा॰ मृग-भावे कच्। अन्वेषणे, याचने,
यज्ञभेदे च। अच्। मृगमदे, मकरराशौ च पु॰।
गामिनी ॰ स्त्री॰ मृग इव गच्छति गम-णिनि। विडङ्गायाम्।
मृगतुल्यगमनवति त्रि॰। स्त्रियां ङीप्।
जीवन * पु॰ मृगैस्तन्मांसादिभिर्जीवति जीव-ल्यु। व्याधे।
था ॰ स्त्री॰ मृग+युध-टाप्। महद्रूपस्यान्वेषणे।
तृष्णा ॰ स्त्री॰ मृगाणां तृष्णेव तृष्णाहेतुत्वात्। सूर्यकिरणे
जलभ्रान्तौ, निर्जलदेशस्थं सूर्यकिरणं दूरतो वीक्ष्य मृगैर्जल-
भ्रान्त्या तृष्णार्त्तैः मद्भिः वभ्रम्यते न च जलं लभ्यते इति, यीष्मे
मरुदेशे सिकतादौ पतितरविकिरणेषु जलभ्रान्तिरिति च मरि-
चम्। स्वार्थे कन्। तत्रैवार्थे।
दंशक * पु॰ मृग दंशति दन्श-ण्वुल्। कुक्कुरे।
धूर्त्तक * पु॰ मृगेषु धूर्त्तकः। शृगाले।
नाभि ॰ पु॰ मृगस्य नाभिः नाभिजन्यः। कस्तूर्य्याम् मृगभेदे।
नाभिजा * स्त्री॰ मृगस्य नाभेर्जायते जन-ड। कस्तूर्य्याम्।
नेत्रा * स्त्री॰ मृगो मृगशिरोनक्षत्रं नेत्रमिव प्रकाशकं यत्र
रात्रिषु। पौषमार्गस्य किञ्चिदधिकत्रयोविंशदिनावधिमार्ग-
शीर्षशेषपर्य्यन्तदिवसीयरात्रिषु। [न्द्रादयोऽप्यत्र।
मृगपति * पु॰ ६त॰। मृगाणां पशूनां पतिः स्वामी। सिंहे। मृगे-
मृगप्रिय ॰ न॰ ६त॰। पर्वततृणे।
मृगवधाजीव * मृगवधेनाजीवति जीव-अच्। व्याधे।
मृगबन्धनी ॰ स्त्री॰ मृगो बध्यतेऽनया बन्ध+ल्युट्-ङीप्। मृगबन्ध-
नार्थे जाले। करणस्य कर्तृत्वविवक्षायां णिनि ङीप्। मृगब-
न्धिनीत्यप्यत्र।
मृगभक्ष्या * स्त्री॰ मृगैर्भक्ष्यते भक्ष-यत्। जटामांस्याम्।
मृगमद ॰ पु॰ मृगस्य मदो गर्वो यस्मात्। कस्तूर्य्याम्।
मृगमदवासा * स्त्री॰ मृगमदस्येव वासः सौरभमस्याः। कस्तूरी-
मल्लिकायाम्। [वधफलके व्यापारे आखेटके।
मृगया * स्त्री॰ मृगो याप्यतेऽनया या+घञर्थे क। (शीकार) पशु
मृगयु * पु॰ मृग-अस्त्यर्थे यु। ब्रह्मणि, शृगालादीनां व्यापारभेदे,
व्याधे च "मृगयुमिव मृगोऽथ दक्षिणेर्मा" इति भट्टिः।

मृगरसा * पु॰ मृगो मृगमांसं तस्येव रसोऽस्याः। महदेवीलतायाम्।
मृगराज ॰ पु॰ मृगाणां पशूनां राजा टच् समा॰। सिंहे। मृगेण
राजते अच्। चन्द्रे। सिंहराशौ च। [स्वार्थे कन्। जीवन्त्याम्।
मृगराटिका ॰ स्त्री॰ मृगं रटति जीवत्त्वेन रट-अण् गौरा॰ ङीप्
मृगरिपु * पु॰ ६त॰। सिंहे। मृगशत्रु प्रभृतयोऽप्यत्र। सिंहराशौ च।
मृगलाञ्छन * पु॰ मृगो लक्षणं यस्य। चन्द्रे। मृगाङ्कादयोऽप्यत्र।
मृगवल्लभ * न॰ ६त॰। कुन्दुरुतृणे।
मृगवाहन * पु॰ मृगो वाहनं यस्य। वायौ "धावन् हरिणपृष्ठस्थः"
इति वायुध्यानम्। स्वातिनक्षत्रे च।
मृगव्य ॰ न॰ मृगान् व्यथतेऽत्र व्यध-ड। मृगयायाम्।
मृगशिरस् * न॰ पु॰। मृगस्येव शिरोऽस्य। आश्विन्यवधिके पञ्चमे
नक्षत्रे। मृगशिराप्यत्र स्त्री॰ टाप्। मृगशीर्षन्, मृगशीर्ष,
एतावप्यत्र पु॰ न॰। [याम्।
मृगा * स्त्री॰ मृगो मृगमांसतुल्यरसोऽस्त्यस्य अच्। सहदेवीलता-
मृगाक्षी ॰ स्त्री॰ मृगस्येवाक्षि पुष्पं यस्याः षच् समा॰ ङीष्।
विशल्यायां, मृगतुल्यनयनवत्यां स्त्रियां च।
मृगाण्डजा * स्त्री॰ मृगस्याण्डाकारात् नाभिस्थितमांसपिण्डात्
जायते जन-ड। कस्तूर्य्याम्। [कोऽप्यत्र।
मृगादन ॰ पु॰ स्त्री॰ मृगान् अत्ति अद-ल्यु। क्षुद्रव्याघ्रे। मृगान्त-
मृगादनी * स्त्री॰ मृग इवाद्यते अद-कर्मणि ल्युट्। सहदेव्याम्,
इन्द्रवारुण्याम् (राखालशशा), कर्कटीभेदे च।
मृगाराति ॰ पु॰ ६त॰। कुक्कुरे, मृगशत्रौ, सिंहे च। सिंहराशौ च।
मृगारि ॰ पु॰ ६त॰। कुक्कुरे, सिंहे, व्याघ्रे, रक्तशोभाञ्जने च।
तस्यैव हि तस्य नाशः।
मृगाविध् * पु॰ मृगं विध्यति विध क्विप् पूर्वदीर्घः। व्याधे।
मृगित * त्रि॰ मृग+क्त। अन्वेषिते, याचिते च।
मृगेन्द्र * पु॰ मृगः इन्द्र इव। सिंहे।
मृगेन्द्रचटक ॰ पु मृगेन्द्र इव हिंस्रचटकः पक्षी। श्येनपक्षिणि।
मृगेन्द्राशी * स्त्री॰ मृगेन्द्रेण सिंहेनाश्यते भक्ष्यते अश-कर्मणि यत्।
वासके। [(माटा राखालशशा)।
मृगेर्वारु * स्त्री॰ मृगप्रिया इर्वारुः कर्कटी। श्वेतायामिन्द्रवारुण्याम्
मृगेष्ट * पु॰ ६त॰। मुद्गरके।
मृगेक्षणा ॰ स्त्री॰ मृगस्य ईक्षणमिव पुष्पमस्याः। मृगेर्वारौ।
मृज ॰ शोधने भूषणे च वा चुरा॰ उभ॰ पक्षे अदा॰ सक॰ वेट्।
मार्जयति ते मार्ष्टि अमीमृजत् त अममार्जत् त अमार्क्षीत्
अमार्जीत् अमृक्षत्।
मृजा * स्त्री॰ मृज-अङ्। मार्जने। [मृडति अमर्डीत्।
मृड * तोषणे क्र्यादि॰ तुदा॰ च पर॰ सक॰ सेट्। मृड्णाति
मृड * पु॰ मृड-क। शिवे। तत्पत्न्याम् स्त्री॰ ङीप् आनुक् च। मृडानी
मृण ॰ हिंसे तुदा॰ पर॰ सक॰ सेट्। मृणति अमर्णीत्।
मृणाल ॰ पु॰ न॰ मृण-कालन्। पद्मादिनालस्थे सूत्रे, वीरणमूले च

मेक(ख)लाद्रिजा * स्त्री॰ मेक(ख)लाद्रेर्जायते जन ड । नर्मदा-नद्याम् ।

मेखला * स्त्री॰ मि + खलन् । स्त्रीकट्या भूषणे, उपनयनकाले ब्रह्म-चारिधार्ये कटीसूत्रे, खड्गादिमुष्ट्या धारणार्थं वपर्य्य(?)शोभार्थेन बन्धे, शैलनितम्बे, नर्मदायां, पृश्निपर्ण्याम्, होमकुण्डोपरिस्थे सूत्रे वेदभेदे च ।

मेघ * पु॰ मिह-घञ्-कुत्वम् । धूमज्योतिःपवनसलिलसङ्घातात्मके जलधरे, मुस्तके, राक्षसभेदे, रागभेदे च ।

मेघजीवन * पु॰ मेघो जीवनं यस्य । चातकपक्षिणि ।

मेघज्योतिस् * न॰ ६त॰ मेघजन्यं ज्योतिः । वज्राग्नौ ।

मेघनाद * पु॰ मेघस्येव नादोऽस्य । वरुणे, रावणस्य पुत्रे इन्द्र-जिति । ६त॰ । मेघशब्दे ।

मेघनादानुलासक * पु॰ स्त्री॰ मेघस्य नादेनानुलसति अनु+लस-ण्वुल् । मयूरे । स्त्रियां ङीष् । मेघनादानुलासीत्यप्यत्र ।

मेघनामन् * पु॰ मेघस्य नामेव नाम यस्य । मेघवाचकशब्दवाच्ये मुस्तके ।

मेघपुष्प * न॰ मेघस्य पुष्पमिव । जले ।

मेघयोनि * स्त्री॰ ६त॰ । धूमे ।

मेघवर्णा * स्त्री॰ मेघस्येव वर्णोऽस्याः । नीलीवृक्षे ।

मेघवर्त्मन् * न॰ ६त॰ । आकाशे । मेघपथादयोऽप्यत्र ।

मेघवह्नि * पु॰ मेघजन्यो वह्निस्तद्घर्षणजातोऽग्निः । वज्राग्नौ । एव मेघानलादयोऽप्यत्र ।

मेघवाहन * पु॰ मेघा वाहनमिव यस्य, मेघान् वाहयति चालयति [वा वह-णिच्-ल्यु । इन्द्रे ।

मेघसार * पु॰ मेघस्य कर्पूरस्य सारः । चीनकर्पूरे ।

मेघस्तनितोद्भव * पु॰ मेघस्तनिताद्उद्भवति भू+अच् । शिलीन्ध्रवृक्षे ।

मेघागम * पु॰ मेघानामागमो यत्र । वर्षाकाले वर्षर्तौ ।

मेघनन्दिन् * पु॰ मेघेन तद्ध्वनिना नन्दति णिनि । मयूरे ।

मेघान्त * पु॰ मेघानामन्तो यत्र । शरत्काले मेघात्ययादयोऽप्यत्र ।

मेघास्थि * न॰ मेघानामस्थीव सङ्हतकठिनत्वात् । करकायाम् ।

मेचक * न॰ मच वुन् पृ॰ । अन्धकारे, स्रोतोऽञ्जने च । मयूरचन्द्रके, धूमे, मेघे, शोभाञ्जने, श्यामवर्णे च पु॰ । तद्वति त्रि॰ ।

मेट(ड) * उन्मादे भ्वादि॰ पर॰ सक॰ सेट् घटि न ह्रस्वः । मेट-(ड)ति अमेटी डीत् ।

मेटुला * स्त्री॰ मेट-उलच् । आमलक्याम् ।

मेढ्र * पु॰ स्त्री॰ मिह-ष्ट्रन् । मेषे, पुंसोऽसाधारणचिह्ने च ।

मेढ्रशृङ्गी * स्त्री॰ मेढ्र इव शृङ्गं यस्याः । मेषशृङ्ग्याम् (गाडरसिङ्गा)

मेथ * वधे मेधायाञ्च सक॰ सङ्गे चाक॰ भ्वादि॰ उभ॰ सेट् । मेथति ते अमेथीत् अमेथिष्ट । घटि न ह्रस्वः । [काठ) ।

मेथि(धि) * पु॰ मेथ(ध)-इन् । धान्यमर्दनार्थं पशुबन्धनकाष्ठे (मेड

मेथिका * स्त्री॰ मेथ-ण्वुल् । (मेथि) शाकभेदे । णिनि । अत्रैव स्त्री॰ ङीप् । अच् गौरा॰ ङीष् । अत्रैवार्थे ।

मेद * वधे मेधायाञ्च सक॰ भ्वादि॰ उभ॰ सेट् । मेदति ते अमे-दीत् अमेदिष्ट । घटि न ह्रस्वः ।

मेदःसारा * स्त्री॰ मेदस इव सारोऽस्याः । अष्टवर्गप्रसिद्धौषधिभेदे ।

मेदक * पु॰ मेद-ण्वुल् । मद्ये (मेदा) ।

मेदज * पु॰ मेदात् महिषासुरमेदसो जायते जन-ड । भूमिज-गुग्गुलौ । मेदोजातमात्रे त्रि॰ । [पु॰ ।

मेदस् * न॰ मेद-असुन् । मांसजन्ये धातुभेदे (वसा) अच् । अत्रैव

मेदस्कृत् * न॰ मेदः करोति स्वपरिपाकेण जनयति क्विप् । मांसे ।

मेदा * स्त्री॰ मेदः कारणत्वेनास्त्यस्याः अच् । अष्टवर्गप्रसिद्धौषधि-भेदे ।

मेदिनी * स्त्री॰ मेदः मधुकैटभमेदोऽस्त्यस्याः कारणत्वेन, इनि । वसुन्धरायाम् "मधुकैटभयोरासीन्मेदसैव परिप्लुता । तेनेयं मेदिनी देवी प्रोच्यते" इति पुराणम् । मेदायाञ्च ।

मेदुर * त्रि॰ मिद-घुरच् । अतिशयस्निग्धे । "मेघैर्मेदुरमम्बरम्" इति जयदेवः । काकोल्यां स्त्री॰ टाप् । [अस्थिनामके धातौ ।

मेदोज * न॰ मेदसो वसातो जायते जन-ड । देहस्थे मज्जहेतौ

मेदोद्भवा * स्त्री॰ मेदादुद्भवति भू-अच् । अष्टवर्गप्रसिद्धौषधिभेदे ।

मेध * मेथवत् सर्वम् । मेधति ते अमेधीत् अमेधिष्ट ।

मेधा * स्त्री॰ मेध-अङ् । धारणावत्यां बुद्धौ यया बुद्ध्या ज्ञातस्य न विस्मरणं तत्र । अच् । यागे पु॰ । [स्त्रियां ङीप् ।

मेधाविन् * पु॰ मेधा+मत्वर्थे विनि । शुकखगे । मेधावति त्रि॰ ।

मेधस् * पु॰ मेध-असुन् । स्वायम्भुवस्य मनोः पुत्रभेदे ।

मेधिर * त्रि॰ मेधा+मत्वर्थे इरच् । मेधावति । [वति जने ।

मेधिष्ठ * त्रि॰ अतिशयेन मेधावान् इष्ठन् मतोर्लुक् । अतिशयमेधा-

मेध्य * त्रि॰ मेध-ण्यत् । पवित्रे, शुचौ च । मेधाय यज्ञाय हितः यत् । छागे, खदिरे, यवे च पु॰ । केतक्यां, शङ्खपुष्प्यां, रक्त-वचायाम्, रोचनायां, शम्याम्, मण्डूक्याञ्च स्त्री॰ । [पत्न्याम् ।

मेनका * स्त्री॰ मि-नक । स्वर्वेश्याभेदे । मेनैव कन् । हिमालय-

मेनकात्मजा * स्त्री॰ ६त॰ । हैमवत्यां दुर्गायाम् । मेनासुतादयोऽप्यत्र

मेना * स्त्री॰ मि-न । हिमालयपत्न्याम् पितॄणां मानस्यां कन्या-याम् । [मेहदो) इदं तत्प्रमर्दने हि लक्ष्मीतुल्यरक्तहस्तता ।

मेन्धी * स्त्री॰ मा लक्ष्मीरिव इन्धते इन्ध-घञ् गौरा॰ ङीष् ।

मेप * गतौ भ्वादि॰ आत्म॰ सक॰ सेट् । मेपते अमेपिष्ट । घटि न ह्रस्वः ।

मेय * त्रि॰ मा-मि-वा यत् । परिच्छेद्ये, ज्ञेये च ।

मेरु * पु॰ मि-रु । सर्ववर्षस्य उत्तरस्थे पर्वतभेदे, जपमालोपरिस्थे फलभीरादिके, करकृतमालायामङ्गुलिपर्वभेदे च ।

मेरुक * पु॰ मेरुरिव पीतवर्णत्वात् इवार्थे कन् । यक्षधूपे (धुना) ।

मेरुसावर्ण * पु॰ चतुर्दशसु मनुषु एकादशे मनौ ।

मेलक * त्रि॰ मेलयति मिल-णिच्-ण्वुल् । विवाहे योटकभेदे । मिल+घञ्-कन् । सङ्गे ।

मेला * स्त्री० मिल-णिच्-अच्-टाप्। नीलीवृक्षे, मस्याम्, अञ्जने, मेलने च।
मेलान्धु * पु० मेलायामस्या अन्धुरिव। मस्याधारे (दोयात)।
मेव * मेवने भ्वादि० आत्म० सक० सेट्। मेवते अमेविष्ट। अडि न ह्रस्वः।
मेष * पु० स्त्री मिष-अच्। (भेडा) पशुभेदे, चक्रमर्द्दवृक्षे, ज्योतिषकस्य द्वादशांशे अश्विनीभरणीकृत्तिकानवपादात्मके राशिभेदे।
मेषकम्बल * पु० मेषस्य तल्लोम्ना निर्मितः कम्बलः। मेषलोमजाते वस्त्राकारे पदार्थे।
मेषलोचन * पु० मेषस्य लोचनमिव पुष्पमस्य। चक्रमर्द्दे, मेषनेत्रादयोऽप्यत्र। [शिङ्गा) लताभेदे।
मेषवल्ली * स्त्री० मेषशृङ्गाकारफलयुक्ता वल्ली शाक०। (गाडर-
मेषविषाणी * स्त्री० मेषस्य विषाणं शृङ्गमिव फलं यस्याः गौरा०। ङीष्। (गाडरशिङ्गा) लताभेदे। स्वार्थे कन् तत्रैव।
मेषशृङ्ग * पु० मेषशृङ्गमिवाकारोऽस्त्यस्य अच्। स्थावरविषभेदे (गाडरशिङ्गा) अजशृङ्ग्यां स्त्री० गौरा० ङीष्।
मेषा * स्त्री० मिष+कर्मणि घञ्। (गुजराटी) सूक्ष्मैलायाम्।
मेषाक्षिकुसुम * पु० मेषाक्षीव कुसुमं यस्य। चक्रमर्द्दे। मेषपुष्पादयोऽप्यत्र। [नाशे मेषाण्डेन तत्करणमिति पुराणम्।
मेषाण्ड * पु० मेषस्याण्ड एवाण्डोऽस्य। इन्द्रे तस्य हि हृषणच्छेदेऽण्ड-
मेषालु * पु० मेषाणामालुरिव प्रियः। वर्वरीवृक्षे।
मेषी * स्त्री० मिष-अच् गौ० ङीष्। जटामांस्यां, तिनिशवृक्षे, च। जातौ ङीष्। मेषजातिस्त्रियाम्।
मेह * पु० मिह-घञ्। प्रस्रावे, प्रमेहरोगभेदे च। अच्। मेघे।
मेहघ्नी * स्त्री० मेहं हन्ति हन-टक्-ङीप्। हरिद्रायाम् आर्द्रतन्मूलरससेवनाद्धि मेहनाश इति वैद्यकप्रसिद्धिः।
मेहन * न० मिह्यतेऽनेन मिह-करणे ल्युट्। शिश्ने। कर्मणि ल्युट्। मूत्रे। भावे ल्युट्। मूत्रोत्सर्गे।
मैत्र * न० मित्रो देवतास्य अण् मैत्रं पायुस्तस्येद पुनरण्। "विट्मोत्सर्गे मैत्रं कर्म समाचरेत्" इति स्मृतिः मित्रो देवताऽस्य, मित्रत आगतं, तस्येदं वा अण्। अनुराधानक्षत्रे न०। तस्य हि मित्रो देवता। मित्रतः प्राप्ते, "मैत्रमौद्वाहिकञ्चैव" इति स्मृतिः। सुहृत्सम्बन्धिनि च त्रि०। मित्र एव स्वार्थे प्रज्ञाद्यण्। मित्रे, ब्राह्मणे च।
मैत्रावरुण * पु० मित्रश्च वरुणश्च देवताद्वन्द्वे आनङ् मित्रावरुणयोरपत्यम् अण्। अगस्त्ये। इत्र। मैत्रावरुणिरप्यत्र। कल्पभेदे तस्य तयोः पुत्रत्वं पुराणप्रसिद्धम्। [ष्यञ्। मैत्र्यमप्यत्र।
मैत्री * न० स्त्री० मित्रस्य भावः अण् स्त्रीत्वपक्षे ङीप्। सौहार्दे।
मैत्र * पु० मित्राया अपत्यम् ढक्। मुनिभेदे, बुद्धदेवे च।
मैथिली * स्त्री० मिथिलायां भवा अण्। सीतायाम्। मिथिलाया राजा अण्। मिथिलाधिपादिषु पु०।

मैथुन * न० मिथुनेन स्त्रीपुंसाभ्यां निर्वृत्तम् अण्। कर्मणि "सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने"। स्मृतिः अन्याधाने हि सप्तरीकर्म्यं वाधिकारः इति तत्साध्यत्वम्। स्त्रीपुंसमङ्गमरूपे ग्राम्यधर्मे च।
मैनाक * पु० मेनकायां भवः अण्। पर्वतभेदे।
मैरेय * पु० मिरायां देशभेदे ओषधिभेदे वा भवः ढक्। मिरा-जाते आसवे। "मैरेयं धातकीपुष्पगुडधानाम्लसम्भवम्"। मद्यभेदे न०। [तं मोचयति अमुमोचत् त अमोचीत्
मोक्ष * क्षेपे वा चु० उभ० पक्षे भ्वादि० पर० सक० सेट्।
मोक्ष * पु० मोक्ष-घञ्। मुक्तौ, मोचने "नोविमोक्षो हि इति, मरणे च। [विड्ङ्गे च स्त्री० प्राचीर
मोघ * त्रि० मुह-घ अच् वा कुत्वम्। निरर्थके, हीने च।
मोघपुष्पा * स्त्री० मोघं पुष्पमार्त्तवं यस्याः। वन्ध्यायां स्त्रियाम्।
मोच * न० मुच-अच्। कदलीफले। शोभाञ्जने पु०। वट-नीलीवृक्षे, शाल्मलिवृक्षे च स्त्री० टाप्। [हि
मोचक * पु० मुच-ण्वुल्। मोचे, कदल्यां, शोभाञ्जने च। वैराग्ये
मोचन * न० मुच-णिच् वा भावे ल्युट्। मुक्तौ, मोचने, दर्भे, च। मुच्यते रोगात् अनया करणे ल्युट्। कण्टकार्याम्।
मोचरस * पु० ६त०। शाल्मलिनिर्यासे स्वनामख्याते पदार्थे।
मोचाट * पु० मुच-णिच्-अच् मोचाय रोगमोचनाय अटति अट् अच्। कृष्णजीरके, रम्भास्थ्नि। मलयोद्भवे च।
मोटक * न० मुट ण्वुल्। श्राद्धे पितृदानार्थं भुग्नकुशपत्रद्वये।
मोटा * स्त्री० मुट-अच्। बलायाम्।
मोट्टायित * न० "कान्तस्मरणवार्त्तादौ हृदि तद्भावभावतः। प्राकट्यमभिलाषस्य मोट्टायितम्" इत्युक्ते स्त्रीणामभिलाषभेदे।
मोद * पु० मुद+घञ्। हर्षे। [इक्षुजातिभेदे (मावा)
मोदक * पु० मोदयति मुद-णिच्-ण्वुल्। खाद्यभेदे (मावा), खर्ज-
मोदमादिनी * स्त्री० मोद इव मोदयति मुद-णिनि। जम्बूम्।
मोदयन्ती * स्त्री० मुद-णिच्-शतृ-ङीप्। वनमल्लिकायाम् (बन मल्लिका)।
मोदा * स्त्री० मोदयति अजान् मुद-णिच्-अच्। अजमोदायाम्।
मोदाढ्या * स्त्री० मोदः अजमोदस्तेनाढ्या। अजमोदायाम्। हर्ष युक्ते त्रि०।
मोदिनी * स्त्री० मोदयति मुद-णिच्-णिनि। अजमोदायां मल्लिकायाम्, यूथिकायां, कस्तूर्यां, मदिरायाञ्च।
मोरट * मुर-अटन्। इक्षुमूले, अङ्कोटपुष्पे, सप्तरात्रोषितक्षीरे च। मूर्वालतायां स्त्री०। घोरमोरटायां पु०।
मोषक * पु० मुष्णाति मुष-ण्वुल्। तस्करे चौरे।
मोषण * न० मुष-ल्युट्। लुण्ठने, छेदने, वधे च।
मोह * मुह घञ्। मूर्च्छायाम्, अज्ञाने, भ्रान्तिसाधने, वेदान्तोक्ते अविद्याऽभिधाने, दुःखे, देहादिष्वात्माभिमाने च।

ल * पु॰ मोचयति मुच-णिच् स्त्॥ भुकुरे, कन्दर्पस्य शर भेदे च। मौलकार्थे त्रि॰। स्त्रियां ङीप्।

राशि * स्त्री॰ मञ्जुणो मित्रपरिमाणेन पञ्चाशदन्दे गते प्रलय-भेदे "कालराशिं दाराविर्मौद्गराशिं" इति स्मृतौ।

क्तिक * न॰ मुक्तैव स्वार्थे ठञ्। मुक्तायाम्।

क्तिकमणा * स्त्री॰ मौक्तिकं मणौ मण-अण्। मणिमात्रे, मुक्ता-स्फोटे शुक्तौ च।

क्तिकशुक्ति * स्त्री॰ ६त॰। मुक्तास्फोटे शुक्तौ।

ञ्जी * स्त्री॰ मुञ्जस्येयम् अण्। कटिसूत्रे, त्रिरावृत्तमुञ्जलतायां मेखलायाम्। मुञ्ज एव अण्। मुञ्जतृणे (मुज्) स्त्री॰।

ञ्जीपत्री * स्त्री॰ मौञ्जीव पत्रमस्याः। वल्वजायाम्।

ञ्जीबन्ध(न) * पु॰ मौञ्ज्या मेखलाया बन्धो यत्र। उपनयन-संस्कारे "मौञ्जीबन्धे प्रभा मोक्षयत्रे मौनगते रवौ" इति स्मृतिः। ६त॰। तद्बन्धने न॰। "द्वितीयं मौञ्जीबन्धनम्" इति स्मृतिः।

ढ्य * न॰ मूढस्य भावः ष्यञ्। मोहे, बाल्ये च।

द्गल्य * पु॰ मुद्गलस्य मुनेरपत्यं यञ्। मुद्गलगोत्रापत्ये मुनिभेदे।

द्गीन * न॰ मुद्गानां भवनं क्षेत्रम्। खञ्। मुद्गभवनयोग्ये क्षेत्रे।

न * न॰ मुनेर्भावः। वाग्व्यापाररहित्ये "उच्चारे मैथुने चैव प्रस्रावे दन्तधावने। स्नाने भोजनकाले च षट्सु मौनं समाच-रेत्" इति स्मृतिः।

निन् * त्रि॰ मौनमस्त्यस्य इनि। वाग्व्यापाररहिते। मुनौ पु॰।

रजिक * त्रि॰ मुरजवादनं शिल्पमस्य ठञ्। मृदङ्गवादनशीले।

र्ख्य * न॰ मूर्खस्य भावः ष्यञ्। जाड्ये, मूर्खतायाञ्च। [शृङ्गाञ्च।

र्वी * स्त्री॰ मूर्वा लता तस्यामुना निर्वृत्ता अण्। धनुर्गुणे, धज-

ल * त्रि॰ मूलं वेत्ति मूलादागतो वा अण्। भूम्यादेरागमादि-मूलज्ञे, "यं परम्परया मौलाः सामन्ताः स्वामिनं विदुः" इति स्मृतिः। मूलादागते च।

लि * पु॰ स्त्री॰ मूलस्यादूरभवः इञ्। चूडायां, किरीटे, संयत-केशेषु च। अशोकवृक्षे पु॰। भूमौ स्त्री॰ वा ङीप्।

षल * न॰ मुषलस्येदम् तद्रूपमण्। मुषलतुल्यनिर्दिष्टे "गङ्गायां मौषलं स्नानं महापातकनाशनम्" इति पुराणम्। मुषलमधि-कृत्य कृतो ग्रन्थः अण्। महाभारतान्तर्गते "मुषलं कुलनाशनम्" इत्यादिप्रतिपादके षोडशे पर्वणि।

मौहूर्त * पु॰ मुहूर्तं तत्प्रतिपादकं शास्त्रं वेत्त्यधीते वा अण्। ज्योतिःशास्त्रज्ञे। ठञ्। तत्रैवार्थे।

म्ना * अभ्यासे भ्वादि॰ पर॰ सक॰ सेट्। मनति अम्नासीत् मम्नौ।

म्रक्ष * संयोजने छेदने च चुरा॰ उभ॰ सक॰ सेट्। म्रक्षयति ते अमम्रक्षत् त। [क्षीत्।

म्रक्ष * संघाते सयोजने च भ्वादि॰ पर॰ सक॰ सेट्। म्रक्षति अम्र-

म्रक्षण * न॰ म्रक्ष-ल्युट्। संयोजने, राशीकरणे, तैले, अभ्यञ्जने च।

म्रद * गतौ भ्वादि॰ पर॰ सक॰ सेट् क्त्वा वेट्। म्रदति अम्रदत् अम्रादीत् अम्रदीत्। [म्रदयति अमम्रदत्।

म्रद * मर्दे भ्वादि॰ आत्म॰ सक॰ सेट् घटा॰। म्रदते अम्रदिष्ट।

म्रदिमन् * पु॰ मृदोर्भावः मृदु+इमनिच् म्रदादेशः। मृदुत्वे।

म्रदिष्ठ * त्रि॰ अतिशयेन मृदुः इष्ठन् म्रदादेशः। अतिमृदुन्यर्थे। ईयसुन्। म्रदीयानप्यत्र त्रि॰। स्त्रियां ङीप्। [अम्रोचीत्।

म्रुच * गतौ भ्वादि॰ पर॰ सक॰ सेट् क्त्वा वेट्। म्रोचति अम्रुचत्

म्रुञ्च * गतौ म्रुचवत्। म्रुञ्चति अम्रुञ्चत् अम्रुञ्चीत्।

म्रेट(ड) * उन्मादे भ्वादि॰ पर॰ सक॰ सेट्। म्रेट(ड)ति अम्रे-टी(डी)त् चङि न ह्रस्वः।

म्लक्ष * पु॰ म्रक्षवत् सर्वम्। म्लक्षयति ते। अमम्लक्षत् त।

म्लान * त्रि॰ म्लै क्त। मलिने, ग्लानियुक्ते च।

म्लानि * स्त्री॰ म्ला-क्तिन्। कान्तिक्षये। [च त्रि॰।

म्लिष्ट * न॰ म्लेच्छ+क्त नि॰। अविस्पष्टवाक्ये। तद्वाक्ययुक्ते, म्लाने

म्लुच * गतौ भ्वादि॰ पर॰ सक॰ सेट् क्त्वा वेट्। म्लोचति। अम्लु-चत् अम्लोचीत्।

म्लुञ्च * गतौ म्लुचवत् सर्वम्। म्लुञ्चति अम्लुञ्चत् अम्लुञ्चीत्।

म्लेच्छ * अपशब्दे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। म्लेच्छयति ते म्लेच्छति अमम्लेच्छत् त अम्लेच्छीत्।

म्लेच्छ * पु॰ म्लेच्छ-घञ्। अपशब्दे "म्लेच्छो ह वा यदपशब्दः" इति श्रुतिः। कर्त्तरि अच्। पामरजातौ, नीचजातौ च पु॰। पापरते त्रि॰। हिङ्गुले न॰।

म्लेच्छकन्द * पु॰ म्लेच्छप्रियः कन्दः। लशुने। [तादिजातिभेदे।

म्लेच्छजाति * स्त्री॰ म्लेच्छाभिधा जातिः। गोमांसादिभक्षके किरा-

म्लेच्छदेश * पु॰ म्लेच्छाधारो देशः। चातुर्वर्ण्याचाररहिते देशे।

म्लेच्छभोजन * न॰ म्लेच्छैर्भुज्यते कर्मणि ल्युट्। यावके यवभेदे।

म्लेच्छमण्डल * न॰ ६त॰। म्लेच्छदेशे। [मय्य्ज।

म्लेच्छमुख * न॰ म्लेच्छानां मुखमिव रक्तत्वात्। ताम्रे। म्लेच्छास्य-

म्लेच्छित * न॰ म्लेच्छ-क्त। अपशब्दे असंस्कृतशब्दे।

म्लेट(ड) * उन्मादे भ्वादि॰ पर॰ सक॰ सेट्। म्लेट(ड)ति अम्लेटी-(डी)त्। चङि न ह्रस्वः। [न ह्रस्वः।

म्लेव * सेवने भ्वादि॰ आत्म॰ सक॰ सेट्। म्लेवते अम्लेविष्ट। चङि

म्लै * कान्तिक्षये भ्वादि॰ पर॰ सक॰ अनिट्। म्लायति अम्लासीत्।

य

[illegible]

विद्युन्माला * स्त्री० अष्टाक्षरपादके छन्दोभेदे। [रोगभेदे।
विद्रधि * पु० येस्त्वनेन विद् हृदयं रुणद्धि रुध+कि पृ०। हृदय-
विद्रधिनाशन * पु० विद्रधिं नाशयति नश-णिच्-ल्यु। शोभाञ्जने।
विद्र(द्रा)व * पु० वि+द्रु अप् घञ् वा। पलायने, क्षरणे, युद्धे च।
विद्रुत * त्रि० वि+द्रु-क्त। प्राप्तद्रवे, पलायिते च।
विद्रुम * पु० विशिष्टो द्रुमः। प्रवालरत्नवृक्षे। विशिष्टो द्रुमो यतः।
किसलये। [कन् तत्रैव।
विद्रुमलता * स्त्री० विद्रुमस्य लतेव। नलीनामगन्धद्रव्ये। स्वार्थे
विद्वत्कल्प * त्रि० ईषदसमाप्तो विद्वान् विद्वस्+कल्पप। ईषदूने
विदुषि। [तरप् विद्वत्तरोऽप्यत्र।
विद्वत्तम * पु० अतिशयेन विद्वान् विद्वस्+तमप्। अतिपण्डिते।
विद्वद्देशीय * त्रि० ईषदसमाप्तो विद्वान् विद्वस्+देशीयर्।
विद्वत्कल्पे।
विद्वस् * त्रि० विद+क्वसु। प्राज्ञे, पण्डिते, आत्मज्ञानयुक्ते च।
विद्विष् * पु० विशेषेण द्वेष्टि द्विष-क्विप्। शत्रौ। क। विद्विषोऽप्यत्र।
विद्वेष * पु० वि+द्विष-घञ्। वैरिभावे शत्रुतायाम्।
विद्वेषण * न० वि+द्विष-णिच्-ल्युट्। तन्त्रोक्ते अभिचारकर्मभेदे
येन शत्रुणा परस्परविद्वेषो भवति तस्मिन् व्यापारे। वि+
द्विष-ल्युट्। विद्वेषे।
विध * विधाने, तु० पर० सक० सेट्। विधति अवेधीत्।
विध * पु० स्त्री० विध-क अङ् वा। विधाने, गजभक्ष्ये, प्रकारे,
वेधे, ऋद्धौ च। वेतने, कर्मणि च स्त्री०।
विधवा * स्त्री० विगतो धवो यस्याः। मृतपतिकायां स्त्रियाम्।
विधातृ * पु० वि+धा तृच्। प्रजापतौ, ब्रह्मणि, कामदेवे, मदि-
रायां, धर्मनिपुत्रभेदे। विधानकर्त्तरि त्रि०। स्त्रियां ङीप्
सा च पिप्पल्याम्।
विधान * न० वि+धा-ल्युट्। करणे, विधौ, गजभक्ष्ये च।
विधानज्ञ * पु० विधानं जानाति ज्ञा क। पण्डिते। विधिज्ञे त्रि०।
विधायक * त्रि० वि+धा ण्वुल्। विधानकर्त्तरि।
विधि * पु० वि+धा कि। जगत्स्रष्टरि ब्रह्मणि, भाग्ये, क्रमे,
"त्रिकोपाक्षनिसाध्यत्वहेतुर्धीविषयो विधिः" इत्युक्ते प्रवर्त्तना-
रूपे नियोगे, तज्जनके वाक्ये, विधाने, कर्मणि, गजभक्ष्ये, वैद्ये,
अप्राप्तप्रापकरूपे वाक्यभेदे, "संज्ञा च परिभाषा च विधिर्नियम
एव च। अतिदेशोऽधिकारः" इति व्याकरणोक्ते सूत्रभेदे।
विधिज्ञ * त्रि० विधिं क्रमं जानाति ज्ञा-क। विधानकुशले।
विधित्सा * स्त्री० विधातुमिच्छा वि+धा-सन्-अ। विधानेच्छायाम्।
विधिदर्शक * पु० विधिं विधानं दिशति दिश+ल्युट्। विधि-
दर्शिनि सदस्ये, गुरौ च।
विधिवत् * अव्य० विधिमर्हति विधि+वति। विध्यनुसारे। [च।
विधु * पु० व्यध कु। चन्द्रे, कर्पूरे, विष्णौ, ब्रह्मणि, शङ्करे, वायौ
विधुत * त्रि०। वि+धु क्त। कम्पिते, त्यक्ते च।

विधुनन * न० वि+धु-णिच्-नुक् च। चालने।
विधुन्तुद * पु० विधुं तुदति तुद-खश्-मुम् च। राहौ।
विधुर * त्रि० विगता धूर्यस्य अच् समा०। विश्लिष्टे, विकले च।
विगता धूः। वैकल्ये, विश्लेषे च न०।
विधूनन * न० वि+धु-ल्युट्। कम्पने। [यान्ति" इति श्रुतिः।
विधूत * त्रि० वि+धू-क्त। कम्पिते, त्यक्ते च। "विधूतपापास्ते
विधेय * त्रि० वि+धा-यत्। विधातुं योग्ये, वचनस्थे, आयत्ते,
विधिना बोधिते च।
विध्वंस * पु० वि+ध्वन्स घञ्। नाशे।
विनत * त्रि० वि+नम-क्त। प्रणते, भुग्ने, शिक्षिते च। गरुड-
मातरि कश्यपपत्नीभेदे, पिटकीभेदे च स्त्री०। [भयव।
विनतासुत * पु० ६त०। अरुणे, गरुडे च। विनताकश्यपयोरप्यु-
विनद * पु० विशेषेण नदति नद+अच्। (डातिपान) वृक्षे।
विनम्रक * न० विशेषेण नम्रमिव इवार्थे कन्। तगरपुष्पे।
विनय * पु० वि+नी-अच्। शिक्षायां, प्रणामे, अनुनये च। वि+
नी कर्त्तरि अच्। विनययुक्ते जने, निभृते, क्षिप्ते, जितेन्द्रिये
च। [क्षिते व्यापस्ते।
विनयग्राहिन् * त्रि० विनयं शिक्षां गृह्णाति ग्रह-णिनि। वचन-
विनयस्थ * त्रि० विनये तिष्ठति स्था-क। वचनकारिणि आयत्ते।
विनशन * न० वि+नश ल्युट्। विनाशे, कुरुक्षेत्रस्थे तीर्थभेदे।
विना * अव्य० वि+ना। वर्जने, अन्तरेणार्थे।
विनाकृत * त्रि० विनेति कृतम् विना+कृ क्त। त्यक्ते, रहिते च।
विनायक * पु० वि+नी ण्वुल्। गणेशे, गरुडे, विघ्ने, गुरौ च।
विनययुक्ते त्रि०।
विनाश * पु० वि+नश-घञ्। ध्वंसे, अदर्शने च।
विनाशोन्मुख * त्रि० विनाशाय उन्मुखं यस्य। नश्यत्ये। [धाने।
वि(वी)नाह * पु० वि+नह घञ् वा अन्यत्रापि दीर्घः। कूपमुखपि-
विनिद्र * त्रि० विगता निद्रा यस्य। प्रकाशिते, निद्राशून्ये च।
विनिपात * पु० वि+नि+पत घञ्। विनाशे, दैवादिकृते व्यसने,
अपमाने च। [निर्दशने, प्रत्यर्पणे च।
विनिमय * पु० वि+नि+मि अच्। परिवर्त्ते, मुख्यबन्धकदानेन ऋणा-
विनियोग * पु० वि+नि+युज-घञ्। क्रियायां प्रवर्त्तने "अनेन
इदं कर्म्म विनियोगः कर्त्तव्य इति" इत्युक्ते अनुष्ठानक्रम-
विधाने च "आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च" इति
श्रुतिः। [नीते, विहृते च। सुशिक्षितायां [illegible]
विनीत * त्रि० वि+नी क्त। विनययुक्ते, [illegible], क्षिप्ते, धृते
विनोद * पु० वि+नी अप्। कर्मणि, [illegible]
विनेतृ * त्रि० वि+नी-तृच्। [illegible]
विनेय * त्रि० वि+नी यत्। शिक्षणीये, [illegible]
विनोक्ति * स्त्री० अलङ्कारोक्ते अर्थालङ्कारभेदे।
विनोद * पु० वि+नुद घञ्। कौतूहले, क्रीडायां, अपनोदने च।

विप्रोषित * त्रि॰ वि+प्र+वस-क्त। गतप्रवासे।
विप्लव * पु॰ वि+प्लु-अप्। परनृपतिराष्ट्रादितो भये, राष्ट्रोपद्रवे च।
विप्लाव * पु॰ वि+प्लु-घञ्। अश्वस्य गतिभेदे, समन्तात् जलप्लावे च।
विप्लुत * त्रि॰ वि+प्लु-क्त। व्यसनयुक्ते, उपद्रुते च "अविप्लुत-ब्रह्मचर्य्यः" इति स्मृतिः।
विफल * त्रि॰ विगतं फलमस्य। निरर्थके। केतक्यां स्त्री॰।
विबध * पु॰ विगतो वधो हननं गतिर्यस्मात्। संगृहीतधान्यतण्डुलादौ "निरुद्धविवधासार" इति माघः। पु॰ दीर्घः भारे च।
विबन्ध * पु॰ विबध्नाति मलम् वि+बन्ध-घञ्। रोगभेदे। [चन्द्रे च।
विबुध * पु॰ वि+बुध-क। पण्डिते, देवे "विबुधसखः" इति भट्टिः।
विभक्त * त्रि॰ वि+भज-क्त। पृथक्कृते, विभिन्ने, कृतविभागे च "अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः, इति स्मृतिः। भावे क्त। विभागे न॰।
विभक्ति * स्त्री॰ वि+भज-क्तिन्। विभागे "संख्यात्वव्याप्यसामान्यशक्तिमान् प्रत्ययस्तु यः। सा विभक्तिर्द्विधा प्रोक्ता" इत्युक्त-लक्षणे प्रत्ययभेदे च।
विभव * पु॰ वि+भू-अप्। धने, मोक्षे, सर्वमूर्त्तसंयोगरूपे, ऐश्वर्य्ये, षष्टिसंवत्सरमध्ये "हृष्टाः पुष्टाः जनाः सर्वे विभवेऽब्दे वरानने!" इत्युक्ते वर्षभेदे च।
विभा * स्त्री॰ वि+भा-अच्। किरणे, शोभायां, प्रकाशे च।
विभाकर * पु॰ विभां प्रकाशं करोति कृ+अच्। सूर्य्ये, अर्कवृक्षे च।
विभाग * पु॰ वि+भज भावे घञ। भागे। कर्मणि घञ्। अंशे, खण्डे, पूर्वस्वामिस्वत्वनाशोत्तरं तत्सम्बन्धाधीनजातस्वत्वव्यञ्जकव्यापारभेदे च। [भजनीये धनादौ च।
विभाज्य * त्रि॰ विभक्तुमर्हति वि+भज-अर्हार्थे ण्यत्। विभागयोग्ये,
विभाण्डक * पु॰ मुनिभेदे।
विभात * न॰ वि+भा-क्त। प्रभाते।
विभाव * पु॰ वि+भू-घञ। परिचये, अलङ्कारोक्ते रसस्योद्दीपके आलम्बनादौ "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा" इति साहित्यदर्पणे दृश्य॰। [इत्युक्तलक्षणे अलङ्कारभेदे।
विभावना * स्त्री॰ "प्रसिद्धकारणाभावात् कार्य्योत्पत्तिर्विभावना"
विभावरी * स्त्री॰ वि+भा-क्वनिप् ङीप् वनोर च। रात्रौ, हरिद्रायां, कुट्टिन्याम्, अनुरक्तयोषिति, मुखरस्त्रियाम्, मेदोवृक्षे च।
विभावसु * पु॰ विभा वसु धनमस्य। सूर्य्ये, अर्कवृक्षे, वह्नौ, चित्रकवृक्षे, हारभेदे च।
विभाषा * स्त्री॰ विरुद्धा भाषा वि+भाष-अ। व्याकरणोक्ते पाणिनिपरिभाषिते "नवेति विभाषा" इत्युक्तलक्षणे विकल्पविधाने।
विभिन्न * त्रि॰ वि+भिद क्त। प्रकाशिते, विदारिते, विभक्ते च।
विभीतक * पु॰ विशेषेण भीत इव स्वार्थे कन्। (बयड़ा) वृक्षे।
विभीषण * पु॰ विशेषेण भीषयते सुहृत् भी-णिच् षुक् च ल्यु। रावणभ्रातरि राक्षसे, नलतृणे च।
विभीषिका * स्त्री॰ वि+भी णिच् षुक् च धात्वर्थनिर्देशे ण्वुल्। भयप्रदर्शने।
विभु * पु॰ वि+भू-डु। सर्वमूर्त्तसंयुक्ते, प्रभौ, महादेवे, ब्रह्मणि च।
विभूति * स्त्री॰ वि+भू-क्तिन्। भस्मनि, "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्ते ऐश्वर्य्ये च।
विभूषा * स्त्री॰ वि+भूष अ। शोभायां, भूषणे च।
विभ्रम * पु॰ वि+भ्रम-घञ्। स्त्रीणां शृङ्गाराङ्गे चेष्टाभेदे, "विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्य्ययः" इत्युक्ते त्वरया भूषास्थानवैपरीत्ये च "यथापरो विभ्रममण्डनानाम्" इति कुमारः। विशेषेण भ्रान्तौ, शोभायां, सन्देहे, भ्रमणे च।
विभ्राज् * त्रि॰ वि+भ्राज-क्विप्। भूषणादिना दीप्ते।
विमत * त्रि॰ वि+मन-क्त। विरुद्धमतियुक्ते। [व्याकुलचित्ते।
विमनस्(स्क) * त्रि॰ विक्षिप्तं मनो यस्य वा कप्। चिन्तादिना
विमर्द * पु॰ विमृद्यतेऽसौ वि+मृद-घञ्। (कालकासुन्दिया) वृक्षे, चक्रमर्दके च। भावे घञ्। मर्दने।
विमर्शन * न॰ वि+मृश-ल्युट्। परामर्शे, न्यायोक्ते साध्यव्याप्यहेतुमत्त्वेन पक्षनिश्चये वितर्के च। घञ्। तत्रैव पु॰।
विमर्ष * पु॰ वि+मृष-घञ्। विचारे, नाटकाङ्गभेदे च।
विमल * त्रि॰ विगतो मलो यस्मात्। स्वच्छे, निर्मले च। विगतो मलो यस्याः ब॰व॰। (आमारुवा) सप्तलायाम्, जगन्नाथक्षेत्रस्थे देवीभेदे च स्त्री॰।
विमातृ * स्त्री॰ विरुद्धा माता। सापत्नमातरि।
विमातृज * पु॰ विमातुर्जायते जन ड। सापत्ने भ्रातरि।
विमान * पु॰ न॰ वि+मन घञ् वि+मा-ल्युट् वा। देवयाने, रथे, सार्वभौमगृहभेदे च। अश्वे पु॰। यानमात्रे, परिमाणे च न॰।
विमार्ग * पु॰ विरुद्धो मार्गः। कुपथे, निन्दिताचारे च।
विमुख * त्रि॰ विरुद्धमनुकूलं मुखमस्य। बहिर्मुखे, निवृत्ते च।
विमुद्र * त्रि॰ विगता मुद्रा मुकुलीभावो यस्य। विकसिते, मुद्रारहिते च।
विम्ब * पु॰ न॰। वी+वन् मुम् ह्रस्वौ। दर्पणादौ आभासमानप्रतिविम्बाश्रये, कमण्डलौ च। सूर्य्यादिमण्डले च कृकलासे पु॰। विम्बायाः फलम् अण् तस्य लुप्। विम्बिकाफले।
विम्बजा * स्त्री॰ विम्बं फलं जायतेऽस्याः जन ड। विम्बिकावृक्षे (तेलाकुचा)।
विम्बट * पु॰ विम्बमटति अट-अच् शक॰। सर्षपे।
विम्बा(म्बी) * स्त्री विम्बमस्त्यस्याः अच् वा गौ॰ ङीष्। (तेलाकुचा) लताभेदे। स्वार्थे कन्। तत्र. सूर्य्यादिमण्डले च।
वियत् * न॰ वि+यम क्विप् मलोपे तुक्। आकाशे।
वियद्गङ्गा * स्त्री॰ वियत्स्था गङ्गा। स्वर्गङ्गायां मन्दाकिन्याम्।
वियात * त्रि॰ वि+या-क्त। धृष्टे, निर्लज्जे च।

विमोग * पु० वि+युज-घञ्। विच्छेदे। ६त०। पचियोगे।

वियोगिन् * पु० वि+युज-घिनुण्। चक्रवाके पचिणि। विच्छेदवति त्रि०।

विरक्त * त्रि० वि+रन्ज-क्त। विच्छिन्ने, विरते च।

विरङ्ग * पु० वि+रन्ज-घञ्। कङ्कुष्ठे।

विरचित * त्रि० वि+रच-क्त। कृते, निर्मिते च।

विरजस्तमस् * त्रि० विगते रजस्तमसी यतः। सत्वगुणप्रधाने।

विरजस् * स्त्री० विगतं रजो यस्याः। गतार्त्तवायां स्त्रियाम्। रजोगुणहीने त्रि०। [सखीभेदे, तच्छापाज्जायमाने नदीभेदे च।

विरजा * स्त्री० विशेषेण रज्यते रन्ज-अ। दूर्वायां, गोलोकस्थे राधा-

विर(रि)ञ्चि * पु० वि+रच-अच् इन् वा मुम् च। जगत्स्रष्टरि।

विरण * न० विशिष्टो रणो मूलमस्य। उशीरे (वेणार मूल)।

विरत * त्रि० वि+रम-क्त। निवृत्ते। [रत्याहित्ये च।

विरति ० स्त्री० वि+रम-क्तिन्। निवृत्तौ, विषयसेवायां व्यापा-

विरल * त्रि० वि+रा-कलन्। अवकाशे, विच्छिन्ने, अनिविड़े च।

विरह * पु० वि+रह-घञ्। विच्छेदे, अभावे, शृङ्गाररसस्य विप्रलम्भाख्ये अवस्थाभेदे च।

विरहित * त्रि० वि+रह-क्त। त्यक्ते, हीने च। [रागशून्ये त्रि०।

विराग ० पु० वि+रन्ज-घञ्। रागाभावे। विगतो रागो यस्य।

विराज् * पु० विशेषेण राजते क्विप्। चत्रिये, ब्रह्माण्डात्मकस्थूलदेहाभिमानिनि आदिपुरुषे, छन्दोभेदे च।

विराट * पु० विशेषो राटो यत्र। देशभेदे, तद्देशाधिपे नृपे च।

विराध ० पु० राक्षसभेदे।

विराधन * न० वि+राध-ल्युट्। पीड़ायाम्।

विराम * पु० वि+रम-घञ्। अवसाने, विरतौ, निवृत्तौ च।

विराल * पु० वि+डल-घञ् डस्य रः। बिड़ाले पशुभेदे।

विराव * पु० वि+रु-घञ्। शब्दे। ६ब०। विगतरवे त्रि०।

विरिञ्च * पु० वि+रिच अच् मुम् च। विरञ्चौ जगत्स्रष्टरि वेधसि, शिवे च। इन्। तत्रैवार्थे।

विरूढ़ * त्रि० विशेषेण रोहति वि+रुह क्त। जाते, अङ्कुरिते च।

विरूप * त्रि० विकृतं रूपमस्य। दुष्टरूपयुक्ते, निन्दिते च। पिप्पलीमूले न०। अतिविषायां, दुरालभायाञ्च स्त्री०।

विरूपाक्ष * पु० विरूपे विकटे अक्षिणी यस्य षच् समा०। महादेवे। विकटनेत्रे त्रि०।

विरेक * पु० वि+रिच घञ्। मलादेरधोनिःसरणे, अतिरेके च।

विरेचन * त्रि+रिच-णिच्-ल्युट्। मलादेर्निःसारणे, "व्यामध्ये विरेचनम्" इति वैद्यकम्। विरेचयति वि+रिच-णिच्-ल्यु। पीलुवृक्षे पु०। भेदकमात्रे त्रि०।

विरोक * पु० न० विरुच घञ् अस्य कः। छिद्रे। सूर्य्यकिरणे पु०।

विरोचन * पु० वि+रुच-युच्। सूर्य्ये, अर्कवृक्षे, वलिपितरि प्रह्लादनन्दने, अग्नौ, चन्द्रे च। विरोचते इव विरुच्-अच्। रोहितक-

वृक्षे, श्योनाकवृक्षे, पूतकरञ्जे च पु०। रुचिकरे त्रि०।

विरोध * पु० वि+रुध-घञ्। वैरे, विरुद्धतायाम्, न्यायोक्ते नानासामानाधिकरण्यरूपे हेतुदोषे, यथा वह्निमान् जलादिः जलरूपहेतोर्वह्निना सामानाधिकरण्यं नास्ति।

विरोधन न० वि+रुध-ल्युट्। वैरे।

विरोधिन् * पु० वि+रुध णिनि। रिपौ, षष्टिसंवत्सरमध्ये "अतो मानुषे कष्टं विरोधिनि न संशयः" इत्युक्तलक्षणे वत्सरभेदे च।

विरोधोक्ति * स्त्री० अर्थालङ्कारभेदे, परस्परविरोधिवचने च।

विल * स्मृतौ तु० पर० सक० सेट्। विलति अवेलीत्।

विल * न० विल-क। छिद्रे, गुहायाञ्च। विलमुत्तिकास्त्वेनास्त्यस्य अच्। घोटकोत्तमे, "वाजिनो विलयोनयः" इति कुमारः। वेतसे च पु०।

विलच * पु० वि+लक्ष-अच्। विस्मययुक्ते।

विलचण * त्रि० विशिष्टं लक्षणमस्य। विभिन्ने, विशेषयुक्ते च। निष्प्रयोजनस्थितौ च न०। दानार्थं काञ्चनपुरुषमूर्त्ति-मय्याभेदे स्त्री०। "अशौचान्तात् द्वितीयेऽह्नि शय्यां दद्यात् विलक्षणाम्" इति स्मृतिः।

विलग्न * त्रि० विशेषेण लग्न लस्ज-क्त तस्य नः जश्च गः। इंसने, मध्यभागे, कटौ, उदितमेषादिराशौ च न०। "गोचरे वा विलग्ने वा" इति ज्योतिषम्। [कार्त्ते च।

विलम्ब * पु० वि+लवि घञ्। विलम्बने, अशीघ्रत्वे, प्रतो-

विलम्बित * त्रि० वि+लवि-क्त। अशीघ्रे, मन्दे च। मध्यत-

विलय * पु० वि+ली-अच्। प्रलये, नाशे च।

विलला * स्त्री० वि+लल-अच्। श्वेतवलायाम्।

विल(ले)शय * पु० विले शेते शी+अच् वा अलुक्०। सर्पे, गोधायां च।

विलाप * पु० वि+लप-घञ्। परिदेवनोक्तौ।

विलास ० पु० वि+लस-घञ्। "तात्कालिको विशेषस्तु गि-ङ्गक्रियादिषु" इत्युक्ते स्त्रीणां शृङ्गारचेष्टाभेदे, चेष्टायां दीप्तौ च।

विलासिनी * स्त्री० विलासोऽस्त्यस्य इनि ङीप्। नार्यां, याञ्च। भोगवति त्रि०। सर्पे, अग्नौ, चन्द्रे, स्मरे, महादेवे च पु०। ["विलीनाशेषपातक" इति भाग

विलीन ० त्रि० वि+ली-क्त। मासद्रवीभावे घृतादौ, मिले, म

विलेपन * न० विलिप्यतेऽनेन करणे ल्युट्। गात्रानुलेप

पिष्टे घृष्टे वा चन्दनकुङ्कुमादौ। कर्मणि ल्युट् ङीप्। सु-

सुवेशायां स्त्रियाञ्च स्त्री०।

विलेप्य ० पु० वि+लिप-यत्। यवाग्वाम। विलेपनीये त्रि०।

विलोचन ० न० वि+लुच-करणे ल्युट्। नेत्रे। भावे ल्युट्। द

विलोड़ित * न० वि+लोड़-क्त। तक्रे। आलोड़िते त्रि०।

विलोम ० त्रि० विगतं लोम यत्र अच् समा०। विपरीते। वरु

सर्पे, कुक्कुरे। ब्रहले च पु०।
...जिह्व * पु० विलोमा विपरीता जिह्वा यस्य। गजे।
...वर्ण * पु० विलोमजः स्वत्यनुक्रमतया व्युत्क्रमजो वर्णः। चम-
...व्रणामधमपर्णेन जनिते सङ्कीर्णे वर्णे। [श्यामलद्वाम्।
...मी * स्त्री० विशिष्टं लोम केशो यस्याः ब्र० अच् गौरा० ङीष्।
...न ० त्रि० वि+लुन-अच्। चपले विशेषमर्द्दे च। [कन्दे।
... * न० विल-क किच तस्य नेत्त्वम्। पातवाले।
...मूला * स्त्री० विलमानविलमिव वेष्टितं मूलमस्याः। वाराही-
...ल्व * पु० विल-वन् किच। श्रीफलद्रुमे। तत्फलादौ, परिमाणे
च न०। [शुष्कविल्वोऽप्यव।
विल्ववेधिका * स्त्री० विल्वस्य वेधोऽस्त्यस्य ठन्। (वेलपठा) पदार्थे।
वि(वी)वध * पु० वि+वध-घञ् वा दीर्घः। धान्यतण्डुलादेराहरणे
भारे, स्कन्धवहनयोग्ये (वाँक) काष्ठभेदे च।
विवर * न० वि+वृ-अप्। छिद्रे, दोषे च।
विवरण * न० वि+वृ-ल्युट्। व्याख्याने, तत्कारके ग्रन्थभेदे च।
विवरनालिका * स्त्री० विवरयुक्तं नालमस्त्यस्याः ठन्। वेणौ (वांश)
विवर्ण * त्रि० विरुद्धो वर्णोऽस्य। अधमे, नीचे च।
...र्त * पु० वि+वृत-घञ्। नृत्ये, समुदाये, अपवर्त्तने, वेदान्तोक्ते
कारणात् विषमसत्ताकतया उत्पद्यमाने कार्य्ये च। यथा
रज्जौ रजतम्, ब्रह्मणो जगत्।
...वस् * त्रि० विगतो वस्त्र आयत्तता यस्य। अवशत्वे, व्याकुले च,
"विवशा कामवधूः" इति कुमार, कृतरोपे च।
विवस्वत् * पु० वि+वस-क्विप् अस्त्यर्थे मतुप् मस्य वः। सूर्य्ये, अर्क-
द्रुमे, अरुणे, देवे च।
विवाद * पु० विरुद्धो वादः। "ऋणादिदायकलहे द्वयोर्बहुत-
रस्य वा। विवादो व्यवहारस्य" इत्युक्तलक्षणे व्यवहारे, कलहे
च।
विवाह * पु० वि+वह घञ्। दारपरिग्रहे, तज्जनके व्यापारे च।
विवाहित * पु० विवाहो जातोऽस्य तार० इतच्। जातविवाहे।
विवाह्य * त्रि० वि+वह-ण्यत्। विवाहयोग्ये, विशिष्य वाह्ये च।
विविक्त * त्रि० वि+विच क्त। निर्जने, पवित्रे, असंयुक्ते च।
कर्त्तरि क्त। विवेकिनि त्रि०। दुर्भगायां स्त्रियां स्त्री०।
विविध * त्रि० विभिन्ना विधा यस्य। नानाप्रकारे।
विवीत * पु० विशिष्टं वीतं गवादिप्रचारस्थानं यत्र। प्रचुरतृणघा-
सादियुक्ते देशे।
विवृत * त्रि० वि+वृ-क्त। विस्तृते, व्याख्याते च।
विवृति * स्त्री० वि+वृ-क्तिन्। विस्तारे, व्याख्याने च।
विवेक * पु० वि+विच-घञ्। याथार्थ्येन वस्तुस्वरूपावधारणे,
प्रकृतिपुरुषयोर्भेदज्ञाने च।
विवोढृ * पु० वि+वह-तृच्। जामातरि।
... पु० वि+वा-कु तस्य वोक आगमः। "सर्वाभिमानादि-

...ष्टेऽपि विव्वोकोऽनादरक्रिया" इत्युक्तलक्षणे स्त्रीणां शृङ्गार-
चेष्टाभेदे।
विश् * प्रवेशे तुदा० पर० सक० अनिट्। विशति अविक्षत्।
विश ० पु० विश-क्विप्। मनुजे, वैश्ये च। [त्रि०।
विशङ्कट * त्रि० वि+शङ्क-टच्। विशाले।
विशद * पु० वि+शद-अच्। शुक्लवर्णे। तद्वति, विमले, व्यक्ते च
विशय * पु० वि+शी अच्। संशये "विषयो विशयश्चैव" इति
मीमांसा। [क्विप्। (छापरमाली) द्रुमे।
विशर * पु० वि+शॄ-अप्। वधे।
विशल्यकृत् * पु० विशल्यं तत्प्रहारवेदनानिवृत्तिं करोति कृ-
विशल्या * स्त्री० विगतं शल्यं तत्प्रहारवेदना यस्याः ब्र०। अग्नि-
शिखाद्रुमे, दन्तीद्रुमे, गुडूच्याम्, त्रिपुट्यायां, अजमोदायाञ्च।
विगतशल्ये त्रि०।
विशसन * न० वि+शस-हिंसने ल्युट्। मारणे।
विशसन * पु० विशस्यतेऽनेन ल्युट्। खड्गे, "असिर्विशसनः खड्गः"
इति, खड्गस्तोत्रम्। [मारिते।
विशस्त * त्रि० वि+शस-क्त। नाशिते, अतीते च। वा इट्। तत्र,
विशाख * पु० विशाखानक्षत्रे भवः अण्। कार्त्तिकेये, धन्विना
वितस्त्यन्तरालपादावस्थाने, पुनर्नवायां, याचने च।
विशाखज * पु० विशिष्टा शाखा यस्य तया सन् जायते जन-ड।
नारङ्गे। विशाखानक्षत्रजाते त्रि०।
विशाखा * स्त्री० विशिष्टा शाखा प्रकारो यस्याः। सप्तविंशतिनक्षत्रा-
न्तर्गतेऽश्विन्यवधिके षोडशे नक्षत्रे, कठिल्लके च।
विशारण * न० वि+शॄ-स्वार्थे णिच्-ल्युट्। मारणे।
विशारद * पु० विशारं ददाति दा-क लस्य रः। वकुलद्रुमे। धृष्ट-
सुरालभायां स्त्री०। पण्डिते, प्रगल्भे, श्रेष्ठे च त्रि०।
विशाल * त्रि० वि+शालच्। विस्तीर्णे, तद्वति च। मृगभेदे,
नृपभेदे च पु०। इन्द्रवारुण्याम्, महेन्द्रवारुण्यां, नदीभेदे च
स्त्री० "विशाला विरजा तथा" इति पुराणम्।
विशालता * स्त्री० विशालस्य भावः तल्। पार्श्वविस्तारे।
विशालतैलगर्भ * पु० विशालं विस्तीर्णं तैलं गर्भे अन्तर्भागे यस्य
अङ्कोटद्रुमे।
विशालत्वच् * पु० विशाला त्वक् यस्य। सप्तच्छद द्रुमे।
विशालपत्र * पु० विशालं पत्रमस्य। शालाञ्चौ, ताम्रवृन्ते च
विशालाक्ष * पु० विशाले अक्षिणी यस्य अच् समा०। म...
महेशे, विष्णौ च। तद्वत्त्वे त्रि०। पार्वत्यां, नागदन्त्याम्...
ङीप्।
विशाली * स्त्री० वि+शालच् गौरा० ङीष्। ...मोदाय...
विशिख * पु० विशिष्टा शिखा [illegible]
तोमरे च। ब्र०। [illegible]
स्त्री०।

विशिष्ट ० त्रि० वि+शिष-क्त। युक्ते, भिन्नधर्मे, विशेषयुक्ते च।
विशिष्टाद्वैत ० न० रामानुजाद्युक्ते प्रकृतिविशिष्टस्य ब्रह्मणोऽद्वैते
विशीर्ण ० त्रि० वि+शॄ-क्त। शुष्के, जराजर्जरे च।
विशीर्णपर्ण ० पु० विशीर्णं पर्णमस्य। निम्बवृक्षे।
विशुद्ध ० त्रि० वि+शुध-क्त। दोषरहिते, विशदे च।
विशुद्धि ० स्त्री० वि+शुध क्तिन्। शोधने, दोषराहित्ये च।
विशृङ्खल ० त्रि० विगता शृङ्खला [illegible]। परिपाटीशून्ये।
विशेष ० पु० वि+शिष घञ्। प्रभेदे, प्रकारे, व्यक्तौ, तिलके, "नित्यद्रव्यवृत्तयो विशेषाः परिकीर्तिताः" इति वैशेषिकोक्ते पदार्थभेदे, अवान्तरभेदे च।
विशेषक ० पु० न० विशेषयति वि+शिष णिच् ण्वुल्। ललाटकृते तिलके। विशेषकारके त्रि०। "तिलकेन विशेषकम्" इत्युक्ते एकस्मिन्नन्वये श्लोकत्रये न०।
विशेषगुण ० पु० [illegible]। [illegible] "[illegible]" [illegible]

[illegible]

विश्लिष्ट ० त्रि० वि+श्लिष क्त। वियुक्ते, शिथिले च।
विश्लेष ० पु० वि+श्लिष-घञ्। वियोगे, शैथिल्ये च।
विश्व ० न० विश-व। जगति संसारे। तदभिमानिनि चैतन्ये पु०। गणदेवविशेषे पु० ब० व०। सकले त्रि० सर्वनामता। [illegible]
विश्वकर्मन् ० पु० विश्वेषु कर्म व्यापारो यस्य। सूर्ये, देवशिल्पिनि, मुनिभेदे, परमेश्वरे च।
विश्वकृत् ० पु० विश्वं करोति कृ-क्विप। विश्वकर्मणि, परमेश्वरे च।
विश्वकेतु ० पु० विश्वे केतवोऽस्य। अनिरुद्धे।
विश्व(ष्व)क्सेन ० पु० विषु(षू)ची सेना यस्य। विष्णौ। विष्वक्सेनप्रियायां स्त्री०।
विश्वगन्ध ० पु० विश्वतो गन्धोऽस्य। बोले, गन्धरसे, पलाण्डौ च।
विश्वगन्धा ० स्त्री० विश्वे सकला गन्धा यस्याः। पृथिव्याम्।
विश्वग्रन्थि ० स्त्री० विश्वतो ग्रन्थयोऽस्याः। हंसपदीलतायाम्।
विश्व(ष्व)च् ० अव्य० विश्वमञ्चति क्विप् विषु(षू) आदेशः। सर्वतोऽर्थे। विश्वगामिनि त्रि० अत्रार्थे विश्व(ष्व)द्र्यञ्च।
विश्वधारिणी ० स्त्री० विश्वं धारयति धृ+णिनि। पृथिव्याम्।
विश्वपर्णी ० स्त्री० विश्वतः पर्णान्यस्याः। भूम्यामलक्याम्।
विश्वप्सन् ० पु० विश्वं प्साति भक्षति प्सा कनिन्। वह्नौ, चन्द्रे, विश्वकर्मणि, भूमौ च।
विश्वभेषज ० न० विश्वेषां भेषजम्। शुण्ठ्याम्।
विश्वम्भर ० पु० विश्वं बिभर्त्ति भृ-खच् मुम् च। हरौ, विष्णौ च। पृथ्व्यां स्त्री०।
विश्वरूपक ० न० विश्वं रूपमस्य कप्। कृष्णागुरुणि।
विश्वरेतस् ० पु० विश्वं रेतोऽस्य यस्य। [illegible]

[illegible]

र्वाः। विश्वेदेवा भवन्त्येते दश श्राद्धेषु पूजिताः" इत्युक्ते श्राद्धदेवभेदे। विश्वदेवस्तु वह्नौ पु०।

विश्वेश * पु० ६त०। शिवे, विश्वेश्वरादयोऽप्यत्र।

विश्वौषध * न० विश्वेषु रोगेषु औषधम्। शुण्ठ्याम्। [अविक्षत् त।

विष * व्याप्तौ जु० उभ० सक० अनिट्। वेवेष्टि वेविष्टे। अविषत्

विष * विप्रयोगे क्र्या० पर० सक० अनिट्। विष्णाति अविक्षत्।

विष * सेचने भ्वादि० पर० सक० अनिट्। वेषति अविक्षत्।

विष् * स्त्री० विष-क्विप्। विष्ठायाम्।

विष * न० विष-क। जले, पद्मकेशरे, मृणाले, गन्धरसे, वत्सनाभे- [कर्कोट्याम्।

विषे च। गरलसाम्ये पु० न०।

विषकण्टकिनी * स्त्री० विषयुक्तं कण्टकमस्या अस्ति इनि। वन्ध्या-

विषकण्ठ * पु० विषं कण्ठे यस्य। शिवे।

विषघ्ना * स्त्री० विषं हन्ति हन-ड नि० कुत्वञ्च। गुडूच्याम्।

विषघातिन् * पु० विषं हन्ति हन-णिनि। शिरीषवृक्षे। विष-

नाशके त्रि०।

विषघ्न * पु० विषं हन्ति हन-क। शिरीषवृक्षे, यवासे, विभीतके, चम्पकवृक्षे च। हिलमोचिकायां (हेलेञ्चा), इन्द्रवारुण्याम्, सर्वं-

रायाम्, भूम्यामलक्याम्, रक्तपुनर्नवायाम्, हरिद्रायाम्, ग्रन्थिकाय्याम्, महाकरञ्जे च स्त्री० ङीप्। विषनाशके त्रि०।

विषजिह्व * पु० विषयुक्ता जिह्वेव पत्रमस्याः। देवताडवृक्षे।

विषज्वर * पु० विषमिव प्राणहन्ता ज्वरो यस्य। महिषे।

विषण्ड * न० विशेषेण षण्डम्। मृणाले।

विषतिन्दु * पु० विषयुक्तस्तिन्दुः। कुचीले। [त्रि०।

विषद * न० वि+षद-अच्। पुष्पकासीसे। शुक्लवर्णे पु०। तद्वति

विषदन्तक * पु० विषं दन्ते यस्य कप्। सर्पे।

विषधर * पु० विषं धरति धृ-अच्। सर्पे, "विषधरविषमम्" इति [लतायाम्।

उद्भटः।

विषधर्मन् * पु० विषस्येव धर्मोऽस्य अनिच् समा०। (आलकुशी)

विषनाशन * पु० विषं नाशयति नश णिच्-ल्यु। शिरीषवृक्षे।

विषमुद * पु० विषं मुदति मुद क्विप्। श्योनाकवृक्षे।

विषपुष्प * न० विषमिव नीलं पुष्पमस्य। नीलपद्मे। कप्।

मदनवृक्षे। कर्म०। नीलपुष्पे न०।

विषम * त्रि० विगतो विरुद्धो वा समः। असमे, अयुग्मे, उन्नतानते, दारुणे, सङ्कटे च। "भिषविज्ञपदन्याद विषमं परिकीर्तितम्" इत्युक्ते पद्यभेदे न०।

विषमच्छद * पु० विषमाः अयुग्मानि सप्त छदाः यस्य। सप्तच्छदे।

विषमज्वर * पु० विषम इवो ज्वरः। ज्वरभेदे।

विषमनयन * पु० विषमाणि अयुग्मानि त्रीणि नयनान्यस्य। शिवे। विषमनेत्रादयोऽप्यत्र।

विषमर्दनी * स्त्री० विषं मर्दयति मर्द-ल्युट्-ङीप्। गन्धनाकुल्याम्। स्वार्थे कन्। तत्रैवार्थे।

विषमस्थ * त्रि० विषमे उन्नतानते सङ्कटे वा तिष्ठति स्था-क।

उपद्रवग्रामे, सङ्कटस्थे, उन्नतानतदेशस्थे च।

विषमशिष्ट * न० विषमं शिष्टं शासनम्। अनुचितशासने।

विषमायुध * पु० विषमाणि अयुग्मानि पञ्च आयुधानि वाणा

यस्य। कामे। विषमेष्वादयोऽप्यत्र।

विषय * पु० विषिण्वन्ति स्वात्मकतया विषयिणं निरूपयन्ति सम्बध्नन्ति वा वि+षि-अच्। इन्द्रियगोचरे शब्दादौ, देशे च।

विषयिन् * न० विषयोऽस्त्यस्य इनि। ज्ञाने, इन्द्रिये च। विषयासक्ते त्रि०। राज्ञि, कामदेवे, धनी च पु०।

विषरूपा * स्त्री० विषं मूषिकविषं रूपयति अतिक्रामति रूप+क।

अतिविषायाम् (आतइच)।

विषलता * स्त्री० विष-प्रधाने व लता। इन्द्रवारुण्याम्।

विषविद्या * स्त्री० विषाय तन्निवृत्तये विद्या। विषघ्नमन्त्रज्ञाने।

विषवैद्य * पु० विषे विषापहारे वैद्यश्चिकित्सकः। विषमन्त्रविद्यावति।

विषशालूक * पु० विषस्य मृणालस्य शालूकः। पद्मकन्दे।

विषहन्त्री * स्त्री० विषं हन्ति हन-तृच्-ङीप। अपराजितायाम्। [विषहारके त्रि०।

विषहारके त्रि०।

विषहरी * स्त्री० विषं हरति हृ-अच् गौरा० ङीष्। मनसादेव्याम्।

विषहा * स्त्री० विषं हन्ति हन ड। देवदालीलतायाम्।

विषा * स्त्री० विषं नाशकत्वेनास्त्यस्याः अच्। (आतइच) अतिविषायाम्, बुद्धौ च। [वृक्षोपधे, चीरकाकोल्याञ्च।

विषाण * न० विष+काणन्। पशुशृङ्गे, हस्तिदन्ते, वराहदन्ते,

विषाणिका * स्त्री० विषाणमस्त्यस्याः ठन्। शठ्याम् (माड़शिङ्गा), कर्कटशृङ्ग्याम्, आमलक्याञ्च।

विषाणिन् * पु० विषाणमस्त्यस्य इनि। गण्डके, हस्तिनि च। शृङ्गाटके, ऋषभौषधे च पु०।

विषाद * पु० वि+षद-घञ्। अवसादे, अप्रमादाञ्च।

विषादनी * स्त्री० विषाय तन्निवृत्तये अद्यतेऽसौ अद ल्युट्। पलाशीलतायाम्।

विषानल * पु० विषस्यानल इव। शिवे। विषहरे त्रि०।

विषापह * स्त्री० विषमपहन्ति अप+हन ड। इन्द्रवारुण्याम्, नागदमन्याम्, अर्कमूलायाञ्च (ईश्वरमूल)।

विषाराति * पु० ६त०। कृष्णधुस्तूरे।

विषारि * पु० ६त०। घृतकरञ्जे, महाचञ्चुशाके च। [गरुडे।

विषास्य * पु० विषमास्ये यस्य। सर्पे। विषाग्निरास्यमस्य। भल्ला-

विषु * अव्य० विष-कु। साम्ये, नानारूपे च।

विषुव * न० विषु दिनरात्र्योः साम्यं वाति वा-क। अहर्निश- दिनरात्र्योः साम्यकाले तुलामेषादिसंक्रान्तिभेदे।

विषुवत् * न० विषु साम्यमस्त्यस्मिन् मतुप् मस्य वः। विषुवतस्तावर्थे।

विष्णोपदी * स्त्री० ६त०। गङ्गायाम्।

विष्क * हिंसायां चुरा० आत्म० सक० सेट्। विष्कयते अविविष्कत। दर्शने उभ० विष्कयति ते अविविष्कत् त।

विष्कम्भ * पु० वि+स्कन्भ-घञ्। सूर्य्यचन्द्रयोगजातयोगमध्ये प्रथमे योगे, विस्तारे, प्रतिबन्धे, रूपककाव्याङ्गभेदे, योगिनां बन्धभेदे, वृक्षे, अर्गलकाष्ठे-कीलकादौ च।

विष्किर * पु० विकिरति वि+कृ-क सुट् च। विहगे।

विष्टप * न० विश-कपन् तुट् च। भुवने।

विष्टब्ध * त्रि० वि+स्तन्भ-क्त। प्रतिबद्धे अवरुद्धे।

विष्टम्भ * पु० वि+स्तन्भ-घञ्। प्रतिबन्धे, रोगभेदे च।

विष्टम्भिन् * त्रि० वि+स्तन्भ-णिनि। प्रतिबन्धके, रोगविशेषजनके च।

विष्टर * पु० वि+स्तृ-अप् षत्वम्। "अर्हतेभ्यो भवेद्दद्या सम्बन्धनस्तु विष्टरः" इति "आसनमात्रं तु विष्टरः" इति च स्मृत्युक्ते दर्भकृते आसनभेदे, आसनमात्रे, वृक्षे च।

विष्टरश्रवस् * पु० विष्टर इव कुशमुष्टिरिव श्रवसी कर्णावस्य। विष्णौ।

विष्टरथा * स्त्री० [illegible] स्वर्णकेतकाम्।

विष्टार * पु० वि+स्तृ-घञ् षत्वम्। छन्दोविशेषभेदे।

विष्टि * स्त्री० विश+क्तिन् [illegible] वा। [illegible]

[illegible] च पु०।

विष्टा * स्त्री० [illegible] पुरीषे।

विष्णु * पु० विष-नुक् [illegible] [illegible]

[illegible] इति

[illegible]

[illegible] [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

घटनपटीयस्याम् अविद्यायाम्, तदधिष्ठात्र्यां दुर्गायाञ्च।

विष्णुरथ * विष्णोः रथ इव गतिहेतुत्वात्। गरुडे।

विष्णुरात * पु० विष्णुना रातः विष्णुर्वा रायाञ्जीवनमस्मै [illegible] त वा। परीक्षिदाख्ये नृपे। स हि गर्भस्थ एव ब्रह्मास्त्रेण दग्धः सन् मृतः प्रसवानन्तरञ्च विष्णुना पुनर्जीवित [illegible] भारतम्।

विष्णुवल्लभा स्त्री० ६त०। तुलस्याम्, अग्निशिखावृक्षे च।

विष्णुवाहन * पु० विष्णुं वाहयति स्थानान्तरं नयति वह-णिच्-ल्यु। गरुडे।

विष्णुवाह्य * पु० विष्णुर्वाह्योऽस्य। गरुडे। [illegible]

विष्फार * पु० वि+स्फुर-णिच् अच् आत् अच् षत्वम्। धनुष्टङ्कारे

विष्य * त्रि० विषेण वध्यः विष+यत्। विषेण वध्ये।

विष्वक्सेन * पु० विषुचो सेना यस्य। विष्णौ, विष्णुनिर्माल्यधारके तद्गणभेदे च। विष्वक्सेना स्त्री०।

विष्वक्सेनप्रिया * स्त्री० ६त०। लक्ष्मयाम् (चामर) वातुभेदे च।

विष्वण * न० वि+ष्वन-ल्युट् अत्वषत्वे। भोजने।

विष्वाण * पु० वि+ष्वन-घञ् अत्वषत्वे। भोजने।

विस * न० वि+सो-क। मृणाले। [illegible]

विसकण्ठिका * स्त्री० विसं मृणालमिव कण्ठोऽस्याः [illegible]

विस * उत्सर्गे दिवा० पर० सक० सेट्। विस्यति अवेसीत्।

विसंवाद * पु० वि+सम्+वद-घञ्। विप्रलम्भे, वञ्चने, ख्यातस्य वस्तुनोऽन्यथा कथनादौ च।

विसकुसुम * न० विसयुक्तं कुसुमम्। पद्मे।

विसङ्कट * पु० विगतः सङ्कटो यस्मात्। सिंहे, इङ्गुदीवृक्षे च।

विसनाभि * स्त्री० विसं नाभौ यस्य। पद्मिन्याम्, पद्मसमूहे च।

विसर * पु० वि+सृ-अप्। समूहे, विस्तारे च।

विसर्ग * पु० वि+सृज-घञ्। दाने, त्यागे, अवत्यागे, विसर्जनीयाख्ये वर्णभेदे, मोक्षे, प्रलये च "भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितम्" इति गीता। [illegible]

विसर्जन * न० वि+सृज-ल्युट्। दाने, त्यागे च। [illegible]

विसर्प * पु० वि+सृप-घञ्। रोगभेदे।

विसर्पण * न० वि+सृप-ल्युट्। प्रसारे।

विसार * पु० विसरति सर्पति वि+सृ-घञ्। मत्स्ये।

विसारिन् * त्रि० वि+सृ णिनि। प्रसरणशीले। मत्स्ये पु०। [illegible] स्त्री० ङीप्। [illegible]

विसिनी * स्त्री० विसानां समूहः [illegible]

विसूचिका * स्त्री० [illegible]

विसृत * त्रि० वि+सृ क्त। विस्तीर्णे।

विसृत्वर * त्रि० वि+सृ क्वरप्। प्रसरणशीले। [illegible]

विसृमर * त्रि० वि+सृ-क्मरच्। विसरणशीले। [illegible]

विसृष्ट * त्रि० वि+सृज-क्त। [illegible] "[illegible]"

विस्त * पु॰ न॰ विस-कर्मणि क्त नि॰ न इट्। स्वर्णकर्षे, अशीतिरक्तिकापरिमाणे च। [समूहे च। आधारे अप्। पीठे।
विस्तर * पु॰ वि+स्तृ-अप्। शब्दसमूहे, वाक्यसमूहे, विस्तारे, प्रणये,
विस्तार * पु॰ वि+स्तृ-संज्ञायां कर्त्तरि घञ्। विटपे। भावे घञ्। विस्तीर्णतायाम्, समासव्यासयोः पदसमूहे च।
विस्तीर्ण * त्रि॰ वि+स्तृ-क्त। विपुले, विस्तारयुक्ते, विशाले च।
विस्तीर्णपर्ण * न॰ विस्तीर्णानि पर्णान्यस्य। मानके।
विस्तृत * त्रि॰ वि+स्तृ-क्त। विस्तारयुक्ते। [वृश्चिकले, विषभेदे च।
विस्फुलिङ्ग * पु॰ विस्फुरति वि+स्फुर-ड वा पः तत् लिङ्गमस्य।
विस्फोट * पु॰ विस्फोटयति वि+स्फुट-णिच् अच्। (विषफोड़ा) व्रणभेदे। स्वार्थे कन्। स्फोटकभेदे "विस्फोटकभयापहा" इति शीतलास्तोत्रम्।
विस्मय * पु॰ वि+स्मि-अच्। आश्चर्य्ये, अद्भुते, रसभेदे च।
विस्मयान्वित * त्रि॰ ३त॰। विस्मययुक्ते, आश्चर्य्ययुक्ते च।
विस्मापन * पु॰ वि+स्मि-णिच् अच् आत् वा पुक् च ल्यु। कुहके, कामदेवे च। गन्धर्वपुरे न॰। विस्मायनमप्यत्र।
विस्मित * पु॰ वि+स्मि-क्त। विस्मययुक्ते।
विस्मृत * त्रि॰ वि+स्मृ-क्त। स्मरणाविषये।
विस्मृति * स्त्री॰ वि+स्मृ क्तिन्। स्मरणाभावे। [च।
विस्र * न॰ विस+रक्। आमगन्धे। चिताधूमादौ,अपक्वमांसगन्धे
विस्रंस * पु॰ वि+स्रन्स-भावे घञ्। पतने, क्षरणे च।
विस्रगन्धा * स्त्री॰ विस्रो गन्धोऽस्याः। वपुषायाम्।
विस्रगन्धि * पु॰ विस्रस्येव गन्धोऽस्य इत्समा॰। हरिताले।
विस्रम्भ * पु॰ वि+स्रन्भ घञ। विश्वासे, प्रत्यये, परिचये च।
विस्रम्भिन् * त्रि॰ वि+स्रन्भ-णिनि। विश्वासयुक्ते, प्रणयिनि च।
विस्रसा * स्त्री॰ वि+स्रन्स क। जरायाम्।
विस्रा * स्त्री॰ विस्रः आमगन्धोऽस्त्यस्याः अच्। वपुषायाम्।
विहग * पु॰ स्त्री॰ विहायसा गच्छति गम-ड नि॰। पक्षिणि। वाणे सूर्य्ये चन्द्रे, मेघे च पु॰। विहङ्गोऽप्यत्र।
विहङ्गम * पु॰ स्त्री॰ विहायसा गच्छति गम-खच् नि॰। पक्षिणि।
विहङ्गराज * पु॰ ६त॰ अच् समा॰। गरुडे "विहङ्गराजाङ्गरुहैः" इति माघः। [हिमालये।
विहनन * न॰ विहन्यते वि+हन ल्युट्। तूलपिचुले, विघ्ने,
विहर * पु॰ वि+हृ अप्। विहारे। ल्युट्। विहरणं तत्रैव न॰।
विहसित * न॰ वि+हस-क्त। मध्यमहास्ये।
विहस्त * त्रि॰ विगतो हस्तो हस्तावलम्बनं यस्य। व्याकुले। पण्डिते, षण्डे च पु॰। हस्तशून्ये त्रि॰।
विहापित * न॰ वि+हा-णिच-क्त। दाने।
विहायस् * पु॰ न॰ वि+हय-असुन् नि॰ हृद्धिः। आकाशे, पक्षिणि च। स्वार्थे अच्। विहायसमप्याकाशे न॰।
विहार * पु॰ वि+हृ घञ्। क्रीड़ार्थं पादाभ्यां गमने, भ्रमणे, स्कन्धे, लीलायां, बौद्धदेवालये, वैजयन्ते च।
विहित त्रि॰ वि+धा-क्त। कृते, विधिना बोधिते च।
विहीन * त्रि॰ वि+हा-क्त। त्यक्ते, वर्जिते च।
विहृत * न॰ वि+हृ-भावे क्त। विहारे, स्त्रीणां चेष्टाभेदे च।
विह्वल * त्रि॰ वि+ह्वल-अच्। भयादिना व्याकुले, विलीने च।
वी * कान्तौ जनने च अक॰ गतौ व्याप्तौ क्षेपे भोजने च सक॰ अदा॰ उभ॰ अनिट्। वेति अवेषीत्।
वी(वि)काश * पु॰ वि+काश-घञ् वा दीर्घः। रहसि, प्रकाशे च।
वीक्षण * न॰ वि+ईक्ष करणे ल्युट्। नेत्रे। भावे ल्युट्। दर्शने।
वीणा * स्त्री॰ वि+इण-नक्। गुणनिकायाम्। भावे च। गतिभेदे, नृत्ये, अश्वगतिभेदे, मन्थौ च। [काशे, शुके, अंशौ किरणे च।
वीचि(ची) * पु॰ स्त्री॰ वे-डीचि स्त्रीत्वे वा ङीप्। तरङ्गे, अव-
वीचितरङ्ग * पु॰ वीचेरिव तरङ्गो यत्र। वीचितो यथा उत्तरोत्तरं तरङ्गजननमेवं स्वजन्यजन्यादिरूपे न्यायभेदे यथा शब्दस्य ढक्कादिदेशे तद्वत्तज्जन्यशब्दपरम्परया श्रोत्रेण सह सम्बन्धात् श्रवणम्।
वीचिमालिन् * पु॰ वीचीनां मालाऽस्त्यस्य इनि। समुद्रे।
वीज * व्यजने अद॰ चुरा॰ उभ॰ सक॰ सेट्। वीजयति ते अवि-वीजत् त। "वीज्यते स हि मन्मथः" इति कुमारः।
वीज * न॰ वी क्विप् जन ड कर्म॰। कारणे, शुक्रे, अङ्कुरे, तत्त्वावधाने, मज्जनि, अव्यक्तगणितभेदे, मन्त्रभेदे, धान्यादेः फलादौ च।
वीजक पु॰ वीजेन कायति कै-क। मातुलुङ्गे। पीतसारे।
वीजकोश * पु॰ वीजानां कोश इवाधारः। पद्मबीजाधारे वराटके।
वीजगर्भ * पु॰ वीजानि गर्भे यस्य। पटोले।
वीजगुप्ति * स्त्री॰ वीजानां गुप्तिर्यस्याम्। शिम्बायाम्।
वीजन * न॰ वीज-भावे ल्युट्। व्यजने। करणे ल्युट्। चामरादौ। वस्तुनि, चक्रवाके, जीवञ्जीवविहगे च पु॰ स्त्री॰। स्त्रियां ङीप्।
वीजपादप * पु॰ वीजप्रधानः पादपः। भल्लातकवृक्षे।
वीजपुष्प * न॰ वीजात् पुष्पं यस्य। मरुवके। [वीजपूर्णोऽप्यत्र।
वीजपूर * पु॰ पूर्य्यते पूर-घञ् ३त॰। (टाबा लेबु) जम्बीरभेदे।
वीजफलक * पु॰ वीजानि फले यस्य कप्। वीजपूरे जम्बीरे।
वीजमातृका * स्त्री॰ वीजानां मातेव इवार्थे कन्। पद्मबीजे।
वीजरुह * पु॰ वीजेन रोहति रुह-क। वीजमात्रजाते धान्यादौ।
वीजरेचन * न॰ वीजं रेचयति रिच ल्यु। वीजेषु मध्ये रेचके जयपालबीजे। [इत्यादनार्थे क्षेपणे।
वीजवपन * न॰ वीजानि उप्यन्तेऽत्र वप आधारे ल्युट्। क्षेत्रस्य
वीजरत्न * न॰ वीजं रत्नमिवास्य। माषकलाये।
वीजवृक्ष * पु॰ वीजमात्राज्जातो वृक्षः। असनवृक्षे।
वीजसञ्चय * पु॰ वीजानां वपनयोग्यधान्यादीनां सञ्चयः। अथवा सम्+चि-अच्। वपनयोग्यधान्यादिसमूहे।

वीजसू * पु० वीजं सूते सू क्विप्। पृथिव्याम्। [चैव।

वीजाकृत * त्रि० वीजेन सह कृष्टम् डाच् कृ-क्त। वीजेन सह कृष्टे

वीजाम्ल * न० वीजेनाम्लमिव। वृक्षाम्ले। [त्रि०।

वीजिन् * पु० वीजमस्त्यस्य इनि। उत्पादके पितरि। वीजविशिष्टे

वीज्य * त्रि० विशेषेण इज्यः वि+यज-क्यप्। कुलीने।

वीटि(टी) * स्त्री० वि+इट-इन् वा ङीप्। (पानेर वीड़ा) सज्जित-ताम्बूले। स्वार्थे क। तत्रैव। [मेदे।

वीणा * स्त्री० अज-नक् वीभावः पृ० णत्वम्। स्वनामख्याते वाद्य-

वीणादण्ड * पु० ६त०। वीणावाद्यस्थितालावूपरिस्थे काष्ठदण्डे।

वीणावाद * त्रि० वीणां वादयति वद-णिच्-अण्। वीणावादके।

वीत * न० वि-इण्-क्त। युद्धासमर्थे हस्त्यश्वादिसैन्ये, अङ्कुशकर्मणि, न्यायाद्युक्ते अनुमानभेदे च। शान्ते, गते च त्रि०।

वीतंस * पु० वि-तन्स-घञ् वा दीर्घः। मृगपक्षिणां बन्धनोपकरणे दामप्रभृतौ, विश्रामहेतुमावरणे च। [शोकहीने त्रि०।

वीतशोक * पु० वीतः विगतः शोको यस्मात् यस्य वा। अशोकवृक्षे।

वीति * स्त्री० वी+क्तिन्। गतौ, दीप्तौ, भोजने, प्रजनने, धारणे च। [वल। वह्नौ।

वीतिहोत्र * पु० वीतये पुरोडाशादिभक्षणाय हूयन्ते देवा अत्र हु+

वीथि(थी) * स्त्री० विथ+इन् पृ० वा ङीप्। पङ्क्तौ, श्रेणौ, गृहाङ्गे, वर्त्मनि, दृश्यकाव्यनाटकाङ्गभेदे च।

वीथ्यङ्ग * पु० वीथिरङ्गमस्य। दृश्यकाव्यभेदे।

वीध्र * त्रि० वि-इन्ध-रक्। निर्मले। नभसि, वायौ च पु०।

वीनाह * पु० वि-नह-घञ् दीर्घः। कूपादिमुखबन्धनसाधने (पाट) इति ख्याते पदार्थे।

वीप्सा * स्त्री० वि+आप-सन् अच ईत् च अभ्यासलोपश्च। व्याप्तौ।

वीर * शौर्य्ये अद० चुरा० आत्म० अक० सेट्। वीरयते अविवीरत।

वीभ * शौर्य्ये इत्येके उद्यमे विकत्थने च भ्वादि० अक० सेट्, आङ्क न वृद्धिः। वीभते अवीभिष्ट।

वीर * न० वीर-अच्। मरिचे, पद्ममूले, काञ्जिके, उशीरे च। [illegible] अन्। करवीरे। विक्रान्ते, शौर्य्ययुक्ते च त्रि०। [illegible] न०। [illegible] त्रि०। [illegible] स्त्री०।

वीरक * पु० वि+ईर-ण्वुल्। करवीरे।

वीरण * न० वि+ईर-ल्यु। उशीरे (वेणार मूल)।

वीरतर * न० वि-ईर [illegible]। वीरणे। शूरतरे त्रि०।

वीरतरु * पु० वि+ईर-उन् कर्म०। अर्जुनवृक्षे, [illegible], भल्लातके [illegible] विल्वभेदे च। [illegible]।

वीरपत्नी * स्त्री० वीरः पतिर्यस्याः नुक् ङीप् च। वीरभार्य्यायाम्।

[illegible] * स्त्री० [illegible]। [illegible] [illegible]।

[illegible]

वीरपाण(न) * न० वीराणां पानम् वा णत्वम्। युद्धात् पूर्वं [illegible]

वीरभद्र * पु० वीरो भद्रोऽस्य। अश्वमेधीयेऽश्वे। वीरेषु भद्रः। [illegible] न०।

वीररजस् * न० वीर इव रजः रक्तत्वात्। सिन्दूरे।

वीरसू * स्त्री० वीरं सूते सू+क्विप्। वीरमातरि।

वीरसेन * पु० वीरा सेना यस्य। नलराजजनके नृपभेदे।

वीरहन् * पु० वीरयति शौर्य्यान्वितं करोति वीर-णिच्-[illegible] वीरो यज्ञाग्निस्तं हतवान् हन-क्विप्। नष्टाग्नौ विप्रे।

वीरा * स्त्री० वि+ईर-अच्, वीर+अच् वा। मुरानामगन्धद्रव्ये, क्षीरकाकोल्याम्, आमलक्याम्, एलवालुकायां, पतिपुत्रवत्स्त्रियां, रम्भायां, विदार्य्याम्, दुग्धिकायाम्, क्षीरविदार्य्यां, काकोल्या, महाशतावर्य्यां, घृतकुमार्य्याम्, अतिविषाया, द्राक्षायाम्, शिंशपावृक्षे च (शिशु)। [मद्यभेदे।

वीराम्ल * पु० वीरयति शौर्य्यान्वितं करोति वीर-णिच्-अच् कर्म०।

वीराशंसन * न० वीरैराशंस्यतेऽत्र आ+शन्स-आधारे ल्युट्। भयङ्करे युद्धक्षेत्रे।

वीरासन * न० वीरस्येवासनम्। "एकपादमथैकस्मिन् विन्यस्योरौ संस्थितम्। इतरस्मिन् तथा पश्चात् वीरासनमिति स्मृतम्" इत्युक्ते आसनभेदे। [लतायाम्।

वीरुध(धा) * स्त्री० वि+रुध-क्विप् दीर्घः वा टाप्। विस्तृत

वीरेश्वर * त्रि० ६त०। वीरपतौ। काशीस्थे शिवलिङ्गभेदे पु०।

वीर्य्य * न० वीर-यत्, वीरस्य भावो यत् वा। देहस्थे परम[illegible] शुक्रे, पराक्रमे, बले, प्रभावे, तेजसि, दीप्तौ च। [

वीर्य्यवत् * त्रि० वीर्य्यमस्त्यस्य मतुप् मस्य वः। बलवति, वीर्य्य[illegible]

वीवध * पु० विशेषेण वध्यतेऽत्र वध-घञ् न वृद्धिः। तण्डुलादिस[illegible] मार्गे, भारे च।

वीवधिक * पु० वीवधः भारवहनं शिल्पमस्य ठन्। भारवाहे।

वीहार * पु० विह्रियतेऽत्र वि+हृ-आधारे घञ् दीर्घः। बु[illegible]न्दिरभेदे।

वुग * योगे भ्वादि० पर० सक० सेट् इदित्। वुङ्गति अवुङ्गी[illegible]

वुट * हिंसायां चुरा० उभ० सक० सेट्। वोटयति ते अवूवुट[illegible] इदित्त्वे वुण्टयति ते अवुवुण्टत् त। [अत्र[illegible]

वुध * हिंसायां चुरा० उभ० सक० सेट इदित्। वुन्धयति ते अ[illegible]

वुश(स) * विभागे, पृथक्करणे च दिवा० पर० सक० सेट्। वु[illegible] (स्य)ति अवोशी(सी)त्। [(वु)वृ(वृ)[illegible]

वूर वूष * हिंसायां चुरा० उभ० सक० सेट्। वू(वू)र्षयति ते[illegible]

वृ * आवरणे चुरा० उभ० सक० सेट। वारयति ते अवीवरत् त।

वृ * सेवायां क्र्या० आत्म० सक० सेट्। वृणीते "वृणते हि विमृश्यकारिणम्" इति भारविः। अवरीष्ट अवरिष्ट अवृत।

वृ * वरणे भ्वादि० उभ० सक० सेट्। वरति ते अवारीत् [illegible] अवरीष्ट अवृत।

वृ * वरणे स्वादि० क्र्यादि० च उभ० सक० सेट्। वृणोति [illegible]

तन्मानि वृणोति अवारीत् अवारिष्ट अवरीष्ट अवृत।
वृंहित * न० बृहि-क्त। करिगर्जने।
वृक * आदाने भ्वादि० आत्म० सक० सेट्। वर्कते अवर्किष्ट।
वृक * पु० वृक-क। वृकाकारे हरिणघातके व्याघ्रभेदे, काके, वकवृक्षे, क्षत्रिये, अग्निकन्दुरुष्करे धूपे, भागन्धे, उदराग्नौ पक्षिभेदे च। तस्य भार्या स्त्री० वा गौरा० ङीष्। वृकस्त्रियां स्त्री० ङीप्।
वृकदंश * पु० स्त्री० वृकं दशति दन्श-अच्। कुक्कुरे। [श्वादौ धूपे।
वृकधूप * पु० वृकवत् उग्रः धूपः कर्म०। नानाद्रव्यमिश्रिते दशा-
वृकधूर्त्त * पु० स्त्री० वृक इव धूर्त्तः। शृगाले। [(नेंदोड़ि)।
वृकाक्षी * पु० वृकस्येवाक्षि पुष्पमस्य षच् समा० ङीष्। त्रिवृति
वृकाराति * पु० ६त०। कुक्कुरे। वृकारिप्रादयोऽप्यत्र।
वृकोदर * पु० वृकनामाग्निरुदरे यस्य। "यस्य तोदरे वृको नाम जठरे हव्यवाहनः। मया दत्तः स धर्मात्मा तेन चासौ वृकोदरः" इत्युक्ते भीमे "नृपसूनुरिव वचनं वृकोदरः" इति भारविः।
वृक्ण * त्रि० व्रश्च क्त। छिन्ने।
वृक्ष * वरणे भ्वादि० आत्म० सक० सेट्। वृक्षते अवृक्षिष्ट।
वृक्ष * पु० व्रश्च क्स। व्रश्चनेऽपि जायमाने द्रुमे। ह्रस्वार्थे कन्। कुटजवृक्षे।
वृक्षचर * पु० स्त्री० वृक्षे चरति चर-अच्। वानरे। स्त्रियां ङीष्।
वृक्षच्छाय * न० ६त०। बहूनां वृक्षाणां छायायाम्।
वृक्षधूप * पु० वृक्षोऽपि धूपस्तत्साधनम्। सरलद्रुमे।
वृक्षनाथ * पु० ६त०। वटवृक्षे।
वृक्षपाक * पु० वृक्षस्य पाकः शिरसि जटिलत्वात्। वटवृक्षे।
वृक्षभवन * न० ७त०। वृक्षस्थे कोटरे। [वन्दायाम् (परगाछा)।
वृक्षभक्षा * स्त्री० वृक्षो भक्षो वेष्टकत्वात् भोजनीय इव यस्याः।
वृक्षभेदिन् * पु० वृक्षं भिनत्ति भिद+णिनि। वृक्षभेदके अस्त्रभेदे।
वृक्षभू * पु० वृक्षस्य हृदि भूमौ भवति भू+क्विप्। अम्लवेतसे।
वृक्षरुहा * स्त्री० वृक्षे रोहति रुह-क। वन्दायाम्, अमृतस्रवायाञ्च।
वृक्षवाटिका * स्त्री० वृक्षैर्वाटीव सहनत्वात् स्वार्थे कन्। अमात्य-गणिकागृहमध्ये राजगृहसमीपस्थे उपवने।
वृक्षादन * पु० वृक्षमपि भिनत्ति अद-ल्यु। कुठारास्त्रे (निहानि) वृक्षान्तरमपि भिनत्ति। अश्वत्थवृक्षे, मधुच्छत्रे, पियाले, वृक्षविदारके च। वन्दायां स्त्री० गौरा० ङीष्। [चुक्राम्ले च।
वृक्षाम्ल * न० वृक्षजातमम्लम्। (तेंतुल) वृक्षजाताऽम्लप्रधाने वृक्षे,
वृक्षोत्पल * पु० वृक्षे उत्पलमिव। कर्णिकारवृक्षे।
वृच * वृतौ रु० पर० सक० सेट्। वृणक्ति। अवर्चीत्। निष्ठा अनिट्।
वृज * त्यागे चुरा० आत्म० सक० सेट् इदित्। वृङ्क्ते अवृञ्जिष्ट नेदिदप्ययम्। वृक्ते अवर्जिष्ट। निष्ठा अनिट्। वृक्तः।
वृज * त्यागे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। वर्जयति ते वर्जति। अववर्जत्-अवीवृजत् अवर्जीत्। निष्ठा अनिट्।

वृज * वृतौ, त्यागे च रु० पर० सक० सेट्। वृणक्ति अवर्जीत्। निष्ठा अनिट्। वृक्तः। [त्रि०।
वृजन * न० वृज्यतेऽत्र वृज-क्यु। पापे, आकाशे च। केशे पु०। कुटिले
वृजिन * न० वृज+इनच् किच्च। पापे। भुग्ने त्रि०। केशे पु०।
वृण * प्रीणने, तुदा० पर० सक० सेट्। वृणति अवर्णीत्।
वृण * भक्षणे तना० उभ० सक० सेट्। वृणोति वर्णोति वृणुते अवर्णीत् अवर्णिष्ट। क्त्वा वेट्। [अववर्त्तत् त।
वृत * दीप्तौ चुरा० उभ० सक० सेट्। वर्त्तयति ते अवीवृतत् त
वृत * वर्त्तने भ्वादि० आत्म० लुङि लृटि लृङि च उभ० अक० सेट्। वर्त्तते। अवृतत् अवर्त्तिष्ट वर्त्स्यति वर्त्तिष्यते। क्त्वा वेट्।
वृत संभक्तौ, वरणे च दिवा० आत्म० सक० सेट्। वृत्यते अवर्त्तिष्ट। क्त्वा वेट्।
वृत * त्रि० वृ-क्त। प्रार्थिते, कर्मादौ प्रार्थनादिना कृतनियोगे च।
वृति * स्त्री० वृ-क्तिन्। वेष्टने (वेड़ा) "वृतिञ्च तत्र कुर्वीत" इति स्मृतिः।
वृतिङ्कर * पु० वृतिङ्करोति कृ अच्। विकङ्कते (वइचि)।
वृत्त * न० वृत-भावे क्त। "गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः। प्रवर्त्तनं हितानाञ्च तत् सर्वं वृत्तमुच्यते" इत्युक्ते चरित्रे, पद्यभेदे, वृत्तौ च। वृत-कर्त्तरि क्त। अतीते, दृढे, वर्त्तुले, अधीते, मृते, जाते च त्रि०। कूर्मे पु०।
वृत्तगन्धि * न० वृत्तस्य पद्यभेदस्य इव गन्धो लेशोऽत्र इत् समा०। "भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्। वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्" इत्युक्ते गद्यभेदे।
वृत्ततण्डुल * पु० वृत्तो वर्त्तुलस्तण्डुलोऽस्य। यावनाले। [ध्याम्।
वृत्तनिष्पाविका * स्त्री० वृत्ता वर्त्तुला निष्पाविका। नखनिष्पा-
वृत्तपर्णी * स्त्री० वृत्तानि पर्णान्यस्याः ङीष्। महाश्रावणपुष्पिकायाम्, पाठायाञ्च (आकनादि)।
वृत्तपुष्प * पु० वृत्तानि वर्त्तुलानि पुष्पाण्यस्य। शिरीषवृक्षे।
वृत्तफल * न० वृत्तं फलमस्य। मरीचे, दाडिमे, बदरे च। वार्त्ताक्याम्, आमलक्याञ्च स्त्री० टाप्।
वृत्तमल्लिका * स्त्री० वृत्ता मल्लिकेव। श्वेतार्के।
वृत्तबीज * पु० वृत्तानि बीजान्यस्य। भिण्डायाम्। आढक्याम् स्त्री०।
वृत्तस्थ * पु० त्रि० वृत्ते गुरुपूजादौ चरित्रे तिष्ठति स्था-क। गुरुपूजादिचरित्ररते। [सन्देशे च।
वृत्तान्त * पु० वृत्तो जातोऽन्तो निर्णयो यस्मात्। प्रवादे, वाचिक-
वृत्ति * स्त्री० वृत-क्तिन्। वर्त्तने, स्थितौ, विवरणे च। करणे क्तिन्। जीविकायाम्। कौशिकीभारतीसात्त्वत्यारभट्याख्ये रचनाभेदे, वेदान्तोक्ते अन्तःकरणादेः परिणामभेदे च। "बुद्धिवृत्तिचिदाभासौ" इति। "ब्रह्मज्ञाननाशाय वृत्तिर्व्याप्तिः" इति च वे०।
वृत्तिकर्षित * त्रि० वृत्त्या कर्षितः। निःस्वे, अल्पमात्रवृत्तिके च।
वृत्र * पु० वृत-रक्। अन्धकारे, रिपौ, त्वष्टृपुत्रे दानवभेदे, मेघे,

व्याधिघात * पु॰ व्याधिं हन्ति हन अण्। आरग्वधे (सोन्दाल)।
व्याधिहन्तृ * त्रि॰ व्याधिं हन्ति हन-तृच्। वाराहीकन्दे। रोगनाशके
व्याधित * त्रि॰ व्याधिर्जातोऽस्य तार॰ इतच्। व्याधियुक्ते।
व्याधु(धू)त * त्रि॰ वि+आ+धु-धू-वा-क्त। कम्पिते। [वायुभेदे।
व्यान * पु॰ वि+अन-घञ्। देहस्थे सर्वशरीरव्यापके प्राणादिमध्ये
व्यापक * त्रि॰ विशेषेणाप्नोति वि+आप-ण्वुल्। अधिकदेशवृत्तौ, न्यायोक्ते स्वाधिकरणवृत्त्यभावप्रतियोगिनि च पदार्थे। तन्त्रोक्ते सर्वाङ्गसम्बन्धिनि न्यासभेदे च।
व्यापन्न * त्रि॰ वि+आ+पद क्त। मृते, विपद्युक्ते च।
व्यापाद * पु॰ वि+आ+पद-घञ। द्रोहचिन्तने। [चिन्तने च।
व्यापादन * न॰ वि+आ+पद-णिच्-ल्युट्। मारणे, परानिष्ट-
व्यापार * पु॰ वि+आ+पृ-घञ्। "व्यापारो भावना सैवोत्पादना सैव च क्रिया" इत्युक्तायां भावयितुः उत्पादनक्रियायाम्। वणिजो व्यवसाये। [व्यवसायवति। वणिग्जने पु॰।
व्यापारिन् * त्रि॰ व्यापारोऽस्त्यस्य इनि। व्यापारवति कारणादौ
व्यापिन् * त्रि॰ वि+आप-णिनि। व्यापके। विष्णौ पु॰।
व्यापृत * त्रि॰ वि+आ+वृ-क्त। व्यापारयुक्ते। [वह्नेर्व्याप्तो धूमः।
व्याप्त * त्रि॰ वि+आप-क्त। पूर्णे, न्यायोक्ते व्याप्तिमति पदार्थे यथा
व्याप्ति * स्त्री॰ वि+आप क्तिन्। ईश्वरस्य ऐश्वर्य्यभेदे, न्यायमते तदभाववति अविद्यमानत्वरूपे पदार्थे यथा वह्नेरभाववति जलादौ धूमो नास्तीति धूमादौ वह्नेर्व्याप्तिः।
व्याप्य * त्रि॰ वि+आप-ण्यत्। व्याप्ते। अल्पदेशवृत्तौ पदार्थे। अनुमितिसाधने न॰। [कालपरिमाणे।
व्याम * पु॰ वि+अम-घञ्। तिर्य्यक्पार्श्वतोविस्तृतयोर्बाह्वोरन्त-
व्यायत * त्रि॰ वि+आ+यम-क्त। दीर्घे, आयते, दृढे, अतिशये च। भावे क्त। दैर्घ्ये, आयामे च न॰।
व्यायाम * पु॰ वि+आ+यम-घञ्। श्रमे, श्रमसाधने व्यापारे, मल्लानां श्रमकारके व्यापारे, पौरुषे, दुर्गसंस्कारे, विषये, व्यामपरिमाणे च।
व्यायोग * पु॰ वि+आ+युज-घञ्। दृश्यकाव्यभेदे।
व्याल * पु॰ वि+अड-घञ् डस्य लः। सर्पे। हिंस्रपशौ, दुष्टगजे च।
व्यालगन्धा * स्त्री॰ व्यालस्य गन्धो लेशोऽस्याः। काकोल्याम्।
व्यालग्राह * पु॰ व्यालान् सर्पान् गृह्णाति ग्रह-अण्। (सापुडे) सर्पधारिणि। णिनि। अत्रैव। [छायाम्।
व्यालजिह्वा * स्त्री॰ व्यालस्य सर्पस्य जिह्वेव पत्रमस्याः। महासम-
व्यालदंष्ट्र * पु॰ व्यालस्य व्याघ्रस्य दंष्ट्रेव कण्टकमस्य। गोक्षुरे।
व्यालनख * पु॰ व्यालस्य नख इव। गन्धद्रव्यभेदे। व्यालदलोऽप्यत्र।
व्यालपत्रा * स्त्री॰ व्यालस्य पाद इव पत्रमस्याः। इर्वारौ कर्कटीभेदे। [रण्डे। विशेषेण लम्बमाने त्रि॰।
व्यालम्ब * पु॰ विशेषेण आलम्बते वि+आ+लबि-अच्। रक्तै-
व्यालायुध * न॰ व्यालस्य व्याघ्रस्यायुधं नख इव। नखीनामगन्ध-
द्रव्ये। व्यालनखाख्ये गन्धद्रव्ये पु॰।
व्यावक्रोशी * स्त्री॰ वि+अव+क्रुश-णच्। स्वार्थे अण्। परस्परं
व्यावहारी * स्त्री॰ वि+अव+हृ-णच् स्वार्थे अण् ङीष्। परस्पर-
हरणे।
व्यावहासी * स्त्री॰ वि+अव+हस-णच् स्वार्थेऽण्। परस्पर-
व्यावृत्त * त्रि॰ वि+आ+वृत-क्त। वृते, निवृत्ते च "व्यावृत्त
कथाने" इति कुमारः।
व्यावृत्ति * स्त्री॰ वि+आ+वृत-क्तिन्। निवारणे।
व्यास * पु॰ व्यस्यति वेदान् वि+अस-घञ्। पराशरसुते मुनि
समासादिसमानार्थके विग्रहवाक्ये, विस्तारे, गोलवृत्त
मध्यस्थरेखायाम्, "य एवं वाचवेहिमो स ब्रह्मन्! व्यास
इत्युक्ते पुराणपाठके विप्रे च।
व्यासक्त * त्रि॰ वि+आ+सञ्ज-क्त। आसक्ते, तत्परे, संलग्ने च।
व्यासङ्ग * पु॰ वि+आ+सञ्ज-घञ्। कार्य्यान्तरत्यागेनैकत्र
आसक्तौ च।
व्यासिद्ध * त्रि॰ वि+आ+सिध क्त। राजाज्ञादिना क्वे निषिद्ध
व्याहत * त्रि॰ वि+आ+हन क्त। व्याघातयुक्ते।
व्याहार * पु॰ वि+आ+हृ-घञ्। वाक्ये उक्तौ। [मन्त्रभेदे
व्याहृति * स्त्री॰ वि+आ+हृ क्तिन्। उक्तौ भूर्भुवस्स्वरादिषु
व्युत्क्रम * पु॰ वि+उद्+क्रम-घञ्। क्रमवैपरीत्ये, व्यतिक्रमे
व्युत्थान * न॰ वि+उद्+स्था-ल्युट्। विरोधकरणे, स्वातन्त्र्यकरणे
प्रतिरोधने, नृत्यभेदे, विशेषेण उत्थाने च। वि+उद्+स्था
क्तिन्। व्युत्थितिरप्यत्र स्त्री॰।
व्युत्पत्ति * स्त्री॰ वि+उद्+पद-क्तिन्। विशेषेण उत्पत्तौ,
जन्ये शब्दार्थज्ञानादिसम्पाद्ये संस्कारभेदे, शब्दानामर्थ
धकशक्तौ च। [युक्ते पुरुषे
व्युत्पन्न * त्रि॰ वि+उद्+पद क्त। व्युत्पत्तियुक्ते शब्दे, तत्संस्कार
व्युदस्त * त्रि॰ वि+उद्+अस क्त। निराकृते।
व्युदास * पु॰ वि+उद्+अस-घञ्। निराकरणे।
व्युष * त्यागे अद॰ चुरा॰ उभ॰ सक॰ सेट्। व्युषयति ते
व्युष्ट * त्रि॰ वि+उष-क्त। वा इडभावः। दग्धे। पर्युषिते,
च। फले, दिवसे च न॰।
व्युष्टि * स्त्री॰ वि+उष-क्तिन्। समृद्धौ, स्तुतौ, फले च।
व्यस * त्यागे दिवा॰ पर॰ सक॰ सेट्। व्यस्यति अव्यसत्
व्यूढ * त्रि॰ वि+वह-क्त। निवेशनविशेषेण स्थिते सैन्यादौ "व्यू
द्रुपदपुत्रेण" इति गीता। संहते "व्यूढोरस्को वृषस्कन्धः"
रघुः। प्रयुक्ते, परिहिते, विवाहिते च "व्यूढा काचन
इति प्रबोधचन्द्रोदयः।
व्यूढकङ्कट * त्रि॰ व्यूढः परिहितः कङ्कटः वर्म येन। सन्नद्धकवचे।
व्यूत * त्रि॰ वि+वे-क्त। तन्तुभिर्ग्रथिते।
व्यूति * स्त्री॰ वि+वे-क्तिन्। वस्त्रादिवपनकर्मणि।

व्यूह * पु॰ वि+ऊह-घञ्। समूहे, निर्माणे च। सम्यक् तर्कें, देहे, सैन्ये, युद्धार्थे सैन्यसन्निवेशनविशेषे च।

व्यूहपार्ष्णि * पु॰ ६त॰। युद्धार्थसंस्थानविशेषेण स्थितसैन्यानां पश्चाद्भागे।

व्ये * स्यूतौ हृतौ च भ्वादि॰ उभ॰ सक॰ अनिट् यजा॰। व्ययति ते [अव्यासीत् अव्यास्त विव्याय विव्यतुः।

व्यो * अव्य॰ व्ये+डो। लौहे, सीसे च।

व्योकार * पु॰ व्यो+कृ-अण्। लौहकारके।

व्योमकेश * पु॰ व्योम्नि केशो यस्य। शिवे महादेवे।

व्योमकेशिन् * पुं॰ व्योमाकारः केशोऽस्त्यस्य इनि। महादेवे।

व्योमचारिन् * पु॰ व्योम्नि चरति चर-णिनि। विहगे, देवे, ग्रहनक्षत्रादौ च।

व्योमधूम * पु॰ व्योम्नि धूम इव नीलत्वात्। मेघे।

व्योमन् * न॰ व्ये-मनिन् पृ॰। आकाशे, (आव) अभ्रके, जले च।

व्योममण्डल * न॰ व्योम मण्डलमिव। मण्डलाकारे आकाशे। ६त॰। पताकायाम्।

व्योममुद्गर * पु॰ व्योम्नो मुद्गर इव आघातहेतुत्वात्। गगनात् अक-[स्मादुत्थिते वायोर्निर्घाते च।

व्योमयान * न॰ ६त॰। आकाशगमनयोग्ये वाहने विमाने।

व्योष * न॰ वि+उष-अच्। शुण्ठीमरिचपिप्पलीरूपे त्रिकटुनि।

व्रज * गतौ भ्वादि॰ पर॰ सक॰ सेट्। व्रजति अव्राजीत्।

व्रज * संस्कारे गतौ च चुरा॰ उभ॰ सक॰ सेट्। "व्राजयति ते अविव्रजत् त।

व्रज * पु॰ व्रज-घञर्थे क। समूहे, गोष्ठे, पथि, मथुरासमीपस्थे देश-[भेदे च।

व्रजनाथ * पु॰ ६त॰। श्रीकृष्णे। व्रजपालादयोऽप्यत्र।

व्रजमोहन * पु॰ व्रजान् व्रजस्थान् मोहयति मुह-णिच्-ल्यु। [श्रीकृष्णे।

व्रजवर * पु॰ व्रजानां वरः प्रार्थनीयः। श्रीकृष्णे।

व्रजवल्लभ * पु॰ ६त॰। श्रीकृष्णे।

व्रजाङ्गना * स्त्री॰ ६त॰। व्रजस्य स्त्रियां गोप्याम्।

व्रज्या * स्त्री॰ व्रज+क्यप्। पर्य्यटने, गमने, जिगीषोर्युद्धार्थप्रयाणे [च।

व्रण * शब्दे भ्वादि॰ पर॰ अक॰ सेट्। व्रणति अव्राणीत् अव्रणीत्।

व्रण * अङ्गक्षतौ अद॰ चुरा॰ उभ॰ सक॰ सेट्। व्रणयति ते अवव्रणत् त।

व्रण * पु॰ न॰ चुरा॰ व्रण+अच्। क्षते।

व्रणकृत् * पु॰ व्रणं करोति कृ-क्विप्। भल्लातके। व्रणकारके त्रि॰।

व्रणद्विष् * पु॰ व्रणं द्वेष्टि द्विष-क्विप्। मांसरोहिकायाम्। व्रणघातके त्रि॰।

व्रणह * पु॰ व्रणं हन्ति हन+ड। एरण्डवृक्षे। गुडूच्याम् स्त्री॰।

व्रणाश * पु॰ व्रणमश्नाति अश-अण्। बोले, गन्धरसे, वटवृक्षे च।

व्रत * न॰ व्रज+घ जस्य तः। धर्मभेदे, पुण्यसाधने उपवासादिनियमभेदे च।

व्रतति(ती) * स्त्री॰ प्रतन-क्तिन् पृ॰ वा ङीप्। लतायां, विस्तारे च।

व्रतसंग्रह * पु॰ ६त॰। व्रतग्रहणाय कृतदीक्षायाम्।

व्रतादेश * पु॰ ६त॰। उपवासादिव्रतोपदेशे।

व्रतिन् * पु॰ व्रतमस्यास्ति इनि। व्रतधारके, यजमाने च।

व्रश्च * छेदे तुदा॰ पर॰ सक॰ वेट्। वृश्चति अव्रश्चीत् अव्राक्षीत्।

व्रश्चन * पु॰ वृश्च्यतेऽनेन व्रश्च-ल्यु। (छेनि) स्वर्णादिच्छेदनार्थे पदार्थे। भावे ल्युट्। छेदने न॰।

व्रात * पु॰ वृ-अतच् पृ॰। समूहे।

व्रातीन * त्रि॰ व्रातेन सङ्घेन जीवति। संघजीविनि।

व्रात्य * पु॰ व्रातात् समूहात् अवति यत्। अव्यवहार्य्ये, संस्कारहीने जातिमात्रोपजीविनि, "अत ऊर्द्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्याः" इति मनुः।

व्रात्यस्तोम * पु॰ व्रात्ययोग्यः स्तोमः। यज्ञभेदे।

व्री * वृतौ क्र्यादि॰ प्वादि॰ पर॰ सक॰ अनिट्। व्रिणाति व्रीणाति अव्रैषीत्।

व्री * गतौ दिवा॰ आत्म॰ सक॰ अनिट्। व्रीयते अव्रेष्ट निष्ठा-[तस्य न। व्रीणः।

व्रीड * चेपे सक॰ लज्जायाम् अक॰ दिवा॰ आत्म॰ सेट्। व्रीड्यते अव्रीडिष्ट।

व्रीड * पु॰ व्रीड-घञ्। लज्जायाम्। अ। तत्रैव स्त्री॰।

व्रीस * वधे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। व्रीसयति ते व्रीसति अविव्रिसत् त अव्रीसीत्।

व्रीहि * पु॰ व्री-हि किच्च। धान्यमात्रे, आशुधान्ये च।

व्रीहिक * त्रि॰ व्रीहिरस्त्यस्य ठन्। धान्यवति। इनि व्रीहीत्यप्यत्र।

व्रीहिकाञ्चन * पु॰ व्रीहिषु काञ्चनं तद्रूपमस्त्यस्य अच्। मसूरे।

व्रीहिपर्णी * स्त्री॰ व्रीहेरिव पर्णान्यस्याः ङीप्। (शालपान) क्षुपभेदे।

व्रीहिमय * पु॰ व्रीहिप्रचुरः मयट्। व्रीहिनिर्मिते हविर्द्रव्य चर्वादौ।

व्रीहिराजिक * पु॰ व्रीहिषु राजते राज-अच् ततः स्वार्थे क। [(काङ्गनि) धान्यभेदे।

व्रुड * संवरणे सक॰ संघाते अक॰ तुदा॰ कुटा॰ पर॰ सेट्। व्रुडति अव्रुडीत्।

व्रूण * वधे वा चुरा॰ उभ॰ पक्षे भ्वादि॰ पर॰ सक॰ सेट्। व्रूणयति [ते अवुव्रूणत् त व्रूणति अव्रूणीत्।

व्रैहेय * त्रि॰ व्रीहीणां भवनं क्षेत्रं ढञ्। व्रीहिभवनयोग्ये क्षेत्रे।

व्ली * गतौ वरणे च क्र्यादि॰ प्वादि॰ पर॰ सक॰ अनिट्। व्लीनाति व्लिनाति अव्लैषीत्।

श

श * न॰ शो-ड। मङ्गले। महादेवे, शस्त्रे च पु॰।

शंयु * त्रि॰ शमस्त्यस्य शम्+युस्। शुभान्विते।

शंव * त्रि॰ शमस्त्यस्य शम्+व। शुभयुक्ते, मुसलादिलौहे, वज्रे च [पु॰।

शंवर * न॰ शं वृणोति शम्+वृ-अच्। जले।

शंसा * स्त्री॰ शन्स-अ। स्तवे, वाञ्छायां, प्रशंसायाम्।

शक्रपर्याय • पु० शक्रस्य पर्यायो नाम यस्य आक०। कुटजवृक्षे। ६त०। इन्द्रस्य वाचकशब्दे।

शक्रपादप • पु० ६त०। देवदारुवृक्षे। [स्वार्थे कन् [illegible]।

शक्रपुष्पी • स्त्री० शक्रस्येव पुष्पमस्याः ङीप्। अग्निशिखावृक्षे।

शक्रभवन • न० ६त०। स्वर्गे। शक्रावासादयोऽप्यत्र।

शक्रभुवा • स्त्री० शक्रस्य भुवि भवति भू-क्विप्। इन्द्रवारुण्याम्।

शक्रमाता • स्त्री० शक्रस्य मातेव। भार्ग्याम्। ६त०। इन्द्रजनन्याम्।

शक्रमूर्द्धन् • पु० शक्रस्येव शिखावान् मूर्द्धा यस्य। वल्मीके। ६त०। इन्द्रमस्तके। शक्रशिरःप्रभृतयोऽप्यत्र।

शक्रवल्ली • स्त्री० शक्रप्रिया वल्ली। इन्द्रवारुण्याम्। [णादयोऽप्यत्र।

शक्रवाहन • पु० शक्रं वाहयति वह+णिच्-ल्यु। मेघे। इन्द्रवाह-

शक्रबीज • न० शक्रस्य कुटजस्य बीजम्। इन्द्रयवे।

शक्रशाखिन् • पु० शक्रशाखकः शाखी। कुटजवृक्षे।

शक्रसारथि • पु० ६त०। इन्द्रसारथौ मातलौ।

शक्रसुत • पु० शक्रस्य सुतः। वालिनामके वानरराजे अर्जुने च।

शक्रसुधा • स्त्री० शक्रस्य सुधेव। शल्लक्याम्।

शक्रसृष्टा • स्त्री० ६त०। हरीतक्याम्।

शक्राख्य • पु० शक्रस्येवाख्या यस्य। पेचके। [illegible]।

शक्राणी • स्त्री० शक्रस्य पत्नी ङीप् आनुक् च। पुलोमजायामि-

शक्राशन • न० शक्रेणाश्यते अश-ल्युट्। भङ्गायाम्।

शक्राशन • पु० शक्रं यवमाश्नाति अश-ल्यु। कुटजवृक्षे।

शक्रोत्थान • न० शक्रस्य तदृध्वजस्य उत्थानम्। शक्रध्वजस्योत्था- नदुत्पत्तिमिते उत्सवे च। ६त०। शक्रोत्सवोऽप्यत्र।

शङ्कर • पु० शं करोति कृ-अच्। महादेवे। चमत्कारे [त्रि०] शिवपत्न्यां स्त्री० ङीप्। [त्राम्। कर्पूरे।

शङ्करावास • पु० ६त०। कैलासाख्ये। इन्द्रनदावास इव शुभ्र

शङ्का • स्त्री० शकि-अ। त्रासे, वितर्के, संशये च। [कि ते च।

शङ्कित • त्रि० शङ्का जाताऽस्य तार० इतच्। भीते, सन्दिग्धे, [त्र-

शङ्कु • पु० शकि-उन्। अस्त्रे, मत्स्यभेदे, कामदेवे, कीलके, दश- कोटिसंख्यायां, नखदाने, महादेवे, कलुषे, पलाशदलस्थिते, मेढ्रे, ज्योतिषशास्त्रोक्ते, छायापरिमाणार्थे काष्ठादिनिर्मिते "शङ्कोश्छाया [illegible]" [illegible] कीलभेदे च।

शङ्कुकर्ण • पु० शङ्कुरिव कर्णावस्य। गर्दभे।

शङ्कुवृक्ष • पु० [illegible]। [illegible]।

शङ्कुला • स्त्री० [illegible]। [illegible] भेदे (काँति) "शङ्कुला [illegible]" [illegible]।

शङ्ख • पु० न० [illegible]। [illegible] [illegible]।

शङ्खक • न० [illegible]।

शङ्खकार • पु० शङ्खनिर्मितं वलयाकारं पदार्थं करोति कृ-अण्। वर्णसङ्करजातिभेदे (शाँखारी)।

शङ्खचूर्ण • न० ६त०। शङ्खजाते चूर्णे।

शङ्खद्राविन् • पु० शङ्खं द्रावयति द्रु णिच्-णिनि। अम्लवेतसे।

शङ्खधरा • स्त्री० धृ-अच् ६त०। हिलमोचिकायाम्।

शङ्खध्म • पु० शङ्खं धमति ध्मा-क। शङ्खवादके। स्त्रियां टाप्। शङ्खध्मा इत्यप्यत्र। [स्त्रियां ङीप्।

शङ्खनख • पु० शङ्खस्य नख इव। क्षुद्रशङ्खे (शामुक) [illegible]

शङ्खपुष्पी • स्त्री० शङ्ख इव पुष्पमस्याः ङीप्। (डाकुनी) वृक्षे।

शङ्खभृत् • पु० शङ्खं बिभर्ति भृ+क्विप् तुक् च। विष्णौ।

शङ्खमुख • पु० शङ्ख इव मुखमस्य। कुम्भीरे।

शङ्खिका • स्त्री० शङ्खोऽस्त्यस्याः ठन्। (चोरकाँटा) क्षुपभेदे।

शङ्खिन् • पु० शङ्ख+अस्त्यर्थे इनि। विष्णौ, समुद्रे च।

शङ्खिनी • स्त्री० शङ्खोऽस्त्यस्याः इनि। [illegible], [illegible], [illegible], उपदेवताभेदे (शाँखचुन्नी), [illegible] स्त्रियाञ्च।

शङ्खिनीफल • पु० [illegible]। [illegible]।

शङ्खिनीवास • पु० ६त०। [illegible]।

शच • गतौ भ्वा० आत्म० सक० सेट् इदित्। शञ्चते, शशञ्चे।

शच • व्यक्तायां वाचि भ्वा० आत्म० सक० सेट्। शचते, शेचे।

शचि(ची) • स्त्री० शच वच वा इन्। [illegible]।

शचीपति • पु० ६त०। इन्द्रे। शचीवल्लभादयोऽप्यत्र। [illegible]

[illegible]

शम्भल * पु० शर्म्म कल्याणदायकं तीर्थं लाति ला+क। ग्रामभेदे यत्र कल्की भविष्यति तस्मिन्। कुट्टन्यां स्त्री० गौरा० ङीप्।
शम्भु * पु० शम्+भू डु। महादेवे। ब्रह्मणि, अर्हे, विष्णौ, सिद्धे च।
श्येत * पु० श्यै-इतच्। शुक्लवर्णे। तद्वति त्रि० स्त्रियां ङीप् तस्य नश्च।
श्येन * पु० श्यै+इनन्। पक्षिभेदे (बाज), पाण्डुवर्णे च। तद्वति त्रि०।
श्येनघण्टा * स्त्री० श्येना घण्टेव। दन्तीवृक्षे।
श्यै * गतौ भ्वादि० आत्म० सक० अनिट्। श्यायते अश्यास्त।
श्येनम्पाता * स्त्री० श्येनस्य पातो यत्र कप् मुम् च। मृगयायाम्।
श्यो(शो)नाक * पु० श्यै-ना(णा)क। (सोना) वृक्षभेदे। [ङ्किष्ट।
श्रकि * सर्पणे भ्वादि० आत्म० सक० सेट् इदित्। श्रङ्कते अश्र-
श्रगि * गतौ भ्वादि० पर० सक० सेट् इदित्। श्रङ्गति अश्रङ्गीत्।
श्रण * दाने भ्वादि० पर० सक० सेट्। श्रणति अश्राणीत् अश्र-णीत्। घटादि० श्रणयति।
श्रण * दाने चुरा० उभ० सक० सेट्। श्राणयति ते अशिश्रणत् त।
श्रत् * अव्य० श्रो-डति। श्रद्धायाम्। [अशिश्रथत् त।
श्रथ * यत्ने अक० प्रतिहर्षे सक० चुरा० उभ० सेट्। श्राथयति ते
श्रथ * दौर्बल्ये अद० चुरा० उभ० अक० सेट्। श्रथयति ते अश-श्रथत् त।
श्रथ * वधे भ्वादि० पर० सक० सेट्। श्रथति अश्रथीत् अश्राथीत्।
श्रथ * बन्धे मोक्षे वधे च वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। श्राथयति ते श्रथति अशिश्रथत् त अश्रथीत् अश्राथीत्।
श्रथि * शैथिल्ये अक० तत्करणे सक० भ्वादि० आत्म० सेट् इदित्। श्रन्थते अश्रन्थिष्ट।
श्रथन * न० श्रथ-ल्युट्। वधे, यत्ने, प्रतिहर्षे च।
श्रद्धा * स्त्री० श्रत्-धा-अङ्। आदरे, गुरुवेदान्तशास्त्रादिषु विश्वासे, स्पृहायां, शुद्धौ, चित्तप्रसादे, "प्रत्ययो धर्मकार्येषु सा श्रद्धेत्य-भिधीयते" इति स्मृत्युक्ते धर्मकार्येषु प्रत्यये च। [त्रि०।
श्रद्धालु * स्त्री० श्रद्धा+आलुच्। स्पृहावत्यां स्त्रियाम्। श्रद्धायुक्ते
श्रन्थ * प्रयत्ने वधे च वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। श्रन्थयति ते श्रन्थति अशश्रन्थत् त। अश्रन्थीत्। [न्थीत्।
श्रन्थ * मोचने प्रतिहर्षे च क्र्यादि० पर० सक० सेट्। श्रथ्नाति अश्र-
श्रन्थन * न० श्रन्थ-ल्युट्। यत्ने।
श्रपित * त्रि० श्रा-क्त-णिच् पुक् ह्रस्वश्च। पक्वे।
श्रम * तपसि आयासे खेदे च अक० भ्वादि० शमादि० पर० सेट् क्त्वा वेट्। श्राम्यति अश्रमत् अश्रमीत्। श्रान्त्वा श्रमित्वा।
श्रम * पु० श्रम-घञ् न वृद्धिः। तपसि, खेदे, आयासे, शस्त्राभ्यासे च।

श्रमण * पु० श्रम-युच्। यतिभेदे। भिक्षाजीविनि त्रि०। जटामांस्यां, मुण्डीर्यां, शबरीभेदे, सुदर्शनायां स्त्रियां च स्त्री०।
श्रमिन् * त्रि० श्रम-इनि। श्रमयुक्ते।
श्रम्भ * प्रमादे भ्वादि० आत्म० अक० सेट्। श्रम्भते अश्रम्भिष्ट।
श्रय * पु० श्रि-अच्। आश्रये। ल्युट्। तत्रैव न०।
श्रव * पु० शृणोत्यनेन श्रु-अप्। कर्णे, ख्यातौ च।
श्रवण * न० शृणोत्यनेन श्रु-ल्युट्। कर्णे शब्दग्राहकेन्द्रियभेदे। भावे ल्युट्। श्रुतौ। अश्विन्यादिषु द्वाविंशे नक्षत्रे पु० स्त्री० स्त्रीत्व-मपि "धनार्कपाते श्रवणं यदि स्यात्" इति स्मृतिः। मुण्डरिका-वृक्षे स्त्री०।
श्रवणद्वादशी * स्त्री० श्रवणेन युक्ता द्वादशी शाक०। "मासि भाद्र-पदे शुक्ले द्वादशी श्रवणान्विता" इत्युक्तायां भाद्रशुक्लद्वादश्याम्।
श्रवणशीर्षिका * स्त्री० श्रवणमिव शीर्षमस्याः कप् अत इत्वम्। श्रावणीवृक्षे।
श्रविष्ठा * स्त्री० श्रूयते श्रु-अप् श्रवः प्रसिद्धिरस्त्यस्याः मतुप् अति-शयेन श्रववती इष्ठन् मतुपो लुक्। धनिष्ठानक्षत्रे।
श्रविष्ठाज * पु० श्रविष्ठानक्षत्रे जायते जन-ड। बुधग्रहे।
श्रवस् * न० श्रूयतेऽनेन श्रु-असि। कर्णे। कर्मणि असि। कीर्त्तौ।
श्रा * विक्लृतौ अदा० पर० अनिट्। श्राति अश्रासीत्। [श्रपयति।
श्रा * पाके अदा० पर० सक० अनिट् घटा०। श्राति अश्रासीत्
श्राण * त्रि० श्रा-क्त। पक्वे। यवाग्वां स्त्री०।
श्राद्ध * न० श्रद्धा-हेतुत्वेनास्त्यस्य अण्। "श्रद्धया दीयते यस्मात् श्राद्धं तेन निगद्यते" इत्युक्ते पित्रादिभ्यः श्रद्धया देये द्रव्ये। अस्त्यर्थे अण्। श्रद्धायुक्ते त्रि०। [च।
श्राद्धदेव * पु० श्राद्धेऽर्ह्याणां पितॄणां देवः शाक०। यमे, मनुभेदे
श्राद्धदेवता * स्त्री० श्राद्धे देवता त्यक्तद्रव्यस्योद्देश्या। "पितरः श्राद्ध-देवताः" इति श्रुत्युक्तेषु पितृषु।
श्राद्धशाक * न० श्राद्धयोग्यं शाकम्। कालशाके।
श्राद्धिक * त्रि० श्राद्धे देयं श्राद्धं तद्द्रव्यं भक्ष्यत्वेनास्त्यस्य वा ठन्। श्राद्धदेये भक्ष्ये, श्राद्धदेयद्रव्यभोक्तरि च। [भोक्तरि।
श्राद्धिन् * त्रि० श्राद्धं तद्द्रव्यं भक्ष्यत्वेनास्त्यस्य इनि। श्राद्धदेयद्रव्य-
श्रान्त * त्रि० श्रम-क्त। श्रमयुक्ते, शान्ते, जितेन्द्रिये च।
श्रान्तसंवाह * न० श्रान्तस्य श्रमस्य संवाहः दूरीकरणम्। पादा-घनादिना श्रमनिवारणे। [श्रामत् त।
श्राम * मन्त्रणे अद० चुरा० उभ० सक० सेट्। श्रामयति ते अश-
श्रावण * पु० श्रवणेन युक्ता पौर्णमासी श्रावणी साऽस्मिन् मासे अण्। वैशाखादिषु पञ्चमे चान्द्रे मासे, उपचारात् कर्कटस्थरविके सौरमासे, पाषण्डे च। श्रवणेन कर्णेन निर्वृत्तः अण्। कर्णजन्ये प्रत्यक्षभेदे। श्रवणनक्षत्रेण युक्ता पौर्णमासी अण्। चान्द्रश्रावण-मासीयपौर्णमास्यां स्त्री० ङीप्। (मुलकुडि) वृक्षभेदे च।
श्रावणिक * पु० श्रावणी श्रवणनक्षत्रयुक्ता पूर्णिमाऽस्त्यस्मिन् मासे

श्रीहस्तिनी * स्त्री० श्रीयुक्ता हस्तिनी। (हातिशुडा) क्षुपभेदे।
श्रु * गतौ भ्वादि० पर० सक० अनिट्। श्रवति अश्रौषीत्।
श्रु * श्रवणे स्वादि० पर० सक० अनिट्। शृणोति अश्रौषीत्।
श्रु(स्रु)घ्निका * स्त्री० श्रु(स्रु)घ्न देशभेदः कारणत्वेनास्त्यस्य ठन्। सर्जिकाक्षारे। [भट्टि। श्रवणेन गृहीते, प्रसिद्धे च त्रि०।
श्रुत * न० श्रूयते श्रु-क्त। शास्त्रे, तज्ज्ञाने च "श्रुतान्वितः" इति
श्रुतकीर्त्ति * स्त्री०। कुशध्वजकन्यायां शत्रुघ्नपत्न्याम्। श्रुता विख्याता कीर्त्तिरस्य। विख्यातयशसि त्रि०।
श्रुतदेवी * स्त्री० श्रुतस्य शास्त्रस्य देवी। सरस्वत्याम्।
श्रुतबोध * पु० श्रुतमात्रं बोधयति बुध-णिच्-अच्। कालिदासकृते छन्दोग्रन्थभेदे।
श्रुतश्रवस् * पु० श्रुतं श्रवो यशोऽस्य। शिशुपालपितरि "निर्वर्त्तितेऽरिः क्रियया स श्रुतश्रवसः सुतः" इति माघः।
श्रुति * स्त्री० श्रु-क्तिन्। कर्णे, श्रवणेन्द्रियजन्ये ज्ञाने, वेदे च। [illegible]शास्त्रोक्ते त्रिभुजक्षेत्रादौ, भुजकोट्योः मध्यस्थरेखाभेदे च।
श्रुतिकटु * पु० श्रुतौ श्रवणे कटुः कठोरः। अलङ्कारोक्ते कठोरशब्दविशेषरूपे काव्यदोषभेदे। [स्मृतिशास्त्रे।
श्रुतिजीविका * स्त्री० श्रुतिं जीवयति मूलतयानुसरति जीव-ण्वुल्।
श्रुतिधर * त्रि० श्रुत्या श्रवणमात्रेण धरति धारयति धृ अच्। श्रवणमात्रेण धारणायुक्ते।
श्रुतिमूल * न० श्रुतिरेव मूलं धर्मप्रामाण्ये कारणम्। वेदरूपे धर्मबोधकप्रमाणे। ६त०। यज्ञादौ, वेदशास्त्रबोधिते धर्मादौ च। ६त०। कर्णमूले। [न। वेदपाठहीने, बधिरे च।
श्रुतिवर्जित * त्रि० श्रुत्या वेदाध्ययनेन कर्णेन वा वर्जितः हीनः।
श्रुतिवेध * पु० श्रुतेः कर्णस्य वेधो यत्र। कर्णवेधाख्ये संस्कारभेदे।
श्रुतिस्फोटा * स्त्री० श्रुताविव पत्रे स्फोटा यस्याः। कर्णस्फोटा-लतायाम्। [रोक्ते शब्दालङ्कारभेदे।
श्रुत्यनुप्रास * पु० श्रूयते इति श्रुतिः शब्दस्तस्यानुप्रासः। अलङ्का-
श्रुत्युक्त * त्रि० श्रुतौ वेदे उक्तः विहितः। वेदविहिते धर्मादौ।
श्रु(स्रु)वा * स्त्री० श्रु(स्रु) क। स्रुचायां यज्ञपात्रभेदे।
श्रु(स्रु)वावृक्ष * पु० श्रु(स्रु)वायाः वृक्षः। (वइँचि) विकङ्कतवृक्षे।
श्रेढी * स्त्री० श्रेढ्यै राशीकरणाय ढौकते ढौक+ड पृ० गौरा० ङीष्। सजातीयद्रव्याणां मिश्रकरणाय यड्यास्त्रोक्ते गणनाप्रकारभेदे। [छन्दोभेदे।
श्रेष्ठिव्यवहार * पु० श्रेष्ठी व्यवहारः। [illegible]
श्रेणि(णी) * स्त्री० श्रि-णि वा ङीप्। हिङ्गुलिकायां पङ्क्तौ।
श्रेयस् * न० अतिशयेन प्रशस्यम् ईयसुन् श्रादेशः। धर्मे, मोक्षे शुभे च। अतिप्रशस्ते त्रि०। स्त्रियां ङीप्। सा च हरीतक्यां, पाठायां, गजपिप्पल्यां, रास्नायाञ्च।
श्रेष्ठ * पु० अतिशयेन प्रशस्यः इष्ठन् श्रादेशः। कुबेरे, नृपे, विष्णौ, द्विजे च। गोदुग्धे न०। अत्युत्कृष्टे त्रि०। स्त्रियां टाप्। स्थल-
याञ्च स्त्री०।
श्रेष्ठकाष्ठ * पु० श्रेष्ठं काष्ठमस्य। शाकवृक्षे (सेगुन)।
श्रेष्ठाम्ल * न० श्रेष्ठमम्लमस्य। वृक्षाम्ले।
श्रेष्ठिन् * पु० श्रेष्ठं धनादिकमस्त्यस्य इनि। शिल्पिवणिजां श्रेष्ठे "न हि श्रेष्ठिचत्वरे प्रतिवसति" इति मृच्छकटिकटीका।
श्रै * स्वेदे भ्वादि० पर० अक० अनिट्। श्रायति अश्रासीत्। णिच् श्रपि घटादि० श्रपयति।
श्रोण * पु० श्रोण+अच्। पङ्गौ। काञ्जिके स्त्री०। [अश्रोणीत्।
श्रोण * सङ्घाते भ्वादि० पर० अक० सेट् ऋदित् न ह्रस्वः। श्रोणति
श्रोणि(णी) * स्त्री० श्रोण इन् वा ङीप्। कट्याम्, पथि च। [पार्श्वे।
श्रोणिफलक * न० श्रोणिः फलकमिव। उपमितसमासः। ६त०। कटि-
श्रोणिसूत्र * न० श्रोण्यां स्थितं सूत्रम्। श्रोणिस्थे खड्गादिबन्धनसूत्रे।
श्रोतस् न० श्रु-असुन् तुट् च। कर्णे, नदीवेगे, इन्द्रिये च।
श्रोत्र * न० श्रूयतेऽनेन श्रु+ष्ट्रन्। शब्दज्ञानसाधने कर्णरूपे इन्द्रिये।
श्रोत्रिय * पु० छन्दो वेदमधीते वेत्ति वा छन्दस्+घन्। वेदाध्यायिमात्रे, "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" इत्युक्ते विप्रे च।
श्रौत * त्रि० श्रुतौ विहितम् अण्। वेदविहिते धर्मादौ "श्रौतं कर्म स्वयं कुर्यात्" इति स्मृतिः। गार्हपत्याहवनीयदक्षिणाग्निषु पु०।
श्रौत्र * न० श्रोत्र स्वार्थे अण्। कर्णे। श्रोत्रियस्य भावः कर्म वा अण्। वैदिकस्य भावे "श्रौत्रं छान्दसत्वे" इति सिद्धान्तकौ०।
श्रौषट् * अव्य० श्रु-डौषटि। यज्ञादौ हविर्दाने।
श्वच * गत्यां भ्वादि० आत्म० सक० सेट् इदित्। श्वञ्चते अश्वञ्चिष्ट।
श्लक्ष्ण * त्रि० श्लिष+क्स्न नि०। अल्पे, चिक्कणे, मौने च।
श्लक्ष्णत्वच् * पु० श्लक्ष्णा त्वगस्य। [illegible]
श्लथ * गतौ भ्वादि० पर० सक० सेट् इदित्। श्लथति अश्लथीत्।
श्लथ * दौर्बल्ये चुरा० उभ० अक० सेट्। श्लथयति ते अशश्लथत् त।
श्लथ * पु० श्लथ अच्। शिथिलशरीरे, शिथिले, दुर्बले च।
श्लाघ * श्लाघायां भ्वादि० आत्म० सक० सेट्। श्लाघते अश्लाघिष्ट। [illegible]
श्लाघ * [illegible]
श्लाघा * स्त्री० श्लाघ अ [illegible] प्रशंसायाम्, [illegible] च। [illegible]
श्लाघ्य * त्रि० श्लाघ ण्यत्। [illegible]
श्लिष * दाहे भ्वा० पर० सक० सेट्। [illegible]
श्लिष * आलिङ्गने दिवा० पर० सक० अनिट्। [illegible]
श्लिष * [illegible] चुरा० उभ० सक० सेट्। [illegible]

• पु० श्वित-अच् घञ् वा। द्वीपभेदे, पर्वतभेदे, कपर्दके, शुक्र-
हे, शङ्खे, शुभ्राभ्रे, जीरके, शुक्लवर्णे च। तद्वति त्रि०। रौप्ये
०। स्वार्थे कन्। रौप्ये न०। वराटके पु०।
कण्टकारी • स्त्री० कर्म०। शुभ्रवर्णकण्टकारिकायाम्।
कन्दा • स्त्री० श्वेतः कन्दोऽस्याः। अतिविषायाम् (आतइच)।
कुञ्जर • पु० कर्म०। ऐरावतगजे, श्वेतगजमात्रे च। श्वेत-
गजादयोऽप्यत्र।
कुश • पु० कर्म०। शुभ्रवर्णे कुशभेदे।
केतु • पु० कर्म०। केतुग्रहभेदे, सामवेदप्रसिद्धे ऋषिभेदे च।
केश • पु० श्वेतः केश इव यस्य। रक्तशिग्रौ। शुक्लवर्णकेशवति
हद्धे त्रि०। कर्म०। शुक्ले केशे पु०।
खदिर • पु० कर्म०। शुक्ले खदिरभेदे।
गरुत् • पु० श्वेतौ गरुतावस्य। हंसे। शुक्लपक्षयुक्ते त्रि०।
गुञ्जा • स्त्री० कर्म०। शुभ्रगुञ्जायां पु०। अदन्तोऽप्यत्र।
चिल्ली • स्त्री० कर्म०। शाकभेदे (शादाचिहड़)।
च्छद • पु० श्वेतः छदः पक्षोऽस्य। हंसे। शुक्लपक्षयुक्ते त्रि०।
जीरक • पु० कर्म०। शुक्लजीरके। [चारभेदे।
टङ्कण • न० कर्म०। शुक्लटङ्कणे मालतीमदीतीरमध्यवि
दूर्वा • स्त्री० कर्म०। शुभ्रदूर्वायाम्।
द्वीप • पु० कर्म०। वैकुण्ठाख्यविष्णुधाम्नि, द्वीपभेदे च।
धातु • पु० कर्म०। खटिकायाम्, शुक्लवर्णधातुद्रव्ये च।
धामन् • पु० श्वेतं धाम यस्य। चन्द्रे, कर्पूरे, समुद्रफेने च।
श्वेतकरादयोऽप्यत्र।
पक्ष • पु० श्वेतं पक्षं पक्षोऽस्य। हंसे। शुक्लपक्षयुक्ते त्रि०।
पद्म • न० कर्म०। सितकमले।
पर्णास • पु० कर्म०। शुभ्रतुलस्याम्।
पाटला • स्त्री० कर्म०। शुक्लपाटलावृक्षे (शादापारुल)।
पिङ्गल • पु० देहेन श्वेतः जटया पिङ्गलः वर्णो वर्णनेति स०।
सिंहे।
पिण्डीतक • पु० कर्म०। महापिण्डीतकवृक्षे।
पुष्प • पु० श्वेतं पुष्पमस्य। सिन्दुवारवृक्षे। शुक्लवर्णपुष्पयुक्ते
त्रि०। कर्म०। शुभ्रे पुष्पे न०। संज्ञायां कन्। शुक्लकरवीरे
पु०। नागदन्त्यां, कोषातक्यां, शणीशिरो च स्त्री०। [वृक्षे।
पुष्पिका • स्त्री० श्वेतं पुष्पमस्याः कप् अत इत्वम्। महाशण-
भण्टा • स्त्री० कर्म०। श्वेतापराजितायाम्।
मन्दार • पु० कर्म०। शुक्लमन्दारे।
मरिच • न० कर्म०। शोभाञ्जनबीजे, शुक्लमरिचे च। [त्रि०।
रक्त • पु० श्वेतो रक्तः वर्णो वर्णनेति स०। पाटलवर्णे। तद्वति
रञ्जन • न० श्वेतं रौप्यं रञ्जयत्यनेन रञ्ज-ल्युट्। सीसके।
रथ • पु० श्वेतो रथो यस्य। शुक्रग्रहे। कर्म०। शुभ्रे रथे।
श्वेतलोध्र • पु० कर्म०। पट्टिकालोध्रे।

श्वेतवचा • स्त्री० श्वेता वचेव। अतिविषायाम् (आतइच)।
श्वेतवल्कल • पु० श्वेतं वल्कलमस्य। उडुम्बरवृक्षे।
श्वेतवाजिन् • पु० श्वेतो वाजी यस्य। चन्द्रे, अर्जुने च। श्वेता-
श्वादयोऽप्यत्र। [त्रि०।
श्वेतवासस् • पु० श्वेतं वासोऽस्य। सन्न्यासिभेदे। शुक्लवस्त्रयुक्ते
श्वेतवाह् • पु० श्वेतेन श्वेताश्वेन उह्यते वह-णिच्। इन्द्रे, अर्जुने,
चन्द्रे च।
श्वेतवाहन • पु० श्वेतं वाहनमस्य। चन्द्रे, इन्द्रे, अर्जुने च।
श्वेतवृक्षा • स्त्री० कर्म०। वनतिक्तायाम्।
श्वेतवृक्ष • पु० कर्म०। वरुणवृक्षे।
श्वेतवृन्ती • स्त्री० कर्म०। शुक्लवर्णक्षुद्रवृहत्याम्।
श्वेतशिंशपा • स्त्री० कर्म०। शुक्लशिंशपायाम्।
श्वेतशिग्रु • पु० कर्म०। सितशोभाञ्जने।
श्वेतशृङ्ग • पु० श्वेते शृङ्गेऽस्य। यवे। शुक्लवर्णशृङ्गयुक्ते त्रि०।
श्वेतशूरण • पु० कर्म०। वनशूरणे। [शुक्लभुजगे।
श्वेतसर्प • पु० श्वेतः सन् सर्पति सृप-अच्। वरुणवृक्षे। कर्म०।
श्वेतसर्षप • पु० कर्म०। गौरसर्षपे।
श्वेतसार • पु० श्वेतः सारोऽस्य। शुक्लखदिरे।
श्वेतसुरसा • स्त्री० कर्म०। शुक्लशेफालिकायाम्। [जितायाम्।
श्वेतस्यन्दा • स्त्री० श्वेता सती स्यन्दते स्यन्द-अच्। सितापरा-
श्वेतहय • पु० कर्म०। उच्चैःश्रवसि, सितवर्णयुक्ते हये च।
श्वेता • स्त्री० श्वित+अच्। वराटिकायाम्, काष्ठपाटलायां, शङ्खि-
न्याम्, अतिविषायाम्, सितापराजितायाम्, शुक्लकण्टकार्यां,
पाषाणभेद्याम्, शुभ्रदूर्वायां, वंशरोचनायां, शर्करायां, शिलाव-
ल्कलायाञ्च।
श्वेतार्क • पु० कर्म०। शुक्लवर्णपुष्पके अर्कवृक्षे। [शाके।
श्वेतावर • पु० श्वेतं श्वेतवर्णमावृणोति आ+वृ-अच्। सितावर-
श्वेतेक्षु • पु० कर्म०। शुक्ले इक्षौ।
श्वेतोहो • स्त्री० श्वेतोहः पक्षो ङीप्। इन्द्राण्याम् शच्याम्।
श्वैत्य • श्वेतस्य भावः ष्यञ्। शुक्लवर्णे।
श्वोवसीयस • न० अतिशयेन वसुः प्रशस्तम् वसीयस् नि०। परदिने
भाविकाले प्रशस्ते मङ्गले। तद्वति त्रि०।

ष

ष • पु० षो वा षु० पत्वम्। केशे। गर्भविमोचने, मानवे च। सर्व,
श्रेष्ठे, विज्ञे च त्रि०। [अषगीत्। षगयति।
षग • संवरणे भ्वादि० पर० सक० सेट् घटा० णिचि न वृद्धिः। षगति
षघ • हिंसायां स्वादि० पर० सक० सेट् णिचि न वृद्धिः। षघ्नोति
अषघीत्।
षच • सेचने भ्वादि० आत्म० सक० सेट्। षचते अषचिष्ट।

ष्टोम * क्लेदे दिवा० पर० अक० सेट्। स्तोम्यति। अस्तोमीत्।
ष्टु * स्तुतौ अदा० उभ० सक० अनिट् लिटि सेट्, लुङि पर० वेट्। स्तौति स्तवीति स्तुते इत्यन्ये अस्तावीत् अस्तोष्ट।
ष्टुच * प्रसादे अक० भ्वादि० आत्म० सेट्। स्तोचते अस्तोचिष्ट।
ष्टुप * समुच्छ्राये अद० चुरा० उभ० सक० सेट्। स्तूपयति ते अतुस्तूपत् त।
ष्टूप * उच्छ्राये दिवा० पर० सक० सेट्। स्तूप्यति अस्तूपत्।
ष्टुभ * स्तम्भे अक० स्तम्भने सक० भ्वादि० आत्म० सेट् क्त्वा वेट्। स्तोभते अस्तोभिष्ट।
ष्टृक्ष * गतौ भ्वादि० पर० सक० सेट्। स्तृक्षति अस्तृक्षीत्।
ष्टृह * वधे तुदा० पर० सक० वेट्। स्तृहति अस्तर्हीत् अस्तृक्षत्।
ष्टृंह * वधे तुदा० आत्म० सक० वेट्। स्तृंहति अस्तृंहीत् अस्तृक्षत्। [अस्तर्हिष्ट।
ष्टेप * क्षरणे भ्वादि० आत्म० अक० सेट् षडिति न क्षस्यः। स्तेपते।
ष्टै * मङ्गले सक० ध्वनौ अक० भ्वादि० पर० अनिट्। स्तायति अस्तासीत्।
ष्ट्यै * वेष्टने सक० ध्वनौ अक० भ्वादि० पर० अनिट्। स्त्यायति अस्त्यासीत्। मतान्तरे मृत्यायति। [स्त्यायति अस्त्यासीत्।
ष्ठग * संवरणे भ्वादि० पर० सक० सेट् घटा० णिचि न ह्रस्वः।
ष्ठल * स्थितौ भ्वादि० पर० अक० सेट् ज्वला०। स्थलति अस्थालीत्। [मीत्।
ष्ठस * निरासे दिवा० पर० सक० सेट्। स्थस्यति अस्थासीत् अस्थ-
ष्ठा * गतिनिवृत्तौ भ्वादि० पर० अक० अनिट्। तिष्ठति अस्थात्।
ष्ठिव * निरासे (मुखेन श्लेष्मादेर्वमने) भ्वादि० पर० सक० सेट्। ष्ठीवति अष्ठेवीत्। ष्ठेवनम्। [ष्ठीवति अष्ठीवीत् ष्ठीवनम्।
ष्ठीव * निरासे (श्लेष्मादेर्मुखेन वमने) भ्वादि० पर० सक० सेट्।
ष्ठ्यूत * त्रि० ष्ठिव-क्त। निरस्ते, वान्ते च। [[illegible]।
ष्णस * निरासे दिवा० पर० सक० सेट् क्त्वा वेट् आ घटा०। स्नस्यति
ष्णा * शौचे अदा० पर० अक० अनिट्। स्नाति अस्नासीत्।
ष्णिह * प्रीतौ दिवा० पर० अक० वेट्। स्निह्यति अस्नेहीत्। स्नेहिता स्नेग्धा स्नेढा। [अस्निहत् त।
ष्णिह * स्नेहयुक्तकरणे चुरा० उभ० सक० सेट्। स्नेहयति ते असि-
ष्णु * प्रस्रवे आत्म० उभ० अक० सेट्। स्नौति अस्नावीत् अस्नोष्ट।
ष्णुच * सेवने भ्वादि० आत्म० सक० सेट्। स्नोचते अस्नोचिष्ट।
ष्णुष * अदने दिवा० पर० सक० सेट्। स्नुष्यति अस्नोषीत्।
ष्णुह * उद्गारे दिवा० पर० सक० वेट्। स्नुह्यति अस्नुहत्।
ष्णै * वेष्टे भ्वादि० पर० सक० अनिट्। स्नायति अस्नासीत्। [illegible] अस्नासीत्।
ष्मि * ईषद्धासे भ्वादि० आत्म० अक० अनिट्। स्मयते अस्मेष्ट।
ष्वक्क * गतौ भ्वादि० आत्म० सक० सेट्। ष्वक्कते अष्वक्किष्ट।
ष्वद * आस्वादे संवरणे च चुरा० उभ० सक० सेट्। स्वादयति ते असि-

ष्वदत् त। [दिष्ट।
ष्वद * प्रीतौ वेष्टने च भ्वादि० आत्म० सक० सेट्। स्वदते अस्व-
ष्वञ्ज * आलिङ्गने भ्वादि० आत्म० सक० अनिट्। स्वजते अस्व-ङ्क्त। [अनिट्। स्वपिति अस्वाप्सीत्।
ष्वप * शयने निद्रायाञ्च अदा० स्वपा० अक्षा० पर० अक०
ष्वर्त * गतौ सक० दुःखेन जीवने अक० चुरा० उभ० सेट्। स्वर्तयति ते असस्वर्तत् त।
ष्वष्क * गतौ भ्वादि० आत्म० सक० सेट्। स्वष्कते अस्वष्किष्ट।
ष्विद * मोहे, स्नेहे च अक० मोचने सक० भ्वादि० आत्म० लुङि उभ० सेट्। स्वेदते अस्विदत् अस्वेदिष्ट। [दत्।
ष्विद * गात्रप्रक्षरणे अक० दिवा० पर० अनिट्। स्विद्यति अस्वि-

—

स

स * पु० सो-ड। विष्णौ, सर्पे, ईश्वरे, शिवे च। [वने।
संकेत * पु० सम्+कित-घञ्। [illegible] प्रत्या-
संक्षोभ * पु० सम्+क्षुभ घञ्। चाञ्चल्ये, क्षोभे च।
संग्राहिन् * पु० सम्+ग्रह-णिनि। कुटजवृक्षे। सङ्ग्राहके त्रि०।
संघ * पु० सम्+हन अप् नि०। समूहे, जन्तुसमूहे च। [illegible] संघा-तोऽपि। समूहे, [illegible] च पु०।
संघर्ष * पु० सम्+घृष घञ्। [illegible]।
संज्ञा * स्त्री० सम्+ज्ञा-अ। [illegible]
[illegible]
[illegible]

संयुज् * वि० सम्यक् युनक्ति सम्+युज-क्विन्। गुणाढ्ये, संयुक्ते च।
संयुक्त * वि० सम्+युज-क्त। संयोगवति पदार्थे।
संयुग * न० संयुज्यतेऽत्र सम्+युज-क पृ० जस्य गः। युद्धे।
संयुत * वि० सम्+यु-क्त। संयुक्ते। [सम्बन्धमात्रे च।
संयोग * पु० सम्+युज-घञ्। मेलने, क्रियाजन्ये द्रव्याश्रिते गुणभेदे,
संयोगपृथक्त्व * न० संयोगेन फलसम्बन्धभेदेन पृथक्त्वं नानात्वम् यत्र। एकस्यैव कर्मणो नित्यानित्यत्वप्रतिपादके मीमांसोक्ते न्यायभेदे। [योजने पदार्थे।
संयोजित * वि० सम्+युज णिच् क्त। कृतमेलने पदार्थान्तरेण कृत-
संरम्भ * पु० सम्+रभ-घञ् मुम् च। कोपे, आक्रोशे, उत्साहे, वेगे च "पर्वुदितमंरम्भमिवाम्बुवाहम्" इति कुमार।
संराधन * न० सम्+राध-ल्युट्। सम्यक् सेवने, सम्यक् चिन्तने च।
संराव * पु० सम्+रु-घञ्। शब्दे।
संरूढ * वि० सम्+रुह-क्त। प्ररोढे, अत्यारूढे च।
संरोध * पु० सम्+रुध-घञ्। रोधने, क्षेपे च।
संलग्न * वि० सम्+लग-क्त। मिलिते।
संलय * पु० संलीयते [illegible] सम्+ली-अच्। निद्रायाम्, प्रलये च। [illegible] भाषणे, रहसि कथने च।
संलाप * पु० सम्+लप-घञ्। परस्परकथने, मैत्र्या [illegible]
[illegible] * पु० [illegible] सम्+[illegible]। [illegible], [illegible] च।
[illegible] * अव्य० सम्+[illegible] क्विप् [illegible]। [illegible] [illegible]।
[illegible]

[illegible]

संवाहन * न० सम्+वह-णिच्-ल्युट्। भारादेर्वहने, अङ्गमर्दने च। [हेतुना भयादिना वा जातोत्कण्ठे।
संविग्न * वि० सम्+विज-क्त। उद्विग्ने इष्टवस्तुलाभाय तदर्थं
संवित्ति * स्त्री० सम्+विद क्तिन्। ज्ञाने, प्रतिपत्तौ, बुद्धौ, अङ्गीकारे च।
संविद् * स्त्री० सम्+विद-सम्प० क्विप्। ज्ञाने, प्रतिपत्तौ, बुद्धौ, अङ्गीकारे, समाधौ, नामनि, आचारे, सङ्केते, युद्धे, तोषे च।
संविदा * स्त्री० संविद्यतेऽनया सम्+विद-क्विप्-टाप्। भङ्गायाम् (सिद्धि) "संविदासवयोर्मध्ये संविदेव गरीयसी" इति तन्त्रम्।
संविदातिक्रम * पु० संविदोऽङ्गीकारस्य व्यतिक्रमो यत्र। कृताङ्गीकारस्योल्लङ्घनहेतुके विवादभेदे।
संविदित * वि० सम्+विद-क्त। अङ्गीकृते, सम्यग्ज्ञाते च। [ज्ञ।
संविधान * न० सम्+वि+धा-ल्युट्। उपाये, आयोजने, रचना-
संविषा * स्त्री० संमर्दितं विषं यया धातुकस्य उत्तरपदलोपः। अतिविषायाम् (आतइच्)।
संवीक्षण * न० सम्यग्वीक्ष्यते अन्विष्यते वा सम्+वि+ईक्ष-ल्युट्। इष्टवस्तुनो लाभाय अन्वेषणे, सम्यग्दर्शने च। [च।
संवीत * वि० सम्+व्येञ्-क्त। आवृते, रुद्धे च। सम्+वि+इण-क्त।
संवृत * वि० सम्+वृ-क्त। आवृते, कृतगोपने च "तस्य संवृतमन्त्रस्य" इति रघुः।
संवेग * पु० सम्+विज-घञ्। भयादिना त्वरायाम्, सम्यग्वेगे च।
संवेद * पु० सम्+विद घञ्। ज्ञाने। युच्। संवेदनमप्यत्र पो०।
संवेश * पु० सम्यक् विशत्यत्र सम्+विश-घञ्। निद्रायाम् शय्यां कस्य तस्य निद्रार्थकत्वात्तथात्वम्। तथाच "संविष्टः कुशशयने निशां निनाय" इति रघुः। पीठे च।
संवेशन * न० सम्+विश-णिच् ल्युट्। रतिक्रियायाम्। तत्र निद्रावेशेन तस्याः निद्राहेतुत्वात् तथात्वम्। [illegible]
संव्यान * न० संवीयते सम्+व्येञ्-कर्मणि ल्युट्। उत्तरीये।
संशप्तक * पु० सम्यक् शपथमङ्गीकारो यस्य कप्। प्रतिज्ञाय [illegible] दनिवर्तिनि सैन्ये "संशप्तकानिवेत्" इति रघुः।
संशय * पु० सम्+शी अच्। सन्देहे [illegible] [illegible]। यथा पर्वतो वह्निमान् वा, अयं स्थाणुर्वा पुरुषो वेति। "संशयात्मा विनश्यति" [illegible] इति [illegible]।
संशयस्थ * वि० संशये स्थितं स्था क। संशययुक्ते।
संशयालु * पु० संशयं [illegible] यस्य। [illegible] "[illegible]" इति [illegible]।
[illegible] * वि० [illegible]। [illegible]।
[illegible] * वि० [illegible]। [illegible]।
[illegible] * न० [illegible]। [illegible]।
[illegible] * वि० [illegible]। [illegible]।

संशितव्रत * त्रि॰ संशितं सम्यक् सम्पादितं व्रतमनेन। सम्यक्-
सम्पादितव्रते। [च।
संशुद्धि * स्त्री॰ सम्+शुध-क्तिन्। सम्यक् शोधने, देहादिमार्जने
संश्यान * त्रि॰ सम+श्यै-क्त। शीतादिना सङ्कुचिते।
संश्रय * पु॰ सम्+श्रि-अच्। आश्रये। [पु॰।
संश्रव * पु॰ सम्+श्रु अप्। अङ्गीकारे। घञ्। संश्रावोऽप्यत्र
संश्रुत * त्रि॰ सम्+श्रु क्त। अङ्गीकृते।
संश्लिष्ट * त्रि॰ सम्+श्लिष-क्त। आलिङ्गिते, सम्बद्धे च।
संश्लेष * पु॰ सम्+श्लिष-घञ्। आलिङ्गने, सम्बन्धमात्रे च।
संसक्त * त्रि॰ सम्+सन्ज क्त। मिलिते, सम्बद्धे, समन्ताद् विस्तीर्णे
च "प्रान्तेषु संसक्तनमेरुधूमम्" इति कुमारः।
संसद् * स्त्री॰ संसीदन्त्यस्याम् सम्+सद-आधारे क्विप्। सभायाम्।
संसरण * न॰ सम्+सृ-ल्युट्। अदृष्टनिबद्धदेहस्वीकाररूपे संसारे,
असम्बाधसेनागमने, रणारम्भे, घण्टापथे, सङ्गतौ च।
संसर्ग * पु॰ सम्+सृज-घञ्। सम्बन्धे, विभागानन्तरं "यत्तत्र धनं
तन्मम" इति कृतसमयेन एकत्रावस्थानरूपे सम्बन्धे च।
संसर्गाभाव * पु॰ संसर्गस्य सम्बन्धस्याभावः। ध्वंसप्रागभावात्यन्ता-
भावरूपे भेदभिन्ने अभावे, सम्बन्धाभावे च।
संसर्गिन् * त्रि॰ सम्+सृज-घिणुन्। संसर्गयुक्ते, विभागानन्तरं
"यत् तत्र धनं तन्मम" इति कृतसमयेन एकत्रावस्थानरूपसं-
सर्गयुक्ते भ्रात्रादौ, सम्बद्धे च।
संसार * पु॰ संसरत्यस्मात् सम्+सृ-घञ्। मिथ्याज्ञानजन्यसंस्कार-
रूपवासनायां, देहारम्भकादृष्टभेदे, अदृष्टोपनिबद्धदेहपरि-
ग्रहे च। आधारे घञ्। विश्वे। भावे घञ्। सङ्गतौ।
संसारमार्ग * पु॰ ६त॰। योनिद्वारे तत एव हि बहिर्निर्गमने
मायामुपलेति तस्य तथात्वम्।
संसारिन् * त्रि॰ संसरति अदृष्टभेदेन देहेन संयुज्यते सम्+सृ-
णिनि। शरीराभिमानिनि जीवे।
संसिद्ध * त्रि॰ सम्यक् स्वभावेन वा सिद्धः सम्+सिध क्त। स्वभा-
वसिद्धे, सम्यग्निष्पन्ने च। [प्रकृतौ च।
संसिद्धि * स्त्री॰ सम्+सिध क्तिन्। स्वभावे, मुक्तौ, सम्यग्नि-
संसृति * स्त्री॰ सम्+सृ-क्तिन्। संसारप्रवाहे, सङ्गतौ च।
संसृष्ट * पु॰ सम्+सृज क्त। विभागानन्तरं स्नेहात् पुनः स्वस्व-
धनेषु कृतसंसर्गवति भ्रात्रादौ "संसृष्टस्तु संसृष्टी" इति
स्मृतिः, वमनादिना संशुद्धे, संयुक्ते च। भावे क्त। सम्बन्धे।
संसृष्टिन् * पु॰ संसृष्टमनेन इनि। संसृष्टभ्रात्रादौ। "अन्योऽ-
र्येषु संसृष्टी" इति स्मृतिः।
संस्कर्तृ * पु॰ सम्+कृ तृच् सुट् च। संस्कारकारके, पाचके च।
संस्कार * पु॰ सम्+कृ-घञ् सुट् च। सतो गुणान्तराधानरूपे प्रति-
यत्ने, यथा घटादेर्जलाहरणादि, [illegible]
दर्पणादेर्निर्मलीकरणादिः। स्मृतिहेतौ अनुभवजन्ये भाव-
नाख्यगुणभेदे, पृथिव्यादिचतुष्टयस्थे वेगाख्ये गुणे, यथास्थि-
ततयास्थापनप्रयोजके स्थितिस्थापकाख्ये गुणभेदे, शास्त्राभ्यास-
जन्यव्युत्पत्तौ, व्याकरणोक्तदिशा शब्दानां साधनप्रकारे, विप्रा-
दीनां वैदिककर्माईत्वसाधने गर्भाधानादौ क्रियाकलापे, पाके
च। [ष्युत्पत्तिहीने च। संस्कारहीनादयोऽप्यत्र।
संस्कारवर्जित * त्रि॰ ३त॰। गर्भाधानादिसंस्कारहीने ब्राह्मणादौ,
संस्कृत * त्रि॰ सम्+कृ-क्त सुट् च। कृतसंस्कारे पदार्थे, व्याकर-
णादिलक्षणाधीनसाधनयुक्ते शब्दे, पक्वे, भूषिते, शोधिते च।
संस्तर * पु॰ सम्+स्तृ-अप्। यज्ञे, शय्यायाम्, पल्लवादिरचित-
शय्यायां च "नवपल्लवसंस्तरे यथा" इति कुमारः।
संस्तव * पु॰ सम्+स्तु-अप्। परिचये, सम्यक्स्तुतौ च।
संस्ताव * पु॰ संस्तूयतेऽत्र सम्+स्तु घञ्। यज्ञार्थं संस्तावकविप्राणां
वासभूमौ।
संस्तुत * त्रि॰ सम्+स्तु क्त। परिचिते, सम्यक्स्तुते च।
संस्त्याय * पु॰ सम्+स्त्यै-घञ्। संघाते, निविडसंयोगरूपे सन्नि-
वेशे, विस्तृतौ, गृहे, संस्थाने च।
संस्थ * त्रि॰ सम्+स्था-क। अवस्थिते, मृते च।
संस्था * स्त्री॰ सम्+स्था-अङ्। व्यापकरूपस्थितौ, स्थितौ, नाशे,
यज्ञभेदे, व्यवस्थायां, प्रलये, मारणे, ज्ञाने च।
संस्थान * न॰ सम्+स्था-ल्युट्। चतुष्पथे, आकारे, चत्वरादौ, ग्रह-
कृत योगभेदे, चिह्ने, सन्निवेशे, सम्यक्स्थितौ च।
संस्थित * त्रि॰ सम्+स्था क्त। मृते, सम्यक्स्थिते च।
संस्पर्शा * स्त्री॰ संस्पृशति सम्+स्पृश-अच् टाप्। रजनीगन्धद्रव्ये।
संस्फुट * त्रि॰ सम्+स्फुट-क्त। विकसिते।
संस्फेट * न॰ सम्+स्फिट-घञ्। युद्धे।
संस्फोट * पु॰ सम+स्फुट घञ्। युद्धे।
संहत * त्रि॰ सम्+हन-क्त। दृढे, मिलिते, [illegible] "संह-
तपार्श्वेषाम्" इति [illegible]
संहतल * पु॰ [illegible] [illegible]
[illegible] [illegible]
संहतपुच्छिका * स्त्री॰ [illegible]
संहति * स्त्री॰ सम्+हन-क्तिन्। समूहे, सम्यग्घनने च।
संहनन * न॰ [illegible] सम्+हन-ल्युट्। देहे,
संघाते, दृढे च। [illegible]
संहर्ष * पु॰ सम्यक् हर्षः सम्+हृष घञ्। आनन्दे, [illegible]
संहार * पु॰ सम्+हृ-घञ्। प्रलये, नाशे, [illegible]
[illegible] [illegible]
संहारमुद्रा * स्त्री॰ [illegible]
संहिता * स्त्री॰ सम्यक् हितं [illegible]
[illegible]

द्विधाननरूपे व्यापारे (इसारा), "अस्मात्‌शब्दादयमर्थो बोध्यः, अयं शब्दः अमुमर्थं बोधयतु वा" इत्येवं शब्दनिष्ठे अर्थबोधनाशक्तिविशेषे, प्रियसङ्गमार्थं गुप्तस्थाने च।
सङ्केतित * त्रि॰ सङ्केतो जातोऽस्य तार॰ इतच्। सङ्केतवति शाब्दे अर्थे "मायात् सङ्केतितं योऽर्थमभिधत्ते" इति काव्यप्र॰।
सङ्कोच * पु॰ सम्+कुच-घञ्। बहुविषयकवाक्यस्याल्पविषयकतया व्यवस्थापने, सामान्यशब्दस्य विशेषपरतायाम्, जडीभावे, बोधे, बन्धे च। सम्+कुच-अच्। मत्स्यभेदे पु॰। कुङ्कुमे न॰।
सङ्कोचनी * स्त्री॰ सम्+कुच-ल्यु गौ॰ ङीष्। लज्जालुलतायाम्।
सङ्क्रन्दन * पु॰ सङ्क्रन्दयत्यसुरान् सम्+क्रन्द-णिच्-ल्यु। इन्द्रे। भावे ल्युट्। सम्यक्क्रन्दने न॰।
सङ्क्रम(क्राम) * पु॰ सङ्क्रामत्यनेन सम्+क्रम-घञ् वा वृद्धिः। जलमध्यस्थाने (सांको) "आत्मानं सङ्क्रमं कृत्वा" इति स्मृतिः। भावे घञ्। रव्यादेः राश्यन्तरसञ्चारे च। [न्तरगमने च।
सङ्क्रमण * न॰ सम्+क्रम-ल्युट्। सङ्क्रान्तौ, रव्यादीनां राश्य-
सङ्क्रान्त * त्रि॰ सङ्क्रान्तिरस्यास्ति अच्, सम्+क्रम-क्त वा। सङ्क्रान्तियुक्ते, सङ्क्रमणकर्त्तरि, प्राप्ते, दायरूपेण पित्रमर्जितः आगते स्त्रिया प्राप्तधने च।
सङ्क्रान्ति * स्त्री॰ सम्+क्रम-क्तिन्। सम्यक्क्रमणे, रव्यादीनां राश्यन्तरसञ्चारे च। तत्र विशेषो वाचस्पत्ये।
सङ्ख्य * न॰ संख्यायते परस्परनामोच्चारणं क्रियतेऽत्र सम्+ख्या-अधर्थे क। युद्धे। अङ्। विचारे, बुद्धौ, द्रव्याश्रिते एकत्वादिसंख्यादौ गुणभेदे च स्त्री॰ टाप्।
सङ्ख्यात * त्रि॰ सम्+ख्या-क्त। कृतसंख्ये, गुणिते, सम्यक्ख्याते च।
सङ्ख्यावत् * पु॰ संख्या विचारणा साऽस्त्यस्य मतुप् मस्य वः। पण्डिते। संख्यायुक्ते त्रि॰। [रणार्थे।
सङ्ख्येय * त्रि॰ संख्यायतेऽसौ सम्+ख्या-यत्। गण्ये संख्याक-
सङ्ग * पु॰ सन्ज-घञ्। मिलने, सम्बन्धे, विषयादिरागे च "ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते" इति गीता।
सङ्गत * न॰ सम्+गम भावे क्त। सौहार्दे, सङ्गतौ च। कर्त्तरि क्त। मिलिते त्रि॰।
सङ्गति * स्त्री॰ सम्+गम-क्तिन्। सङ्गमे, मिलने, न्यायोक्ते अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषये, "प्रसङ्गः उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते" इत्युक्ते प्रसङ्गादौ पदार्थे च।
सङ्गम * पु॰ सम्+गम-घञ् न वृद्धिः। सङ्गतौ, स्त्रीपुंसयोः सम्भोगे, नद्यादेर्नद्यादियोगस्थाने च "गङ्गासागरसङ्गमः" इति पुराणम्।
सङ्गर * पु॰ संगीर्य्यते सम्+गॄ-अप्। आपदि, प्रतिज्ञायां, क्रियाकारके, विषे, शमीफले च।
सङ्गव * पु॰ सङ्गता गावो दोहनायात्र काले नि॰। "प्रात कालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु" इति स्मृत्युक्ते प्रातःकालानन्तरं मुहूर्त्तत्रयात्मके कालभेदे।
सङ्गिन् * त्रि॰ सन्ज-घिणुन्। सङ्गयुक्ते। स्त्रियां ङीप्।
सङ्गीत * न॰ सम्+गै-क्त। दर्शनार्थं नाट्यगीतवाद्यत्रिके, तत्प्रतिपादकग्रन्थे च। कर्मणि क्त। सम्यग्गीते त्रि॰।
सङ्गीर्ण * त्रि॰ सम्+गॄ क्त। स्वीकृते। [कत्व सङ्कलने च।
सङ्ग्रह * पु॰ सम्+ग्रह-अप्। सञ्चये, संक्षेपे, बह्वर्थकवाक्यानामे-
सङ्ग्रहणी * स्त्री॰ संहिता ग्रहणी। ग्रहणीरोगभेदे।
सङ्ग्राम * युद्धे अद॰ चुरा॰ उभ॰ सक॰ सेट्। संग्रामयति ते असससंग्रामत् त।
सङ्ग्राम * पु॰ सङ्ग्राम-घञ्। युद्धे।
सङ्ग्रामपटह * पु॰ ६त॰। रणवाद्यभेदे।
सङ्ग्राहिन् * पु॰ सम्यक् गृह्णाति मलम् सम्+ग्रह-णिनि। कुटजवृक्षे। मलावष्टम्भके, संग्रहकारके च त्रि॰।
सङ्घ * पु॰ संघ्नन्त् सर्वम्। सजातीयसमूहे, समूहे च।
सङ्घचारिन् * पु॰ सङ्घीभूय चरति चर-णिनि। मत्स्ये। सङ्घीभूयचारिणि जन्तुमात्रे त्रि॰।
सङ्घजीविन् * पु॰ सङ्घेन जीवति जीव णिनि। सङ्घोपजीविनि।
सङ्घट्ट * पु॰ सम्+घट्ट-घञ्। परस्परसङ्घर्षणे, गठने च।
सङ्घट्टन * न॰ सम्+घट्ट-ल्युट्। मिलने, गठने, रचनायाञ्च। युच्। तत्रैव स्त्री॰। [द्वये (योडखात)।
सङ्घतल * पु॰ संघो संहते मिलिते तले यत्र। संयोजितमतल-
सङ्घपुष्पी * स्त्री॰ संघीभूतानि पुष्पाण्यस्याः ङीप्। धातकीपुष्पाम् (धाइ फुल)।
सङ्घर्ष * पु॰ सम्+घृष्-घञ्। परस्परघर्षणे, स्पर्द्धायाञ्च।
सङ्घशस् * अव्य॰ संघ+वीप्सार्थे शस्। भूरिशः इत्यर्थे।
सङ्घाटिका * स्त्री॰ संघटयति सम्+घट-णिच्-ण्वुल्। युग्मे, जलकण्टके, घ्राणे च। [द्वन्द्वसंयोगे, कर्णे च।
सङ्घात * पु॰ सम्+हन-घञ्। समूहे, नरकभेदे, सम्यग्हनने,
सङ्घातपत्रिका * स्त्री॰ संघातयुक्तं पत्रमस्याः कप् अत इत्वम्। शतपुष्पायाम्।
सचि(ची) * स्त्री॰ सच-इन् वा ङीप्। इन्द्राण्याम्।
सचिक्कण * पु॰ सह चिक्कणेन। क्लिन्नेत्रे (पिंचुटियुक्तनेत्रे)।
सचिव * पु॰ सच-इन् तथा सन् वाति वा-क। सहाये, मन्त्रिणि, कृष्णधुस्तूरे च।
सचेतन * त्रि॰ सह चेतनया। विशिष्टज्ञानयुक्ते।
सचेष्ट * पु॰ सचते सच अच् सदाभूतः सन् इष्टः। आम्रे। सह चेष्टया। चेष्टान्विते त्रि॰। [चाम।
सचारा * स्त्री॰ सन् चारो गात्रानुलेपने विपक्षतिरस्याः। हरिद्रा॰
सच्चिदानन्द * पु॰ सत् नित्यः चित् चैतन्यमानन्दः निरतिशयसुखं नित्यज्ञानसुखमये ब्रह्मणि। [चितौ" इति श्रुतिः।
सच्छूद्र * पु॰ कर्म॰। सदोपमाचितादौ शूद्रभेदे। "सच्छूद्रो ....

सत्य * न० सते हित यत्। सत्ययुगे, शपथे, सिद्धान्ते, याथार्थ्ये च। तद्वति त्रि०। अश्वत्थवृक्षे, नान्दीमुखश्राद्धदेवे च पु०।

सत्यङ्कार * पु० सत्य+कृ-घञ् नि० मुम्। "सत्यैतत् पण्यं क्रेयम्" इत्येवं सत्यकरणे, सत्यापने (बायनादिघोषा)।

सत्यपुर * न० सत्ययुक्तं पुरम्। विष्णुलोके।

सत्यफल * पु० सत्यं फलमस्य। बिल्ववृक्षे।

सत्यभामा * स्त्री० सत्राजिन्नृपसुतायां श्रीकृष्णस्य भार्य्यायाम्।

सत्यम् * अव्य० सत्+यम्। स्वीकारे।

सत्ययुग * न० सत्यप्रधानं युगम् शाक०। सत्यप्रचुरे प्रथमे युगे।

सत्यलोक * पु० सत्यप्रचुरो लोकः। ऊर्द्धस्थसप्तलोकमध्ये सर्वोपरि-स्थे लोके। [वचनादयोऽप्यत्र।

सत्यवचस् * पु० सत्यं वचोऽस्य। मुनौ। सत्यवचनयुक्ते त्रि०। सत्य-

सत्यवत् * पु० सत्यं विद्यतेऽस्य मतुप् मस्य वः। सावित्रीपतौ नृप-भेदे, मुनिभेदे च। सत्ययुक्ते त्रि०। स्त्रियां ङीप् सा च व्यासस्य मातरि च।

सत्यवतीसुत * पु० ६त०। सत्यवत्याः पुत्रे व्यासे मुनिभेदे।

सत्यवाच् * पु० सत्या वाक् यस्य। ऋषौ, काके च तस्य शब्देन हि शुभाशुभनिर्णयेन तस्य सत्यत्वम्। सत्यवदनशीले त्रि०।

सत्यवादिन् * त्रि० सत्यं वदति वद-णिनि। यथार्थवाक्यवक्तरि।

सत्यव्रत * पु० सत्यं व्रतमस्य। त्रिशङ्कुनामके राजभेदे। सत्यतत्-परे त्रि०। [त्रि०।

सत्यसङ्गर * पु० सत्यः सङ्गरः प्रतिज्ञा यस्य। कुबेरे। सत्यप्रतिज्ञे

सत्यसन्ध * त्रि० सत्या सन्धा सन्धानं यस्य। सत्याभिसन्धौ।

सत्याकृति * स्त्री० सत्य+डाच्+कृ क्तिन्। "पण्यमेतत्क्रया क्रेयम्" इत्येवप्रतिज्ञारूपे सत्यकरणे (बायनादेर्घोषा)।

सत्यानृत * न० सत्यसहितमनृतं यत्र। वणिग्वृत्तौ वाणिज्ये।

सत्यापन * न० सत्य+णिच्-पुक् च ल्युट्। सत्याकृतौ। युच्। सत्यापनाऽप्यत्र स्त्री०। [सत्यवाक्ये न०।

सत्योद्य * त्रि० सत्यमुद्यं यस्य वद-क्यप्। सत्यवादिनि। कर्म०।

सत्र * सततार्थे सत्यार्थे च अव्य० [illegible] [illegible] [illegible] [illegible]। सत्र [illegible] [illegible] सत्रापदं [illegible]। [च।

सत्र * न० सद्‌ [illegible] [illegible]। यज्ञभेदे, [illegible] [illegible]

सत्राजित् * पु० [illegible] [illegible]।

सत्वर * त्रि० सह त्वरया। शीघ्रे। [illegible] त्रि०।

सदंशक * पु० सह दंशेन [illegible]। [illegible]। [illegible] त्रि०।

सदंशवदन * पु० सह दंशेन [illegible] [illegible] [illegible] बकविशेषे।

सदक्षिण * न० कर्म०। [illegible] [illegible] [illegible]।

सदन * न० सीदत्यस्मिन् सद-ल्युट्। गृहे, जले च।

सदय * पु० सह दयया। [illegible] [illegible]। [illegible] [illegible] [illegible]।

सदस् * स्त्री० न०। सीदत्यस्याम् सद-असि। सभायाम्।

सदस्य * पु० सदसि साधुर्भवति वा यत्। ऋत्विगतिरिक्तानां विधिदर्शि-परिहारार्थं विधानदर्शिनि। सभासदि त्रि०।

सदा * अव्य० सर्वस्मिन् काले दाच् सादेशः। सर्वस्मिन् काले इत्यर्थे।

सदागति * पु० सदा गतिरस्य। वायौ। सदागतियुक्ते त्रि०।

सदाचार * पु० कर्म० ६त० वा। "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्त-रम्। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः। वर्णानां सान्तरालानां स सदाचार उच्यते" इति मनूक्तदेशाचारे, "साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते" इत्युक्ते साधूनामाचरणे च।

सदातन * पु० सदा भवः सदा+ट्युल् तुट् च। विष्णौ। नित्ये त्रि०। स्त्रियां ङीप्। [illegible]

सदातोया * स्त्री० सदा तोयानि यस्याम्। [illegible] [illegible]।

सदात्मन् * त्रि० सन् आत्मा चित्तं यस्य। साधुचित्ते।

सदादान * पु० सदा दानं मदजलं [illegible] वा यस्य। [illegible] [illegible]। सदादातरि त्रि०। [illegible]

सदानन्द * पु० सदा आनन्दो यस्य। [illegible]। [illegible]

सदानर्त्त * पु० सदा नृत्यति नृत-अच्। [illegible]। [illegible] वति त्रि०।

सदानीरा * स्त्री० सदा नीरमस्याम्। [illegible] [illegible]।

सदापुष्प * पु० सदा पुष्पं यस्य। [illegible]। [illegible] स्त्री० ङीप्। सदापुष्पयुक्ते त्रि०।

सदाफल * [illegible] [illegible] [illegible]

सदाफल * पु० सदा [illegible] [illegible] [illegible] [illegible]

[illegible] [illegible]

सदाभ्रमा * स्त्री० [illegible] [illegible]

सदाशिव * पु० सदा [illegible] [illegible]

[illegible] [illegible] [illegible] [illegible]

[illegible] [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सन्दिहान * त्रि॰ सम्+दिह शानच्। सन्देहयुक्ते।
सन्दी * स्त्री॰ सम्+दो-ड गौरा॰ ङीप्। खट्वायाम्।
सन्दीप्य * पु॰ सन्दीप्यतेऽसौ सम्+दीप-कर्त्तरि यत्। मयूर-
शिखावृक्षे।
सन्देश * पु॰ सम्+दिश-घञ्। वाचिकार्थकथने वार्त्तायाम्।
सन्देशहर * पु॰ सन्देशं हरति अभीष्टस्थानं कथनाय नयति हृ-
अच्। दूते "तवैव सन्देशहरात्" इति रघुः। ण्वुल्।
सन्देशहारकोऽप्यत्र।
सन्देह * पु॰ सम्+दिह घञ्। संशयशब्दार्थे।
सन्दोह * पु॰ सम्+दुह-घञ्। समूहे, सम्यग्दोहे च।
सन्द्राव * पु॰ सम्+द्रु-घञ्। पलायने।
सन्धा * स्त्री॰ सम्+धा-अङ्। स्थितौ, प्रतिज्ञायाम्, सन्धाने,
सुरोत्पादनानुगुणे व्यापारभेदे, अनुसन्धाने च।
सन्धान * न॰ सम्-धा-ल्युट्। सुरादिसम्पादनानुगुणे व्यापारे,
सोमरसकण्डनात्मके अभिषवे, अनुसन्धाने, सङ्घट्टने च। सन्धाने
स्त्रीत्वमपि तत्र ङीप्। सा च कुम्भशालायाञ्च।
सन्धि * पु॰ सम्+धा-कि। नृपाणां षड्गुणान्तर्गते मेलनार्थे
मैत्रीकरणरूपे व्यापारे, संयोगे, अस्थिद्वयसंयोगस्थाने, चौरादि-
कृतसुरङ्गायां "सन्धिं कृत्वा तु चौर्य्यम्" इति स्मृतिः। भगे,
सङ्घट्टने, नाटकाङ्गविशेषे, व्याकरणोक्ते वर्णद्वयजाते वर्णविकार-
भेदे। [कारके (सिन्धेल)।
सन्धिचौर * पु॰ सन्धिना कृतसुरङ्गया चौरः। सन्धिं कृत्वा चौर्य्य-
सन्धिजीवक * पु॰ सन्धिं जीवति जीव-ण्वुल्। शाठ्येन परार्थ-
हारके।
सन्धित * त्रि॰ सन्धा जाताऽस्य तार॰ इतच्। कृतसन्धे, मिलिते च।
सन्धिनी * स्त्री॰ सन्धा वृषभसंयोगस्तज्जगर्भोऽस्त्यस्याः इनि ङीप्।
वृषभसंयोगेन धृतगर्भायां गवि।
सन्धिपूजा * स्त्री॰ सन्धौ अष्टम्याः शेषे नवम्याश्च आद्ये दण्डे पूजा।
आश्विनशुक्लाष्टमीनवमीसन्धिकाले विहितपूजायाम्।
सन्धिबन्ध * पु॰ सन्धिं बध्नाति संयुनक्ति सम्+बन्ध अण्। भूमिच-
म्पके। तच्छेदने हि भग्नसन्धियोजनं वैद्यके प्रसिद्धम्।
सन्धिला * स्त्री॰ सन्धिं लाति ला-क। नद्यां, मदिरायाञ्च। स्वार्थे
कप्। सुरङ्गायाम्।
सन्धिविग्रहाधिकारिन् * पु॰ सन्धिविग्रहेषु अधिकरोति अधि+कृ-
णिनि। नृपाणां सन्धिविग्रहाद्यधिकारिमन्त्रिभेदे।
सन्धिवेला * स्त्री॰ सन्धियुक्ता वेला समयः। अहोरात्रसन्धिसमये।
सन्धिहारक * पु॰ सन्धिना सुरङ्गया हरति परद्रव्यम् हृ-ण्वुल्।
सन्धिचौरे (सिन्धेल)।
सन्धुक्षित * त्रि॰ सम्+धुक्ष-क्त। उद्दीपिते।
सन्धेय * त्रि॰ सम्+धा यत्। संयोज्ये मेलनीये।
सन्ध्या * स्त्री॰ सम्-ध्यै-अङ् ड वा। एकदण्डात्मकोत्तरमाविंशदर-
रूपकालव्यापककार्ये, दिवारात्रस्य मध्यवर्त्तिकाले, स च दिवा-
शेषदण्डसहितरात्रिप्रथमदण्डात्मकः कालः तयोश्चतुर्दण्डात्मक-
कालश्च "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टये। नाडीनां
तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" इति स्मृतिः। "अहोरात्रस्य
यः सन्धिः सूर्य्यनक्षत्रवर्जितः। सा च सन्ध्या समाख्याता" इति
स्मृतिः। सायाह्ने, सन्ध्याकाले उपास्यदेवताभेदे च। "सन्ध्या-
मुपासते ये तु नियतं शंसितव्रताः" इति स्मृतिः। "प्रातःसन्ध्यां
ततः कृत्वा संकल्पं बुध आचरेत्" इति स्मृतिः। एतद्विशेषो
वाचस्पत्ये। "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च प्रकीर्त्तितः" इत्युक्ते युग-
सन्धिकाले, नदीभेदे, ब्रह्मपत्नीभेदे च।
सन्ध्यांश * पु॰ सन्ध्यायाः सत्ययुगादेरंशः। सत्ययुगादेरंशभेदे
तत्प्रमाणं सन्ध्यायां द्रष्टव्यम्। "सन्ध्यासन्ध्यांशसहितं विज्ञेयं
तच्चतुर्युगम्" इति मनुः।
सन्ध्याचल * पु॰ "सन्ध्यां वशिष्ठः कृतवान् तत्र यस्माद्विभेः सुतः।
ततः सन्ध्याचलं नाम तस्य गायन्ति देवताः" इत्युक्ते पर्वतभेदे।
सन्ध्यानटिन् * सन्ध्यायां नटति नट णिनि। शिवे।
सन्ध्यापुष्पी * स्त्री॰ सन्ध्यायां पुष्पमस्याः। जातिवृक्षे।
सन्ध्याबल * पु॰ सन्ध्यायां सन्ध्योपलक्षिते रात्रिकाले बलं यस्य।
रात्रौ बलयुक्ते राक्षसे। [कालिकमेघे च।
सन्ध्याभ्र * न॰ सन्ध्याकालिकमभ्रमिव। सुवर्णगैरिके, सन्ध्या-
सन्ध्याराग * न॰ सन्ध्याया इव रागोऽस्याः। सिन्दूरे। [पुंसि सप्तर्षि।
सन्ध्याराम * पु॰ सन्ध्यायां तदाख्यभार्य्यायां रमते रम-घञ्। चतु-
सन्न * पु॰ सीदति सद-क्त। पियालवृक्षे। अवसन्ने त्रि॰। स्वार्थे
कन्। तत्रैव।
सन्नकद्रु * पु॰ सन्न एव सन्नकः कर्म॰। पियालवृक्षे, पर्वतवृक्षे च।
सन्नत * त्रि॰ सम्+नम-क्त। प्रणते, शब्दायमाने च।
सन्नति * स्त्री॰ सम्+नम क्तिन्। प्रणामे, ध्वनौ, नम्रतायाञ्च।
सन्नद्ध * त्रि॰ सम्+नह-क्त। कृतसन्नाहे, धृतवर्म्मणि, व्यूहरचनया-
स्थिते सैन्यादौ, आततायिनि, शस्त्रादियुक्ते च।
सन्नय * पु॰ सम्+नी-अच्। समूहे, पृष्ठस्थिते बले च। [च।
सन्नहन * न॰ सम्+नह-ल्युट्। वर्म्मग्रहणे, उद्योगे, सम्यग्बन्धने
सन्नाह * पु॰ सन्नह्यते सम्+नह-घञ्। (सांजोया) वर्म्मणि।
सन्निकर्ष * पु॰ सम्+नि-कृष-घञ्। सान्निध्ये "मद्गमनादिकर्म्मा
हि अन्यार्थमपि सन्निधौ" इति पुराणम्। इन्द्रियार्थसम्बन्धे,
न्यायमते ज्ञानकारणं सामान्यलक्षणादीनञ्च संविशेषात्मके
अलौकिकप्रत्यक्षसाधने व्यापारभेदे च।
सन्निकर्षण * न॰ सम्+नि कृष-ल्युट्। सन्निकर्षे।
सन्निकृष्ट * त्रि सम्+नि-कृष-क्त। निकटस्थे।
सन्निध * न॰ सम्+नि+धा क। नैकट्ये। तद्योगिनि त्रि॰।
सन्निधान * न॰ सम्+नि+धा ल्युट्। नैकट्ये, प्रत्यासत्तौ च।

सन्निधि * पु॰ सम्+नि+धा-कि। सामीप्ये। कर्मणि कि। इन्द्रियविषये। कर्म॰। साधुनिधौ।

सन्निपतित * त्रि॰ सम्+नि-पत-क्त। मिलिते, उपस्थिते, मृते च।

सन्निपात * पु॰ सम्+नि-पत-घञ्। मेलने। "सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य" इति व्या॰ परि॰। कफादिधातुत्रयस्य विजातीयवैषम्यरूपत्रिदोषजे विकारे, नाशे, उपस्थितौ च।

सन्निपातज्वर * पु॰ सन्निपातस्य तदर्थो ज्वरः। वैद्यकोक्ते त्रिदोषजविकारसाधने ज्वरे। [नेपालनिम्बे।

सन्निपातनुद् * पु॰ सन्निपातं त्रिदोषजविकारं नुदति नुद-क्विप्।

सन्निबन्धन * न॰ सम्यक् निबन्धनं प्रा॰। नानास्थानस्थवाक्यानामेकत्र सङ्कलने, तदुपयोगिग्रन्थभेदे च। ब॰। सम्यग्निबन्धवति त्रि॰ "सद्वृत्तिः सन्निबन्धना" इति माघः।

सन्निभ * त्रि॰ सम्+नि+भा-क। सदृशे। निभादिवदस्य नित्यसमासता। [भावे घञ्। सम्यक्स्थितौ।

सन्निवेश * पु॰ सम्+नि+विश-आधारे घञ्। पुरादेर्बाह्यस्थे देशे।

सन्निहित * त्रि॰ सम्+नि+धा-क्त। निकटस्थे "कर्मसन्निहितं नैव" इति मीमांसा, सम्यक्स्थापिते च। भावे क्त। नैकट्ये, न॰। [अर्पिते च।

सन्न्यस्त * त्रि॰ सम्+नि+अस-क्त। निक्षिप्ते, कृतसम्यक्त्यागे, युक्ते

सन्न्यास * पु॰ सम्+नि+अस-घञ्। "काम्यानां कर्मणां त्यागं सन्न्यासं कवयो विदुः" इत्युक्ते विहितकर्मणां विधानेन सम्यक्त्यागे, तदुपयोगिचतुर्थाश्रमे, चैत्रे कर्त्तव्ये पुराणप्रसिद्धशिवव्रतभेदे च। [वति, चैत्रे कर्त्तव्यशिवव्रतकर्त्तरि च।

सन्न्यासिन् * पु॰ सम्+नि+अस-णिनि। सन्न्यासवति, चतुर्थाश्रम-

सपक्ष * पु॰ समानः पक्षः। तुल्यरूपे, साध्यसाधनाश्रये पक्षे च।

सपक्षाकरण * न॰ सह पक्षेण पक्षेण सपक्षः तथा क्रियते सपक्ष+डाच्-कृ-ल्युट्। पक्षेण सह शरवेधनरूपे अत्यन्तव्यथने। कर्मणि क्त। सपक्षाकृतः। तथा पीड़िते त्रि॰।

सपत्न * पु॰ सह एकार्थे पतति यतते पत-न सहस्य सः। शत्रौ।

सपत्नारि * पु॰ सपत्नः अरिरिव। (वेडवांश) वंशभेदे।

सपत्नी * स्त्री॰ समानः पतिर्यस्याः ङीप् न च। एकभर्त्तृकायां स्त्रियाम्, समस्वामिकायां भूम्यादौ तु सपतिरित्यपि।

सपदि * अव्य॰ सह पद्यते पद-इन् सहस्य सः। तत्क्षण इत्यर्थे "सपदि मुकुलिताक्षीम्" इति कुमारः।

सपर * पूजायां कण्ड्वादि॰ पर॰ सक॰ सेट्। सपर्य्यति असपर्य्यीत्।

सपर्य्या * स्त्री॰ सपर-यक्-अ टाप्। पूजायाम् "सोऽहं सपर्य्याविधिभाजनेन" इति रघुः। [चतुर्थांशविशिष्टे च।

सपाद * त्रि॰ सह पादेन चरणेन चतुर्थांशेन वा। पादसहिते,

सपिण्ड * पु॰ समानः पिण्डः, अदेहारम्भकदेहो यस्य। एकदेहारम्भके ज्ञातिभेदे "असपिण्डा च या मातुः" इति स्मृतिः

प्रातोमात्र साक्षात् परम्परया अतिपरम्परया वा एकदेहारम्भकत्वात्वम्। तत्र च दाये अशौचे च सादिस्थानविशेषो तत्स्थले। "दायत्वभोक्तृत्वेनैवापिण्डयति दायदवंशोत्यं साऽपिण्डम्" इति दायभागः।

सपिण्डीकरण * न॰ सह पिण्डेन ततः अभूततद्भावे च्वि+कृ-ल्युट्। प्रेतत्वविमोचनाय प्रेतोद्देशेन कर्त्तव्ये पित्रादिपिण्डसमन्वयकरणश्राद्धभेदे "सपिण्डीकरणादूर्द्धं न दद्यात् प्रतिमासिकम्" इति स्मृतिः।

सपिण्डीकृत * त्रि॰ सह पिण्डैः पित्रादिपिण्डैः सपिण्डः तत च्वि-कृ-कर्मणि क्त। यदुद्देशेन सपिण्डीकरणं श्राद्धं कृतं तस्मिन् मृते जने "ये सपिण्डीकृताः प्रेताः" इति स्मृतिः।

सपीतक * पु॰ सह समानः पीतकेन। राजघोषातकीवृक्षे।

सपीति * स्त्री॰ पा+क्तिन् पीतिः पानम् सह एकत्र पीतिः ज्ञात्यादीनां सह भोजने। [वृक्षे।

सपीतिका * स्त्री॰ सह पीतेन कप् अत इत्वम्। हस्तिघोषातकी

सप्तक * न॰ सप्तानामवयवम् कन्। सप्तसङ्ख्यायाम्। सप्त प्रमाणमस्य कन्। सप्तसंख्यान्विते त्रि॰। [कान्।

सप्तकी * स्त्री॰ सप्तभिः स्वरैरिव कायति शब्दायते कै-क। मेखला

सप्तचत्वारिंशत् * स्त्री॰ सप्ताधिका चत्वारिंशत् शाक॰। (सात चल्लिश) संख्यायां, तत्संख्यान्विते च। एवं सप्तदशादयः सप्ताधिकतत्तत्संख्यायां तत्संख्यान्विते च।

सप्तच्छद * पु॰ सप्त सप्त छदाः प्रतिपत्रम् यस्य वृत्तौ संख्याशब्दस्य वीप्सार्थता भाष्योक्ता। (छातिम) वृक्षे।

सप्तजिह्व * पु॰ सप्त जिह्वा इव आस्वादसाधनानि अर्चिषो यस्य। वह्नौ "काली कराली च मनोजवा च सुलोहिता चैव सुधूम्रवर्णा। उग्रा प्रदीप्ता च कपीटयोनिः सप्तैव कीलाः कथिताश्च जिह्वाः" इत्युक्तानां सप्तानामग्निज्वालानामेव तज्जिह्वात्वमुक्तम्। [दयोऽस्य वह्नौ।

सप्तज्वाल * पु॰ सप्त काल्यादयः ज्वाला यस्य। वह्नौ। सप्तार्चिरा-

सप्ततन्तु * सप्तभिः भूरादिभिर्महाव्याहृतिभिस्तन्यते तन+तुन्। यज्ञे। [न्विते च।

सप्तति * स्त्री॰ सप्तगुणिता दशतिः नि॰। (सत्तर) संख्यायां, तत्संख्या-

सप्ततितम * त्रि॰ सप्ततेः पूरणः तमप्। येन सप्ततिसंख्या पूर्य्यते तस्मिन् अर्थे। [तस्मिन्नर्थे।

सप्तदश * त्रि॰ सप्तदशानां पूरणः डट्। येन सप्तदशसंख्या पूर्य्यते

सप्तद्वीपा * स्त्री॰ सप्त जम्बूप्रभृतयो द्वीपा यस्याः। जम्बूप्रभृतिसप्तद्वीपवत्यां पृथिव्याम्।

सप्तधा * अव्य॰ सप्तन्+प्रकारे धाच्। सप्तप्रकारे।

सप्तधातु * पु॰ ब॰ व॰। सप्तगुणिता धातवः। देहस्थेषु "रसासृङ्मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः। शरीरस्था इमे ज्ञेयाः पण्डितैः सप्त धातवः" इत्युक्तेषु रसादिषु धातुषु।

सप्तन् • पु॰ त्रि॰। सप-तनिन्। (सात) संख्यान्विते।
सप्तनामा • स्त्री॰ सप्त नामानि यस्याः टाप्। आदित्यभक्तायाम्।
सप्तपत्र • पु॰ सप्त पत्राणि प्रतिपर्वं यस्य। स्वर्णरथे, सप्तच्छद-वृक्षे च। [मण्डलिकासु गमनेषु सप्तसु पदेषु।
सप्तपदी • स्त्री॰ सप्तानां पदानां समाहारः ङीप्। विवाहकाले
सप्तपर्ण • पु॰ सप्त सप्त पर्णान्यस्य प्रतिपर्वम्। (छातिम) वृक्षे। लज्जालुलतायां स्त्री॰।
सप्तपाताल • न॰ समाहारद्विगुः पातादि॰। "अतलं वितलञ्चैव नितलञ्च क्रमादधः। महातलञ्च सुतलं पातालं सप्त कीर्त्तितम्" इत्युक्तेषु सप्तसु भूमेरधःस्थलोकेषु।
सप्तप्रकृति • स्त्री॰ ब॰ व॰ सप्तसंख्याताः प्रकृतयः। सांख्यसिद्धे महदहङ्कारसहितपञ्चतन्मात्ररूपेषु शब्दादितन्मात्रात्मके पदार्थे। "महदाद्याः प्रकृतिविकृतयः सप्त" इति सांख्यकारिका। योऽस्मदादीनां हेतुत्वात् प्रकृतित्वम् प्रकृतिकार्य्यत्वाच्च विकृतित्वमासाम्।
सप्तभद्र • पु॰ सप्तसु स्थानेषु भद्रमस्य। शिरीषवृक्षे।
सप्तम • त्रि॰ सप्तानां पूरणः मट्। येन सप्तसंख्या पूर्य्यते तस्मिन्नर्थे। स्त्रियां ङीप्। सा च चन्द्रस्य सप्तमकलायाः क्रियायां तिथौ च।
सप्तरत्न • पु॰ सप्त रत्नानि प्रशस्तान्यस्य। "पादिपादन्मे [illegible] [illegible]" [illegible] इत्युक्तेषु [illegible] जने।
सप्तर्षि • पु॰ ब॰ व॰। सप्त च ते ऋषयश्च कर्म॰। "मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः। वसिष्ठश्च" इत्युक्तेषु सप्तसु ऋषिषु।
सप्तर्षिमण्डल • त्रि॰ [illegible]। आकाशे नित्यं [illegible] "सप्तर्षिमण्डलं [illegible] सर्वज्योतिषाम्" इति पुराणम्।
सप्तला • स्त्री॰ सप्त [illegible]। नवमालिकायां, चर्मकषायां, [गुञ्जायां, पाटलायां च।
सप्तशती • स्त्री॰ सप्तानां शतानां समाहारः। मार्कण्डेयपुराणान्तर्गते देवीमाहात्म्यबोधके ग्रन्थभेदे। "[illegible]" इति पुराणम्। [illegible]
सप्तशलाक • पु॰ [illegible]
सप्तांशा • स्त्री॰ [illegible]
सप्तसप्ति • पु॰ सप्त सप्तयोऽश्वा यस्य। सूर्य्ये, अर्कवृक्षे च। [illegible]
सप्तसागर • पु॰ ब॰ व॰। [illegible] "[illegible]" [illegible]
सप्ताह • पु॰ [illegible]

सुखे समन्ताद्यजति इष्टौ।
सप्ताश्ववाहन • पु॰ सप्त अश्वाः वाहनान्यस्य। सूर्य्ये, अर्कवृक्षे च।
सप्ति • पु॰ सप-ति। अश्वे। ["[illegible]" इति माघः।
सफर • पु॰ सप-अरन् पृ॰ [illegible]। (पुँटी) मत्स्ये। [illegible]
सफल • त्रि॰ सह फलेन सस्य सः। सार्थके, [illegible] च।
सबल • त्रि॰ सह बलेन सामर्थ्येन सैन्येन वा। बलयुक्ते, सैन्ययुक्ते च।
सब्रह्मचारिन् • पु॰ समानं ब्रह्म वेदस्तदध्ययनार्थं व्रतं चरति [illegible] [illegible]
[illegible]
सभर्तृका • स्त्री॰ सह भर्त्रा [illegible]। [illegible]
सभा • स्त्री॰ सह भान्ति [illegible] यत्र। [illegible]
[illegible]
सभाज • [illegible]
[illegible]
सभाजन • [illegible]
[illegible]
[illegible]

समज्या * स्त्री० सम्+अज-क्यप् न वीभावः। सभायाम्, कीर्त्तौ च। [प्रा०। औचित्ये न०।

समञ्जस * त्रि० सम्यक् अञ्ज औचित्यं यत्र। उचिते, युक्ते च।

समदर्शिन् * त्रि० समस्मिन् सर्वत्र ब्रह्मभावेनाभिन्नतया पश्यति दृश+णिनि। सर्वत्र समदर्शके तत्त्वज्ञानिनि। "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः" इति गीता। [त्रि०।

समदृष्टि * स्त्री० कर्म०। सर्वत्र तुल्यदर्शने। ब०। समदर्शिनि

समधिक * त्रि० सम्यक् अधिकः प्रा०। अत्यन्ताधिके।

समन्त * पु० सम्यक् अन्तः स यत्र वा। सम्यगन्ते, सीमायाञ्च।

समन्ततस् * अव्य० समन्त+तसिल्। सर्वत्र विस्तारे।

समन्तदुग्धा * स्त्री० समन्ततो दुग्धमस्याः। स्नुहीवृक्षे।

समन्तपञ्चक * न० समन्तात् पञ्चकं यत्र। तीर्थभेदे।

समन्तभद्र * पु० समन्तात् भद्रमस्य। बुद्धे।

समन्तभुज् * पु० समन्तात् भुङ्क्ते भुज-क्विप्। वह्नौ। [च।

समन्तात् * अव्य० समन्त+आति। समन्तत इत्यर्थे, सर्वत्र विस्तारे

समन्वित * त्रि० सम्+अनु+इण-क्त। सङ्गते।

समपद * न० समं पदं यस्मिन्। धन्विनां समपदनिवेशनपूर्वके "स्थानानि धन्विनां पञ्च" इत्युपक्रम्य "अन्वर्थं स्यात् समपदम्" इत्युक्ते स्थानभेदे।

समभिव्याहार * पु० सम्+अभि+वि+आ+हृ-घञ्। साहित्ये।

समभिव्याहृत * त्रि० सम्+अभि+वि+आ+हृ-क्त। साहिते।

समभिहार * पु० सम्+अभि+हृ-घञ्। पौनःपुन्ये "क्रियासमभिहारेण विराध्यन्तम्" इति माघः।

समम् * अव्य० सम-अमु। साहित्ये, एकदेश्यें च "सममेव समाक्रान्तं द्वयम्" इति रघुः।

समय * पु० सम्+इण-अच्। काले, शपथे, आचारे, सिद्धान्ते, निर्देशे, सङ्केते, भाषायां, अङ्गीकारे च।

समया * अव्य० सम्+इण आ। नैकट्ये, मध्ये च।

समयाध्युषित * पु० समयः अध्युषितो यत्र। सूर्यतारारहितकाले "उदितेऽनुदिते चैव समयाध्युषिते तथा" इति मनुः।

समर * पु० न० सम्+ऋ-अप्। युद्धे।

समरमूर्द्धन् * पु० ६त०। समरस्याग्रे।

समर्चन * न० सम्यक् अर्चनं प्रा०। सम्यक्पूजने।

समर्दित * त्रि० सम्+अर्द-क्त। सम्यक्पीडिते। [परस्याभीष्टे पु०।

समर्थ * त्रि० सम्+अर्थ-अच्। शक्ते, हिते च। सम्यगर्थः प्रा०।

समर्थन * न० सम्+अर्थ-ल्युट्। [illegible] विषयनिर्णया- [illegible] च। [illegible] स्त्री०।

समर्द्धुक * त्रि० समर्द्धयति सम्+ऋध-णिच्-उकञ्। इष्टवरदातरि [illegible]।

[illegible] * त्रि० [illegible] पु०।

समल * न० सम्यक् मलम्। विष्ठायाम्। सह मलेन। मलयुक्ते [illegible]

समवतार * पु० समवतीर्य्यतेऽनेन सम्+अव+तॄ-घञ्। [illegible] रणसोपाने।

समवर्त्तिन् * पु० समं वर्त्तते वृत-णिनि। यमे धर्मराजे।

समवकार * पु० सम्+अव+कृ-घञ्। नाटकभेदे।

समवाय * पु० सम्+अव+इण-अच्। समूहे, मेलने, [illegible] नित्यद्रव्यादिषु जात्यादीनां सम्बन्धभेदे च।

समवेत * त्रि० सम्+अव+इण-क्त। मिलिते, समूहान्विते, [illegible] ते समवायसम्बन्धेन स्थिते च।

समष्टि * स्त्री० सम्+अश-क्तिन्। सम्यग्व्याप्तौ, समस्त [illegible] कर्त्तरि क्तिच्। सङ्घीभूते समस्ते पदार्थे। [(गुड़िया) [illegible]

समष्ठि(ष्ठी)ल * पु० समं तिष्ठति स्था+इलच् पृ० वा [illegible]

समसन * न० सम्+अस-ल्युट्। समासे, संक्षेपे च।

समस्त * त्रि० सम्+अस-क्त। संक्षिप्ते, सकले, व्याकरणोक्ते समासे शब्दभेदे च।

समस्थ * त्रि० समं तिष्ठति स्था-क। समभावेन तुल्यतया स्थि[illegible]

समस्थली * स्त्री० कर्म०। गङ्गायमुनयोर्मध्यस्थे अन्तर्वेदिदेशे।

समस्या * स्त्री० समस्यते संक्षिप्यतेऽनया सम्+अस-क्यप्। [illegible] उक्तस्य श्लोकपदादेः परकृतेन स्वकृतेन वा अवशेषेण भाग[illegible] सङ्घटनार्थे कृते प्रश्ने।

समा * स्त्री० समयति विकलयति भावान् सम-अच्-टाप्। [illegible] अमरकृतास्य नित्यबहुवचनान्तताङ्गीकृता पाणिनिना तु [illegible] समा विजायते इति सूत्रे एकवचनान्तता निर्दिष्टा।

समांसमीना * स्त्री० समांसमां विजायते प्रसूते ख न० [illegible] समामित्यत्र कालाधारे द्वितीया। प्रतिवर्षं प्रसूतायां ग[illegible]

समाकर्षिन् * पु० सम्+आ+कृष-णिनि। अतिदूरगामिनि [illegible] सम्यगाकर्षणकर्त्तरि त्रि०। [illegible]

समाख्या * स्त्री० समाख्यायतेऽनया सम्+आ+ख्या अङ्। [illegible]

समाघात * पु० समाहन्यतेऽत्र सम्+आ+हन-घञ्। युद्धे।

समाज * पु० सम्+अज-घञ् व्यभावः। पशुभिन्नानां समूहे, [illegible] याम्, हस्तिनि च।

समाधा * स्त्री० सम्+आ+धा-अङ्। निष्पत्तौ, विवाद[illegible] पूर्वपक्षस्य सम्यगुत्तरानुगुणसिद्धान्तावधारणकारिणा [illegible] अवधारणे च। ल्युट्। समाधानमप्यत्र न०। तत्र [illegible] ध्येयवस्तुनि निरन्तरस्थापनरूपे समाधौ च।

समाधि * पु० सम्+आ+धा-कि। समाधायां, ध्येयवस्तुनि [illegible] तया मनसः स्थापनरूपे ध्यानभेदे, अवधाने, नियम[illegible]

समाध्मात * त्रि० सम्+आ+ध्मा क्त। सम्यग्वर्द्धिते, [illegible]

समान * त्रि० सममानयति अन-अच्। तुल्ये, साधौ, [illegible] स्वर्ये च। "यत्समानाधिकरणम्" इति [illegible]।

समानोदक * पु० समानम् उदकं तर्पणादौ देयमुदकं यस्य [illegible]

नोदकभावस्तु निवर्त्तताचतुर्दशात्" इत्युक्ते एकादशाद्यधिचतु-
र्दशपुरुषपर्य्यन्ते ज्ञातिभेदे। [भ्रात्रादौ। भगिन्यां स्त्री०।
समानोदर्य्य * पु० समाने उदरे भवः यत् वा न सादेशः। एकोदर-
समाप * पु० सम्यक् आपो यत्र अच् समा० नि०। देवयजनस्थाने।
समापन * न० सम्+आप-ल्युट्। समाप्तौ, परिच्छेदे, वधे च।
समापन्न * त्रि० सम्+आ-पद क्त। समाप्ते, प्राप्ते, क्लिष्टे च। भावे
क्त। समाप्तौ न०।
समाप्त * त्रि० सम्+आप-क्त। अवसानप्राप्ते, सम्यक्प्राप्ते च।
समाप्ति * स्त्री० सम्+आप-क्तिन्। अवसाने, समर्थने, प्राप्तौ च।
समायोग * पु० सम्+आ+युज-घञ्। संयोगसमवायरूपादिस-
म्बन्धे "अवेद्दृष्टिसमायोगात्" इति पुराणम्। प्रयोजने च।
समालम्बिन् * पु० समालम्बते सम्+आ+लबि-णिनि। भूतृणे।
समालम्बनकर्त्तरि त्रि०।
समालम्भ * पु० सम्+आ+लभ-घञ् मुम् च। कुङ्कुमादिना
गात्रलेपने। ल्युट्। तत्रैवार्थे न०।
समावर्त्तन * न० समावर्त्तते गुरुकुलादनेन सम्+आ+वृत-
ल्युट्। वेदाध्ययनानन्तरं गार्हस्थ्याय गुरुकुलादागमनहेतुके
संस्कारभेदे।
समाविष्ट * त्रि० सम्+आ+विश-क्त। युक्ते, मनोऽभिनिवेशवति,
अभीष्टकर्त्तव्यकर्मणि, चित्तकार्य्यविषययुक्ते च।
समावृत्त * पु० सम्+आ+वृत-क्त। कृतसमावर्त्तनसंस्कारे।
समावेश * पु० सम्+आ+विश-घञ्। बहूनामर्थानामेकत्र आधारा-
दौ अवस्थापने, कर्त्तव्येऽभिनिवेशे च।
समावेशित * त्रि० सम्+आ-विश-णिच्-क्त। कृतसमावेशने।
समास * पु० सम्+अस-घञ्। संक्षेपे, समर्थने, समाहारे, व्याक-
रणोक्ते द्व्यादिपदानामेकपदतासम्पादके पदसाधुत्वार्थके संस्का-
रभेदे च। [अभिनिविष्टे च।
समासक्त * त्रि० सम्+आ+सन्ज क्त। संयुक्ते, अत्यन्तासक्ते,
समासङ्ग * पु० सम्+आ+सन्ज घञ्। संयोगे, सम्यगभिनिवेशे च।
समासवत् * पु० समास+अस्त्यर्थे। मतुप् मस्य वः। व्याकरणोक्ते
समासयुक्ते शब्दे संक्षेपयुक्ते च त्रि०। समासेन तुल्यं वति। समा
सतुल्ये अव्य०। [निकटस्थिते च।
समासादित * त्रि० सम्+आ+सद+णिच्-क्त। आहृते, प्राप्ते,
समासार्णी * स्त्री० समासेन सङ्क्षेपेणार्थोऽभिहितो यस्याः। समस्या-
दाम्। [प्राप्ते, निश्चये, युद्धे च।
समाहित * त्रि० सम्+आ+धा क्त। कृतसमाधौ, स्थापिते, प्रति-
समाहृत * त्रि० सम्+आ+हृ-क्त। सङ्गृहीते, एकत्रस्थापिते च।
समाहृति * स्त्री० सम्+आ+हृ-क्तिन्। सङ्ग्रहे, संग्रहे, समुच्चये च।
समाह्वय * पु० समाह्वयते सम्+आ+ह्वे-अच् आत्वाभावः। द्यूते
आह्वाने, प्राणिकरणकद्यूते च। "प्राणिभिः क्रियमाणस्तु स
विज्ञेयः समाह्वयः" इति स्मृतिः।

समाख्या * स्त्री० समा ख्याता यस्याः। कीर्त्तिशब्दे। समाख्यायाञ्च।
समित् * स्त्री० समीयतेऽत्र सम्+इण्-आधारे क्विप्। युद्धे।
समिता * स्त्री० सम्+इण् क्त। गोधूमचूर्णे। सङ्गते त्रि०।
समिति * स्त्री० सम्+इण-आधारे क्तिन्। सभायां, युद्धे च।
समिध् * स्त्री० समिध्यतेऽनया सम्+इन्ध-करणे क्विप्। काष्ठे,
होमीयकाष्ठभेदे च। विस्तरो वाचस्पत्ये।
समिध * पु० समिध्यते सम्+इन्ध क। काष्ठे, वह्नौ च।
समिन्धन * न० सम्+इन्ध-करणे ल्युट्। काष्ठे, सम्यग्दीप्तौ च।
समीक * न० सम्+ईक्क्। युद्धे।
समीकरण * न० असमः समः क्रियतेऽनेन सम+च्वि+कृ ल्युट्।
बीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावतां सङ्ख्यानानार्थे
प्रक्रियाभेदे, तुल्यरूपतापादने च।
समीक्ष * न० सम्यगीक्ष्यतेऽनेन घञ्। साङ्ख्यदर्शने। भावे घञ्।
पर्य्यालोचने, सम्यग्ज्ञाने च पु०। अ। समीक्षायाम् सत्त्वे, बुद्धौ,
मीमांसाशास्त्रे, यत्ने च। स्त्री० टाप्।
समीक्ष्यकारिन् * त्रि० समीक्ष्य पर्य्यालोच्य करोति कृ-णिनि उप०।
सम्यक्पर्य्यालोचनपूर्वककार्य्यकारके।
समीचीन * त्रि० सम्यगञ्चः सम्+अन्च+क्विप् ततः ख सम: समि
अञ्चेरकारलोपे पूर्वस्य दीर्घः। यथार्थे, न्याय्ये च। सत्ये न०।
सत्यवति त्रि०।
समीप * त्रि० सङ्गता आपोऽत्र अच् समा० अत ईत्त्वम्। निकटे।
समीर * पु० सम्यक् ईरयति नोदयति सम्+ईर-अच्। वायौ।
समीरणे। पु० समिरोऽप्यत्र।
समीरण * पु० सम्+ईर-ल्यु। वायौ, मरुवकवृक्षे, पथिके च।
समीरित * त्रि० सम्+ईर-क्त। कथिते, प्रेरिते "अनुभूत-
समीरिता" इति कुमारः।
समीहित * त्रि० सम्+ईह-क्त। अभीष्टे। सम्यक् चेष्टिते न०।
समुख * त्रि० सह मुखेन मुखव्यापारेण वा सहस्य सादेशः।
वावदूके, वाग्मिनि च।
समुचित * त्रि० सम्+उच-क्त। सम्यगुपयुक्ते, समञ्जसे च।
समुच्चय * पु० सम्+उद्+चि-अच्। दिशानां राशौ, परस्पर
निरपेक्षाणामनेकेषामेकस्मिन् क्रियादावन्वये च। यथा ईश्वरं
[illegible]
[illegible]
[illegible]
समुच्छित * त्रि० सम्+उद्+श्रि-क्त। [illegible]
[illegible]
समुत्कोर * पु० सम्+उद्+कृ [illegible]
समुच्छेद * पु० सम्+उद्+छिद-घञ्। [illegible]
समुद्गर [illegible]
[illegible]

समुच्छ्रित * त्रि॰ सम्+उद्+श्रि-क्त। अत्युन्नते।

समुच्छलित * त्रि॰ सम्यक्+उच्छलितम् सम्+उद्+शल-क्त। समन्तात् विस्तीर्णे (जयतापि) "समुच्छलितविभ्रमागतिः" इति काव्य प्र॰। [विते च।

समुच्छ्वसित * त्रि॰ सम्+उद्+श्वस क्त। सम्यगुच्छ्वासयुक्ते, प्रत्युज्जी-

समुच्छ्वास * पु॰ सम्+उद्+श्वस-घञ्। मुखनासिकाभ्यां श्वास-वायोर्व्यापारे।

समुज्झित * त्रि॰ सम्+उज्झ-क्त। त्यक्ते। [गुदमने च।

समुत्क्रम * पु॰ सम्+उद्+क्रम-घञ् न वृद्धिः। ऊर्द्ध्वगमने, सम्य-

समुत्क्रोश * पु॰ स्त्री॰ सम्यक् उत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश-पच्। कुररीविहगे। भावे घञ्। उच्चैः शब्दे।

समुत्थ * त्रि॰ सम्यगुत्तिष्ठति सम्+उद्+स्था-क सस्य थः। सम्य-गुत्थिते। [उत्तोलने च।

समुत्थान * न॰ सम्+उद्+स्था-करणे ल्युट् सस्य थः। समुद्योगे,

समुत्पत्ति * स्त्री॰ सम्+उद्+पद-क्तिन्। समुद्भवे।

समुत्पन्न * त्रि॰ सम्+उद्+पद-क्त। समुद्भूते।

समुत्पाट * पु॰ सम्+उद्+पट घञ्। उन्मूलीकरणे।

समुत्पाटित * त्रि॰ सम्+उद्+णिच्+पट क्त। उन्मूलीकृते। [पु॰।

समुत्पिञ्ज * त्रि॰ सम्+उद्+पिञ्ज अच्। अत्याकुले। आकुलसैन्ये

समुत्सर्ग * पु॰ सम्यक् उत्सर्गः। सम्+उद्+सृज-घञ्। सम्यक्त्यागे।

समुत्सुक * त्रि॰ सम्यगुत्सुकः प्रा॰ स॰। अत्यन्तोत्सुके, इष्टवस्तुला-भाय त्वरान्विते च।

समुत्सृष्ट * त्रि॰ सम्+उद्+सृज क्त। सम्यक्त्यक्ते। [दाने।

समुत्सेध * पु॰ सम्+उद्+सिध-घञ्। समुन्नतौ, अतिस्थूलता-

समुदक्त * त्रि॰ सम्+उद्+अञ्च-क्त। कूपादेरुद्धृतजलादौ।

समुदय * पु॰ सम्+उद्+इण-अच्। समूहे, युद्धे, समुद्गमे, दिवसे च। ज्योतिषोक्ते लग्ने न॰। प्रभेदे समूहे पु॰। [धारे च।

समुदाचार * पु॰ सम्+उद्+आ+चर घञ्। अभिप्राये, सम्यगा

समुदित * त्रि॰ सम्+उद्+इण-क्त। [illegible] उदयं प्राप्ते। सम्+वद कर्मणि क्त। सम्यगुक्ते।

समुदीरण * न॰ सम्+उद्+ईर ल्युट्। सम्यगुच्चारणे।

समुदीरित * त्रि॰ सम्+उद्+ईर क्त। सम्यगुक्ते।

समुद्ग * पु॰ सम्+उद्+गम-ड। सम्पुटके सम्पुटाकारे गृह-[illegible] [च।

समुद्गम * पु॰ सम्+उद्+गम घञ् न वृद्धिः। ऊर्द्ध्वगतौ, समुद्भवे

समुद्गीत * त्रि॰ सम्+उद्+गै-क्त। [illegible]

समुद्गीर्ण * त्रि॰ सम्+उद्+गॄ-क्त। [illegible], उद्गीर्णे, वान्ते च।

समुद्दिष्ट * त्रि॰ सम्यक् उद्दिष्टम् सम्+उद्+दिश क्त। सम्यगुद्दिष्टे [illegible] इति [illegible]।

समुद्देश * पु॰ सम्+उद्+दिश घञ्। [illegible]

समुद्धत * त्रि॰ सम्+उद् हन-क्त। [illegible], [illegible]

समुद्गीर्णे च।

समुद्धरण * न॰ सम्+उद्+हृ-ल्युट्। उत्तोलने, कूपादेर्जलोद्ध[illegible] भुक्तान्नस्य वमने, उन्मूलने च। कर्मणि ल्युट्। वान्ते अन्ना[illegible] समुन्मूलिते च। [उन्मूलिते

समुद्धृत * त्रि॰ सम्+उद्+हृ क्त। अपनीते, वान्ते, उत्तोलि[illegible]

समुद्धर्त्तृ * त्रि॰ सम्+उद्+हृ तृच्। वमनकारिणि, उन्मूलयि-तरि, उत्थापके, हृतद्रव्यस्य पुनरादानकर्त्तरि च।

समुद्भव * पु॰ सम्+उद्+भू-अप्। समुत्पत्तौ।

समुद्भूत * त्रि॰ सम्+उद्+भू-क्त। समुत्पन्ने।

समुद्यत * त्रि॰ सम्+उद्+यम-क्त न वृद्धिः। सम्यगुद्यमवति।

समुद्यम * पु॰ सम्+उद्+यम-घञ् न वृद्धिः। सम्यक् प्रयत्ने।

समुद्र * पु॰ सम्+उन्द-क्लेदने र, सम्+उद्+रा-क वा। स्वना-ख्याते प्रचुरजले सागरे। सह मुद्रया मुद्रासहिते त्रि॰ "बन्धे मरुत्त्वान् विततं समुद्रं बभौ मरुत्त्वान् विततः समुद्रः" इति भट्टिः। तस्यां, अस्याश्च स्त्री॰ टाप्।

समुद्रकफ * पु॰ समुद्रस्य कफ इव। जलधिफेने। [इति नद्याम्

समुद्रकान्ता * स्त्री॰ ६त॰। पृक्कायां, नद्याञ्च। समुद्रप्रियादयो

समुद्रगा * स्त्री॰ समुद्रं गच्छति गम-ड। नद्याम्। "सर्वा नद्यः समुद्रगाः" इति पुराणम्।

समुद्रगृह * न॰ समुद्र इव प्रचुरजलं गृहम्। जलयन्त्रगृहे।

समुद्रचुलुक * पु॰ समुद्रश्चुलुकः गण्डूषीकृतजलमिव अनायासेन पीतत्वादस्य। अगस्त्ये मुनौ। [सारांशे, अमृते, चन्द्रे च।

समुद्रनवनीत * न॰ समुद्रस्य नवनीतमिव। समुद्रमन्थनोद्भूत

समुद्रफेन * पु॰ ६त॰। समुद्रस्य फेने।

समुद्रमेखला * स्त्री॰ समुद्रः मेखलेव वेष्टनाकारत्वात् यस्याः। पृथिव्याम्। समुद्ररसनादयोऽप्यत्र। [नौकायाम् च।

समुद्रयान * न॰ यायतेऽनेन या-ल्युट् ६त॰। पोते समुद्रतरणसा[illegible]

समुद्रलवण * न॰ समुद्रजलजातं लवणम्। (करकच) लवणे।

समुद्रवह्नि * पु॰ ६त॰। समुद्रस्थे अग्नौ वाडवानले।

समुद्रवेला * स्त्री॰ ६त॰। समुद्रस्य ऊर्मौ।

समुद्रान्त * न॰ समुद्रस्यान्तः पर्यन्तदेशः [illegible] च। समुद्रः अन्तो यस्य वा। जातीफले। दुरालभायाम्, [illegible] पृक्कायां, कर्पासे च स्त्री॰। समुद्रपर्यन्ते त्रि॰।

समुद्राम्बरा * स्त्री॰ समुद्र अम्बरमिव वेष्टनाकारं यस्याः। पृथि-व्याम्। सागराम्बरादयोऽप्यत्र।

समुद्रीय * त्रि॰ समुद्र+भवार्थे घ छ वा। समुद्रभवे द्रव्ये।

समुद्वह * त्रि॰ सम्+उद्+वह-अच्। श्रेष्ठे, [illegible] च।

समुन्दन * न॰ सम्+उन्द ल्युट्। सम्यगार्द्रीकरणे [illegible]।

समुन्द * न॰ सम्+उन्द-क। [illegible] आर्द्रे।

समुन्नत * त्रि॰ सम्+उद्+नम-क्त। उन्नते, [illegible] पु॰।

समुन्नति * स्त्री० सम्+उद्+नम-क्तिन्। उन्नतायाम् "प्रायः पयोधरसमुन्नतिरत्र चेत्." इत्युद्भटः।

समुन्नद्ध * त्रि० सम्+उद्+नह-क्त। गर्विते, पण्डितम्मन्ये, प्रभौ, समुद्धृते च। कर्मणि क्त। उत्तोल्य बद्धे। [क्षेपणे, समुन्नायने च।

समुन्नय * पु० सम्+उद्+नी-अच्। ऊर्द्ध्वनयने, सम्यग्नीतौ, उत्-

समुपचित * त्रि० सम्यक् उपचितम् उप+चि-क्त। सुवृद्धीकृते, संवर्द्धिते च।

समुपजोषम् * अव्य० सम्+उप+जुष अम्। अत्यन्तानन्दे।

समुपेयिवस् * त्रि० सम्+उप+इण-क्वसु। समोपगते।

समुपोढ * त्रि० सम्+उप+वह क्त। बद्धे, सजाते च।

समुल्लेप * पु० सम्+उद्+लिप-घञ्। पादादिना भूम्यादेः खनने।

समूढ * त्रि० सम्+ऊह-वा वह-क्त। राशीकृते, धनपाशुते "समूढमस्य पांसुरे" इति ऋग्वेदः, भुग्ने, दमिते, सद्योविजाते, शोधिते च। सह मूढेन। मूढसहिते त्रि०।

समूरु * पु० सङ्गतौ मांसहीनौ ऊरू यस्य। मृगभेदे।

समूल * त्रि० सह मूलेन। मूलसहिते "समूलघातं न्यवधीत्" इति भट्टिः।

समूह * सम्+ऊह-घञ्। समुदये।

समूहनी * स्त्री० समूह्यतेऽनया ल्युट्।। सम्मार्जन्याम् भावे ल्युट्। सम्मार्जने, सम्यगूहकरणे च न०।

समूह्य * पु० सम्+ऊह-ण्यत्। यज्ञियाग्नौ। सम्यक् तर्क्ये त्रि०। [च।

समृद्ध * त्रि० सम्यक् ऋद्धः ऋध+क्त। अधिकसम्पत्तियुक्ते, अतिवृद्धे

समृद्धि * स्त्री० सम्यक् ऋद्धिः सम्+ऋध-क्तिन्। अतिसम्पत्तौ, वृद्धौ "मधुसमृद्धिसमेधितमेधया" इति माघः।

समेत * त्रि० सम्+आ इण क्त। समागते, सङ्गते च।

समेधित * त्रि० सम्+एध-णिच्+क्त। संवर्द्धिते "मधुसमृद्धिसमेधितमेधया" इति माघः।

समोदक * न० समम् अर्द्धभागेन तुल्यमुदकं यत्र। अर्द्धाम्बुसंयोगेन मथितदधिजाते तक्रभेदे। सह मोदकेन। मोदकसहिते त्रि०। [यस्य यद्रूपता उचिता तस्य तथाभवने च।

सम्पत्ति * स्त्री० सम्+पद+क्तिन्। अतिविभवे, अनुरूपात्मभावे

सम्पद् * स्त्री० सम्+पद सम्प० क्विप्। विभवे, सम्पत्तौ च।

सम्पन्न * त्रि० सम्+पद-क्त। साधिते, सम्पद्युक्ते च।

सम्पराय * पु० सम्+परा+इण-अच्। युद्धे, आपदि उत्तरकाले च।

साम्परायिक * न० सम्परायाय आपदे हितम् ठञ्। युद्धे। ठण्। साम्परायिकमप्यत्र।

सम्पर्क * पु० सम्+पृच-घञ्। सम्बन्धे।

सम्पर्किन् * त्रि० सम्+पृच-घिनुण्। सम्बन्धयुक्ते।

सम्पा * स्त्री० सम्यक् अतर्कितं पतति पत-ड। विद्युति।

सम्पाक * पु० सम्यक् पाको यस्मात् ५ब०। आरग्वधवृक्षे तर्कोत्पने हि भुक्तादेः सम्यक् पाको भवतीति वैद्यके प्रसिद्धम्, धूर्ते, अल्पे, अभ्यर्के, लम्पटे च त्रि०।

सम्पात * पु० सम्+पत-घञ्। पक्षिगतिभेदे, सम्यक्पतने च।

सम्पाति * पु० सम्+पत-णिच्-इन्। जटायुषो ज्येष्ठभ्रातरि, पक्षिभेदे। स्वार्थे कन्। तत्रैव।

सम्पुट * पु० सम्+पुट-क। कुङ्कुमकहरणे। सम्यक् पुटमिव उभयपार्श्ववर्त्ति यस्य। एकजातीयपदार्थे भिन्नजातीयस्य उभयतो व्याप्त्या स्थिते त्रि० "सकारैः सम्पुटो जाप्यः" इति तन्त्रम्।

सम्पुटक * पु० सम्पुटयति सम्+पुट-अच् स्वार्थे वुन्। समुद्गके मञ्जुषाख्ये (पेटरा) पदार्थविशेषे।

सम्पूर्ण * त्रि० सम्+पूर-क्त। परिपूर्णे, समग्रे च "आदित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता एकादशी हि सम्पूर्णा" इति स्मृत्युक्ते एकादशीभेदे।

सम्पृक्त * त्रि० सम्+पृच-क्त। मिश्रिते, सम्बद्धे च।

सम्प्रणयन * न० सम्+प्र+णी ल्युट्। सम्यगाज्यहुतादेः शोधनाय संस्कारविशेषे, विधाने च।

सम्प्रति * अव्य० सम्+प्रति+समाहारद्वन्द्वः। इदानीमित्यर्थे।

सम्प्रतिपत्ति * स्त्री० सम्+प्रतिपद्यते क्तिन्। वादुक्तार्थविषयस्वीकारे "पूर्वाभियोगं प्रत्यर्थी यदि तं प्रतिपद्यते। सा तु सम्प्रतिपत्तिः स्यात्" इति स्मृत्युक्ते व्यवहारे, उत्तरभेदे च।

सम्प्रदातृ * त्रि० सम्+प्र+दा-तृच्। दानकर्त्तरि।

सम्प्रदान * न० सम्+प्र+दा-भावे ल्युट्। सम्यक् प्रदाने। सम्प्रदीयतेऽस्मै ल्युट्। "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति पाणिन्युक्ते दानकर्मोद्देश्ये। तच्च त्रिविधम् "अनिराकरणात् कर्त्तुस्त्यागाङ्गकर्मणेप्सितम्। प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्" इति। तत्र विप्राय वस्त्रं ददातीत्यादौ अनिराकर्त्तृसम्प्रदानम्, याचकाय धनं ददातीत्यादौ प्रेरयितृसम्प्रदानम्, गुरवे धनं ददातीत्यादौ अनुमन्तृसम्प्रदानम्।

सम्प्रधारणा * स्त्री० सम्+प्र+धृ-णिच्-युच्। युक्तायुक्तत्वविवेचनेनार्थसमर्थने।

सम्प्रयोग * पु० सम्+प्र+युज-घञ्। इष्टादिलाभेच्छया धनादिविनियोगे। "विभागः सम्प्रयोगश्च" इति स्मृतिः। रमणे, सम्बन्धे च।

सम्प्रयोगिन् * त्रि० सम्+प्र+युज-घिनुण्। कामुके कलाकेलिकारके, सम्यग्लाभार्थं धनादिविनियोजके च।

सम्प्रमाद * पु० सम्+प्र+मद-घञ्। योगादिशास्त्रोक्ते चित्तस्य नैर्मल्यसम्पादके प्रयत्नभेदे। भावे घञ्। सम्यक्प्रमत्ततायाम्।

सम्प्रसाधन * न० सम्+प्र+साध+णिच् करणे ल्युट्। कटकादौ भूषणे। भावे ल्युट्। भूषणक्रियायाम्।

सम्प्रसारण * न० सम्+प्र+सृ+णिच्-ल्युट्। सम्यग्विस्तारणे, सम्पादने, व्याकरणोक्ते यवः स्थाने जायमाने इकस्वरवर्णे च।

सम्प्रहार * पु० सम्प्रह्रियतेऽत्र सम्+प्र+हृ-घञ्। युद्धे। भावे घञ्।

[illegible]

সম্ভাবিত ● ত্রি॰ সম্+ভূ-ণিচ্-ক্ত। সম্ভবযুক্তে পদার্থে।

সম্ভাষণ ● ন॰ সম্+ভাষ-ল্যুট্। সম্যক্কথনে, পরস্পরকথনে চ।

সম্ভিন্ন ● ত্রি॰ সম্+ভিদ-ক্ত। বিদলিতে, ভেদান্বিতে, সম্মিলিতে চ। "সম্ভিন্নকূল" ইতি বৈগোলিকাঃ।

সম্ভূতি ● স্ত্রী॰ সম্+ভূ-ক্তিন্। বিভবে, ... "সম্ভূতিঞ্চ উপাসতে" ইতি শ্রুতিঃ।

সম্ভূয়সমুত্থান ● ন॰ সম্ভূয় মিলিত্বা সমুত্থানম্। মিলিত্বা বণিজাং বাণিজ্যাদিকর্মকরণে বিবাদভেদে।

সম্ভৃতি ● স্ত্রী॰ সম্-ভৃ-ক্তিন্। সম্যক্পোষণে।

সম্ভেদ ● পু॰ সম্ভিদ্যতে ... সম্+ভিদ-আধারে ঘঞ্। নদ্যাঃ সমুদ্রস্থানে। ভাবে ঘঞ্। ... সম্যগ্ভেদনে, ... চ। "সম্ভেদে ..." ইতি মীমাংসা।

সম্ভোগ ● পু॰ সম্+ভুজ-ঘঞ্। সম্যগ্ভোগে, সুরতে, ... "... সম্ভোগঃ ..." ...

সম্ভ্রম ● পু॰ সম্+ভ্রম-ঘঞ্ ... । ... আদরে, ... চ।

সম্মতি ● স্ত্রী॰ সম্+মন-ক্তিন্। অনুমতৌ, ...

সম্মদ ● পু॰ সম্+মদ-অপ্। হর্ষে। ...

সম্মর্দ ● পু॰ ... সম্+মৃদ-আধারে ঘঞ্। যুদ্ধে। ...

সম্মান ● পু॰ সম্+মান-ঘঞ্। আদরে।

[illegible]

सरक * पु॰ न॰ सृ-वुन्। मद्यपानमात्रे, मद्यपरिवेशने, इक्षुजमद्ये तत्पात्रे, अविरलपथिकपङ्क्तौ च। गतिशीले त्रि॰।
सरघा * स्त्री॰ सरं मद्यभेदं हन्ति हन-ड नि॰। मधुमक्षिकायाम्।
सरज * न॰ सरात् जायते जन-ड। नवनीते।
सरजस् * स्त्री॰ सह रजसा। ऋतुमत्यां स्त्रियाम्। रजोयुक्ते त्रि॰। अव्ययी॰ अच् समा॰। रजःसाहित्ये अव्य॰।
सरट * पु॰ स्त्री॰ सृ-अटन्। कृकलासे (काँकलास)। [याञ्च।
सरण * न॰ सृ-ल्युट्। गमने, लौहमले च। (गन्धभादाल) लता-
सरणि(णी) * स्त्री॰ सृ-अनि वा ङीप्। पथि पङ्क्तौ प्रसारण्याम्।
सरपत्त्रिका * स्त्री॰ सरे जले पत्त्रमस्त्यस्याः ठन्। पद्मे। पद्मपत्रे च।
सरमा * स्त्री॰ सह रमते रम-अच्। कुक्कुरयोषिति, विभीषणप- [स्त्री॰।
त्न्याञ्च।
सरयु * पु॰ सृ-अयु। वायौ। ऊङ्। अयोध्यान्तिकवाहिनदीभेदे
सरल * पु॰ सृ-अलच्। पीतदारुणि धूपकाष्ठभेदे। उदारे, ऋजौ च त्रि॰। त्रिपुटायां स्त्री॰। [टायाञ्च।
सरलद्रव * पु॰ ६त॰। सरलवृक्षनिर्यासे (टारपीन), नदीभेदे, त्रिपु-
सरलाङ्ग * पु॰ सरलो वृक्षोऽङ्गं साधनं यस्य। श्रीवेष्टे गन्धद्रव्ये।
सरस् * न॰ सृ-असुन्। जले, सरोवरे च। गौरा॰ ङीप्। सरसी-त्यप्यत्र स्त्री॰ “सरसीः परिशीलितुम्” इति नैषधम्।
सरस * न॰ सह रसेन जलेन आस्वादेन च। सरोवरे। रसान्विते, सार्द्रे च त्रि॰। “सरसां सरसां परिमुच्य” इति भट्टिः। श्वेत-त्रिवृतायां स्त्री॰।
सरसमत * न॰ सरसमिव निर्यासं सम्प्रतनोति सम्+प्र+तन-ड। विकण्टकवृक्षे (तँकाटासिजु)। [जमनुविद्धम्” इति शकुन्तला।
सरसिज * न॰ सरसि जायते जन-ड अलुक् स॰। पद्मे, “सरसि-
सरसीरुह * न॰ सरस्यां सरोवरे रोहति रुह-क। पद्मे। सारस-खगे च पु॰ स्त्री॰।
सरस्वत् * पु॰ सरांसि जलानि सन्त्यस्य मतुप् मस्य वः। सरोवरे सागरे च। नद्याम्, नदीभेदे, वाण्यां, गवि, ज्योतिष्मत्यां, ब्राह्म्याम्, शक्तौ, देवीभेदे, सोमलतायाञ्च स्त्री॰ ङीप्।
सरा * स्त्री॰ सृ-अच्। निर्झरे।
सराव * पु॰ सरं जलमवति अव-अण्। जलाधारे मृण्मये पात्रभेदे (सरा)। सह रावेण। सशब्दे त्रि॰।
सरि * पु॰ स्त्री॰ सृ इन्। स्त्रीत्वपक्षे वा ङीप्। निर्झरे।
सरिका * स्त्री॰ सरोऽस्त्यस्याः ठन् सृ-वुन् वा। हिङ्गुपत्रिकायाम्।
सरित् * स्त्री॰ सृ-इति। नद्याम्, सूत्रे च।
सरित्पति * पु॰ ६त॰। समुद्रे। [न तस्य दः। समुद्रे।
सरित्वत् * पु॰ सरित् स्वामित्वेनास्त्यस्य मतुप् मस्य वः पदत्वाभावात्
सरित्सुत * पु॰ ६त॰। गङ्गापुत्त्रे भीष्मे। [त्त्यत्र।
सरितांपति * पु॰ ६त॰ अलुक् स॰। समुद्रे, सरितां नाथादयो-
सरिद्वरा * स्त्री॰ सरित्सु वरा श्रेष्ठा। गङ्गायाम्।

सरिल * न॰ सृ-इलच्। जले।
सरीसृप * पु॰ स्त्री॰ वक्रं सर्पति। सृप-यङ् तस्य लुक्, अच्। सर्पे, वृश्चिकादौ, ज्योतिषोक्ते वृश्चिकादिराशौ च।
सरु * पु॰ सृ-उन्। खड्गादिमुष्टौ।
सरूप * त्रि॰ समानं रूपमस्य समानस्य सः। तुल्यरूपे सदृशे। सारसखगे पु॰ स्त्री॰।
सरोज * न॰ सरसि जायते जन-ड। पद्मे। सरोजातमात्रे त्रि॰।
सरोजन्मन् * न॰ सरसि जन्म यस्य। पद्मे। तडागजातमात्रे त्रि॰।
सरोजिनी * स्त्री॰ सरोजानां समूहः सन्निकृष्टदेशो वा इनि। पद्मसमूहे, तद्युक्तदेशरूपायां पद्मलतायाम्, पद्माधारदीर्घि-कायाञ्च।
सरोरुह्(ह) * न॰ सरसि रोहति रुह-क्विप् क वा। पद्मे।
सरोवर * पु॰ सरोभिर्जलैर्व्रियतेऽसौ वृ-अप्। तडागे।
सर्ग * पु॰ सृज-घञ्। स्वभावे, सृष्टौ, निर्मोचे, काव्यादेः परिच्छेदे “सर्गोऽयमादिर्गत” इति नैषधम्। निश्चये, “यदि सर्ग एष ते” इति रघुः। मोक्षे, उत्साहे, अनुमतौ च। [वाचस्पत्ये।
सर्गबन्ध * पु॰ सर्गैर्बध्यतेऽसौ बन्ध-घञ्। महाकाव्ये। लक्षणं
सर्ज * अर्जने भ्वादि॰ पर॰ सक॰ सेट्। सर्जति असर्जीत् षोप-देशत्वाभावान्न षत्वम्।
सर्ज * सृ-अच्। शालवृक्षे, तद्रसे (धुना), पीतशाले च।
सर्जक * पु॰ सृज-ण्वुल्। पीतशाले, शालवृक्षे च।
सर्जगन्धा * स्त्री॰ सर्जस्येव गन्धो यस्याः। रास्नायाम्।
सर्जन * न॰ सृज+ल्युट्। सैन्यपश्चाद्भागे, सृष्टौ च।
सर्जनिर्यासक * पु॰ सर्जस्य निर्यास इव कायति कै-क। राले।
सर्जमणि * पु॰ सर्जस्य शालवृक्षस्य मणिरिव। (धुना) सर्जरसे।
सर्जरस * पु॰ ६त॰। शालवृक्षरसे (धुना)।
सर्जि(र्जी) * स्त्री॰ सृज-इन् वा ङीप्। नदीभेदे, तत्कूलजे सर्जिकाक्षारे (साजिमाटि)। [नदीभेदे च।
सर्जिका * स्त्री॰ सृज-ण्वुल्-टाप् अत इत्त्वम्। सर्जिकाक्षारे,
सर्जिकाक्षार * स्त्री॰ सर्जिकायाः क्षारः। स्वनामख्याते क्षारभेदे (साजिमाटि)।
सर्जिक्षार * पु॰ ६त॰। (साजिमाटि) सर्जिकाक्षारे।
सर्ज्य * पु॰ सर्जस्येदं यत्। सर्जरसे। सृज+ण्यत्। सर्जनीये त्रि॰।
सर्प * पु॰ सृप-अच्। नागकेशरे, भुजङ्गे च “सर्पापसर्प भद्रम्” इति भारतम्। तज्जातिस्त्रियां ङीप्। भावे घञ्। गमने।
सर्पकङ्काली * स्त्री॰ सर्पस्येव कङ्कालमङ्गविशेषो यस्याः गौरा॰ ङीप्। सर्पविषघातिन्यां लतायाम्।
सर्पगन्धा * स्त्री॰ सर्पाणां विषस्य गन्धो गन्धनं हिंसनं यस्याः ६त्र विषहारिण्यां लतायाम्। [नकुलीलतायाम्।
सर्पघातिनी * स्त्री॰ सर्पं सर्पविषं हन्ति हन-णिनि। सर्पविष-
सर्पच्छत्र * पु॰ सर्पस्तृणमिवानायासच्छेद्यो यस्य। नकुले।

सर्पदंष्ट्र * पु० सर्पस्य दंष्ट्रेव पुष्पमस्य। नागदन्तीवृक्षे। सर्पस्य दंष्ट्रेव स्पर्शनात् दुःखदत्वात्। वृश्चिकालीलतायां स्त्री०।

सर्पदंष्ट्रिका * स्त्री० सर्पदंष्ट्राकारोऽस्त्यस्याः ठन्। अजशृङ्गाम्।

सर्पदण्डी * स्त्री० सर्पं दण्डयति दण्ड-अण्। गोरक्षीवृक्षे।

सर्पदन्ती * स्त्री० सर्पस्य दन्त इव पुष्पाण्यस्याः गौरा० ङीष्। नागदन्तीवृक्षे। [कर्कोट्याम्।

सर्पदमनी * स्त्री० सर्पान् दमयति अनया दम-णिच्-ल्युट्। वन्ध्या-

सर्पपुष्पी * स्त्री० सर्पः सर्पदन्त इव पुष्पाण्यस्याः ङीष्। नाग-दन्त्याम्।

सर्पभुज् * पु० सर्पं भुङ्क्ते भुज-क्विप्। मयूरे। गरुडे च।

सर्पराज * पु० सर्पाणां राजा टच् समा०। वासुकौ नागभेदे।

सर्पलता * स्त्री० सर्पाख्या लता। ताम्बूलीलतायाम्।

सर्पसत्र * न० सर्पस्य होमद्रव्यस्य तन्नाशनार्थं वा सत्रम्। जनमे-जयानुष्ठिते महाभारतप्रसिद्धे सर्पनाशनार्थे यज्ञभेदे।

सर्पसहा * स्त्री० सर्पं सहते सह-अच्। सर्पकङ्कालीलतायाम्।

सर्पहन् * पु० सर्पं हन्ति हन-क्विप्। नकुले। गरुडे च।

सर्पाक्षी * स्त्री० सर्पस्येवाक्षि पुष्पं यस्याः षच् समा०। गन्धना-कुल्याम्। [च।

सर्पाख्य * पु० सर्पस्याख्या आख्या यस्य। नागकेसरे, मत्स्यकन्दभेदे

सर्पाङ्गी * स्त्री० सर्पस्येवाङ्गं यस्याः ङीष्। सर्पकङ्कालीलतायाम्।

सर्पादनी * स्त्री० सर्पविषमद्यतेऽनया अद-ल्युट् ङीप्। नाकुल्याम्।

सर्पाराति * पु० [illegible]। गरुडे, नकुले च। सर्पारिप्रभृतयोऽप्यत्र।

सर्पावास * न० सर्पाणामावासो यत्र। चन्दनवृक्षे। [illegible]। सर्पा-वासे पु०।

सर्पाशन * पु० सर्पानश्नाति अश-ल्युट्। मयूरे, गरुडे च।

सर्पिस् * न० सृप-इसि। घृते। [कारके त्रि०।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

सर्वग्रन्थि * पु० सर्वत्र ग्रन्थिरिवास्य। पिप्पलीमूले। [त्रि०।

सर्वङ्कष * पु० सर्वं कषति कष-खच् मुम् च। पापे। सर्वातिरेकिणि

सर्वजनीन * त्रि० सर्वजनेषु विदितः ख। सर्वत्र विख्याते।

सर्वज्ञ * पु० सर्वं जानाति ज्ञा-क। शिवे, बुद्धे, परमेश्वरे च। सर्व-ज्ञानकर्त्तरि त्रि०। दुर्गायां स्त्री०।

सर्वतस् * अव्य० सर्व+तसिल्। समन्तत इत्यर्थे।

सर्वतिक्ता * स्त्री० सर्वतः तिक्ता। काकमाच्याम्।

सर्वतोभद्र * पु० न० सर्वतो भद्राणि सुखानि यस्य। चतुर्द्वारयुक्ते गृहभेदे, प्रतिष्ठादौ पूज्यदेवतानां मण्डलभेदे, ज्योतिषोक्ते शुभाशुभज्ञानार्थे चक्रभेदे, अलङ्कारोक्ते बन्धभेदात्मके चित्रकाव्ये च। सर्वतोभद्रमस्य। निम्बवृक्षे पु०। गाम्भार्य्यां, नटयोषिति च स्त्री०। [शुभाशुभज्ञानार्थे चक्रभेदे।

सर्वतोभद्रचक्र * न० सर्वतो भद्रं यत्र तादृशं चक्रम्। ज्योतिषोक्ते

सर्वतोभद्रबन्ध * पु० सर्वतो भद्राकारेण बन्धः। चित्रकाव्यभेदे।

सर्वतोभद्रमण्डल * न० सर्वतो भद्रनामकं मण्डलम्। शारदाति-लकाद्युक्ते प्रतिष्ठादौ पूज्यदेवतामण्डलभेदे।

सर्वतोमुख * न० सर्वतो मुखमस्य। जले। आकाशे, शिवे, ब्रह्मणि, परमेश्वरे, आत्मनि, ब्राह्मणे, अग्नौ च पु०।

सर्वत्र * अव्य० सर्व-त्रल्। सर्वस्मिन् काले, देशे, दिशि चेत्यर्थे।

सर्वत्रग * पु० सर्वत्र गच्छति गम-ड। वायौ। सर्वत्रगामिनि त्रि०।

सर्वत्रगामिन् * पु० सर्वत्र गच्छति गम+णिनि। वायौ। सर्वत्र-गन्तरि त्रि०।

सर्वथा * अव्य० सर्वप्रकारम् थाल्। सर्वप्रकारे, भृशे, प्रतिज्ञाया-दितौ च। [तद्रूपे। सर्वदमनकर्त्तरि त्रि०।

सर्वदमन * पु० सर्वान् दमयति दम+णिच्-ल्युट्। दुष्मन्तपुत्रे भर-

सर्वदर्शिन् * पु० सर्वं समभावेन पश्यति दृश-णिनि। बुद्धे, परमे-श्वरे च। सकलद्रष्टरि त्रि०। [काशादावित्यर्थे।

सर्वदा * अव्य० सर्वस्मिन् काले देशे दिशि वा दाच्। सर्वस्मिन्

सर्वधुरीण * त्रि० सर्वां धुरं वहति ख। सकलभारवाहके वृषादौ।

सर्वनाम * न० सर्वेषां नाम। व्याकरणोक्ते कार्यविशेषार्थं सं-ज्ञावति सर्वादिशब्दभेदे।

सर्वभक्षा * स्त्री० भक्ष-अण् उप०। अजायाम्। सर्वभक्षके त्रि०।

सर्वमङ्गला * स्त्री० सर्वाणि मङ्गलान्यस्याः पृष०। दुर्गायाम्।

सर्वमय * त्रि० सर्वात्मक मयट्। सर्वात्मके। परमेश्वरे पु०।

सर्वमूषक * पु० सर्वं मुष्णाति मुष क्वुन् पृ०। काले।

सर्वरस * पु० सर्वो रसमयः। [illegible] च। [illegible]।

सर्वरत्नक * पु० [illegible]।

सर्वराज * पु० सर्वो राजा [illegible] समा०। [illegible]। सकलराजे।

सर्वरी * स्त्री० [illegible]। रात्रौ।

सर्वर्त्तुपरिवर्त्त * पु॰ सर्वर्त्तूनां परिवर्त्तो यत्र। वत्सरे।

सर्वला(ली) * स्त्री॰ सर्वं लाति ला क वा गौरा॰ ङीप्। तोमराख्ये

सर्वलिङ्गिन् * पु॰ सर्वेषां लिङ्गानि सन्त्यस्य इनि। वेदविरुद्ध-
चारिणां बौद्धादीनां लिङ्गवत्सु पाषण्डेषु।

सर्वलोह * पु॰ सर्वः लोहमयोऽवयवो यस्य। लोहमये वाणे।

सर्ववर्णिका * स्त्री॰ सर्वं वर्णयति वर्ण-ण्वुल् अत इत्वम्। गाम्भारी-
वृक्षे।

सर्वविद् * पु॰ सर्वं वेत्ति विद-क्विप्। परमेश्वरे। सर्वज्ञातरि त्रि॰।

सर्ववेद * पु॰ सर्वे वेदा अधीतत्वेन सन्त्यस्य अच्। सर्ववेदाध्ययन-
कर्त्तरि। विद-अच् उप॰। सर्वज्ञे त्रि॰।

सर्ववेदस् * पु॰ सर्वाणि धनानि वेदयते लम्भयति पात्राय ददाति
विद-लाभे णिच्-असि। सर्वस्वदक्षिणकविश्वजिन्नामकयाग-
कर्त्तरि।

सर्ववेशिन् * पु॰ सर्वेषां वेशो धार्य्यत्वेनास्त्यस्य इनि। नटे।

सर्वसंहत * पु॰ सर्वं संहृतमुषितं यस्य। षष्टिधान्ये। सर्वतोचिते
त्रि॰। [सैन्यसज्जीकरणेन युद्धयात्रायाम्।

सर्वसन्नहन * न॰ सर्वेषां सन्नहनं युद्धार्थं सज्जीकरणं यत्र। सर्व-

सर्वसह * पु॰ सर्वं सहते अच्। गुग्गुलौ। सर्वसहिष्णौ त्रि॰।

सर्वसिद्धि * पु॰ सर्वेषां सिद्धिरस्मात्। श्रीफले। सकलसाधने त्रि॰।

सर्वस्व * न॰ कर्म॰। सकलधने।

सर्वस्वदक्षिण * पु॰ सर्वस्वं दक्षिणा यत्र। विश्वजिन्नामकयागभेदे।

सर्वहित * न॰ सर्वेषां हितम्। मरिचे ६त॰। सकलहितहेतौ त्रि॰।

सर्वाङ्गीण * त्रि॰ सर्वाङ्गाणि व्याप्नोति ख। सर्वावयवव्यापके "सर्वा-
ङ्गीणे तरुत्वचे" इति भट्टिः। [त्वम्। दुर्गायाम्।

सर्वाणी * स्त्री॰ सर्वस्य आनयति मोक्षं आ-नी-ड पूर्वपदादिति

सर्वानुकारिणी * स्त्री॰ सर्वमनुकरोति अनु+कृ णिनि। शाल-
पर्ण्याम्। [प्राणिनि त्रि॰।

सर्वानुभूति * स्त्री॰ सर्वेषामनुभूतिर्यत्र। श्वेतत्रिवृतायाम्। तत्त्व-

सर्वान्नभोजिन् * त्रि॰ सर्वेषामन्नं सर्वाण्यन्नानि वा भुङ्क्ते भुज-
णिनि। सर्वान्नभक्षके। [भक्षके।

सर्वान्नीन * त्रि॰ सर्वेषामन्नं सर्वमन्नं वा भुङ्क्ते ख। सर्वान्न-

सर्वाभिसन्धिन् * पु॰ सर्वत्र आचारे अभिसन्धानमस्य इनि। सर्वत्रा-
भिसन्धिमति जने। [चतुरङ्गसैन्यसहायेन युद्धयात्राभेदे।

सर्वाभिसार * पु॰ अभिसियते अत्र अभि+सृ-भावे घञ् ६त॰।

सर्वार्थसिद्ध * पु॰ सर्वेषु अर्थेषु सिद्धः। बुद्धे। सकलार्थसिद्धिमति
त्रि॰।

सर्वाश्म * पु॰ सर्वमश्नुते अश् [illegible]। [illegible]

सर्वौघ * पु॰ सर्वेषां चतुरङ्गसैन्यानामोघो [illegible]
[illegible] कर्म॰। [illegible]

सर्वौषधि * स्त्री॰ कर्म॰। "कुष्ठमांसीहरिद्राभ्यां [illegible]
मुरा[illegible] सर्वौषधिः स्मृत" इत्युक्ते [illegible]

वर्गे।

सर्वौषधिगण * पु॰ सर्वासामोषधीनां गणः। "मुरा मांसी वचाकुष्ठं
शैलेयं रजनीद्वयम्। शठीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृत:"
इत्युक्ते द्रव्यगणे।

सर्षप * पु॰ सृ-अप सुक् च। (सरिषा) शस्यभेदे। [तैलभेदे।

सर्षपतैल * न॰ सर्षपस्य स्नेहे सर्षप-स्नेहार्थे तैलच्। सर्षपस्नेहरूपे

सल * न॰ सल+अच्। जले।

सलिल * न॰ सल-इलच्। जले।

सलिलकुन्तल * पु॰ सलिलस्य कुन्तल इव। शैवाले।

सलिलराशि * पु॰ ६त॰। समुद्रे। सलिलनिध्यादयोऽप्यत्र।

सलिलेन्धन * पु॰ सलिलमिन्धनमिव दाह्यं यस्य। वाडवानले।

सल्लकी * स्त्री॰ सल्ल-क्वुन् लुक् च षि॰ गौरा॰ ङीष्। गजभक्ष्याम्।

सव * पु॰ सूयते सू-अप्। यज्ञे, सन्ताने च। अच्। सूर्य्ये, अर्कवृक्षे च

सवन * न॰ सु-ल्युट्। यज्ञाङ्गे स्नाने, सोमनिष्पादनव्यापारे, सोम-
पाने, यज्ञे, सोमनिर्मोचने, समरे च। [भिः" इति रघुः।

सवयस् * त्रि॰ समानं वयो यस्य समानस्य सः। वयस्ये "सवयोभि-

सवर्ण * पु॰ समानो वर्णो यस्य। तुल्यरूपे, एकजातीयके यथा-
[illegible] "तुल्यास्यप्रयत्नं
सवर्णम्" इति व्याकरणोक्ते [illegible] यथा
[illegible]
[illegible]
[illegible] त्रि॰।

सवत्सा * स्त्री॰ सह वत्सेन। [illegible]

सवाचस् * त्रि॰ सह वाचसा। [illegible]

सविकल्पक * न॰ सह विकल्पेन सह। वेदान्तोक्ते [illegible]
[illegible]
[illegible] च।

सविकाश * त्रि॰ सह [illegible]। [illegible] च।

सवितृ * पु॰ सू तृच्। [illegible] "[illegible]"
इति श्रुतिः। सूर्य्ये च।

सविध * त्रि॰ सह [illegible] । निकटे "[illegible]
[illegible]" इति नैषधम्।

सविशेष * त्रि॰ सह [illegible] [त्रि॰।

सवेश * त्रि॰ [illegible] सह [illegible]। निकटे, [illegible]

सव्य * त्रि॰ षू+यत् [illegible]। वाम, दक्षिणे, प्रतिकूले च।
विष्णौ पु॰।

सव्यसाचिन् * पु॰ सव्येन [illegible]। अर्जुने।

सव्येष्ठ * पु॰ सव्ये तिष्ठति [illegible]
सारथौ।

[illegible] * स्त्री॰ सह [illegible]

[illegible] * स्त्री॰ सह [illegible]

[illegible]

मरुत्कर • पु० मरुत्वं वातः किरणा यस्य। सूर्ये। तस्य किरणाद्वातोऽस्य।

[illegible]

(औषध)।

[illegible]

[illegible]

सहासन * न॰ सह आस्यतेऽत्र आस-ल्युट्। एकासने।

सहित * त्रि॰ सम्यक् हितः पृ॰ समोऽन्त्यलोपः। सम्यग्हिते। सह-क वा इट्, सह-इतच् वा। समभिव्याहृते। [स्त्रियां ङीप्।

सहित्र * त्रि॰ सह-इत्र् वा इट्। सहनशीले। इडभावे सोढाप्यत्र।

सहित्र * न॰ सह्यतेऽनेन सह-इत्र। सहनसाधने धर्मभेदे।

सहिष्णु * त्रि॰ सह-इष्णुच्। सहनशीले। [विरुद्धधर्मद्वयसहने।

सहिष्णुता * स्त्री॰ सहिष्णोर्भावः तल्। क्षमायाम् शीतोष्णादि-

सहृदय * त्रि॰ सह हृदयेन। प्रशस्तचित्ते, काव्यार्थभावनाधीन-परिपक्वबुद्धौ "सहृदयधुरीणाः कतिपये" इति रसगङ्गाधरः।

सहृल्लेख * पु॰ हृदयस्य लेख कालुष्यकरण हृल्लासः सह हृल्लेखेन। "विचिकित्सा तु हृदये यस्मिन् समायते। सहृल्लेखन्तु विज्ञेयम्" इत्युक्ते दूषितान्ने।

सहोक्ति * स्त्री॰ सह उक्तिः। सहकथने, एकोक्तौ, सहशब्दस्यो-क्तित्व। अर्थालङ्कारभेदे। [पर्णशालायाम्।

सहोटज * पु॰ न॰ सहतं आतपादेव सह-अच् कर्म॰। मुनीनां

सहोढ * पु॰ सह ऊढया। "या गर्भिणी संस्क्रियते ज्ञाताऽज्ञा-तापि वाऽसती। वोढुः स गर्भो भवति सहोढ इति चोच्यते" इति मनूक्ते अज्ञातगर्भायाः परिणीतायाः स्त्रिया गर्भे। तज्जाते पुत्रभेदे सहोढजः। सहोढः सन् जायते जन-ड।

सहोदर * न॰ सह समानमुदरं यस्य। एकगर्भजाते भ्रातरि। भगिन्यां स्त्री॰।

सह्य * न॰ सहास्य भाव यत् नि॰। (साहाय्ये।) "तवार्थे सह्यम-करोत्" इति पुराणम्। सह भावे यत्। आरोग्ये, साम्ये, माधुर्ये च। कर्मणि यत्। सोढव्ये त्रि॰। पुनाख्यदेशसमीपस्थे पर्वतभेदे पु॰।

सा * स्त्री॰ सो-ड। गौर्यां, लक्ष्म्यां च।

सांख्य * न॰ सङ्ख्यायतेऽत्र संख्या सम्यग्ज्ञानं तास्यत्र अण्। सम्य-ग्दर्शने "एषा तेऽभिहिता सांख्ये" इति गीता। संख्या मूलप्रकृ-त्यादिपदार्थानां गणनमत्र प्रधानम्। कपिलप्रणीते दर्शन-शास्त्रे, परमतर्षे सांख्यमप्युभयत्र सांख्योपयोगी पु॰।

सांघातिक * त्रि॰ संघाताय हितम् ठञ्। सङ्घातकारके, ज्योति-षोक्ते जन्मनक्षत्रावधिषोडशनक्षत्रे च "देहद्रविण बन्धूनां नाशः सांघातिके तथा" इति ज्योतिषम्। परस्मर्णं सांघातिकमपि उभयत्र।

सांदृष्टिक * न॰ संदृष्टं प्रत्यक्षदृष्टमनुसरति ठक्। दृष्टानुसारिन्याय-भेदे। संदृष्टे दृष्टमात्र फलति ठण्। सद्यःफले। परमस्त्वे सान्दृष्टिकमप्युभयत्र।

सांयात्रिक * पु॰ सम्यक् यात्रायै अलम् ठञ्। पोतेन वाणिज्य-[कारके।

सांयुगीन * त्रि॰ संयुगे युद्धे साधु खञ्। रणकुशले।

सांराविण * न॰ सम्+रु-भावे णिनि ततः स्वार्थेऽण्। व्यासे इत्यादि-कोलाहले।

सांवत्सर * पु॰ संवत्सरं तज्ज्ञानोपयोगिशास्त्रं
अण्। ज्योतिर्विदि गणके। वर्षसम्बन्धिनि त्रि
सांवत्सरिक * त्रि॰ संवत्सरे भवः ठञ्। प्रतिवर्षकर्त
सांवादिक * पु॰ सम्यग्वादायालं ठञ्। नैयायिके।
सांशयिक * त्रि॰ संशयमापन्नः ठञ्। सन्दिहाने, सं
सांसारिक * त्रि॰ संसाराय हितं तत्र भवो वा ठञ्
संसारोपयोगिनि वा पदार्थे।
सांसिद्धिक * त्रि॰ संसिद्धिः स्वभावसिद्धिः तया नि
स्वभावसिद्धे "सांसिद्धिकमुदाहृतम्" इति भाषापरि
साकम् * अव्य॰ सह अकति अक-अम् सादेशः। साहित्य
साकल्य * न॰ सकलस्य भावः ष्यञ्। समुदाये। स्वार्थे ष्यञ्
होमार्थे मिश्रितेषु तिलादिद्रव्येषु च। [काङ्क्षायुक्ते पद
साकाङ्क्ष * त्रि॰ सह आकाङ्क्षया। साभिलाषे, शाब्दबोधो
साकार * त्रि॰ सह आकारेण मूर्त्या। मूर्तिविशिष्टे, सावय
साकुरुण्ड * पु॰ सकुरुण्ड एव स्वार्थेऽण्। सकुरुण्डवृक्षे।
साकेत * न॰ आकित्यते आकेतः सह आकेतेन। अयोध्यापुरे "
साकेतनिवासिन" इति रघुः।
साक्तुक * पु॰ सक्तवे हितः ठञ्। यवे। सक्तूनां समा
तस्येदं वा ठञ्। सक्तुसमूहे न॰। तत्सम्बन्धिनि त्रि॰।
साक्षात् * अव्य॰ सह अक्षति अक्ष-आति सादेशः, सह अक्षमत्
अत-क्विप् लौकिक वा। प्रत्यक्षे, तद्रूपे चैतन्ये च "यत्साक्ष
अपरोक्षाद् ब्रह्म" इति श्रुतिः।
साक्षात्कार * पु॰ साक्षात्+कृ-घञ्। प्रत्यक्षे।
साक्षिन् * त्रि॰ सह-अक्षि अस्य इनि साक्षाद्द्रष्टा इति वा नि॰।
साक्षाद्द्रष्टरि। स्त्रियां ङीप्। परमेश्वरे पु॰ "साक्षी चेताः
केवलो निर्गुणश्च" इति श्रुतिः। अयमेव साक्षिचैतन्यत्वेन
वेदान्तपरिभाषादौ स्वीकृतः।
साक्ष्य * न॰ साक्षिणो भावः कर्म वा ष्यञ्। साक्षिधर्मणि,
व्यवहारविषयवृत्तान्तकथनरूपे तत्कार्ये च। "यः साक्ष्यमनृतं
वदेत्" इति स्मृतिः।
सागर * पु॰ सगरेण निर्वृत्तः अण्। समुद्रे, मृगभेदे, सङ्ख्याभेदे
च। [नद्यां, मूर्च्छनायाञ्च।
सागरगामिनी * स्त्री॰ सागरं गच्छति गम+णिनि न अलम्।
सागरनेमि * स्त्री॰ सागरः नेमिरिव वेष्टनाकारो यस्याः। पृथि-
व्याम्।
सागरमेखला * स्त्री॰ सागरो मेखलेव यस्याः। पृथिव्याम्।
सागरालय * पु॰ सागर आलयो यस्य। वरुणे।
सागरोत्थ * न॰ सागरात् उत्तिष्ठति उद्+स्था क। सामुद्र ल॰।
साग्निक * पु॰ सह अग्निना अग्निहोत्रेण वा क
द्वन्द्वे। अग्निहोत्रिणि द्विजे च।
साङ्ग्य * ...स्य भावः ष्यञ्।

वृत्तिस्वरूपे न्यायोक्ते जातिबाधके दोषभेदे, पूर्वोक्तसङ्करस्य धर्मे च। [स्मृतिः।

साङ्ग * त्रि॰ सहाङ्गेन। अङ्गयुक्ते "साङ्गं तत् क्रियते पुनः" इति

साङ्कृतिक * त्रि॰ सङ्कृत्या निर्वृत्तः ठञ्। सङ्कृते।

साङ्ग्रामिक * त्रि॰ संग्रामः प्रयोजनमस्य ठञ्। युद्धोपयोगिरथादौ च।

साचि * अव्य॰ सच-इण्। वक्रे, तिर्य्यगर्थे च। [याम्।

साचिचाटिका * स्त्री॰ साचि यथा तथा चटति ण्वुल्। श्वेतपुनर्णवा-

साचीकृत * त्रि॰ असाचि साचि क्रियते स्म च्वि-कृ-क्त दीर्घः। वक्रीकृते "साचीकृता चारुतरेण तस्थौ" इति कुमारः।

साट * प्रकाशने अद॰ चुरा॰ उभ॰ सक॰ सेट्। साटयति ते असासाटत् त।

साटोप * त्रि॰ सहाटोपेन सहस्य सः। सगर्वे, विकटे च। [त।

सात * सुखे अद॰ चुरा॰ उभ॰ अक॰ सेट्। सातयति ते असासातत्

सात * न॰ सात-अच्। सुखे। सन+क्त। दत्ते, नष्टे च।

सातला * स्त्री॰ सातं सुखं लाति ला-क। चर्मकषायाम्।

साति * स्त्री॰ सन-क्तिन्। अवसाने, दाने, तीव्रपीडायाञ्च।

सातीनक * पु॰ सतीन एव स्वार्थे अण्। सतीनकवृक्षे (क्षुद्रमटर)।

सात्यकि * पु॰ सत्यकस्य वृष्णिवंश्यनृपस्यापत्यम् अण्। शिनेर्नप्तरि स्वनामख्याते वृष्णिवंश्ये क्षत्रियभेदे। [देशभेदे।

सात्वत् * पु॰ सत्वमेव सात्वमतति अत-क्विप् शक॰। यादवाधिकृत-

सात्वत * पु॰ सत्वमेव सात्वम् तत् तनोति तन ड। सत्वगुणोपाधिके विष्णौ। सात्वतो देशस्य राजा अण्। विष्णौ, सात्वद्देशाधिपे नृपे बहुषु तस्य लुक् "भगवान् सात्वतां पतिः" इति पुराणम्। "सत्वं सत्वाश्रयं सत्वगुणं सेवेत केशवम्। योऽनन्यत्वेन मनसा सात्वतः समुदाहृतः" इत्युक्ते वैष्णवे यदुवंश्ये अंशपुत्रे नृपभेदे च। यदुवंशोत्पन्नत्वेन शिशुपालमातरि स्त्री॰ ङीप्। सा च नाटकस्य वृत्तिभेदे च।

सात्विक * पु॰ सत्वात् सत्वगुणप्रधानात् विष्णोर्भवति ठञ्। चतुर्मुखे ब्रह्मणि तस्य विष्णुनाभिकमलजत्वात् तथात्वम्। सत्वमेव सात्वमस्त्यस्य ठञ्। विष्णौ। सत्वगुणेन तत्कार्य्येण मनसा वा निर्वृत्तः ठञ्। सत्वगुणजाते, सत्वप्रधानमनोविशेषजाते च शृङ्गारादिरसानुगुणे भावभेदे च। सत्वप्रधाने जने त्रि॰। "आहाराः सात्विकप्रियाः" इति गीता। दुर्गायां स्त्री॰ ङीप्।

सादनी * स्त्री॰ साद्यन्ते रोगा अनया सद-णिच्-करणे ल्युट् ङीप्। कटुकायाम्।

सादि * पु॰ सद-इण्। सारथौ, योद्धरि च। अवसन्ने त्रि॰।

सादिन् * पु॰ सद-णिनि। अश्वारोहणकर्त्तरि, गजारोहिणि, रथारोहिणि च। अवसन्ने त्रि॰। स्त्रियां ङीप्।

सादृश्य * न॰ सदृशस्य भावः ष्यञ्। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यं, येन सह यस्य सादृश्यं प्रसिद्धं तत् तादृशत्वे

प्रदर्शितम्।

साधक * त्रि॰ सध-ण्वुल्, सिध-णिच्-ण्वुल् साधादेशो वा। ... कर्त्तरि, तन्त्रोक्ते मन्त्रादिसिद्धिकारके शिष्ये च। ... "सिद्धिमाप्नुयात्" इति तन्त्रम्।

साधन * न॰ साध्यतेऽनेन सिध-णिच्-ल्युट् साधादेशः। ... क्रियोत्पादके हेतुभेदे "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" इत्युक्ते क्रिया... साधकव्यापारवति करणे, सैन्ये, युद्धोपकरणे, पुंश्चिह्ने, कारक... प्रमाणे, अनुमापके, हेतौ च। भावे ल्युट्। मारणे, मृतसंस्कारे... अग्निदाने, गतौ, निष्पादने, अनुगमने, सिद्धौ च। कर्म... ल्युट्। द्रव्ये, धने, मैत्रे च।

साधर्म्य * न॰ सधर्मस्य समानधर्मस्य भावः ष्यञ्। न्यायोक्तसाधा... रणधर्मरूपे लक्षणे "यदुक्तं यस्य साधर्म्यम्" इति भाषापरि... च्छेदः। समानो धर्मो यस्य तस्य भावः ष्यञ्। समानधर्मत्वे... पद्ममिव सुन्दरं मुखमित्यादौ सौन्दर्य्यम्।

साधारण * त्रि॰ सह धारणया स्वार्थेऽण्। सदृशे, अनेकस्वत्वे... कस्मिन् धने "साधारणं समाश्रित्य यत्किञ्चिद्वाहनादिकम्... इति स्मृतिः। स्त्रियां गौरा॰ ङीप्। सा च कुञ्चिकायां, वेश्या... दिनायिकायाञ्च। न्यायोक्ते "यः सपक्षे विपक्षे च भवेत् साधा... रणस्तु सः" इत्युक्ते हेत्वाभासभेदे पु॰। यथा वह्निमान् द्रव्य... त्वादित्यादौ द्रव्यत्वहेतुः। सपक्षे पर्वते, विपक्षे ह्रदादौ च... स्थित इति साधारणः।

साधारणधर्म * पु॰ कर्म॰। "अहिंसा सत्यमस्तेयं शौचमिन्द्रिय... निग्रहः। दमः क्षमार्जवं दानं धर्मं साधारणं विदुः" इत्युक्ते धार... सादौ सर्ववर्णाश्रमतुल्ये धर्मे। न्यायाद्युक्ते संशयहेतौ समान... धर्मे च। रज्जू रजतं न वेति संशये रज्जुरजतयोः सामान्यधर्म... चाक्चिक्यत्वशुभ्रत्वादिः।

साधित * त्रि॰ सिध+णिच्-क्त। दापिते, प्रमाणादिना उद्भाविते च... "साधितात् दशकं शतम्" इति स्मृतिः, निष्पादिते, शोधिते च।

साधिदैव * त्रि॰ सह अधिदैवेन स्वार्थेऽण् द्विपदवृद्धिः। अधिदैवत... सहिते। साधिभूतसाधियज्ञावपि। परमेश्वरे।

साधिष्ठ * त्रि॰ अतिशयेन साधु वाढो वा इष्ठन् साधादेशः टि... लोपो वा। अत्यन्तदृढे, अतिसाधौ, अतिशोभने च।

साधिष्ठान * त्रि॰ सह अधिष्ठानेन। सन्निहिते। तन्त्रोक्ते षट्चक्र... मध्ये सुषुम्णामध्यस्थे चक्रभेदे न॰।

साधीयस् * त्रि॰ अतिशयेन साधुः वाढो वा साधादेशः टिलोपो वा। अत्यन्तदृढे, न्याय्ये, साधुतरे च। स्त्रियां ङीप्।

साधु * त्रि॰ साध+उन्। उत्तमकुलजाते, सुन्दरे, मनोहरे, उचिते च। स्त्रियां वा ङीप्। मुनौ, जिने च "न प्रहृष्यति सम्माने नावमाने च कुप्यति। न क्रुद्धः परुषं ब्रूयादेतद्धि साधुलक्षणम्" इत्याद्युक्तधर्मवति जने, वार्द्धुषिके च पु॰।

साधुपुष्प * न० साधु पुष्पं यस्य। स्थलपद्मे। कर्म०। उत्तमकुसुमे।

साधुवाह * पु० कर्म०। विनीते सुशिक्षिते घोटके।

साधुवादिन् * पु० साधु यथा तथा वदति णिनि। विनीतेऽश्वे। सुन्दरवचनकर्त्तरि त्रि०।

साधुवृक्ष * पु० कर्म०। कदम्बवृक्षे, वरुणवृक्षे, शोभनवृक्षमात्रे च।

साध्य * पु० सिध-णिच्-यत्। "मनोमन्ता तथा प्राणो नरोऽपानश्च वीर्य्यवान्। निर्भयो नरकश्चैव दंशो नारायणो वृषः। प्रभुश्चेति समाख्याताः साध्या द्वादश देवताः" इत्युक्ते द्वादशसंख्यके गणदेवताभेदे, विष्कम्भादिषु योगेषु एकविंशे योगे च। साधनीये त्रि०। अष्टादशविवादेषु प्रमाणादिना उन्नाय्ये पदार्थे। "प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्। निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदुः" इत्युक्ते व्यवहारे साधनार्हे प्रतिज्ञेये पक्षे पु०। अनुमित्या साधनीये वह्न्यादौ च यथा "वह्निमान् धूमात्" इत्यादौ सिषाधयिषितः वह्निः साध्यः। साध्यमस्त्यस्मिन् अर्श आद्यच्। साध्यवति पक्षे पु० "साध्यनिर्देशः प्रतिज्ञा" इति न्यायसूत्रम् "साध्यवत्तया पक्षनिर्देशः" इति दीधितिकारः। संस्कार्य्ये, तन्त्रोक्ते मन्त्रभावे, आद्यमन्त्रस्य सानुकूलतायाह्ये चक्रस्थे द्वितीयपञ्चमादिके "सिद्धः साध्यः सुसिद्धोऽरिः क्रमात् ज्ञेया मनीषिभिः" इत्युक्ते मन्त्रभेदे च। विस्तारो वाचस्पत्ये।

साध्यता * स्त्री० साध्यस्यानुमितिविधेयस्य भावः तल्। अनुमितिविधेयतारूपे न्यायोक्ते विषयताभेदे।

साध्यतावच्छेदक * पु० साध्यतामवच्छिनत्ति विशेषयति अव+छिद-ण्वुल्। येन रूपेण यस्य साध्यतारूपा विषयता तस्मिन् धर्मे। "यथा वह्निवान् धूमात्" इत्यत्र वह्निः साध्यः तस्य साध्यता वह्नित्वमवच्छिनत्तीति वह्नित्वं साध्यतावच्छेदकम्।

साध्यसिद्धि * स्त्री० साध्यस्य सिद्धिः विनिर्णयः सिध-क्तिन्। साध्यस्य वह्न्यादेः अनुमित्यादिना साधनाधीने निर्णये, निष्पत्तौ च। व्यवहारे, प्रतिज्ञासाध्यस्य प्रतिज्ञेयार्थस्य सिद्धिः निर्णयो यत्र। व्यवहारे, प्रतिज्ञातार्थस्य प्राड्विवाकादिभिः विनिर्णयरूपे व्यवहारपादे च।

साध्वस * न० साधु अस्यति अस-अच्। भये।

साध्वी * स्त्री० साध-ङीप्। मेदायां, "आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा। मृते म्रियते या पत्यौ साध्वी ज्ञेया पतिव्रता" इत्युक्तलक्षणायां स्त्रियाञ्च।

सानन्द * त्रि० सह आनन्देन। आनन्दसहिते "सानन्दं नन्दिहस्त" इति मालतीमाधवम्।

सानु * पु० न० सन-ञुण्। पर्वतस्थे समभूमिदेशे, प्रस्थे, वने, वातसमूहे, पथि, अग्रे, कोविदे, अर्के, पल्लवे च।

सानुज * न० सानौ जायते जन+ड। प्रपौण्डरीके। तुम्बुरुवृक्षे पु०। सहानुजेन। अनुजसहिते त्रि०।

सानुमत् * पु० सानुरस्त्यस्य मतुप्। पर्वते।

सान्तपन * न० सन्तापयति सम्+तप-णिच्-ल्युट् स्वार्थेऽण्। "गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः" इत्युक्ते द्व्यहसाध्ये व्रतभेदे।

सान्तर * न० सह अन्तरेण सादेशः। विरले, व्यवधानसहिते त्रि०।

सान्तानिक * त्रि० सन्तानः प्रयोजनमस्य ठक्। सन्तानसाधने विधानभेदे। [अससान्त्वत् त सान्त्वापयतीत्यन्ये।

सान्त्व * आनुकूल्यकरणे अद० चुरा० उभ० सक० सेट्। सान्त्वयति ते

सान्त्व * न० सान्त्व+अच्। अत्यर्थमधुरे, आनुकूल्ये, शोकमनःप्रीतिदवाक्ये, प्रियवाक्यादिना क्रोधोपशमनरूपे, सान्त्वने च।

सान्त्वन * न० सान्त्व-ल्युट्। आनुकूल्यकरणे, प्रियवादादिना क्रोधाद्युपशमने च। युच्। अत्रैव स्त्री०।

सान्दीपनि * पु० सन्दीपनस्यापत्यम् इञ्। रामकृष्णयोराचार्य्ये अवन्तिपुरवासिनि मुनिभेदे। [मनोज्ञे च। वने न०।

सान्द्र * त्रि० अदि-रक् सह अन्द्रेण। निविड़े, मृदौ, स्निग्धे,

सान्द्रपुष्प * पु० सान्द्रं पुष्पमस्य। विभीतकवृक्षे।

सान्द्रस्निग्ध * त्रि० सान्द्रं स्निग्ध.। अतिस्निग्धे, अतिमनोहरे च।

सान्निक * पु० सन्ना सुराद्यावर्त्तं शिल्पं वेत्ति ठक्। शौण्डिके। सन्निः प्रयोजनमस्य ठञ्। सन्निकर्त्तरि त्रि०।

सान्ध्य * त्रि० सन्ध्यायां भवः अण्। सन्ध्याकालिके।

सान्नाय्य * न० सन्नीयते सम्+नी-ण्यत् नि०। मन्त्रादिना संस्कार्य्ये घृतादौ। [इति दुर्गादासशनमन्त्यः।

सान्निध्य * न० सन्निधिरेव ष्यञ्। नैकट्ये, "सान्निध्यमिह कल्पय"

सान्निपातिक * त्रि० सन्निपातात् त्रिदोषविकारात् आगतः तेन निर्वृत्तो वा ठञ्। सन्निपातञ्जाते रोगे "विकारे सान्निपातिके" इति कुमारः।

साम्यासिक * पु० सन्न्यासः प्रयोजनमस्य ठक्। सन्न्यासिनि।

सापत्न * पु० सपत्न एव स्वार्थे अञ्। शत्रौ। सपत्न्यां भवः तस्या अपत्यं वा अञ्। सपत्नीपुत्रे। अण्। सापत्न्योऽप्यत्र।

सापिण्ड्य * न० सपिण्डस्य भावः ष्यञ्। दायाशौचपिण्डदानाद्युपयोगिनि ज्ञातिधर्मे "सापिण्ड्यं साप्तपौरुषम्" इति स्मृतिः।

साप्तपदीन * न० सप्तभिः पदैः उच्चारितैर्निर्वृत्तम् खञ्। सख्ये सौहार्दे।

साप्तपौरुष * त्रि० सप्त पुरुषान् व्याप्नोति अण्। सप्तपुरुषव्यापके।

साफल्य * न० सफलस्य भावः ष्यञ्। सार्थक्ये, सम्पूर्णतायाञ्च।

साम * सान्त्वने अद० चुरा० उभ० सक० सेट्। सामयति ते अससामत् त।

सामग * पु० साम तद्वेदं गायति। सामवेदाध्यायिनि।

सामगर्भ * पु० साम गर्भे यस्य। विष्णौ।

सामग्री * स्त्री० न० समग्रस्य भावः ष्यञ् स्त्रीत्वपक्षे ङीष् ङौ यलोपः। समस्तानाम् "प्रादेश सामग्र्यविधौ" इति कुमारः। स्वार्थे ष्यञ्। कारणसमूहे, द्रव्ये च स्त्री०।

सामञ्जस्य * न० समञ्जसस्य भावः ष्यञ्। औचित्ये।

ल्याम्, सङ्क्षेपेण पञ्चगत्यादिबोधके ज्योतिषग्रन्थभेदे च।

सारतरु * पु॰ सारप्रधानः जलप्रधानस्तरुः। कदलीवृक्षे।

सारथि * पु॰ सृ-अथिण्, सह रथेन सरथः घोटकः तत्र नियुक्तः इञ् वा। रथादिवाहनप्रेरके नियन्तरि।

सारदा * स्त्री॰ सारं ददाति दा-क। सरस्वत्याम् "लिखति यदि गृहीत्वा सारदेति" शिवप्रसादः। सारदातरि त्रि॰।

सारद्रुम * पु॰ साराढ्यो द्रुमः। खदिरवृक्षे।

सारभाण्ड * न॰ कर्म॰। यज्ञविप्रपात्रे, श्रेष्ठपात्रे च। [वृक्षे।

सारमूषिका * स्त्री॰ सारे मूषिकेवापहारकत्वात्। देवदाली-

सारमेय * पु॰ स्त्री॰ सरमायाः कश्यपपत्न्याः अपत्यम् ढक्। कुक्कुरे। तद्योषिति स्त्री॰।

सारलोह * न॰ लोहेषु सारः राज॰। लोहसारे (इस्पात)।

सारव * त्रि॰ सरय्वां भवः अण् नि॰। सरयूनदीभवे।

सारस * न॰ सरोऽभिजनो नियतवसतिरस्य अण्। पद्मे, काव्याभरणे च। सह रसेन स्वार्थे अण्। चन्द्रे, स्वनामख्याते पक्षिणि च पु॰। तद्योषिति स्त्री॰। सरस इदम् अण्। सरोवरसम्बन्धिनि त्रि॰।

सारसन * न॰ सारं सनोति सन-अच्। स्त्रीकट्याभरणे, काञ्च्याम्, कञ्चुकदाढ्यार्थं मध्यकाये निबद्धे पट्टिकादौ च।

सारस्वत * पु॰ सरस्वती देवताऽस्य, सरस्वत्या इदं वा अण्। विल्वदण्डे देशभेदे, पञ्चगौडमध्ये ब्राह्मणभेदे, सरस्वतीप्रतिपालितमुनिभेदे, ब्राह्मदिनरूपे कल्पभेदे च "सारस्वतस्य कल्पस्य" इति पुराणम्। सरस्वतीसम्बन्धिनि "तस्यां पूर्वाह्णसमये कुर्यात् सारस्वतोत्सवम्" इति पुराणम्। सरस्वतीदेवताके च त्रि॰ "तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः" इति स्मृतिः।

सारस्वतकल्प * पु॰ कर्म॰। तन्त्रोक्ते सरस्वत्या उपासनार्थके विधानभेदे, तन्नामके ब्राह्मदिने च। [याम।

सारा * स्त्री॰ सारयति सृ-णिच्-अच्। कृष्णत्रिवृतायाम्, दूर्वा-

साराल * पु॰ सारमालाति आ+ला क। तिलवृक्षे।

सारि(री) * पु॰ स्त्री॰ सृ-इण् स्त्रीत्वपक्षे वा ङीप्। पाशके "सारीं चरन्तीं सखि! मारय" इति नैषधम्, पक्षिभेदे च।

सारिका * स्त्री॰ सरति गच्छति सृ-ण्वुल्। पक्षिभेदे (शालिक)।

सारिणी * स्त्री॰ सृ-णिनि। सहदेवीलतायाम्, कार्पास्यां, दुरालभायां, कपिलशिंशपायां, प्रसारिण्यां, रक्तपुनर्णवायाञ्च।

सारिवा * स्त्री॰ सारिरिव वाति वा-क। (अनन्तमूल) लताभेदे।

सारोष्ट्रिक * पु॰ सारः श्रेष्ठ उष्ट्रो यत्र सारोष्ट्रः देशभेदस्तत्र भवः ठक्। विषभेदे।

सार्थ * पु॰ सृ-थन् स्वार्थेऽण्। समूहे, जन्तुसमूहे "स जयत्यरिसार्थसार्थकी" इति नैषधम्। सह अर्थेन वाऽर्थेन वा। वणिक्समूहे। धनिनि त्रि॰। कन्। सार्थक। अर्थसहिते अर्थे त्रि॰। शब्दे पु॰ "सार्थकः स्वार्थबोधकृत्" इति शब्दशक्तिप्रकाशिका"।

सार्थवाह * पु॰ सार्थं वहति वह-अण्। वणिग्जने।

सार्द्र * त्रि॰ सह आर्द्रेण। आर्द्रतायुक्ते। [सार्द्रः। अर्धयुक्ते त्रि॰।

सार्धम् * अव्य॰ सह+ऋध-अम्। साहित्ये। सह अर्धेन।

सार्प * न॰ सर्पो देवताऽस्य अण्। अश्लेषानक्षत्रे।

सार्पिष्क * त्रि॰ सर्पिषा संस्कृतम् ठञ्। घृतसंस्कृते व्यञ्जनादौ।

सार्वजनीन * त्रि॰ सर्वेषु जनेषु विदितः खञ् द्विपदवृद्धिः। सर्वलोकविदिते।

सार्वत्रिक * त्रि॰ सर्वत्र भवम् ठक्। सर्वस्मिन् कालादौ भवे।

सार्वधातुक * न॰ सर्वधातून् व्याप्नोति ठक्। व्याकरणोक्ते सर्वधातुप्रकृतिके तिङादौ प्रत्यये। [सर्वभूतव्यापके।

सार्वभौतिक * त्रि॰ सर्वाणि भूतानि व्याप्नोति ठञ् द्विपदवृद्धिः।

सार्वभौम * पु॰ सर्वस्या भूमेरीश्वरः सर्वासु भूमिषु विदितो वा अण्। चक्रवर्त्तिनि नृपे, उत्तरदिक्स्थे गजे च। सकलभूमिसम्बन्धे त्रि॰।

सार्वलौकिक * त्रि॰ सर्वेषु लोकेषु विदितः ठञ् द्विपदवृद्धिः। सर्वलोकेषु विदिते "स रामः सार्वलौकिकः" इति भट्टिः।

सार्वविभक्तिक * त्रि॰ सर्वासु विभक्तिषु तदर्थे भवः ठञ्। सर्वविभक्त्यर्थे विहिते तसिलादौ प्रत्यये।

सार्षप * त्रि॰ सर्षपस्य विकारः अण्। सर्षपविकारतैलादौ "अदुष्टं सार्षपं तैलम्" इति स्मृतिः।

साल * पु॰ सल-घञ्। वृक्षमात्रे, "रसालः सालः समदृश्यत" इति नैषधम्। स्वनामख्याते वृक्षभेदे, प्राकारे च। [निर्यासे (धुना)।

सालज * पु॰ सालः कारणत्वेनास्त्यस्य पामादित्वात् न। साल-

सालनिर्यास * पु॰ ६त॰। (धुना) सर्जरसे। [वृक्षे।

सालपर्णी * स्त्री॰ सालस्येव पर्णान्यस्याः ङीप्। (सालपानि)

सालपुष्प * न॰ सालस्येव पुष्पं यस्य। स्थलपद्मे।

सालभञ्जिका * स्त्री॰ सालं भनक्ति भन्ज ण्वुल्। काष्ठादिनिर्मितक्रीडासाधने पुत्तलिकायाम्, वेश्यायाञ्च।

सालरस * पु॰ ६त॰। (धुना) रासे।

सालवेष्ट * पु॰ सालं वेष्टयति वेष्ट+अण्। रासे (धुना)।

साला * स्त्री॰ सालः प्राकारोऽस्त्यस्याः अच्। गृहे।

सालावृक * पु॰ सालायां वृक इव। कुक्कुरे।

सालूर * पु॰ सल+ऊरच् णिच्च। भेके मण्डूके।

सालेय * पु॰ सालायां भवः ढक्। मधुरिकायाम्।

सालोक्य * न॰ समानो लोकोऽस्य तस्य भावः ष्यञ्। पञ्चविधमुक्तिमध्ये एकलोकस्थवासरूपे मुक्तिभेदे। [नृपे।

साल्व * पु॰ ब॰ व॰ देशभेदे। तेषां राजा अण्। तद्देशाधिपे

साल्वहन् * पु॰ साल्वं नृपं हतवान् हन क्विप्। विष्णौ।

सावधान * त्रि॰ सह अवधानेन। अवहिते, सतर्के, मनोऽभिनिवेशयुक्ते च।

सावन * न॰ सवनं सोमयागाङ्गं स्नानं तस्येदम् अण्। "अहोरात्रेण चैकेन सावनो दिवसः स्मृतः" इति ज्योतिषोक्ते अहोरात्रात्मके दिवसे, सवनत्रयस्य अहोरात्रसाध्यत्वात्तस्य तत्सम्बन्धित्वम्। तत्त्रिंशद्दिवसात्मके मासभेदे च पु॰ "विवाहादौ स्मृतः सौरः यज्ञेषु सावनो मतः" इति स्मृतिः। "सूतकादिपरिच्छेदो दिनमासाब्दपस्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः" इति सूर्य्यसिद्धान्तः।

सा(शा)वर * पु॰ स(श)वरेण निर्वृत्तः अण्। पापे, अपवादे च।

सावर्ण * पु॰ सवर्णायां सूर्य्यपत्न्यां छायायां भवः अण्। सवर्णागर्भजे सूर्य्यजे अष्टमे मनौ। इञ्। सावर्णिरप्यत्र "सूर्य्याज्जन्म समासाद्य सावर्णिर्भविता मनुः" इति चण्डी।

सावित्र * पु॰ सविता देवताऽस्य अण्। विप्रे। ऋग्विशेषे, स्त्री॰ ङीप्। "सावित्रीमात्रसारोऽपि" इति स्मृतिः। सा च सत्यवतो भार्य्यायाञ्च। सवितृदेवताके चर्वादौ त्रि॰। यज्ञोपवीते न॰। स्वार्थादौ अण्। सूर्य्ये। तस्येदम् अण्। महादेवे, गर्भे, वसौ च पु॰। [कृष्णचतुर्दश्यां सावित्रीपूजनार्थे व्रते।

सावित्रीव्रत * न॰ सावित्रीपूजनमुद्दिश्य कर्त्तव्यं व्रतम्। ज्यैष्ठ-

सावित्रीसूत्र * न॰ सावित्रीदीक्षाकालिकं सूत्रम् शाक॰। यज्ञोपवीते। [कम्बले।

सास्ना * स्त्री॰ सस-न नित्। गोगलस्थिते लोमसङ्घातात्मके

सास्र * त्रि॰ सह अस्रेण। अश्रुजलान्विते।

साहचर्य्य * न॰ सहचरस्य भावः ष्यञ्। समभिव्याहारे, साहित्ये, सामानाधिकरण्ये च।

साहस * न॰ सहसा बलेन निर्वृत्तम् अण्। बलेन कृते चौर्य्यस्त्रीसंग्रहादौ दुष्टकर्मणि, "सहसा क्रियते यत्तु तत् साहसमिति स्मृतम्" इति स्मृतिः। तच्च पञ्चविधम् "मनुष्यमारणं स्तेयं परदाराभिमर्षणम्। पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्" इति स्मृतिः। सहसा अविमृश्य कृतम् कर्म। अविमृश्यकृतकर्मणि त्रि॰। साहसमनुसरति अण्। स्मृत्युक्ते दण्डविशेषे, "साशीति पणसाहस्रो दण्ड उत्तमसाहसः। तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धमधमः स्मृतः" इति स्मृतिः। "पाकयज्ञे तु साहसः" इत्युक्ते वह्निभेदे च पु॰।

साहसिक * त्रि॰ साहसं प्रसृतः ठक्। मनुष्यमारणाद्यभिरते चौरे, परदारिके, मिथ्यावादिनि, दृढवादिनि च।

साहस्र * न॰ सहस्राणां समूहः अण्। सहस्रसमूहे। स्वार्थे अण्। सहस्रसङ्ख्यायाम् न॰। सहस्रं परिमाणमस्य अण्। सहस्रसङ्ख्यान्विते त्रि॰। सहस्रसङ्ख्यकगजसमूहे पु॰।

साहायक * न॰ सहायस्य भावः वुञ्। साहाय्ये।

साहाय्य * न॰ सहायस्य भावः ष्यञ्। सहायतायाम्।

साहित्य * न॰ सहितस्य भावः ष्यञ्। मिलने परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वे, एक-क्रियान्वयित्वे बुद्धिविशेषविषयत्वे, काव्यभेदे च।

साह्न * न॰ सह्नस्य भावः अण् सह-ष्यञ् वा। सहत्वे। सह-

साह्वय * पु॰ सह आह्वयेनाभिधानेन। अभिधानसहिते "ग-गजसाह्वयम्" इति भारतम्। मेषादिमानिकरणयुद्धे च।

सिंह * पु॰ स्त्री॰ हिन्स-अच् पृ॰ वर्णविपर्य्ययः। स्वनामख्याते पशौ, रक्तशोभाञ्जने, मेषादितः पञ्चमे राशौ च। पदान्तस्थः। श्रेष्ठ

सिंहकेशर * पु॰ सिंहस्येव केशरोऽस्य। वकुले।

सिंहतल * पु॰ सिंहस्येव तलमत्र। करद्वयमेलनरूपे अञ्जलौ।

सिंहतुण्ड * पु॰ सिंहस्येव तुण्डः पुष्पमस्य। सेहुण्डवृक्षे।

सिंहद्वार * न॰ सिंहचिह्नितं द्वारम्। पुरप्रवेशनयोग्ये द्वारे।

सिंहध्वनि * पु॰ सिंहस्येव ध्वनिः। सिंहतुल्यनादे। सिंहनादयोऽप्यत्र। इत॰। सिंहस्य शब्दे। [वादकं

सिंहनर्दिका * पु॰ सिंह इव नर्दति नर्द-ण्वुल्। (नि

सिंहनादिका * स्त्री॰ सिंहमपि नादयति नद-णिच्-ण्वुल्। दु-लभायाम्।

सिंहपर्णी * स्त्री॰ सिंहस्य पुच्छ इव पर्णमस्याः ङीप्। वासक

सिंहपुच्छिका * स्त्री॰ सिंहस्य पुच्छ इव पत्राण्यस्याः कप्, इत्त्वम्। (चुड़चाकुले) वृक्षे।

सिंहपुच्छी * स्त्री॰ सिंहस्य पुच्छ इव पुष्पाणि पर्णानि वा ङीप्। चित्रपर्ण्यां, पृश्निपर्ण्याम्, माषपर्ण्याञ्च।

सिंहपुष्पी * स्त्री॰ सिंहस्य पुच्छ इव पुष्पाण्यस्याः। पृश्निपर्ण्याम्।

सिंहमुखी * स्त्री॰ सिंहस्य मुखमिव मुखमस्यदन्त इव पुष्पम ङीप्। वासके। [नादयोऽप्यत्र

सिंहयाना * स्त्री॰ सिंहो यानं वाहनं यस्याः। दुर्गायाम्। सिंहवा

सिंहल * पु॰ सिंहोऽस्त्यत्र लच्। देशभेदे। तद्देशप्रभवत्वात् पि-त्तलौ, त्वचे च न॰।

सिंहलास्थान * पु॰ सिंहल आस्थानं यस्य। तालसदृशे वृक्षभेदे।

सिंहवाहिनी * स्त्री॰ सिंहरूपो वाहो विद्यतेऽस्या इनि। दुर्गायाम्।

सिंहविक्रान्त * पु॰ स्त्री॰ सिंह इव विक्रान्तः। अश्वे। सिंहतुल्यविक्रमे त्रि॰।

सिंहविन्ना * स्त्री॰ सिंह इव विन्ना विद क्त। माषपर्ण्याम्।

सिंहसंहनन * त्रि॰ सिंहस्येव संहननमङ्गमस्य। वराङ्गयुते, सिंहतुल्यदृढाङ्गे च। "सिंहसंहननो युवा" इति रघुः।

सिंहा(शिङ्घा)ण * न॰ शिघि-आनच् पृ॰। लौहमले। नासिकामले।

सिंहासन * न॰ सिंहचिह्नितमासनम्। राजासने, चतुरङ्गक्रीडायां अश्वभेदे, योगासनभेदे च। लक्षण वाचस्पत्ये।

सिंहास्य * पु॰ सिंहस्यास्यमिवास्यमस्यदन्त इव पुष्पं यस्य। वासके।

सिंहिका * स्त्री॰। कश्यपपत्न्यां राहुमातरि।

सिंहिकासुत * पु॰ ६त॰। राहौ। सिंहिकापुत्रादयोऽप्यत्र।

सिंही * स्त्री॰ हिनस्ति रोमान् हिन्स+अच् पृ॰। वार्त्ताकी, बृह

तन्त्रोक्ते स्थानभेदे।

सिद्धपुर * न० कर्म० "लङ्काकुमध्ये यमकोटिरस्याः प्राक् पश्चिमे रोमकपत्तनञ्च। अधस्ततः सिद्धपुरञ्च" इत्युक्ते भूगोलस्थेषु भूवृत्तपादान्तरितदेशस्थेषु चतुर्षु देवनिर्मितेषु पुरेषु मध्ये महार्षोभागस्थे पुरभेदे।

सिद्धपुष्प * पु० सिद्धं नित्यं पुष्पं यस्य। करवीरवृक्षे।

सिद्धप्रयोजन * पु० सिद्धं प्रयोजनं यस्मात् ५ब०। गौरसर्षपे।

सिद्धरस * पु० सिद्धः दृढीकृतो रसः। पारदे। सिद्धो रसोऽस्य। धातुमात्रे त्रि०।

सिद्धविद्या * स्त्री० सिद्धा विद्या मन्त्रोपास्या। "काली तारा महाविद्या षोडशी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तासु दशसु काल्यादिषु।

सिद्धसाधन * न० सिद्धस्य निश्चितस्य साधनमनुमानम्। न्यायोक्ते सिद्धावस्थायां साध्यत्वेन निश्चितस्य पुनरनुमानरूपे दोषे। सिद्धं साधयति अण्। ३ सर्षपे पु०।

सिद्धसाध्य * पु० सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्तकोष्ठावधि- द्वितीयकोष्ठस्थाद्याक्षरयुक्ते तन्त्रोक्ते मन्त्रभेदे।

सिद्धसिद्ध * पु० तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्त- कोष्ठस्थिताद्याक्षरयुक्ते मन्त्रभेदे।

सिद्धसिन्धु * स्त्री० ६त०। मन्दाकिन्याम्। सिद्धापगाप्यत्र।

सिद्धसुसिद्ध * पु० तन्त्रोक्ते सिद्धादिचक्रस्थे साधकनामाद्याक्षरयुक्त- [illegible] मन्त्रभेदे।

सिद्धान्त * पु० सिद्धः [illegible] यस्मात्। [illegible] प्रतिः- [illegible]।

सिद्धारि * पु० तन्त्रोक्ते "सिद्धादि"चक्रस्थे साधकनामाद्याक्षरयुक्तको- [illegible] मन्त्रभेदे।

सिद्धार्थ * पु० [illegible] श्वेतसर्षपे, [illegible] "सिद्धार्थकम्" [illegible]।

[illegible]

[illegible]

[illegible]

सिध्मल * त्रि० सिध्मन्+अस्त्यर्थे लच्। किलासरो[illegible] स्त्री०।

सिध्य * पु० कार्य्यं साधयति सिध-णिच्-कर्त्तरि य[illegible]

सिध्रक * पु० सेधति रोगान् सिध-रक् स्वार्थे कन्। "वनगिर्य्योः" इत्यादिसूत्रेण सिध्रकशब्दस्य प[illegible] विधानात् पुंस्त्वमेवास्य, अमरोक्तं स्त्रीत्वन्तु[illegible]

सिध्रकावण * न० सिध्रकप्रधानं वनं णत्वम् दीर्घश्च[illegible]

सिन * पु० सीयते बध्यते सि-क्त प्राप्ते तस्य नः। [illegible]

सिनी * स्त्री० सि-क्त तस्य नश् स्त्रियां ङीप्। [illegible]

सिनीवाली * स्त्री० सिनीं श्वेतां चन्द्रकलां वल[illegible] ङीप्। चतुर्दशीयुक्तायाममावास्यायाम्।

सिन्दु(न्धु)क * पु० स्यन्दते स्यन्द-उ संप्रसारणञ्च[illegible] स्वार्थे वा कन्। सिन्दुवारवृक्षे।

सिन्दु(न्धु)वार * सिन्धुं गजमदं वारयति [illegible] (निसिन्दा) वृक्षे "मुक्ताकलापीकृतसिन्दुवारम्[illegible] तस्य च श्वेतपुष्पत्वात् मुक्तातुल्यत्वम्। [illegible]

सिन्दूर * न० स्यन्द-ऊरन् संप्रसारणम्। स्वनामख्[illegible]

सिन्दूरकारण * न० ६त०। सीसके। [illegible]

सिन्दूरतिलक * पु० सिन्दूरवर्णस्तिलकश्चिह्नभेदो[illegible]

सिन्दूरी * स्त्री० सिन्दूरवर्णानि पुष्पाणि सन्त्य[illegible] ङीप्। सिन्दूररोचन्यां, धातक्याञ्च।

सिन्धु * पु० स्यन्द-उ सम्प्रसारणं दस्य धश्च। समु- द्रे तद्रूपे, रागभेदे, गजमदे, देशभेदे च। त[illegible] ब० व। नदीभेदे स्त्री०।

सिन्धुकफ * पु० सिन्धोः कफ इव। समुद्रफेने।

सिन्धुखर * न० सिन्धुदेशे कीर्यते क्रियते वा[illegible]

सिन्धुखेल * पु० सिन्धुसमीपे खेलति खेल-अच्।[illegible]

सिन्धुज * न० सिन्धुदेशे समुद्रे वा जायते जन-ड[illegible] चन्द्रे, कर्पूरे च पु०। लक्ष्म्यां स्त्री०। सिन्धुज[illegible]

सिन्धुनन्दन * पु० ६त०। चन्द्रे। सिन्धुसुतादयो[illegible] स्त्री०।

सिन्धुपुष्प * पु० सिन्धौ पुष्यति विकाशते पुष्प[illegible]

सिन्धुसम्भव * न० सिन्धुसम्भवात् जायते [illegible] समुद्रे च। [सिन्धुपत्री[illegible]

सिन्धुर * पु० स्त्री० सिन्धुं मदजलमस्त्यस्य र। [illegible]

सिन्धुलवण * न० सिन्धुदेशजातं लवणम्। सैन्ध[illegible]

सिन्धुवार * पु० सिन्धुं मदजलं वारयति वारि[illegible] ण्। सिन्धुवारवृक्षे (निसिन्दा)।

सिन्धुवेषण * पु० [illegible] ६त०। गाम्भारीवृक्षे।

सिन्धुसङ्गम * पु० सिन्धोः नद्याः नदीसमुद्रयो[illegible] नदीसमुद्रयोर्मिलने। [illegible]

सिन्धूद्भव * न० सिन्धोः उद्भवति उद्+भू-अच्। सैन्धवलवणे। समुद्रजातमात्रे त्रि०।

सिन्धूत्थ * पु० सिन्धोरुत्पन्न इव। सैन्धवलवणे। श्वेतसिन्धूरे।

सिप्र * पु० सप-रक् पृ०। सरोवरभेदे, चन्द्रे, निदाघजले, घर्मे च। उज्जयिनीसमीपस्थनदीभेदे स्त्री० "सिप्रातरङ्गानिलकम्पितासु" इति रघुः।

सिम * पु० सि-मन् किच्च। सर्वस्मिन् इत्यर्थे, तदर्थस्य सर्वनामता।

सिम्बा(म्बि) * स्त्री० शाम्यति हविरनया शम अच् इन् वा पृ०। (छुटि) शिम्बायाम्। इनन्तः। नखीनामगन्धद्रव्ये वा ङीप्। ङीबन्तः। निष्पाव्याञ्च।

सिम्बिजा * स्त्री० सिम्बेर्जायते जन-ड। शमीधान्ये कलायादौ।

सिर * सि-रक्। पिप्पलीमूले। नाडाम्, अम्बुशाखिन्याञ्च स्त्री०।

सिरकी * स्त्री० सि-क्विप् नक-अच् गौरा० ङीप् कर्म०। सरकी-तृणे।

सिहुण्ड * पु० सो-क्विप् सिः छेदस्तं हुण्डते कण्टकावृतत्वात् हुडि-अच्। स्नुहीवृक्षे। [तत्रैव।

सिह्न * पु० स्निह-नक् पृ०। इन्द्रकभूपाख्ये गन्धद्रव्ये। स्वार्थे कन्।

सिह्नकी * स्त्री० स्निह-लक् पृ० गौरा० ङीप्। सल्लकीवृक्षे।

सिह्नभूमि * स्त्री० सिह्नस्य गन्धद्रव्यस्य भूमिः। सल्लकीवृक्षे।

सीक * सेचने भ्वादि० आत्म० सक० सेट्। सीकते असीकिष्ट। अस्ति न ह्रस्वः। षत्वोपदेशत्वाच्च षत्वम्।

सीक * मर्षे वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। सीक-यति ते सीकति असीसिकत् त असीकीत्। न षत्वम्।

सीकर * पु० सीक्यते सिच्यतेऽनेन सीक-अरच्। जलकणे।

सीता * स्त्री० सि-त पृ० दीर्घः। लाङ्गलपद्धतौ, जनकराजदुहितरि, मद्रासवर्षस्थितगङ्गायाञ्च।

सीतापति * पु० ६त०। श्रीरामे।

सीतायाःपति * पु० ६त० अलुक्समा०। श्रीरामे "सीतायाःपतये नमः" इति पुराणम्। अलुक्समासत्वे पत्ये इति स्यात्। [शब्दे।

सीत्कार * पु० सीदित्यव्यक्तस्य कारः सीत्+कृ घञ्। अनुरागजे

सीत्कृत * न० सीत्-कृ-भावे क्त। सीत्कारे, अनुरागजशब्दे।

सीत्य * न० सीतया लाङ्गलपद्धत्या निर्वृत्तं यत्। धान्ये। सीता-मर्हति यत्। हलकर्षणयोग्ये क्षेत्रादौ त्रि०।

सीधु * पु० सिध-उ पृ०। मद्ये, "इक्षोः पक्वरसैः सिद्धः सीधुरित्य-भिधीयते" इत्युक्ते मद्यभेदे च।

सीधुगन्ध * पु० सीधोरिव गन्धोऽस्य न इत् अनित्यत्वात्। बकुले।

सीधुपुष्प * पु० सीधुगन्धयुक्तं पुष्पमस्य। कदम्बे, बकुले च। धातक्यां स्त्री० ङीप्।

सीधुरस * पु० सीधोरिव रस आस्वादोऽस्य। आम्रवृक्षे।

सीमन्त * पु० सीम्नोऽन्तः शक०। (सिंथि) केशमध्यवर्त्तिरेखाकारे पदार्थे, "षष्ठेऽष्टमे वा सीमन्तः" इत्युक्ते गर्भाधानात् षष्ठे वा मासि कर्त्तव्ये संस्कारभेदे च।

सीमन्तक * न० सीमन्ते कायति कै+क। सिन्दूरे। नरकाधारे पु०।

सीमन्तिनी * स्त्री० सीमन्त+अस्त्यर्थे इनि। योषिति।

सीमन्तोन्नयन * न० सीमन्तस्य तदाख्यगर्भसंस्कारस्य उन्नयनमुद्भा-वनमत्र। उक्ते गर्भसंस्कारककर्मभेदे।

सीमन् * स्त्री० सि-इमनिन् पृ० न गुणादि। मर्य्यादायाम्, अवधौ, स्थितौ, क्षेत्रे, अण्डकोषे "सीम्नि पुष्कलको हतः" इति सिद्धान्त-कौमुदी। वेलायाञ्च। [शब्दार्थे च।

सीमा * स्त्री० सीमन्+डाप्। मर्य्यादायां, ग्रामादेरन्तभागे, सीमन्-

सीमाविवाद * पु० सीमायां विवादः। अष्टादशसु विवादेषु मध्ये स्वनामख्याते विवादभेदे।

सीर * पु० सि-रक् पृ०। सूर्य्ये, अर्कवृक्षे, हले च। [नृपे।

सीरध्वज * पु० सीरो हलः तच्चिह्नितो ध्वजो यस्य। चन्द्रवंश्ये जनक-

सीरपाणि * पु० सीरः हलः पाणौ यस्य। बलदेवे।

सीरिन् * पु० सीरो हलोऽस्त्यस्यायुधत्वेन इनि। बलरामे।

सी(से)वन * न० सिव-ल्युट् नि० वा दीर्घः। सेवने तन्तुसन्ताने (सेलाइ)। [कन्। तत्रार्थे।

सीस * न० सि-क्विप् पृ० सी+स कर्म०। (सीसे) धातुभेदे। स्वार्थे

सीहुण्ड * पु० सिहुण्ड+पृ० दीर्घः। स्नुहीवृक्षे। [समायामे च।

सु * अव्य० सु+डु। पूजायाम्, अतिशये, कष्टे, अनुमतौ, समृद्धौ,

सुकण्टका * स्त्री० सुष्ठु कण्टकोऽस्याः। घृतकुमार्य्याम्।

सुकण्डु * स्त्री० सु+कण्ड्+यक् डु। कण्डूरोगे (चुलकोना)।

सुकन्द * पु० शोभनः कन्दोऽस्य। कशेरौ। शोभनकन्दयुक्ते त्रि०। संज्ञायां कन्। पलाण्डौ। वाराहीकन्दे, धरणीकन्दे। [(पोल)।

सुकन्दिन् * पु० शोभनः स्निग्धः कन्दोऽस्त्यस्य इनि। शूरणे,

सुकरा * स्त्री० सुखेन क्रियते दुह्यते वा सु+कृ-खल्। सुशीलायां गवि। सुखसाध्ये त्रि०। [कर्णयुक्ते त्रि०।

सुकर्णक * पु० सुष्ठु कर्ण इव कन्दोऽस्य कप्। हस्तिकन्दे। शोभन-

सुकर्णिका * स्त्री० सुष्ठु कर्णाविव पर्णान्यस्याः कप् अत इत्वम्। मूषिकपर्ण्याम्। [(कानाकुमडा)।

सुकर्णी * स्त्री० सुष्ठु कर्णाविव पत्राण्यस्याः ङीप्। इन्द्रवारुण्याम्

सुकर्मन् * पु० सुष्ठु कर्म यस्मात् ५ब०। विष्कम्भादिषु मध्ये सप्तमे योगे। शोभनकर्म्मकर्त्तरि त्रि०। कर्म्म०। शोभने कर्म्मणि न०।

सुकल * पु० सुष्ठु कलयते व्याप्नोति सु+कल-अच्। दातृभोक्तृ-ज्ञानित्वादिना विख्याते जने, सुन्दरमधुरादिशब्दे च त्रि०।

सुकाण्ड * पु० सुष्ठु काण्डोऽस्य। कारवेल्ले, सुन्दरकाण्डयुक्ते दण्डे च। काण्डीरलतायां स्त्री०। स्वार्थे कन् अत इत्वम्। तत्रैव।

सुकान्ता * स्त्री० सुष्ठु कान्ता इव सु+कम-कर्त्तरि क्त। [illegible]-मावामलतायाम्। शोभनकान्तियुते त्रि०।

सुकाष्ठ * न० सुष्ठु काष्ठं प्रा०। देवदारुकाष्ठे, [illegible]

सुकाष्ठा * स्त्री० सुष्ठु काष्ठं यस्याम्। काष्ठ[illegible]

सुकुन्दक * पु॰ सु+कुदि-ण्वुल्। पलाण्डौ।
सुकुन्दन * न॰ सु+कुदि-ल्यु। वर्वरे।
सुकुमारा * स्त्री॰ सु+कुमार-अच् घञ् वा। जातीवृक्षे, नवमालिकायाम्, कदल्यां, पृक्कायां, मालत्याञ्च। अतिकोमले त्रि॰। प्रा॰। सुन्दरकुमारावस्थान्विते त्रि॰। स्त्रियां ङीप्। तमालपत्रे न॰।
सुकृत् * त्रि॰ सु+कृ-क्विप्। पुण्यकारके, धार्मिके जने।
सुकृत * न॰ सु+कृ क्त। पुण्ये, धर्मे, शुभे च। सुकर्मणि न॰।
सुकृति * स्त्री॰ सु+कृ-क्तिन्। पुण्ये, मङ्गले, सत्कर्मणि च। [च।
सुकृतिन् * त्रि॰ सुकृतमनेन इनि। पुण्यशीले, शुभयुक्ते, सत्कर्माढ्ये
सुकेसर * पु॰ सुष्ठु केसरो यस्य। वीजपूरे।
सुकोली * स्त्री॰ प्रा॰ स॰। चीरकाकोल्याम्।
सुकोपक * पु॰ सुष्ठु कोपोऽस्य कप। कोपाम्रे।
सुख * सुखसम्पादने अद॰ चुरा॰ उभ॰ सक॰ सेट्। सुखयति ते असुसुखत्-त। अपोपदेशत्वात् षत्वम्।
सुख * न॰ सुख घञ्। पुण्यजन्ये गुणभेदे, आनन्दे, अनुकूलवेदनीये यदनुभवाय चित्तमनुकूलं भवति तस्मिन् अर्थे। तच्च "आत्मधर्मः" इति नैयायिकादयः। "चित्तधर्म" इति सांख्यादयः। सुखयतीति अच्, सुखमस्यास्ति अच् वा। सुखकारके, सुखिनि च त्रि॰। [हर्षे। सुखकारके त्रि॰।
सुखङ्करी * स्त्री॰ सुखङ्करोति कृ-खच् मुम् च ङीप्। जीवन्ती-
सुखजात * त्रि॰ जातं सुखमस्य परनिपातः। जातानन्दे "सुखजातः सुरापीतः" इति श्रुतिः।
सुखदोह्या * स्त्री॰ सुखेन दोह्या दुह-ण्यत्। क्लेशं विना दोहनीयायां गवि। सुखसन्दोह्याप्यत्र।
सुखभाज् * त्रि॰ सुखं भजते भज-ण्वि। सुखयुक्ते।
सुखमोदा * स्त्री॰ सुखं सुखकरो मोदो यस्याः। मल्लकीवृक्षे।
सुखरात्रि * स्त्री॰ सुखा सुखकरी रात्रिर्यस्याम्। आश्विनामावास्यायाम् दीपान्वितामावास्यायाम्।
सुखरात्रिका * स्त्री॰ सुखा रात्रिर्यस्याः ब॰ कप्। दीपान्वितामावास्यायाम् पूर्वदिनगतायां तिथौ, दीपान्वितामुपक्रम्य "पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका" इति ज्योतिर्वचनम्। कश्चाविसुखरात्रिरप्यत्र "कार्त्तिके भूतले देवि! सुखरात्रि! नमोऽस्तु ते" इति दीपान्वितामावास्यायां लक्ष्मीपूजनमन्त्रः।
सुखवर्चक * पु॰ सुखं वर्चयति सर्वोऽयमिति वर्च-णिच् ण्वुल्। सर्जिकाक्षारे (साजिमाटि)।
सुखवर्चस् * पु॰ सुखं सुखकरं वर्चो यस्य। सर्जिकाक्षारे (साजि-माटि)। [ढचे।
[illegible]
[illegible]

सुखाधार * पु॰ सुखानामाधारः। स्वर्गे। कर्म॰। सुखकराधारे
सुखायत * पु॰ सुखेनायम्यते आ+यम-क्त। विनीताश्वे।
सुखायन * पु॰ सुखेनायतेऽनेन अय ल्युट्। सुविनीताश्वे।
सुखावह * त्रि॰ सुखमावहति जनयति आ+वह-अच्। सुख-जनके।
सुखाश * पु॰ सुखा सुखकरी आशा यस्य। वरुणे। सुखेन अश-घञ्। राजतिनिशे वृक्षे। स्वार्थे कन्। सुखाशने (अश राजतिनिशवृक्षे च पु॰। भावे घञ्। सुखभोजने।
सुखोत्सव * पु॰ सुखकर उत्सवो यस्मात् ब॰। पत्यौ। कर्म॰ आनन्दकारके उत्सवे पु॰। [क्षारे (साजिमाटि)
सुखोर्जिक * पु॰ सुखस्य ऊर्जः वृद्धिरस्त्यस्य ठन्। सर्जि-
सुग * न॰ सुष्ठु गच्छति निर्याति गम-ड। विष्ठायाम्। सुगमे त्रि॰
सुगत * पु॰ सुष्ठु गच्छति जानाति गम-कर्त्तरि क्त। बुद्धे। सुगते युते त्रि॰।
सुगन्ध * न॰ सुष्ठु गन्धोऽस्य न॰ इत्। गन्धतैले, क्षुद्रजीरके, नीलोत्पले, चन्दने, ग्रन्थिपर्णे च। रक्तशिग्रौ, गन्धके, चणके, भूतृणे च पु॰। सद्गन्धद्रव्ययुक्ते आपणादौ त्रि॰।
सुगन्धक * पु॰ सुष्ठु गन्धोऽस्य कप्। रक्ततुलस्यां, गन्धके, नागरङ्गे, कर्कोट्याञ्च।
सुगन्धपत्रा * स्त्री॰ सुगन्धं पत्रमस्याः। रुद्रजटायाम्।
सुगन्धभूतृण * न॰ कर्म॰। गन्धतृणे। [याष
सुगन्धमूला * स्त्री॰ सुगन्धं मूलं यस्याः। स्थलपद्मिन्याम्, रास
सुगन्धा * स्त्री॰ सुष्ठु गन्धोऽस्याः। रास्नायां, वचायां, वन्ध्याकर्कोट्यां, रुद्रजटायां, नाकुल्यां, शतपुष्पायां, नवमालिकायां, स्वर्णयूथिकायां, पृक्कायां, सल्लक्यां, गन्धपत्रायाम्, वनलतायां, तुलस्यां, मातुलुङ्गे च।
सुगन्धामलक * न॰ सुगन्धि सर्वौषधिगणैर्युक्तमामलकम्। "सर्वौषधिसमायुक्ताः शुष्कास्त्वामलकास्तु च। यदा तदाय योगः स्यात् सुगन्धामलकाभिधः" इत्युक्ते सर्वौषधियुक्ते शुष्के आमलकवल्कले।
सुगन्धि * पु॰ सुष्ठु गन्धः यस्य वा इत्समा॰। इष्टगन्धे सुरभौ। सुष्ठु गन्धोऽस्य। सुगन्धयुक्ते त्रि॰। एलवालुके, मुस्तायां, कसेरौ, गन्धतृणे, धान्यके, पिप्पलीमूले च पु॰। स्वार्थे कन्। कह्लारे, गोदुग्धे, पुष्करमूले, उशीरे, मुरपर्णे, महागन्धे, गन्धके, तुरुष्के च। [युक्तपुण्यवति त्रि॰। सुगन्धिनि पुण्ये न॰।
सुगन्धिकुसुम * पु॰ सुगन्धि कुसुमं यस्य। पीतकरवीरे। मस्म
सुगन्धित्रिफला * स्त्री॰ त्रयाणां फलानां समाहारः सुगन्धि त्रिफलमस्याः सादृश्येन टाप्। जातीफले, पूगफले, लवङ्गकलिकाफले च।
सुगन्धिमूल * न॰ सुगन्धि मूलमस्य। उशीरे (बेणा)।
[illegible]

. प्रात स्मरणीये पुण्यकीर्त्तौ जने।
सुगन्धि * पु॰ सुष्ठु गन्धिर्यस्य। चोरकद्रव्ये। सुन्दरगन्धिमति त्रि॰।
सुग्रीव * पु॰ सुष्ठु ग्रीवाऽस्य। श्रीकृष्णाश्वे, सूर्य्यपुत्रे वानरेश्वरे च। सुन्दरग्रीवावति त्रि॰। स्त्रियां ङीप् कश्यपस्य पत्नीभेदे।
सुचक्षुस् * पु॰ सुष्ठु चक्षुरिव फलमस्य। उडुम्बरे। शोभनलोचनयुक्ते त्रि॰। प्रा॰ स॰। शोभने नेत्रे न॰।
सुचञ्चुका * स्त्री॰ सुष्ठु चञ्चुरिव शिखा यस्याः कप्। महाचञ्चुशाके।
सुचरित्रा * स्त्री॰ सुष्ठु चरित्रं यस्याः। पतिव्रतायां स्त्रियाम्। सच्चरित्रवति त्रि॰। प्रा॰ स॰। सच्चरित्रे न॰।
सुचर्मन् * पु॰ सुष्ठु चर्मेव वल्कलमस्य। भूर्जद्रुमे। सुन्दरचर्मवति त्रि॰। प्रा॰। सुन्दरे चर्मणि न॰।
सुचित्रबीजा * स्त्री॰ सुचित्रं विचित्रं बीजं यस्याः। विडङ्गायाम्।
सुचित्रा * स्त्री॰ प्रा॰ स॰। चिर्भटायाम्। विचित्रे त्रि॰।
सुचिर * न॰ प्रा॰ स॰। अत्यन्तचिरकाले। बहुकालभवे त्रि॰।
सुचिरायुस् * पु॰ सुचिरं बहुकालिकमायुर्यस्य। देवे। बहुकालजीविनि त्रि॰। [स्वधरे त्रि॰।
सुचेलक * पु॰ प्रा॰ स॰। सूक्ष्मवस्त्रे। सुष्ठु चेलोऽस्य कप्। सुवस्त्र-
सुजल * न॰ शोभनं जलं यस्मात् ब॰। कमले। प्रा॰ स॰। सुन्दरे जले न॰।
सुजाता * स्त्री॰ सु+जन-क्त। तुवर्याम्। मनोज्ञे त्रि॰।
सुजीवन्ती * स्त्री॰ प्रा॰ स॰। स्वर्णजीवन्त्याम्।
सुटुंक * क्षमादरे चुरा॰ उभ॰ सक॰ सेट्। सुटयति ते अचुसुटत् त पोटदेश एव न्याय्यः।
सुत * पु॰ स्त्री॰ सु क्त। पुत्रे, तनयायाञ्च। स्त्री॰ सा च दुहिता भार्याञ्च। सत्त्वे, प्रसवे, निष्पीडिते च त्रि॰। पार्थिवे पु॰।
सुत(त)नक * न॰। सु(स्तु)-भावे क्त सु(स्तु)तं जननं तत्कारणम् अन्। जननाशौचे, पर्य्याप्तभावे च "सुतके मृतके तथा" इति "मातृवत् सुतकं तत् स्यात्" इति च स्मृतिः। [सुतजीवकद्रुमे।
सुतजीवक * पु॰ सुतं जीवयति धारणात् जीव-णिच्-ण्वुल्।
सुतनु(नू) * पु॰ स्त्री॰ सुष्ठु तनुर्देहोऽस्याः वा ऊङ्। नार्य्याम्। "सुतनु! मदनमस्य दयेथाः" इति माघः। सुन्दराङ्गयुक्ते त्रि॰। प्रा॰ स॰। सुन्दरे काये स्त्री ऊङभावः। अत्यल्पसूक्ष्मे त्रि॰। स्त्रियां वा ङीप्।
सुतप * पु॰ सुष्ठु तपति सु+तप-खच्। सूर्य्ये। सुष्ठु तपोऽस्य। मुनौ पु॰। सुन्दरतपोयुक्ते त्रि॰ प्रा॰। सुन्दरे तपसि न॰।
सुतपादिका * सुताः संहताः पादाः मूलान्यस्याः कप् अ इत्वम्। हंसपदीलतायाम्।
सुतराम् * अव्य॰ सु+तरप्-अतिशये आम् तरप्। अत्यर्थे अनिशयोक्तियत्ने "अथवा मृदुवस्तुहिंसितुं मृदुनैवारभते प्रजान्तकः" इति रघुः। [illegible]
[illegible]
सुतश्रेणी * स्त्री॰ सुतश्रेणीमृच्छति ऋ-अण्-ङीप्। देवदालीलतायाम्।
सुतल * पु॰ न॰ सुष्ठु तलं यत्र। पातालभेदे। अट्टालिकाभेदे पु॰।
सुतहिबुकयोग * पु॰ सुते हिबुके च योगः षष्ठीतत्पु॰। "सुतहिबुकाधिपयुक्तिदेवगुरुवर्द्धि दानकारिणो वा। यद्यत्सुतयाति तच्छुभं स्यात्" इत्युक्ते योगभेदे।
सुतिक्त * पु॰ प्रा॰ स॰। (क्षेतपापड़ा) पर्पटे। अत्यन्तिक्ते त्रि॰। कोषातक्यां स्त्री॰। संज्ञायां कन्। पारिभद्रे, निम्बे, भूनिम्बे च पु॰।
सुतीक्ष्ण * पु॰ प्रा॰। शोभाञ्जनद्रुमे, शिग्रुशोभाञ्जने, मुनिभेदे च "सुतीक्ष्णमुनिश्रेष्ठम्" इति भट्टिः। अत्युग्रे त्रि॰।
सुतुङ्ग * पु॰ प्रा॰। नारिकेलद्रुमे, ज्योतिषोक्ते ग्रहाणाम् उच्चराशिषु [illegible] भेदेषु च। [illegible] अत्युच्चे त्रि॰।
सुतेजन * पु॰ सु+तिज-ल्यु। धन्वनि, शरे। [त्रि॰।
सुतेजस् * पु॰ सुष्ठु तेजोऽस्य। [illegible] [illegible]
सुतेला * स्त्री॰ सुष्ठु तैलं यस्याम् टाप्। महाज्योतिष्मतीलतायाम्।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

सुदिनाह * न० सुदिनं प्रशस्तमहः टच् समा०। प्रशस्तदिवसे।
सुदीर्घधर्मा * स्त्री० सुदीर्घः अतिविस्तीर्णो धर्मो गुणविशेषो यस्याः केवलत्वाभावादनिच् समा० डाप्। प्रसनपर्ण्याम्।
सुदूर * त्रि० प्रादि० स०। अतिदूरे।
सुद्युम्न * पु० वैवस्वतमनुपुत्रे।
सुधन्वन् * त्रि० सुष्ठु धनुर्यस्य अनङ् समा०। सुन्दरधनुर्द्धरे। राजविशेषे, अनन्ते नागे, विश्वकर्मणि च पु०।
सुधर्मन् * स्त्री० सु+धृ-मनिन्। देवसभायाम्। कुटुम्बिनि पु०।
सुधर्मा * स्त्री० सुष्ठु धर्मो यस्याः अनिच् समा० वा डाप्। देवसभायाम्। गौ० ङीप्। सुधर्मीत्यप्यत्र।
सुधा * स्त्री० सुष्ठु धीयते पीयते धार्यते वा धे, धा-वा क। अमृते। लेपनद्रव्ये (कलिचुन), मूर्वायाम्, स्नुह्यां, गङ्गायाम्, इष्टकायां, विद्युति, रसे, जले, धात्र्याम्, हरीतक्याम्, मधुनि, शालपर्ण्याञ्च।
सुधांशु * पु० सुधेवाह्लादकाः अंशवोऽस्य। चन्द्रे, कर्पूरे च। सुधाकरादयोऽप्यत्र। [तैले।
सुधांशुतैल * न० सुधांशुना कर्पूरेण वासितं तैलम्। कर्पूरवासिते
सुधांशुरत्न * न० ६त०। मौक्तिके तस्य चन्द्रप्रियत्वात्तथात्वम्।
सुधाङ्ग * पु० सुधेवाप्यायनमङ्गमस्य। चन्द्रे, कर्पूरे च।
सुधाजीविन् * पु० सुधां लेपनद्रव्यमाजीवति आ+जीव-णिनि। पलगण्डे लेपके (राज)।
सुधाधार * पु० ६त०। चन्द्रे, कर्पूरे, अमृताधारपात्रे च। [च।
सुधानिधि * पु० सुधा निधीयतेऽत्र नि+धा-कि। चन्द्रे, कर्पूरे
सुधापयस् * पु० सुधा लेपनद्रव्यमिव शुभ्रं पयो निर्यासोऽस्य। स्नुहीवृक्षे।
सुधाभुज् * पु० सुधां भुक्तवान् भुज भूते क्विप्। देवे।
सुधाभृ(सू)ति * पु० सुधा भ्रियते पुष्यते सूयते वाऽनेन भृ-सू-वा क्तिन्। यज्ञे, चन्द्रे, कर्पूरे च।
सुधामय * न० सुधात्मकं लेपनद्रव्यात्मकं वा प्राचुर्ये मयट्। राजभवने सौधे। अमृतप्रदाह्लादकवाक्यादौ त्रि०। स्त्रियां ङीप्।
सुधामोदक * पु० सुधेव मोदयति मुद-णिच्-ण्वुल्। यवासशर्करायाम्, कर्पूरे च। [च।
सुधावर्षिन् * पु० सुधां वर्षति वृष-णिनि। चन्द्रे, कर्पूरे, ब्रह्मणि
सुधावास * पु० ६त०। चन्द्रे, कर्पूरे च। सुधाया इव वासो गन्धो यस्याः। त्रपुष्याम्।
सुधासिन्धु * पु० सुधामयः सिन्धुः। अमृतसमुद्रे। [(आलजिभ)।
सुधास्रवा * स्त्री० सुधां स्रवति स्रु-अच्। दन्तोद्भवे, सुद्रजिह्वायाञ्च
सुधाहर * पु० सुधां हरति हृ-अच्। गरुडे। सुधाहारकादयोऽप्यत्र।
सुधिति * पु० स्त्री० सु+धा-क्तिन् न ह्यादेशः। कुठारे।
सुधी * पु० सुष्ठु धीर्यस्य। पण्डिते। ष्ठ० धो.। सुन्दरबुद्धौ स्त्री०।
सुष्ठु ध्यायति सु+ध्यै-क्विप् नि०। सुबुद्धियुक्ते त्रि०।
सुधोद्भव * पु० सुधया सह उद्भवति उद्+भू-अच्। धन्वन्तरौ। ६त०। हरितक्यां स्त्री०।
सुनन्द * न० सुष्ठु नन्दयति सु+नन्द-अच्। बलरामसुषले, श्रीकृष्णपार्षदचरभेदे, राजगृहभेदे च। आनन्दजनके त्रि०। गोरोचनायाम्, उमायाम्, उमासखीभेदे, नार्याम्, अर्कपत्रोद्भवे च (ईश्वरमूल) स्त्री०।
सुनयन * पु० सुष्ठु नयने यस्य। मृगे। नार्यां स्त्री०। शोभननेत्रयुक्ते त्रि०।
सुनालक * पु० सुष्ठु नालेन कायति कै+क। वकवृक्षे। सुन्दरनालयुक्ते त्रि०। [सुन्दरनासिकायाम् स्त्री०।
सुनासिका * स्त्री० सुष्ठु नासाऽस्त्यस्य ठन्। काकनासायाम्। प्रा०।
सुनासी(शी)र * पु० सुष्ठु नासी(शी)रः अग्रगसैन्यं यस्य। इन्द्रे।
सुनासी(शी)र्य * पु० सुना(शी)सीरो देवताऽस्य यत्। यज्ञभेदे। छ। सुनासी(शी)रीयोऽप्यत्र। [स्वार्थे कन् तत्रैव।
सुनिषण्ण * न० सुष्ठु निषण्णं स्वप्नो यस्मात् ५ब०। (सुसुनि)शाके।
सुनिष्टप्त * त्रि० सु+निस्+तप-क्त षत्वम्। अत्यन्तोद्दीप्ते, प्रतप्ते च। [त्रि०। प्रा० स०। सुन्दरनीतौ स्त्री०।
सुनीति * स्त्री० सुष्ठु नीतिः यस्याः। ध्रुवमातरि। सुन्दरनीतियुक्ते
सुनील * न० प्रा० स०। मणिभेदे (नीलम)। दाडिमे, सुन्दरनीलवर्णे च पु०। तद्वति त्रि०। अतस्याम्, अपराजितायाम्, अतसीक्षुपे च स्त्री०।
सुनीलक * पु० सुनील इव कायति कै कन्। नीलभृङ्गराजे, नीलासने, नीलरत्ने च।
सुन्द * पु०। दैत्यभेदे, वानरभेदे च।
सुन्दर * त्रि० सु+उन्द-अरन् शक०। मनोहरे। स्त्रियां ङीप्। सा च उत्तमस्त्रियां त्रिपुरसुन्दरीदेव्याञ्च। कामदेवे, वृक्षभेदे च (सुन्दरि) पु०। [परिपक्वे त्रि०।
सुपक्व * पु० सुन्दरं पच्यते सु+पच-क्त तस्य वः। शोभनाम्रे। सुन्दर-
सुपच * त्रि० भुक्त स्वम् सुखेन पच्यते पच-घञर्थे क। लघुपाके द्रव्यमात्रे।
सुपत्र * न० सुष्ठु पत्रमस्य। तेजपत्रे आदित्यपत्रे पु०। सुन्दरपत्रयुक्ते त्रि०। रुद्रजटायां, शतावर्य्याम्, शालपर्ण्याञ्च स्त्री०
सुपत्रक * पु० सुष्ठु पत्रमस्य स्वार्थे कन्। शोभाञ्जनवृक्षे। अ कायां स्त्री० अत इत्त्वम्।
सुपथ * पु० सुष्ठु पन्थाः प्रा० स० अच् समा० वा। सत्कर्मणि, स दाचारे च। सुष्ठु पन्था यत्र अच् समा०। सुन्दरपथयुक्ते त्रि०
सुपथिन् * पु० प्रा० स० समासान्ताभावः। सत्पथे।
सुपद्मा * स्त्री० सुष्ठु पद्यते पद-म। वचायाम्। पद्मिन्यां स्त्री०।
सुपर्ण * पु० सुष्ठु पर्णं पत्रं पक्षो वा यस्य। गरुडे। सुन्दरपर्णे त्रि०। नागकेशरे पु०। बहुव्रीहौ स्वार्थे कप्। आरग्वधे वृक्षे, च

...श्चिक, गरुडे च। शालपर्ण्यां, रेणुकायां, पद्मायां, स्वर्णजी-
वन्त्याञ्च स्त्री॰ कापि अत इत्वम्।
सुपर्णकेतु * पु॰ सुपर्णो गरुडः केतुर्यस्य। विष्णौ।
सुपर्णी * स्त्री॰ सुष्ठु पर्णान्यस्याः गौरा॰ ङीष्। पद्मिन्यां, गरुडमा- [तरि च।
सुपर्णीतनय * पु॰ ६त॰। गरुडे।
सुपर्वन् * पु॰ सुष्ठु पर्व यस्य। देवे, बाणे, वंशे, धूमे च मा॰ स॰। [सुन्दरे पर्वणि न॰।
सुपर्वा * स्त्री॰ सुष्ठु पर्व यस्याः अच् टाप्। श्वेतदूर्वायाम्।
सुपाक्य * न॰ सुपाकमर्हति यत्। विड्लवणे।
सुपार्श्व * पु॰ सुष्ठु पार्श्वोऽस्य। प्लक्षवृक्षे (पाकुड) वृक्षभेदे, सम्पा-
तिपुत्रे विहगभेदे च। संज्ञायां कन्। गर्दभाण्डवृक्षे पु॰।
सुन्दरपार्श्वान्विते त्रि॰।
सुपिङ्गला * स्त्री॰ प्रा॰। ज्योतिष्मत्यां, जीवन्त्याञ्च।
सुपीत * न॰ प्रा॰। गर्जरे (गाजर)। सुन्दरपीतवर्णे पु॰। तद्वति- [त्रि॰।
सुपुट * पु॰ सुष्ठु पुटमस्य। कोलकन्दे, विष्णुकन्दे च।
सुपुत्रिका * स्त्री॰ सुष्ठु पुत्रः पत्रं यस्याः कप् अत इत्वम्। जतु-
कायाम् (तेलापोका)।
सुपुष्करा * स्त्री॰ सुष्ठु पुष्करमस्यस्याः अच्। स्थलपद्मिन्याम्।
सुपुष्प * न॰ प्रा॰ स॰। लवङ्गकुसुमे, प्रपौण्डरीके, तूले, स्त्रीणां
रजसि च "सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरम्" इति श्यामा-
स्तवः। सुष्ठु पुष्पमस्य। (पारिजातमादार) वृक्षे। कप्। पाट-
लायां स्त्री॰ अत इत्वम्।
सुपुष्पी * स्त्री॰ सुष्ठु पुष्पमस्याः गौरा ङीष्। श्वेतापराजितायां,
शतपुष्पायाम्, कोषफलायां, कदल्यां, मिश्रेयायां, द्रोणपु-
ष्पाञ्च।
सुपूर * पु॰ सुष्ठु पूर्यते सु+पुर-क। बीजपूरे।
सुपूरक * पु॰ सुष्ठु पूरयति सु+पूर-ण्वुल्। वकवृक्षे।
सुप् * स्त्री॰ व्याकरणपरिभाषित सुप्प्रभृतौ प्रत्यये।
सुप्त * न॰ स्वप-भावे क्त सम्प्रसारणम्। निद्रायां, शयने च।
कर्मणि क्त। निद्रिते त्रि॰।
सुप्तजन * पु॰ सुप्तो जनो यत्र। अर्धरात्रे। निद्रिते नरि।
सुप्ति * स्त्री॰ स्वप-क्तिन्। शयने, निद्रायाम्, स्वप्ने च "करोति
सुप्तिर्जनदर्शनातिथिम्" इति नैषधम्। स्पर्शतायां, विश्वासे।
सुप्रतिभा * स्त्री॰ सुष्ठु प्रतिभा यस्याः ६ब॰। सुरायाम्। प्रा॰ स॰।
उत्कृष्टबुद्धौ। ६ब॰। तद्वति त्रि॰।
सुप्रतिष्ठा * स्त्री॰ प्रा॰ स॰। प्रतिष्ठायाम्। ६ब॰ तद्वति त्रि॰।
पञ्चाक्षरपादके छन्दोभेदे स्त्री॰।
सुप्रतीक * पु॰ सुष्ठु प्रतीकं यस्य। ईशानकोणस्थिते दिग्गजे, शिवे,
कामे च। सुन्दराङ्गे त्रि॰। प्रा॰ स॰। सुन्दराङ्गे न॰।
सुप्रभा * स्त्री॰ सुष्ठु प्रभा यस्याः। कालिकाविशेषे। सुन्दरदीप्ति-
मति त्रि॰। प्रा॰। शोभनदीप्तौ स्त्री॰। [च।
सुप्रभात * न॰ प्रा॰ स॰। सुप्रभातकाले, तत्र पाठ्य...

...पाठ्ये सुप्रयुक्तशर * पु॰ सुप्रयुक्तः शरो येन। शो-
भनाभ्यासपाटवयुक्ते।
सुप्रयोगविशिख * पु॰ सुष्ठु प्रयोगो विक्षेपो यस्य ...
खो यस्य। शीघ्रहस्तो बाणमोक्षणप्रयोगपटु...
सुप्रलाप * पु॰ सु+प्र+लप-घञ्। सुवचने।
सुप्रसन्न * पु॰ सु+प्र+सद-क्त। कुबेरे। अतिप्रसा...
संज्ञायां कन्। कृष्णार्जके पु॰।
सुप्रसरा * स्त्री॰ सु+प्र+सृ-अच्। प्रसारिण्यां [विस्ता...
सुप्रसाद * सुन्दरमायासेन प्रसादो यस्य। शिवे।
सुन्दरप्रसन्नतायाम्।
सुफल * पु॰ सुष्ठु फलमस्य। दाडिमे, बदरे, मुद्गे, ...
कपित्थे च। सुन्दरफलशालि त्रि॰। इन्द्रवारुण्यां, कु...
कदल्यां, काश्मर्यां, कपिलद्राक्षायाञ्च स्त्री॰।
सुबन्ध * पु॰ सुष्ठु बध्यते कर्मणि बन्ध+घञ्। तिलवृक्षे।
सुभग * सुष्ठु भगः माहात्म्यादिः यस्य। चम्पके, अशोके, रक्त...
टङ्कणे च। सुहृदि, प्रिये, शोभनैश्वर्ययुक्ते च त्रि॰। ...
मुस्तायां, शालपर्ण्याम्, हरिद्रायां, नीलदूर्वायां, तुल...
प्रियङ्गौ, कस्तूर्यां, स्वर्णकदल्यां, वनमल्लिकायां, पतिप्रि...
प्रियायां च स्त्री॰। [मृगे च। प्रियप्रिय...
सुभगम्मन्य * त्रि॰ असुभगः सुभगो भवति भू च्वि ...
सुभगासुत * पु॰ सुभगायाः पतिप्रियायाः सुतः। ...
सुभङ्ग * पु॰ सुष्ठुनायासेन भज्यते नारिकेलम्। ...
नारिकेलवृक्षे।
सुभट * पु॰ प्रा॰ स॰। सुन्दरयोद्धरि।
सुभद्र * पु॰ सुष्ठु भद्रं यस्मात्। विष्णौ। ६ब॰। शोभनमङ्गलवति
त्रि॰। श्यामालतायाम्, कृष्णस्य भगिन्याञ्च स्त्री॰। कप्।
देवदारौ, [...] च पु॰।
सुभद्राणी * स्त्री॰ सुभद्रं मङ्गलमानयति आ+नी-ड गौरा॰
ङीष् णत्वम्। त्रायमाणलतायाम्।
सुभद्रेश * पु॰ ६त॰। अर्जुने। सुभद्राभ्रातृपुत्रे च।
सुभाञ्जन * पु॰ सुष्ठु अनक्ति अञ्ज-क कर्म॰। शोभाञ्जने।
सुभिक्ष * त्रि॰ सुष्ठु भिक्षा यत्र। यत्र भिक्षाबाहुल्यम्। ...
बाधवर्जित देशकालादौ।
सुभिस्सा * स्त्री॰ सुष्ठु भिस्सा ... [दुग्धिकायाम्।
सुभीरुक * पु॰ सुष्ठु भीरु ... ...
... रजते।
सुभूति * पु॰ सुष्ठु भवति सु+भू-क्तिन्। ... प्रा॰ स॰।
... स्त्री॰ ६ब॰। तद्वति त्रि॰ ...
सुभ्रम * न॰ सुष्ठु ... ... पु॰।
सुभ्रू(भ्रू) * स्त्री॰ [illegible] ... त्रि॰।
... त्रि॰।

[illegible]

सुरदाम्बरी • पु॰ सुराणां वासवो नेता। इन्द्रे।

सुरङ्ग • न॰ सुर् रङ्गो यस्मात् ५ब॰। सिन्दूरे, (रत्नमल्ली) वो॰ का॰ दे॰। नागरङ्गे, सर्वसङ्गे च।

[illegible]

सुरभिः, ... स्त्री० वा ङीप्। धेनौ, शल्लक्यां,
सुगन्धे, मनोज्ञे च त्रि०।
सुरभिका * स्त्री० सुरभि+स्वार्थे कन्। (गाँदाफल) कले।
सुरभिगन्धा * स्त्री० सुरभिर्गन्धो यस्याः। जातीपत्राम्।
सुरभिदारु * पु० सुरभि दारु यस्य। सरलवृक्षे। [च।
सुरभिदला * स्त्री० सुरभि दलमस्याः। जम्बूभेदे, राजजम्बूवृक्षे
सुरभिवल्कल * न० सुरभि वल्कलमस्य। गुडत्वचि (दारचिनि)।
सुरभिस्रवा * स्त्री० सुरभि स्रवो निर्यासो यस्याः। शल्लक्याम्।
सुरमृत्तिका * स्त्री० सुरप्रिया मृत्तिका। तुवर्याम् (बर्दकमाटि)।
सुरमेदा * स्त्री० सुरप्रिया मेदा। महामेदायाम्।
सुरर्षि * पु० सुरश्चासौ ऋषिः। नारदादिषु ऋषिषु।
सुरलता * स्त्री० सुरप्रिया लता। महाज्योतिष्मत्याम्। [लोकान्त।
सुरलोक * पु० सुराणां लोकः वासस्थानादि। स्वर्गे। सुरभुवनाद-
सुरवर्त्मन् * न० सुराणां वर्त्म यत्र। आकाशे।
सुरवल्लभा * स्त्री० ६त०। श्वेतदूर्वायाम्।
सुरवल्ली * स्त्री० सुरप्रिया वल्ली। तुलस्याम्। [तयोऽप्यत्र।
सुरवैरिन् * पु० ६त०। असुरे। सुरविरोधिनि त्रि०। सुररिपुप्रभृ-
सुरस * न० सुष्ठु रसः यस्य सु+रस अच्। बोले, त्वचे, गन्धतृणे,
सिन्धुवारे, मोचके च। प्रा० स०। स्वादौ रसे। ६ब०। सुरसा-
युक्ते त्रि०। सुरसा पु० स्त्री०। रास्नायां, नागमातरि,
मिश्रेयायां, ब्राह्म्यां, महाशतावर्यां च स्त्री०। [भेदे च।
सुरसुन्दरी * स्त्री० सुरप्रिया सुन्दरी। भिन्नकायचतुष्टयेषु, योगिनी-
सुरा * स्त्री० सुर+क सु+रक् वा। मद्ये, चषके च।
सुराकर * पु० सुराया आकरः। मद्योत्पत्तिस्थाने।
सुराचार्य * पु० ६त०। बृहस्पतौ। [सुन्दरराजान्विते त्रि०।
सुराजक * पु० सुष्ठु राजते राज ण्वुल्। भृङ्गराजे। ६ब० कप्।
सुराजन् * सुष्ठु पूजितो राजा न टच् समा०। सुन्दरे राजनि।
६ब०। सुन्दरराजस्वामिके देशे त्रि०।
सुराजीविन् * पु० सुरां सुरासम्पादनमाजीवति आ+जीव णिनि।
शौण्डिके। [दलकः" इति स्मृतिः।
सुराप * त्रि० सुरां पिबति पा-क। मद्यपानकारके "सुरापः श्याव-
सुरापगा * स्त्री० ६त०। गङ्गायाम्। सुरनद्यादयोऽप्यत्र।
सुरापाण * न० सुरा पीयतेऽनेन पा करणे ल्युट्। चषके (पाटनी)।
सुरायाः पानं देयो यत्नम्। प्राच्यदेशस्थे जने पु०।
सुराभाग * पु० सुराया भागः अग्रभागः। सुरामण्डे।
सुरामण्ड * पु० ६त०। सुराया अग्रभागे।
सुरारिहन् * पु० सुराणामरिं हन्ति हन-क्विप्। विष्णौ।
सुरार्ह * न० सुरान् देवानर्हति अर्ह-अच्। हरिचन्दने।
सुराष्ट्र * पु० ६ब०। देशभेदे (सुरट)।
सुराष्ट्रज * न० स्त्री० सुराष्ट्रदेशे जायते जन-ड। तुवरिकायाम्।
कृष्णमुद्गे, विषभेदे च पु०। तद्देशजातमात्रे त्रि०।

सुराह्व * पु० सुरवृक्षस्य आह्वा यस्य सुरान् आह्वयति यस्मिन्
आ+ह्वे-क वा। देवदारुवृक्षे, मरुवके, हरिद्रावृक्षे च। [स्त्री०।
सुरुङ्ग * पु० सु+रुज-घञ पृ०। शोभाञ्जनवृक्षे। सुरङ्गायां (सिँध)
सुरूप * न० सुन्दरं रूपमस्य। तूले। सुन्दराकृतिमति त्रि०। पण्डिते
पु०। शालपर्ण्यां, भार्ग्याम् च स्त्री०। प्रा० स०। सुन्दरे रूपे न०।
सुरेचक * पु० सु+रेच-ण्वुल्। गर्दभाण्डे। [स्त्री०।
सुरेज्य * पु० इज्यते पूज्यते यज-क्यप् ६त०। बृहस्पतौ। तुलस्यां
सुरेन्द्र * पु० सुराणामिन्द्रः श्रेष्ठो राजा वा। इन्द्रे सुरराजे।
सुरेभ * न० सु+रेभ अच्। रङ्गे (रांग)।
सुरेवट * पु० सुष्ठु रेवटः सु+रेव-अटन् वा। रामपूगे।
सुरेश्वर * पु० सुराणामीश्वरः। रुद्रे, इन्द्रे च। स्वर्गङ्गायां,
दुर्गायाञ्च स्त्री० ङीप्। [स्त्री०।
सुरेष्ट * पु० ६त०। शाले, सुरपुन्नागे, शिवमल्लाम् च। ब्राह्म्यां
सुरोत्तम * पु० सुरेषूत्तमः। सूर्ये। देवश्रेष्ठे त्रि०।
सुरोत्तर * पु० सुरेषु तत्पूजनेषूत्तरः श्रेष्ठः। चन्दने।
सुरोद * पु० सुरेव उदकमस्य समुद्रभेदः। सुरासमुद्रे।
सुलभ * त्रि० सुखेन लभ्यते सु+लभ-खल्। अनायासलभ्ये।
माषपर्ण्यां, धूम्रपत्रायाञ्च स्त्री०।
सुलोचन * पु० सुष्ठु लोचनमस्य। हरिणे। सुन्दरनेत्रयुक्ते त्रि०।
सुलोमशा * स्त्री० सुलोमानि सन्त्यस्याः श। काकजङ्घावृक्षे। सुलो-
मयुक्ते त्रि०। [याञ्च।
सुलोमा स्त्री० सुष्ठु लोमान्यस्याः डाप्। ताम्रवल्ल्याम्, मांसच्छदा-
सुलोहक * न० प्रा० स०। पित्तले। [त्रि० स्त्रियां ङीप् तस्य नश्च।
सुलोहिता * स्त्री० प्रा० स०। अग्निजिह्वाभेदे। सुरक्तवर्णे पु० तद्वति
सुवक्त्र * पु० सुष्ठु वक्त्रं सेवनात् यस्मात्। वनबर्बर्याम्। ६ब०।
सुन्दराननयुक्ते त्रि०। प्रा० स०। सुन्दरे मुखे न०। [न०।
सुवचस् * त्रि० सुष्ठु वचोऽस्य। वाग्मिनि। प्रा० स०। सुन्दरवचने
सुवर्चक * पु० सुष्ठु वर्चयति सु+वर्च+णिच्-ण्वुल्। सर्जिकाक्षारे।
सुवर्चला * स्त्री० सुष्ठु वर्चयति वर्च+णिच्-कलच्। सूर्यभार्या-
याम्, अतस्याम्, आदित्यभक्तायां, ब्राह्म्याञ्च। देशभेदे पु०।
सुवर्चिक * पु० सुवर्च+मत्वर्थे ठन्। सर्जिकाक्षारे। अनुकायां
स्त्री०।
सुवर्चिन् * पु० सु+वर्च णिच्-णिनि। सर्जिकाक्षारे।
सुवर्ण * न० सुष्ठु वर्णोऽस्य। स्वनामख्याते धातुभेदे, हरि-
चन्दने, स्वर्णगैरिके, धने, नागकेशरे। "कर्षे सुवर्णस्य सुवर्ण-
सञ्ज्ञम्" इत्युक्ते कर्षमिते काञ्चने च, यज्ञभेदे, धुस्तूरे, कनकगु-
ग्गुलौ च पु०। सुष्ठु वर्णो रूपमक्षरं वास्य। सुरूपे, सुन्दरा-
क्षरयुक्ते च त्रि०। "न सुवर्णमयी तनुः परं ननु वागपि
तावकी तथा" इति नैषधम्।
सुवर्णक * न० सुवर्णमिव इवार्थे कन्। पित्तले। सुष्ठु वर्णोऽस्य
कप्। सुन्दरवर्णयुक्ते त्रि०।

सुवर्णकदली * स्त्री० सुष्ठु वर्णो यस्याः कर्म०। स्वर्णवर्णकदल्याम्
(चाँपाकला)। [(सेकरा) स्वर्णकारे जातिभेदे।
सुवर्णकार * पु० सुवर्णं सुवर्णमयभूषणादि करोति कृ-अच।
सुवर्णगैरिक * सुवर्णमिव पीतं गैरिकम्। (वर्णकमाटि) गैरिक-
भेदे। [त्याम्।
सुवर्णनकुली * स्त्री० सुवर्णमिव पीता नकुली। महाज्योतिष्म-
सुवर्णप्रसर * न० सुवर्णस्य प्रसर इव यत्र। एकवालुके।
सुवर्णवणिज् * पु० सुवर्णस्य वणिक् क्रयविक्रयादिकर्त्ता। जातिभेदे
(सोनार वेने)। स्वर्णवणिक्प्रभृतयोऽप्यत्र।
सुवर्णयूथी * स्त्री० सुवर्णमिव पीता यूथी। पीतवर्णयूथिकायाम्।
सुवर्णवर्णा * स्त्री० सुवर्णस्येव वर्णो यस्याः। हरिद्रायाम्। स्वर्णतुल्य-
वर्णयुक्ते त्रि०।
सुवर्णा * स्त्री० सुष्ठु वर्णो यस्याः। कालागुरुणि, वाव्यालके च।
स्वर्णक्षीर्य्यां, हरिद्रायाम्, पाण्डुकर्ण्यां च स्त्री० ङीप्।
सुवयस् * स्त्री० सुष्ठु वयोऽस्याः। मेदायां स्त्रियाम्।
सुवलि(ली) * स्त्री० प्रा० स०। सोमराजीलतायाम्।
सुवहा * स्त्री० सुखेन उह्यते वायुनासौ सु+वह-खल्। शेफालि-
कायां, रास्नायां, गोधापद्याम्, एलापर्ण्याम्, शल्लक्यां, वीणायां,
त्रिवृतायाम्, रुद्रजटायां, हंसपद्यां, गन्धनाकुल्यां, मुसल्यां,
नीलसिन्धुवारे च। सुखवाह्ये त्रि०। सम्यक् वहति सु वह-अच्
सम्यक् वाहके त्रि०।
सुवास * पु० सुष्ठु वासः। सद्गन्धे, सुखनिवासे च। ६ब०। सद्गन्ध-
युक्ते, सुनिवासान्विते च त्रि०। [पितृकुलवासिन्यां स्त्रियाम्।
सुवासिनी * स्त्री० सुखेन वसति सु+वस-णिनि। चिरण्ट्यां चिरं
सुविद् * पु० सुष्ठु वेत्ति विद् क्विप्। पण्डिते। सुष्ठु विद्यते लभ्यते
विद-लाभे क्विप्। गुणाढ्यायां स्त्रियाम् स्त्री०।
सुविद * पु० सु+विद-क। कञ्चुकिनि।
सुविदत्र * पु० सुविदं गुणाढ्यां स्त्रियमतति अत-क्विप्। नृपे।
सुविदल्ल * पु० सुविदत्रं राजानं लाति ला-क। अन्तःपुरे कृताधिकारे,
कञ्चुकिनि। सुविदता राज्ञा लीयते ला क। अन्तःपुरस्त्रिना-
र्य्याम् स्त्री०। [त्रि०।
सुविनीता * स्त्री० सु+वि+नी+क्त। सुखेन वाह्यायां गवि। सुविनययुक्ते
सुवीज * पु० सुष्ठु बीजमस्मात् बीज क। (पद्मबीज) वृक्षभेदे। ६ब०।
सुन्दरबीजयुक्ते त्रि०। प्रा० स०। सुन्दर बीजे न०।
सुवीरक * न० सु+वीर-ण्वुल्। सौवीराञ्जने।
सुवीराम्ल * न० सुवीरवत् [illegible] करोति सु+वीर-अच्
कर्म०। काञ्जिके। [प्रा० स० उत्तमे वीर्ये न०।
सुवृत्त * न० सुष्ठु वृत्तं यस्मात्। सदाचारे। छन्दोविशेषे स्त्री०।
सुवृष * पु० सुष्ठु वृषः कर्म०। [illegible] (पोंज)। सुन्दरवृषान्विते
त्रि०। कामधेनुवा, [illegible] स्त्री०। [ज्योतिष्मत्याम्।
सुवेदा * स्त्री० सुष्ठु वेदो [illegible] यस्याः ६त०। महा-

सुवेल * पु० सुगता वेला समुद्रकूलं येन। त्रिकूटपर्वते। सुष्ठु वेला
मर्य्यादा स्थितिः यस्य। शान्ते, प्रणते च त्रि०।
सुवेश * पु० सुखेन विश्यते उपभुज्यते सु+विश घञ्। श्वेतेक्षौ।
सुन्दर वेशयुक्ते त्रि०।
सुव्रता * स्त्री० सुष्ठु व्रतं नियमो यस्याः। सुशीलायां गवि। सुन्द-
रव्रतयुक्ते त्रि०। [सुखवति त्रि०।
सुशर्मन् * पु० शॄ-मनिन् सुष्ठु शर्म सुखं यस्य। नृपभेदे। सुन्दर-
सुशल्य * पु० सुष्ठु दृढं शल्यं यस्मात्। खदिरे। [त्र।
सुशवी * स्त्री० सु+शव-अच् गौरा० ङीष्। कारवेल्ले, कृष्णजीरके
सुशाक * न० सुष्ठु शाको यस्मात् ५ब०। आर्द्रके। तत्संयोगे
हि शाकस्य सुस्वादुता। सुष्ठु शाको यस्य। चञ्चुशाके,
तण्डुलीये (नटेशाक), भिण्डायाञ्च पु०।
सुशिख * पु० सुन्दरी शिखा यस्य। वह्नौ, चित्रकवृक्षे च। शोभन-
शिखायुक्ते त्रि०। मयूरशिखायां स्त्री०। [त्रि०।
सुशीत * न० प्रा० स०। पीतचन्दने, अतिशीतजस्पर्शे च। तद्वति
सुशीतल * न० प्रा० स०। गन्धतृणे। अतिशीतगुणयुक्ते त्रि०।
सुशीता * स्त्री० प्रा० स०। शतपत्राम्, शीतगुणवत्यां स्त्रियाञ्च।
सुशीम * पु० सु+श्यै-मक् सम्प्रसारणञ्च। शीतस्पर्शे। तद्वति त्रि०।
सुशील * पु० सुन्दरं शीलमस्य। विष्णुपार्श्वचरभेदे। शोभनचरि-
तान्विते त्रि०। [श्रीयुक्ते त्रि०।
सुश्रीक * स्त्री० सुन्दरी श्रीरस्य कप्। सल्लकीवृक्षे। सुन्दर-
सुश्रुत * पु० सु-श्रूयते सु+श्रु क्त। विश्वामित्रमुनिपुत्रे चिकित्सा-
शास्त्रकर्त्तरि मुनिभेदे, तत्कृतग्रन्थे च। सुन्दरश्रुते त्रि०।
"देवाकर्णय सुश्रुतेन चरकस्योक्तेन" इति नैषधम्।
सुश्लिष्ट * त्रि० सु+श्लिष-क्त। सुसंयुक्ते दृढमिलिते सुसङ्गते च।
सुषम * पु० सुन्दरः समः प्रा० स० षत्वम्। शोभने, समे च। पर-
मायां शोभायां स्त्री०। [जीरके, कृष्णजीरके च।
सुषवी * स्त्री० सु+सु अच् गौरा० ङीष्। कारवेल्ले, शुक्लकारवेल्ले,
सुषामन् * त्रि० सुष्ठु साम यस्य सुषामादि० षत्वम्। [illegible]
स्त्रियां वा डाप् ङीप् च।
सुषि * स्त्री० शुष-इन् पृ० शस्य सः। शुषौ छिद्रे।
सुषिर * न० शुष+किरच् पृ० शस्य सः। छिद्रे। [त्रि०।
सुषीम * पु० सुष्ठु सीमा यस्य। शीतलस्पर्शे। तद्वति, मनोज्ञे च
सुषुप्त * न० सु+स्वप-भावे क्त। "यत्र सुप्तो न कञ्चन कामं कामयते
न कञ्चन स्वप्नं पश्यति तत् सुषुप्तम्" इति श्रुत्युक्ते ज्ञानशून्या-
वस्थाभेदे। कर्त्तरि क्त। तदवस्थान्विते त्रि०।
सुषुप्ति * स्त्री० सु+स्वप-क्तिन्। पुरीतति नाड्यां मनसः सर्वविषय-
ज्ञानशून्ये वेदान्तोक्ते सर्वपदार्थशून्ये च परस्याभेदे "सुषु-
प्तिकाले सकले प्रलीने" इति श्रुतिः।
सुषुम्णा * स्त्री० सुषु इडास्थानं सम्यक् स्थायति यत्र स्था क। तन्त्रोक्ते
देहस्थनाडीभेदे इडापिङ्गलानाड्योर्मध्यस्थे पृष्ठे नाड्याम्।

सुषेण * पु० सुष्ठु सेनयति सेनां करोति अच् षत्वम्। करमर्द्दके (करमचा), वेतसे, चिकित्सके वानरभेदे च। विष्णौ। विहति स्त्री० ङीप् कन् अत इत्वम्। कणुविहति स्त्री०।

सुष्ठु * अव्य० सु+स्था-कु। अतिशये, प्रशस्ते, सत्ये च।

सुसंस्कृत ० त्रि० सु+सम्+कृ-क्त सुट् च। प्रयत्नेन घृतादिनाना-द्रव्येण पक्वे व्यञ्जनादौ। उत्तमसंस्कारयुते। [त्रि०।

सुसम्पद् * स्त्री० प्रा० स०। सौभाग्ये। सुष्ठु सम्पद् यस्य। सुसमृद्धे

सुसार * सुष्ठु सारोऽस्य। रक्तखदिरे। अतिसारयुते। [त्रि०।

सुसिकता * स्त्री० प्रा० स०। शर्करायाम्। उत्तमवालुकायां ब०

सुस्थ * त्रि० सुखेन तिष्ठति स्था-क। आरोग्येण युक्ते, सुखिनि च।

सुस्था * स्त्री० सु+स्थै-क। (सेंमारी) शमीधान्यभेदे।

सुस्नात * त्रि० सुष्ठु स्नातः सु+स्ना-क। मङ्गलद्रव्येण स्नातस्नाने।

सुहित * त्रि० सु+धा-क्त। तृप्ते, विहिते च। प्रा० स०। सुन्दरहिते न०। पुव०। अग्निजिह्वाभेदे स्त्री०। [लग्नाच्चतुर्थस्थाने च।

सुहृद् ० पु० सुष्ठु हृदयं यस्य मित्रार्थे हृदादेशः। मित्रे, ज्योतिषोक्ते

सुहृदय * त्रि० सुष्ठु हृदयं यस्य। प्रशस्तमनस्के। प्रा० स०। सुचित्ते न०।

सुहृद्बल ० न० सुहृदेव बलम्। मित्ररूपे सैन्ये।

सू ० स्त्री० सू+क्विप्। सूतौ, प्रसवे, क्षेपे, प्रेरणे च।

सूक * न० सू+प्रेरणे क्विप्-स्वार्थे कन्। उत्पले, वाणे, वाते च।

सूकर * पु० स्त्री० सू-इत्यव्यक्तं शब्दं करोति कृ अच्। वराहे, कुम्भकारे, मृगभेदे च। वराहक्रान्तायां, वराहयोषिति च स्त्री० ङीप्।

सूक्त * न० सु+वच-भावे क्त। सुन्दरकथने, एकार्थप्रतिपादके एकदैवत्ये वेदमन्त्रसमुदाये च। यथा श्रीसूक्तं पुरुषसूक्तमित्यादि, तानि च वेदे बहूनि सन्ति, तत्र महादानोपयोगीनि कतिचित् सूक्तानि तुलादानादिपद्धतौ अस्माभिरुद्धृतानि। "जप्यानि सूक्तानि तथैव चैषाम्" इति वह्निपुराणम्। शारिकायाम् स्त्री०।

सूक्ष्म * न० सूच-मन् सुगम च नेट्। कैतवे, अध्यात्मपदार्थे, परब्रह्मणि च। कतकवृक्षे पु०। अणुपरिमाणवति, अल्पे च त्रि०।

सूक्ष्मकृष्णफला * स्त्री० सूक्ष्मं कृष्णं फलं यस्याः। मत्स्यजम्बूवृक्षे। [पीलुवृक्षे।

सूक्ष्मतण्डुल * पु० सूक्ष्मस्तण्डुलोऽस्य। (धनजस) इति ख्याते। पिप्पल्यां स्त्री०।

सूक्ष्मदर्शिन् * त्रि० सूक्ष्मं पश्यति दृश-णिनि। अत्यन्ततीक्ष्णबुद्धौ कुशाग्रबुद्धौ।

सूक्ष्मपत्र * पु० सूक्ष्मं पत्रमस्य। धान्यके वनजीरके, देवसर्षपे, लघुबदरे, सुवर्णे, वनबर्बर्यां, बादरवृक्षे, मोहिन्यां च। सूक्ष्मपुष्प्यां, शतावर्यां लघुब्राह्म्यां, दुरालभायां, आकाशमांस्यां च स्त्री०। कप् अत इत्वम्। तत्रैव।

सूक्ष्मपिप्पली * स्त्री० कर्म०। वनपिप्पल्याम्।

सूक्ष्मपुष्पी * स्त्री० सूक्ष्माणि पुष्पाण्यस्याः। यवतिक्तायाम्।

सूक्ष्मफला * स्त्री० सूक्ष्मं फलमस्याः। भूम्यामलक्याम्। भूकर्बुदारे।

सूक्ष्मबदरी * स्त्री० कर्म०। भूमिबदर्य्याम्।

सूक्ष्मभूत ० न० कर्म०। वेदान्तप्रसिद्धे अपञ्चीकृते पञ्चानां भूतानां सूक्ष्मांशभेदे।

सूक्ष्ममूला ० स्त्री० सूक्ष्मं मूलमस्याः। जयन्त्याम्।

सूक्ष्मवल्ली * स्त्री० कर्म०। ताम्रवल्ल्यां, जतुकायाञ्च।

सूक्ष्मबीज * पु० सूक्ष्मं बीजमस्य। (खसखस) इति ख्या

सूक्ष्मशर्करा * स्त्री० कर्म०। वालुकायाम्।

सूक्ष्मशाख * पु० सूक्ष्मा शाखाऽस्य। जालबर्बुरे।

सूक्ष्मशालि * पु० कर्म०। अणुधान्ये श्यामाकादौ।

सूक्ष्मा * स्त्री० सूच-मन्-सुगमच् नेट् टाप्। यूथिकायां, करुण्यां, वालुकायाञ्च।

सूक्ष्मैला ० स्त्री० कर्म०। क्षुद्रैलायाम् (गुजराटी एलाच्)।

सूच * पैशुन्ये (चलद्रोहि) अद० चुरा० उभ० सक० सेट्। सूते असुसूचत् त।

सूचक * त्रि० सूचयति अन्तर्द्दृष्टिं सूच-ण्वुल्। पिशुने, द्रोहिशति, बोधके च। काके, कुक्कुरे, विडाले, पिशाचे, गणे, बुद्धे, नाटकशसिद्धे सूत्रधाराख्ये प्रधाननटे, कथके, शालौ च पु०। सोपनमाधनद्रव्ये।

सूचन ० न० सूच ल्युट्। हिंसने, ज्ञापने च। युच्। नत, दृष्टे पीडायाम्, अभिनये च स्त्री०।

सूचि(ची) * स्त्री० सूच+इन् वा ङीप्। सिद्धायां, सीवनसाधने स्वनामख्याते लौहमयपदार्थे च।

सूचिक ० त्रि० सूचिः तया सीवनं शिल्पमस्य ठन्। सूच्याजीविनि [(दरजि)।

सूचिका ० स्त्री० सूचि+स्वार्थे कन्। सूच्याम्। सूचिरिव इवार्थे कन्। हस्तिशुण्डायाम्। [सिद्धान्तालङ्कारमम्।

सूचिकाभरण * न० वैद्यकोक्ते औषधभेदे तत्त्व च सूचनशिलतया

सूचिकामुख ० पु० सूचिकेव तत्सूक्ष्मं मुखमस्य। शङ्खे। सूच्या-सूचेन०।

सूचिपत्र * न० सूच्याकारं पत्रम्। सीसकादौ प्रसिद्धे सूच्या-[कारे पत्रभेदे।

सूचित * त्रि० सूच-क्त। कथिते, बोधिते, विदिते च।

सूचिपत्रक * पु० सूचिरिव पत्रमस्य कप्। शितावरशाके। सूचिदलाद्योऽप्यत्र।

सूचिपुष्प * पु० सूच्याकारं पुष्पं पुष्पावयवः। केतकवृक्षे। सूची-[पुष्पादयोऽप्यत्र।

सूचिशालि * पु० कर्म०। सूक्ष्मधान्ये श्यामाकादौ।

सूचीपत्रा * स्त्री० सूचीव पत्रमस्याः। गण्डदूर्वायाम्।

सूचीमुख ० सूचीव मुखमस्य। हिंस्रके। हीरके स०।

सूच्यग्रस्थूलक * पु० सूच्यग्रमिव स्थूलः स्वार्थे कन्। (उरुण्ड) तृणभेदे।

सूत * पु० सू-कर्मणि प्रेरणे [illegible] क्त। सूर्ये, सूत, [illegible] ब्राह्मण्यां क्षत्रियाज्जाते [illegible]

सूततनय * पु॰ सूतस्य तनयः। भारतप्रसिद्धे राधेये कर्णे। सूतपुत्रादयोऽप्यत्र। तस्य सूतपालितत्वात्तथात्वम्।

सूति * स्त्री॰ सू-क्तिन्। प्रसवे "प्रवृत्तेः सूतिमारुतैः" इति स्मृतिः। सूयते कण्ड्यते सोमोऽत्र सू-आधारे क्तिन्। सोमाभिषवभूमौ।

सूतिका * स्त्री॰ सू-क्त कन् अत इत्वम्। नवप्रसूतायां स्त्रियाम् "उदक्यां सूतिकां विना" इति स्मृतिः।

सूतिकागार * न॰ सूतिकाया निवासयोग्यमगारम्। सूतिकागृहे। सूतिकागृहादयोऽप्यत्र।

सूतिकारोग * पु॰ ६त॰। वैद्यकोक्ते रोगभेदे।

सूतिकाषष्ठी * स्त्री॰ सूतिकागृहपूज्या षष्ठी शाक॰। सूतिकागारे प्रसवावधि षष्ठे दिवसे पूज्यायां षष्ठीदेव्याम्। [च।

सूत्थान * वि॰ सुष्ठु उत्थानम् उद्योगो यस्य। चतुरे, कर्मकुशले

सूत्या * स्त्री॰ सू-क्यप् नि॰। यज्ञाङ्गस्नानभेदे, अभिषवे, सोमरसपाने च।

सूत्याशौच * न॰ सूतिनिमित्तकमाशौचम्। जननाशौचे "शावाशौचं न कर्त्तव्यं सूत्याशौचं विधीयते" इति स्मृतिः।

सूत्र * ग्रन्थने वेष्टने च चुरा॰ उभ॰ सक॰ सेट्। सूत्रयति ते असुसूत्रत् त।

सूत्र * न॰ सूत्र-अच्। वस्त्रसाधने तन्तौ, व्यवस्थायां, नाटकसाधने प्रस्तावे, "स्वल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः" इत्युक्ते शास्त्रभेदे च।

सूत्रकण्ठ * पु॰ सूत्रं कण्ठे यस्य। विप्रे, कपोते, खञ्जरीटे च।

सूत्रधार * पु॰ सूत्रं नाट्यसाधनं धारयति धृ-णिच्-अण्। नाट्याङ्गसाधनयुक्ते नाटकप्रस्तावके प्रधाननटे "सूत्रधारेण सहिताः संलापं यत्र कुर्वते" इति दशरूपकम्, इन्द्रे, शिल्पिभेदे च (छुतार)।

सूत्रपुष्प * पु॰ सूत्रसाधनं पुष्पं यस्य। कार्पासे। [(दरजी)।

सूत्रभिद् * पु॰ सूत्रं भिनत्ति सूच्या, भिद-क्विप्। सूच्याजीवे

सूत्रयन्त्र * न॰ सूत्रवानं यन्त्रम्। (तांत) सूत्रवानयन्त्रे।

सूत्रला * स्त्री॰ सूत्रं लाति ला-क। तर्क्व्याम् (टेको)।

सूद * पु॰ सूदयति [illegible] सूद-अच्। सूपकारके, व्यञ्जनभेदे सूपे, [illegible], [illegible], [illegible], [illegible] च।

सूदन * न॰ सूद-ल्युट्। हिंसने, [illegible], अङ्गीकारे च।

सूदशाला * स्त्री॰ ६त॰। पाकशालायाम्।

सूना * [illegible] [illegible]। [illegible], [illegible] च। [illegible]। [illegible] [illegible]।

सूना * स्त्री॰ [illegible] [illegible]। प्राणिवधस्थाने "पञ्च सूना गृहस्थस्य" इति मनुः, [illegible], [illegible], [illegible] च।

सूनु * पु॰ सू-नु। पुत्रे, अनुजे, सूर्य्ये, अर्कवृक्षे च। [illegible] [illegible] [illegible], [illegible] च। [illegible] त्रि॰।

सूप * पु॰ सुखेन पीयते सु+पा-घञर्थे क पृ॰। (दालि) व्यञ्जनभेदे। सुवपति सु+वप-क पृ॰। सूपकारे पाचके। आधारभाण्डे। करणे क। सायके।

सूपकार * त्रि॰ सूपं करोति कृ-अण्। पाचके।

सूपधूपन * न॰ सूपो धूप्यतेऽनेन। हिङ्गौ, सूपपाके हि [illegible] सूपदानं पाकशास्त्रे प्रसिद्धम्। [पर्ण्य

सूपपर्णी * स्त्री॰ सूपसाधनस्य मुद्गस्येव पर्णमस्याः ङीप्।

सूपश्रेष्ठ * पु॰ सूपेषु तत्साधनेषु श्रेष्ठः। मुद्गे।

सूपाङ्ग * न॰ सूपस्य तत्संस्कारकमङ्गमुपकरणम्। हिङ्गौ।

सूर * पु॰ सवति प्रेरयति कर्मणि लोकान् सू-क्रन्। सूर्य्ये, अर्कवृक्षे च। सूर-क। पण्डिते।

सूरण * पु॰ सूर-ल्युट्। शूरणे (ओल)।

सूरत * त्रि॰ सु+रम-क्त पृ॰। दयालौ।

सूरसूत * पु॰ ६त॰। अरुणे गरुडाग्रजे।

सूरि * पु॰ सू-क्रिन्। सूर्य्ये, अर्कवृक्षे, यादवभेदे, पण्डिते "सदा पश्यन्ति सूरयः" इति श्रुतिः। राजसर्षपे स्त्री॰ ङीप्।

सूरिन् * पु॰ सूर-णिनि। पण्डिते।

सूर्च(र्च्य) * अनादरे भ्वादि॰ पर॰ सक॰ सेट्। सूर्च(र्च्य)ति [illegible] र्चीत्(र्च्यीत्) अषोपदेशत्वान्न षः।

सूर्च(र्च्य)ण * न॰ सूर्च(र्च्य)-ल्युट्। अनादरे।

सूर्प * पु॰ न॰। शूर्प-पृ॰ शस्य सः। शूर्पशब्दार्थे। [शुभमिन्द्रा

सूर्पणखा * स्त्री॰ शूर्पे इव नखा अस्याः पृ॰ शस्य सः षत्वम्। रा

सूर्मि * स्त्री॰ शूर्मि+पृ॰ शस्य सः। शूर्मिशब्दार्थे वा ङीप्।

सूर्य्य * पु॰ सृ-क्यप् नि॰ दीर्घश्च। दिवाकरे, अर्कवृक्षे, दानवभेदे च। [कोत् यवाग्निसम्भवस्तस्मिन् मणौ च (आतसी

सूर्य्यकान्त * पु॰ सूर्य्यस्य कान्तः प्रियः। स्फटिकमणौ, सूर्य्यसम

सूर्य्यग्रहण * न॰ सूर्य्यस्य राहुणा तदाक्रान्तभूच्छायया ग्रहणम् आक्रमणम्। ज्योतिषोक्ते राहुप्रविष्टभूमिच्छायया सूर्य्यमण्डलस्य आक्रमणरूपे ग्रासे।

सूर्य्यज * पु॰ सूर्य्यात् जायते जन-ड। शनिग्रहे, यमे, वैवस्वतमनौ, सुग्रीववानरे च। सूर्य्यपुत्रादयोऽप्यत्र। यमुनायां स्त्री॰

सूर्य्यभक्त * पु॰ सूर्य्यस्य भक्त इव प्रियः। बन्धूकवृक्षे।

सूर्य्यमणि * पु॰ सूर्य्यप्रियः मणिः। सूर्य्यकान्तमणौ।

सूर्य्यलता * स्त्री॰ सूर्य्यभक्ता लता। आदित्यभक्तायाम्।

सूर्य्यवल्ली * स्त्री॰ सूर्य्यानुगामिनी वल्ली। अर्कपुष्पिकायाम्।

सूर्य्यसारथि * पु॰ ६त॰। अरुणे गरुडाग्रजे। सूर्य्यसूतादयोऽप्यत्र।

सूर्य्या * स्त्री॰ सूर्य्यस्य भार्य्या टाप्। असूर्य्या संज्ञायाम् सूर्य्यनाशिकायाम्। मानुषी कुन्त्याम् ङीप्। सूरीत्यपि च।

सूर्य्यालोक * पु॰ ६त॰। आतपे रौद्रे।

सूर्य्यावर्त्त * पु॰ सूर्य्यं दर्शनेन आ+वृत-अच्। (हुड़हुडिया)

सृगालिन * पु॰ सृगालं विदः जन्मा। सृगालजातवो।
सृप्रीत * पु॰ सृप्रीत सृप्रीप्राकामेन उक्तः प्रापितः अङ-क्त।
सृप्रीतमते चारुणाश्विनौ।
सृकाल * पु॰ सृ-कालन् कस्य नैत्वम्। सृगाले।
सृक्कन् * न॰ सृज-कन् कनिन् वा कस्य नैत्वम्। ओष्ठप्रान्त-भागे "सृक्कणी परिलेढि च" इति श्रुतिः। "महासृक्काय
रोगिणो नृसिंहस्य" इति। अं शात् कस्य नास्य।
सृक्वन् * न॰ सृज-क्वनिप्। ओष्ठप्रान्तभागे। पु॰ सृक्विन् अप्यत्र।
सृग * पु॰ सृ गक् गस्य नैत्वम्। भिन्दिपालास्त्रे।
सृगाल * पु॰ स्त्री॰ सृ गालन् गस्य नैत्वम्। जम्बुके, दैत्यभेदे च।
सृज * विसर्गे त्यागे दिवा॰ आत्म॰ अनिट् सक॰। सृज्यते असृष्ट।
अनुदात्तोपदेशः। [मनसो विषयम् अस्य सदा सृज्यति।
सृज * विसर्गे तुदा॰ पर॰ सक॰ अनिट्। सृजति असाक्षीत्
सृजकाचार * पु॰ सृजति वर्णमिति सृज-क्त ततः स्वार्थे कन् कर्म॰।
सर्जिकाक्षारे। [सर्जीऽपि।
सृणि * पु॰ सृ-निक्। अङ्कुशे। चन्द्रमासे स्त्री॰ तत्र वा ङीप्।
सृणिकीका * स्त्री॰ सृणि +कन् ईकन् वा। लालायाम्।
सृति * स्त्री॰ सृ-भावे क्तिन्। गमने। करणे क्तिन्। पथि। [च।
सृत्वर * त्रि॰ सृ-क्वरप्। गमनकर्त्तरि। स्त्रियां ङीप् सा च मातरि
सृप * गतौ भ्वादि॰ पर॰ सक॰ अनिट्। सर्पति असृपत्। अनुप-देशत्वात् वा। [पृष इत्येव धातुः पठ्यते इत्यन्यम्।
सृभ * हिंसे भ्वादि॰ पर॰ सक॰ सेट् ऋ॰ वेट्। सर्भति असर्भीत्।
सृमर * पु॰ सृ क्मरच्। मृगभेदे। गमनशीले त्रि॰। [च।
सृष्ट * त्रि॰ सृज-क्त। निर्मिते, युक्ते, निश्चिते, बहुले, भूषिते, त्यक्ते
सृष्टि * स्त्री॰ सृज-क्तिन्। निर्माणे, त्रिगुणस्य निर्माणे, स्वभावे च।
कर्मणि क्तिन्। शकुन्तलायां "या सृष्टिः स्रष्टुराद्या" इति शकु-
न्तला। [प्रौढत्वे।
सृष्टिप्रदा * स्त्री॰ सृष्टिं सर्जनं गर्भे प्रददाति प्र+दा-क। गर्भदा-
सॄ * हिंसायां क्र्यादि॰ प्वादि॰ पर॰ सक॰ सेट्। सृणाति असारीत्
शीर्णः शीर्णिः।
सेक * पु॰ सिच् घञ्। सेचने जलादिना आर्द्रीकरणे। [पातभेदे।
सेकपात्र * न॰ सिच्यतेऽनेन सिच-करणे घञ् कर्म॰। (सेचनी)
सेक्तृ * पु॰ सिञ्चति रेतः सिच-तृच्। पत्यौ। सेचके त्रि॰।
सेचक * पु॰ सिञ्चति तोयेन पृथिवीम् सिच-ण्वुल्। मेघे। सेक-
कर्त्तरि त्रि॰।
सेचन * न॰ सिच भावे ल्युट्। जलादिना आर्द्रीकरणे। करणे
ल्युट्। सेचनी, क्षुद्रसेकपात्रा स्त्री॰ ङीप्।
सेट् * पु॰ सिट्-वन्। (तरमुज) इत्ये।
सेतु * पु॰ सि-तुन्। जलादेर्बन्धनधारणार्थे (बाँध) (जाङ्गाल) पदार्थे,
मर्यादायां, तन्नामके प्रवालकेऽस्त्रे च। स्वार्थे कन्। वरुणवृक्षे।
सेतुबन्ध * पु॰ ६त॰। लङ्कागमनार्थं श्रीरामेण नलद्वारा कारिते
समुद्रोपरि पाषाणबन्धे, सेतोर्देवानामबन्धे च।
सेतुभेदिन् * पु॰ सेतुं भिनत्ति भिद-णिनि। दन्तीवृक्षे।
सेतुवृक्ष * पु॰ सेतुनामको वृक्षः। वरुणवृक्षे, सेतूपरिस्थे वृक्षे च।
सेत्र * न॰ सि-ष्ट्रन्। (बेडि) निगडे।
सेना * स्त्री॰ सि-न, सह इनेन प्रभुणा वा सैन्ये। [च।
सेनाङ्ग * न॰ ६त॰। हस्त्यश्वरथपदातिसंघाते, सेनाया उपकरणे
सेनाचर * पु॰ सेनायां चरति चर-ट। सेनानुगामिनि "सेनाचरी-
भवदिभानन" इति नैषधम्। [सेनापतौ च।
सेनानी * पु॰ सेनां देवसेनां वा नयति नी-क्विप्। कार्त्तिकेये,
सेनापति * पु॰ ६त॰। कार्त्तिकेये, सेनाध्यक्षे च।
सेनामुख * न॰ ६त॰। सैन्याग्रे, हस्त्यश्वादिसंख्याविशेषे "हस्तिनः
त्रयः रथाः त्रयः अश्वा नव पदातयः पञ्चदश एतत् समुदाये"।
सेनारक्ष * पु॰ सेनां रक्षति रक्ष अण्। सेनारक्षाकारके यामिके
सैन्ये।
सेफ * पु॰ सि-फ। मेढ्रे पुंसोऽसाधारणचिह्ने।
सेमन्ती * स्त्री॰ सिम-भिक् गौरा॰ ङीप्। (सेवती) पुष्पवृक्षे।
सेलु * पु॰ सि+लु। श्लेष्मातकवृक्षे।
सेवक * पु॰ सीव्यति सिव ण्वुल्। सीवनकर्त्तरि (दरजी)। सेव
ण्वुल्। भृत्ये, दासे, अनुचरे च त्रि॰।
सेवधि * पु॰ सेवं सेवनं दधाति धा-कि। पद्मभवे निधौ।
सेवन * न॰ सिव-सेव-वा ल्युट्। सूच्यादिना वस्त्रादेर्योजने वान-
यने, उपभोगे, वन्दने, पूजने, भजने च। सीव्यतेऽनया ल्युट्।
सूच्यां स्त्री॰ ङीप्।
सेवा * स्त्री॰ सेव-अ। भजने, आराधने, उपभोगे, चाटूपचये च।
सेवित * त्रि॰ सेव-क्त। पूजिते, आराधिते, आश्रिते, उपभुक्ते च।
सेव्य * न॰ सेव-ण्यत्। वीरणमूले। अश्वत्थे, हिज्जलवृक्षे च पु॰।
सेवार्हे त्रि॰। वन्दाकृक्षे स्त्री॰।
सैंहली * स्त्री॰ सिंहले देशे भवा अण् ङीप्। सिंहपिप्पल्याम्।
सैंहिकेय * पु॰ सिंहिकायां भवः ढक्। राहौ। तस्याः अपत्यम् ढक्।
सिंहिकेयोऽप्यत्र। [सिकतामयप्रदेशे त्रि॰।
सैकत * न॰ सिकताः सन्त्यत्र अण्। वालुकामये नद्यादितटे।
सैकतेष्ट * न॰ सैकतं स्थानमिष्टं यस्य। आर्द्रके। सैकतप्रिये त्रि॰।
सैतवाहिनी * स्त्री॰ सितायाः शर्करायाः अयम् अण् सैतो मधुर-
रसस्तं वहति वह-णिनि। बाहुदाख्ये नद्याम्।
सैद्धान्तिक * पु॰ सिद्धान्तं वेत्ति ठञ्। सिद्धान्ताभिज्ञे।
सैनापत्य * न॰ सेनापतेर्भावः कर्म॰ वा ष्यञ्। सेनापतिधर्मे, तत्-
कर्मणि च "सैनापत्यमुपेत्य यः" इति कुमारः।
सैनिक * पु॰ सेनायां समवैति ठञ्। सिन्धिते हस्त्यश्वादौ।
सैन्धव * न॰ सिन्धुनदीसमीपे देशे भवम् अण्। लवणभेदे। सिन्धो-
रदूरभवः अण्। घोटके, तत्र सिन्धुदेशसमुद्भवो दिव्याश्व-
देशोद्भवत्वात् तथात्वम्।

सैन्धवघन * पु॰ सैन्धवमिव घनः। सैन्धवशिलावत् समन्तादेकरसात्मके चिदानन्दस्वरूपे परमेश्वरे।

सैन्य * पु॰ सेनाया समवैति ञ्य। मिलिते हस्त्यश्वादौ। सेनानां संघः ष्यञ्। सेनासमुदाये न॰।

सैरन्ध्री * स्त्री॰ सीरं हलं धरति धृ-मूल॰ क मुम् च सीरन्ध्रः कृषकस्तस्येदं शिल्पकर्म अण् तदस्यास्ति अच् गौरा॰ ङीप्। परगृहस्थे स्ववशे शिल्पकारिणि स्त्रीभेदे पृ॰ सैरिन्ध्रीत्यप्यत्र।

सैरिभ * पु॰ सीरे हले तद्वहने इभ इव शूरः शक॰ ततः स्वार्थेऽण्। महिषे, "सेवे सैरिभमर्दिनीमिह महालक्ष्मीम्" इति महालक्ष्मीध्यानम्। [भिषण्याम्। स्वार्थे कन् तत्रैव।

सैरीय * पु॰ सीरस्येदम् अण् सैरं हलाकारमर्हति छण्।

सैरेय * स्त्री॰ सैरं सीराकारमर्हति ढञ्। भिषण्याम्। ढकञ्। सैरेयकोऽप्यत्र।

सैवाल * न॰ सेवार्थे मीनादीनामुपभोगाय अलति पर्याप्नोति अच् सेवालः ततः स्वार्थे अण्। शैवाले। स्वार्थे कन्। तत्रैव।

सोढ * त्रि॰ सह-क्त वा इडभावः। क्षान्ते तितिक्षिते। कर्त्तरि क्त। शीतादिसहनशीले त्रि॰।

सोढृ * त्रि॰ सह-तृच् वा इडभावः। सहनकर्त्तरि क्षमाशीले।

सोत्कण्ठ * त्रि॰ सह उत्कण्ठया। औत्सुक्यान्विते अभीष्टलाभेच्छया विलम्बासहिष्णुत्वयुक्ते।

सोत्प्रास * न॰ उद्+प्र-अस-घञ् सह उत्प्रासेन। सोल्लुण्ठने, अन्यार्थकस्य वाक्यस्य अन्यार्थकत्वकल्पनया तदुत्तरार्थके वाक्ये, प्रियवाक्ये च। सशब्दहास्ये पु॰।

सोदय * न॰ त्रि॰ सह उदयेन प्रादुर्भावेन वृद्ध्या वा। प्रादुर्भूते, वृद्धियुक्ते, लाभयुक्ते (सुदयुक्ते) च। [स्त्री॰।

सोदर * पु॰ सह समानमुदरं यस्य। एकोदरभवे भ्रातरि। भगिन्यां

सोदर्य * पु॰ सह समाने उदरे शयितः यत् सादेशः। एकोदरजाते भ्रातरि। भगिन्यां स्त्री॰।

सोनह * न॰ सु-विच् सवं नह्यते नह घञर्थे क। लशुने।

सोन्माद * पु॰ सह उन्मादेन। उन्मत्ते, उन्मादिनि।

सोपप्लव * पु॰ सह उपप्लवेन। समाक्रान्तभूच्छायेन राहुणा योगक्षयोपप्लवादिते चन्द्रे, तथाभूतचन्द्रच्छायायोगयुक्ते सूर्ये च।

सोपाधि(क) * त्रि॰ सह उपाधिना वा कप् सादेशः। उपाधियुक्ते प्रतिज्ञाभासयाद्युत्तरदानादौ।

सोपान * न॰ अप-दन-भावे घञ् सह विद्यमानः उपानः उपरि गतिर्येन। आरोहणसाधने काष्ठादिनिर्मिते (पैठा) प्रभृती पदार्थे।

सोमाघ्न * पु॰ सोमाघ्न+ड॰। (गजना) वृक्षे।

सोम * पु॰ सु मन्। चन्द्रे, कर्पूरे, कुवेरे, यमे, वायौ, वसुभेदे, जले, सोमवल्लीपर्वते, तद्रसे, वानरे, दीधितौ च। सह उमया। शिवे, वानरभेदे सुग्रीवे च।

सोमगर्भ * पु॰ सोमस्य तदाख्यामृतरूपस्येव गर्भः स्थानम्। विष्णौ। [दुग्धे। चन्द्रजाते त्रि॰। बुधे पु॰।

सोमज * न॰ सोमात् तत्चरितोपधिम्यरसपानात् जायते जन-ड।

सोमतीर्थ * न॰ सोमेन तपस्तया कृतं तीर्थम्। प्रभासतीर्थे।

सोमप * पु॰ सोमं तद्रसं पिबति पा-क। यज्ञे सोमरसपानकर्त्तरि पितृगणभेदे ब॰ व॰। पा-क्विप् सोमपा अप्यत्र। [ऋषभेदे।

सोमपत्र * पु॰ सोमस्य औषधिविशेषस्येव पत्त्रमस्य। (उलुखड)

सोमपीति(थि)न् * पु॰ पीतमनेन इनि सोम पीतः पृ॰ वा तस्य यः। यज्ञे सोमरसपायिनि। पा-क्वनिप्। सोमपीवाप्यत्र।

सोमबन्धु * पु॰ सोमस्य बन्धुः, सोमो बन्धुरस्य वा। सूर्ये तद्वृद्धिकरत्वात् तस्य तथात्वम्। चन्द्रजे बुधे पु॰। कुमुदे न॰।

सोमभू * पु॰ सोम एव भूरुत्पत्तिस्थानं यस्य। बुधग्रहे, चन्द्रवंशे क्षत्रिये च। [भेदे।

सोमयाग * पु॰ सोमेन यागः। त्रिवर्षसाध्ये सोमरसपानाङ्के याग-

सोमयाजिन् * पु॰ सोमेन यजते यज-णिनि। सोमयागकर्त्तरि।

सोमयोनि * न॰ सोमः योनिरस्य। चन्दनभेदे।

सोमराजी * स्त्री सोमेन राजते राज-अच् गौरा॰ ङीप्। (सोमराज) औषधिभेदे। स्वार्थे कन्। सोमराजिकाप्यत्र। राजणिनि। सोमराजीत्यप्यत्र पु॰।

सोमलता * स्त्री॰ सू+मन् कर्म॰। स्वनामख्यातायां लतायाम्।

सोमलतिका * स्त्री॰ सोमलतेव इवार्थे कन् अत इत्वम्। गुडूच्याम्।

सोमवंश * पु॰ सोमस्य वंशः। चन्द्रवंशे, चन्द्रावधिके गोत्रपरम्पराजाते क्षत्रिये च। [खदिरे, कट्फले च।

सोमवल्क * पु॰ सोमस्येव वल्कमस्य। करञ्जे, रीठाकरञ्जे, श्वेत-

सोमवल्लिका * स्त्री॰ सोमवल्लीव इवार्थे कन्। सोमराज्याम्। स्वार्थे कन्। सोमलतायाम्।

सोमवल्ली * स्त्री॰ सोमाख्यामृताय वल्ली। गुडूच्याम्। सोमाख्या वल्ली। सोमलतायाम्, सोमराज्या, ब्राह्म्या, सुदर्शनायाञ्च।

सोमवार * पु॰ सोमस्वामिके वारः। चन्द्रस्वामिके दिने।

सोमविक्रयिन् * पु॰ सोमं विक्रीणाति वि+क्री-णिनि। सोमलतायाः तद्रसस्य वा विक्रेतरि।

सोमवृक्ष * पु॰ सोम इव वृक्ष। कट्फलवृक्षे, श्वेतखदिरे च।

सोमसार * पु॰ सोम इव शुभ्रः सारोऽस्य। श्वेतखदिरे।

सोमसिद्धान्त * पु॰ सोमं सुतवान् सु+भूते क्विप्। यज्ञार्थे कृतसोमलतानिष्पीडने।

सोमसुत्वन् * पु॰ सोमं सुतवान् भूते क्वनिप्। कृतसोमरसपाने।

सोमसुता * स्त्री॰ ६त॰। नर्मदानद्याम्। बुधे पु॰। सोमोद्भवाप्यत्र पु॰ स्त्री॰ यथायथम्।

सोमसूत्र * न॰ सोमस्य जलस्य सूत्रमिव प्रणाली। जलनिर्गमप्रणाल्याम्, शिवलिङ्गस्थगौरीपट्टस्य जलनिर्गमस्थाने च। "सोमसूत्रं न लङ्घयेत्" इति तन्त्रम्।

सौलुण्ठ * त्रि॰ सह उल्लुण्ठेन सादेशः। भूमौ पार्श्वपरिवर्त्तनादियुक्ते पयआदौ, अन्यार्थवाक्यस्य अन्यपरत्वयुक्ते वाक्ये न।

सौल्लुण्ठन * सह उल्लुण्ठनेन सादेशः। अन्यथास्थितस्य अन्यरूपेण परिवर्त्तनमस्तिते वाक्ये (स्तुतिपरस्य निन्दापरता निन्दापरस्य च स्तुतिपरता इत्येवंरूपे वाक्ये)। [सुकरस्य कर्मणि।

सौकर्य्य * न॰ सुकरस्य भावः कर्म वा ष्यञ्। अनायाससाध्यत्वे।

सौखसुप्तिक * त्रि॰ सुखसुप्तिं सुखेन शयनं पृच्छति ठञ्। प्रातःकाले सुखशयनप्रच्छके वैतालिकादौ।

सौख्य * न॰ सुखमेव चातु॰ ष्यञ्। सुखे।

सौगत * पु॰ सुगत एव अण्। सुगते बुद्धभेदे। तस्येदम्। सुगतसम्बन्धिनि त्रि॰। सुगतमताध्यायिनि। त्रि॰।

सौगन्ध * न॰ सुष्ठु गन्धोऽस्य स्वार्थे अण्। कत्तृणे रामकर्पूरे।

सौगन्धिक * न॰ सुष्ठु गन्धः सुगन्धः तस्येदम् ठञ्। स्वार्थे अण् कह्लारे। सुगन्धके पु॰।

सौगन्ध्य * न॰ सुगन्धस्य भावः ष्यञ्। सद्गन्धे। स्वार्थे ष्यञ्। सुगन्धौ।

सौचिक * पु॰ सूचीं तत्कर्मसीवनमुपजीवति ठन्। (दरजी) सौवनकारके। ["सौजन्यजन्यं यशः" इत्युद्भटः।

सौजन्य * न॰ सुजनस्य भावः ष्यञ्। सुजनतायां, सद्व्यवहारे च

सौण्डी * स्त्री॰ शुण्डाकारोऽस्त्यस्याः अण् ङीप् पृ॰ शस्य सः। गजपिप्पल्याम्।

सौत्र * पु॰ पाणिन्यादिभिः सूत्रेण कर्मविशेषाय पठितः अण्। ध्वाद्यादिदशगणीयभिन्नेषु सूत्रमात्रपठितेषु धातुषु। सूत्रं यज्ञसूत्रं मर्हति अण्। विप्रे।

सौत्रामणी * स्त्री॰ सुत्रामा इन्द्रो देवताऽस्य अण् अपूर्वत्वात् न टिलोपः णत्वम्। इष्टिभेदे तत्र हि सुरापानं विप्राणामपि विहितम् "सौत्रामण्यां सुरां पिबेत्" इति श्रुतिः।

सौदामनी * स्त्री॰ सुदामा पर्वतभेदस्तेनैका दिक् तत्प्रान्तभवत्वात् अण्। विद्युति। सा हि स्फटिकमयस्य सुदाम्नः पर्वतस्य कटेशे जाता। अप्सरोभेदे च। सुदामा ऐरावतगजस्तस्य पत्नी ङीप्। ऐरावतयोषिति। तत्र ङीपि अल्लोपेऽपि। सौदाम्न्यपि।

सौदायिक * न॰ सुदायात् बन्धुकुलात् आगतः ठञ्। "ऊढया कन्यया वापि पत्युः पितृगृहेऽथवा। भर्त्तुः सकाशात् पित्रोर्वा लब्धं सौदायिकं स्मृतम्" इति स्मृत्युक्ते स्त्रीधनभेदे "सौदायिकं धनं प्राप्य स्वातन्त्र्यं परिकीर्त्तितम्" इति स्मृतिः।

सौदास * पु॰ सुदासो अपत्यं कल्माषपादे नृपतौ।

सौध * पु॰ न॰ सुधया लेपनद्रव्येण रक्तम् अण्। राजसदनभेदे। सुधासुधावर्णमर्हति अण्। रूप्ये न॰। दुग्धपाषाणे पु॰। सुधासम्बन्धिनि त्रि॰।

सौनिक * पु॰ सूना वध्यस्थानं तदुपलक्षितमांसादि पण्यमस्य ठण्। मांसक्रयविक्रयोपजीविनि व्याधे (कसाइ)।

सौन्दर्य्य * न॰ सुन्दरस्य भावः ष्यञ्। चारुतायाम्, "अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम्। सुश्लिष्टः सन्धिबन्धः स्यात् तत् सौन्दर्य्यमुदाहृतम्" इत्युक्ते अङ्गादीनां मनोहरत्वे।

सौपर्ण * न॰ सुष्ठु पर्णानि तद्रूपमर्हति अण्। मरकतमणौ। शुण्ठ्याम्, पातालगरुडीलतायां स्त्री॰ ङीप्। तस्येदम् गरुडसम्बन्धिनि त्रि॰।

सौपर्णेय * पु॰ सुपर्ण्या विनतायाः अपत्यम् ढक्। गरुडे।

सौप्तिक * त्रि॰ सुप्तिकाले रात्रौ भवम् ठञ्। रात्रियुद्धे सुप्तानधिकृत्य कृतो ग्रन्थः ठञ्। महाभारतपर्वभेदे।

सौभ * न॰ सुष्ठु भवंत लोके भाति भा-क स्वार्थे अण्। कामचारिणि, पुरे, हरिश्चन्द्रनृपपुरे च।

सौभद्र * पु॰ सुभद्रायां भवः अण्। सुभद्रापुत्रे अभिमन्यौ।

सौभद्रेय * पु॰ सुभद्राया अपत्यम् ढक्। सुभद्रासुते अभिमन्यौ।

सौभरि * पु॰ मुनिविशेषे।

सौभागिनेय * पु॰ सुभगाया अपत्यम् ढक् इनादेशः द्विपदवृद्धिः। सुभगापुत्रे। तत्कन्यायां स्त्री॰ ङीप्।

सौभाग्य * न॰ सुभगस्य भावः ष्यञ् द्विपदवृद्धिः। पतिप्रियत्वे। स्वार्थे ष्यञ्। सिन्दूरे, टङ्कणे च। विष्कम्भादिषु मध्ये चतुर्थे योगे पु॰। [सिन्दूरतिलके।

सौभिक * पु॰ [illegible]

सौमनस्य * न॰ सुमनसो भावः ष्यञ्। [illegible]

सौमनस्यायनी * स्त्री॰ [illegible] ङीप्। [illegible]

सौमित्र(त्रि) * पु॰ सुमित्रायाः भवः अण्, बाह्वादि॰ इञ् वा।

सौम्य * त्रि॰ सोमो देवताऽस्य ट्यण्। सोमदेवताके। [illegible] स्त्रियां ङीप्। सोम इव [illegible] अण्। [illegible] प्रियदर्शने, अनुग्रे च त्रि॰। बुधे पु॰। [illegible] [illegible] [illegible] [illegible] "[illegible]" इति श्रुतिः। [illegible] [illegible] [illegible] सौम्यपार्श्विन [illegible] पु॰। [illegible] त्रि॰। [illegible] पु॰।

सौम्यकृच्छ्र * पु॰ कर्म॰। [illegible]

सौम्यगन्धी * स्त्री॰ [illegible] [illegible]।

सौम्यवत् * पु॰ [illegible]

सौर * पु॰ [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सूर्य्यदेवताके त्रि॰। [illegible]

सौरथ * पु॰ [illegible]

सौरभ * न॰ [illegible] अण्। [illegible] [illegible] [illegible] च न॰।

स्त्रियां ङीप्। [स्त्रियां टाप्।

स्तनप * पु॰ स्त्री॰ स्तनं पिबति पा-क। अतिशिशौ बालके।

स्तनभर * पु॰ ६त॰। स्थूलस्तनभारे, तदाभोगे च।

स्तनयित्नु * पु॰ स्तन+इत्नु। मेघे, मुस्तके, मेघशब्दे, विद्युति, मृत्यौ, रोगे च। [उपचा।

स्तनहस्त * पु॰ स्तनस्य हस्त इवाग्रम्। स्तनाग्रे। स्तनशिखादयोऽप्यत्र।

स्तनान्तर * न॰ स्तनयोरन्तरम्। हृदि, स्तनमध्ये च।

स्तनाभोग * पु॰ ६त॰। स्तनस्य परिपूर्णतायाम्।

स्तनित * न॰ स्तन+भावे क्त। मेघशब्दे, सुरतादिशब्दे च। कर्त्तरि क्त। शब्दिते त्रि॰। [स्तभ्नाति अस्तभत् अस्तम्भीत्।

स्तन्भ * रोधने क्र्या॰ स्वा॰ पर॰ सक॰ सेट् क्त्वा वेट्। स्तभ्नाति

स्तन्य * न॰ स्तने भवम् यत्। स्तनजाते दुग्धे।

स्तब्धरोमन् * पु॰ स्तब्धानि रोमाणि यस्य। शूकरे। जड़ीकृतरोमणि त्रि॰ स्त्रियां वा डाप् ङीप् च।

स्तभ * स्तम्भने जड़ीभावे अक॰ तत्करणे, क्रियानिरोधे च सक॰ भ्वादि॰ आत्म॰ सेट् इदित्। स्तम्भते अस्तम्भिष्ट।

स्तम्ब * पु॰ स्था+अम्बच् किच्च पृ॰। काण्डरहिते भिण्डिकादौ तृणे, तृणादि-गुच्छे च।

स्तम्बकरि * पु॰ स्तम्बं गुच्छं करोति,कृ-इन्। व्रीहिधान्ये।

स्तम्बघन * पु॰ स्तम्बो हन्यतेऽनेन हन+क नि॰। स्तम्बोन्मूलके खनित्रादौ।

स्तम्बघ्न * त्रि॰ स्तम्बो हन्यतेऽनेन हन-करणे क। स्तम्बोन्मूलके खनित्रादौ। [रमते अच् अलुक् स॰। गजे।

स्तम्बेरम * पु॰ स्त्री॰ स्तम्बे तृणादीनां काण्डे गुच्छे गुल्मे वा

स्तम्भ * पु॰ स्तम्भ-घञ्। (थाम) स्थूणायाम्। भावे घञ्। जड़ीभावे पु॰।

स्तम्भन * न॰ स्तम्भ-जड़ीकरणे भावे ल्युट्। जड़ीकरणे। करणे ल्युट्। तन्त्रोक्ते जड़ीकरणसाधने प्रयोगभेदे। [स्मरे बाणभेदे।

स्तम्भन * पु॰ स्तम्भयति स्तम्भ-णिच् ल्यु। कन्दर्पस्य पञ्चसु बाणेषु

स्तव * पु॰ स्तु+अप्। प्रशंसायाम्, स्तुतौ च।

स्तवक * पु॰ स्तु+वुन्, स्था-अच्क पृ॰ वा। गुच्छे। ग्रन्थपरिच्छेदे।

स्तावक * त्रि॰ स्तु ण्वुल्। स्तुतिकारके।

स्तिमित * न॰ स्तिम भावे क्त। आर्द्रतायाम्, अचाञ्चल्ये च। कर्त्तरि क्त। अचञ्चले, आर्द्रे च त्रि॰।

स्तुत * पु॰ स्तु-क्त। स्तवे।

स्तुति * स्त्री॰ स्तु-क्तिन्। स्तवे।

स्तुतिपाठक * पु॰ स्तुतिं पठति पठ-ण्वुल्। राजादेर्बन्दिनि।

स्तुम्भ * रोधने सौ॰ क्र्या॰ स्वा॰ कार्य्यनाशे पर॰ सक॰ सेट् क्त्वावेट्। स्तुभ्नोति स्तुभ्नाति। अस्तुम्भीत्।

स्तुभ * पु॰ स्त्री॰ स्तुभ-मूल॰ क। छागे। स्त्रियां ङीप्।

स्तूप २ उच्छ्राये अद॰ चुरा॰ उभ॰ सक॰ सेट् स्तूपयति ते अतुस्तू-

पत्। ऋदुपधत्वात् न षोपदेशः।

स्तूप * पु॰ स्तु-पक् पृषो॰ स्तूप-अच् वा। राशीकृते मृत्तिकादौ। महाते, वले, निष्प्रयोजने च।

स्तृ ० विस्तारे स्वा॰ उभ॰ सक॰ अनिट्। स्तृणोति स्तृणुते अस्तार्षीत् अस्तृत अस्तरिष्ट।

स्तृ ० प्रीतौ अक॰ रक्षणे सक॰ स्वा॰ पर॰ अनिट्। स्तृणोति अस्तार्षीत्। अषोपदेशत्वात् षः। [दिशत्वात् षः।

स्तृह * गतौ भ्वादि॰ पर॰ सक॰ सेट्। स्तृहति अस्तर्हीत्। अषोप-

स्तृह * वधे तुदा॰ पर॰ सक॰ वेट्। स्तृहति अस्तर्हीत् अस्तृक्षत्। अषोपदेशत्वात् षः।

स्तृ * आच्छादने क्र्यादि॰ स्वादि॰ उभ॰ सक॰ सेट्। स्तृणाति स्तृणीते अस्तारीत् अस्तरिष्ट अस्तरीष्ट अस्तीर्ष्ट। [स्तेनत्-त।

स्तेन * चौर्य्ये अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्तेनयति-ते अति-

स्तेन * पु॰ स्तेन-अच्। चौर्य्ये। कर्त्तरि अच्। चोरे त्रि॰।

स्तेप * क्षरे चुरा॰ उभ॰ सक॰ सेट्। स्तेपयति-ते अतिस्तिपत् च। अषोपदेशत्वात् षः।

स्तेम * पु॰ स्तिम-घञ्। आर्द्रभावे, क्लेदे च।

स्तेय * न॰ स्तेनस्य भावः यत् नलोपः। चौर्य्ये "अपर्य्ये वा परोक्षं वा रात्रौ वा यदि वा दिवा। यत् परद्रव्यहरणं स्तेयं तत् परिकीर्त्तितम्" इत्युक्ते परद्रव्यापहारे। [क्लीव।

स्तेयिन् * त्रि॰ स्तेयमस्त्यस्य इनि। परद्रव्यापहारके। चौरे

स्तैन(न्य) * न॰ स्तेनस्य भावः अण् ष्यञ् वा। चौर्य्ये परद्रव्यापहरणे। स्तेन एव स्वार्थे अण्। चोरे त्रि॰।

स्तैमित्य * न॰ स्तिमितस्य भाव ष्यञ्। जाड्ये, क्लेदे, आर्द्रतायां च।

स्तोक * पु॰ स्त्री॰ स्तुच-घञ्। चातके, अल्पविन्दौ च। अल्पे त्रि॰।

स्तोकक * पु॰ स्त्री॰ स्तोकाय अल्पाय कायति शब्दायते कै क। चातके।

स्तोत्र * न॰ स्तु ष्ट्रन्। स्तवे गुणकर्म्मादिभिः प्रशंसने।

स्तोम * पु॰ स्तुम घञ्। यज्ञाङ्गे नाना छन्दसामावृत्ति..... भेदे। यथा ज्योतिष्टोमे इत्यादि, और ....., देवने, स्तुतौ च।

स्तोम * श्लाघागुणाविष्करणे अद॰ चुरा॰ उभ॰ सक॰ सेट्। स्तोमयति ते अतुस्तोमत्-त।

स्तोम * पु॰ स्तोम अच् स्तु मन् वा। समूहे, दण्डे, यज्ञे च। मस्तके, धने, दण्डे, लौहदण्डे च न॰। वक्रे त्रि॰।

स्त्यान * न॰ स्त्यै-भावे क्त नस्य नः। घने, अमृते, मधुरे, आलस्ये, प्रतिशब्दे च। कर्त्तरि क्त। सङ्घीभूते, घनीभूते च त्रि॰।

स्त्यै * शब्दे घने भ्वादि॰ अक॰ अनिट्। स्त्यायति अस्त्यासीत्। अषोपदेशत्वात् षः।

स्त्री * स्त्री॰ स्त्यै+ड्रट्। योषिति नारीमात्रे।

स्त्रीकरी * स्त्री॰ स्त्रीं करोति इति स्त्रीकरमात्र....., नारीकिङ्करीषु।

स्त्रीधनधारिन् * पु॰ स्त्रियादिधनं धारयति धृ णिनि। स्त्रीधनग्राहके।

मृदङ्गादिवाद्यस्थाने गान्धारस्थाने च।

स्थानचञ्चला * स्त्री॰ स्थाने स्थितापि चञ्चला। वर्वरीवृक्षे। अन्य-त्रापि गणनाभावस्याप्यशासनम्।

स्थानाध्यक्ष * त्रि॰ स्थाने अध्यक्षः। स्थानरक्षके।

स्थानिक * त्रि॰ स्थानेऽधिकृतः ठक्। स्थानाध्यक्षे।

स्थानिन् * त्रि॰ स्थानमस्त्यस्य रक्षकत्वेन इनि। स्थानरक्षके। स्थानं प्रसङ्गः अस्त्यर्थे इनि। व्याकरणोक्ते आदिश्यमानवर्णादिः कार्ये इगादौ "स्थानिवदादेशोऽनल्विधौ" इति पाणिनिः।

स्थानीय * न॰ तिष्ठन्त्यस्मिन् स्था-आधारे अनीयर्। नगरे। स्थानं ग्रामसङ्घ इति स्थानस्येदम् वा छ। तत्सम्बन्धिनि देशे, स्थानसम्ब-न्धिनि च त्रि॰।

स्थाने * अव्य॰ स्था-न। योग्यत्वे, औचित्ये च "स्थाने भवानेक-नराधिपः सन्" इति रघुः। सत्ये, सादृश्ये, कारणार्थे च।

स्थापत्य * पु॰ स्थपतिरेव स्वार्थे ष्यञ्। अन्तःपुररक्षके कञ्चुकि-प्रभृतौ। तस्य भावः ष्यञ्। स्थपतिधर्मे न॰।

स्थापन * न॰ स्था-णिच्-पुक् ल्युट्। आरोपणे, समाधौ, पुंसवनाख्ये गर्भसंस्कारे च। युच्। स्थापनाप्यत्र स्त्री॰ सा च निवेशने।

स्थापनी * स्त्री॰ स्थाप्यतेऽनया स्था णिच्-पुक् करणे ल्युट् ङीप्। पाठायाम्।

स्थापित * त्रि॰ स्था-णिच्-पुक् क्त। निहिते, निवेशिते, न्यस्ते च।

स्थामन् * न॰ स्था-मनिन्। सामर्थ्ये, बले च।

स्थायिन् * त्रि॰ स्था-णिनि। स्थितिशीले, अलङ्कारोक्ते रसानुकूले रत्यादिभावे पु॰। "विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा। रत्यादी रसतामेति स्थायी भावः सचेतसाम्" इति साहित्य॰।

स्थायुक * त्रि॰ स्था-उकञ्। स्थितिशीले। एकग्रामाधिकृते पु॰।

स्थाल * न॰ स्थलति तिष्ठत्यत्रान्नम् आधारे घञ्। (थाल) भोजन-पात्रे। पाकपात्रे (हाँड़ि) स्त्री॰ गौरा॰ ङीष्।

स्थालीपाक * पु॰ स्थाल्यां पाकः। गव्यदुग्धेन स्थाल्यां कृते पाक-भेदे। तद्विधानं वाचस्पत्ये।

